काव्यमाला. १.

श्रीगोवर्धनाचार्यविरचिता

आर्यासप्तशती

अनन्तपण्डितकृतया व्यङ्ग्यार्थदीपनाटीकया समेता।

UNIVERSITY

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधिता।

सा च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीता।

१८८६

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी ठैवर्यैवाधिकारः।)

मूल्यं सार्धो रूप्यकः।

काव्यमाला।

श्रीरुद्रटप्रणीतः
काव्यालंकारः।

श्वेताम्बरजैनपण्डितनमिसाधुकृतटिप्पणसमेतः।

प्रथमोऽध्यायः।



निःशेषापि त्रिलोकी विनयपरतया संनमन्ती पुरस्ता-
यस्याङ्घ्रिद्वन्द्वसक्ताङ्गुलिविमलनखादर्शसंक्रान्तदेहा।
निर्भीतिस्थानलीना भयदभवमहारातिभीत्येव भाति
श्रीमान्नाभेयदेवः स भवतु भवतां शर्मणे कर्ममुक्तः॥
पूर्वमहामतिविरचितग्रन्थानुसारेण किमपि रचयामि।
संक्षिततरं रुद्रटकाव्यालंकारटिप्पणकम्॥

इह शास्त्रकारः शिष्टस्थितिपालनार्थमविघ्नेन शास्त्रसमाप्त्यर्थं च प्रथममेव तावद्गणनाय स्तुतिमाह—

अविरलविगलन्मदजलकपोलपालीनिलीनमधुपकुलः।
उद्भिन्नवश्मश्रुश्रेणिरिव गणाधिपो जयति॥ १॥

गणाधिपो विनायको जयति सर्वोत्कर्षेण वर्तते। कीदृशः। अविरलं घनं विगलच्च मजलं दानाम्बु ययोस्ते, अविरलविगलन्मदजले च ते कपोलपाल्यौ च प्रशस्तकपोलौ पालीशब्दस्य समासे केशपाशवत्प्रशंसार्थत्वात्। तयोर्निलीनं श्लिष्टं मधुपकुलं भ्रमरसमूहो यस्य सोऽविरलविगलन्मदजलकपोलपालीनिलीनमधुपकुलः। अत उत्प्रेक्षते—उद्भिन्ना नवा नूतना श्मश्रुश्रेणिर्मुखरोमसंस्थानविशेषो यस्य स उद्भिन्नवश्मश्रुश्रेणिः स इव॥

. श्लिष्टसंवत्सरीयैकादशशतकोद्भूतभोजदेवप्रणीते सरस्वतीकण्ठाभरणे 'किं गौरि प्रति रुषा' इत्याद्या रुद्रटश्लोकाः समुपलभ्यन्ते. तेनैकादशशतकात्प्राचीनो रुद्रटः. नमिसाधुरस्य ग्रन्थस्य टिप्पणं १०६९ मिते श्लिष्टसंवत्सरे रचितवानिति टिप्पणसमाप्तौ स्थितात् 'पञ्चविंशतिसंयुक्तैरेकादशसमाशतैः। विक्रमात्समतिक्रान्तैः प्रावृषीदं निर्मितम्॥' इत्यस्माच्छ्लोकाज्ज्ञायते. राजकीयसंग्रहान्तर्वर्तिनि तालपत्रलिखिते टिप्पणतके तु 'षट्सप्ततिसंयुक्तैरेकादशसमाशतैः' इति पाठो वर्तते. अत्र तु छन्दोभङ्गः

एवमभीष्टदेवतां स्तुत्वाधुना वाङ्मयव्यापिभवानीनमस्कृतिपुरःसरं श्रेष्ठजनप्रवृत्तयेऽभिधेयादि विवक्षुराह—

सकलजगदेकशरणं प्रणम्य चरणाम्बुजद्वयं गौर्याः ।
काव्यालंकारोऽयं ग्रन्थः क्रियते यथायुक्ति ॥ २ ॥

सकलजगदेकशरणं निखिलविश्वाद्वितीयशरण्यम्, प्रणम्य नमस्कृत्य, चरणाम्बुजद्वयमङ्घ्रिकमलयुगम्, गौर्या उमायाः, काव्यस्य कवेर्भावः कर्म वा काव्यं तस्यालंकारो भूषणं काव्यालंकारः, अयमेषः, ग्रन्थः शास्त्रम्, क्रियते विधीयते । बुद्ध्या निष्पन्नमिव ग्रन्थं गृहीत्वेदमा परामृशत्ययमिति । तत्र काव्यालंकारा वक्रोक्तिवास्तवादयोऽस्य ग्रन्थस्य प्राधान्यतोऽभिधेयाः । अभिधेयव्यपदेशेन हि शास्त्रं व्यपदिशन्ति स्म पूर्वकवयः । यथा कुमारसंभवः । काव्यमिति दोषा रसाश्चेह प्रासङ्गिकाः, न तु प्रधानाः । संबन्धस्तूपायोपेयलक्षणो नाभिवोक्तः । नहि तेन विनास्यालंकाराः प्रतिपाद्या भवन्ति । ननु दण्डि-भेधाविरुद्र-भामहादिकृतानि सन्त्येवालंकारशास्त्राणि, तत्किमर्थमिदं पुनरिति पौनरुक्त्यदोषं क्रियाविशेषणेन निरस्यन्नाह—यथायुक्तीति । शेषेष्वलंकारेषु च या या युक्तिर्यथायुक्ति, युक्तिमनतिक्रम्य वा । क्रियते । एतदुक्तं भवति—अन्यैरलंकारकारैर्न तथा युक्तियुक्तानि सकलानि वा

स्फुट एव. पाठद्वयानुसारेणापि नमिसाधुरेकादशशतकोत्तरार्धे विद्यमान आसीदिति निर्विवादमेव. नमिसाधुना च प्राचीनां रुद्रटग्रन्थवृत्तिं विलोक्य टिप्पणं व्यरचीति टिप्पणप्रारम्भस्थितया 'पूर्वमहामतिविरचितवृत्त्यनुसारेण किमपि रचयामि' इत्याद्यार्यया प्रतीयते. अत्र पूर्वमहामतिशब्दाभ्यां वृत्तिकर्तुः प्राचीनत्वमादरणीयत्वं च नमिसाधुवदति. तस्मादेकादशशतकस्थनमिसाधुतो वृत्तिकर्ता प्राचीनः, मूलग्रन्थकर्ता रुद्रटस्तु प्राचीनतर इति सिद्धम्. रुद्रटस्यैकादशशतकापेक्षया प्राचीनतरत्वम्. डाक्टरब्यूलरस्तु स्वकीय काश्मीररिपोर्ट'पुस्तके 'खिस्तसंवत्सरीयैकादशशतकोत्तरार्धे काव्यालंकारकर्ता रुद्रटो बभूव' ("In the latter half of the eleventh century falls *Rudrata*, the auther of the *Kâvyâlamkâra*."—Jour. B. B. R. A. S. Vol. XII. No. XXXIV. P. 67) इति वदति. यदि मूलग्रन्थकाररुद्रट-वृत्तिकार-टिप्पणकारास्त्रयोऽपि समकालीनाः स्वीक्रियन्ते, तदा डाक्टरब्यूलरमतं संगच्छत इति स्वयमेव पण्डिता विचारयन्तु. अस्य ग्रन्थस्य 'ग्रामतरुण्या' इत्याद्या बहवः श्लोकाः काव्यप्रकाशादिषु प्राप्यन्ते. काव्यप्रकाशस्य नवमोल्लासे साहित्यदर्पणस्य च नवमपरिच्छेदे रुद्रटमतमुपन्यस्तमस्ति. काव्यादर्शसरणिमनुकरोत्यस्य ग्रन्थस्य परिपाटी. अन्यो ग्रन्थस्तु रुद्रटकृतो न प्राप्यते. शृङ्गारतिलककर्ता तु रुद्रभट्टः, न रुद्रटः. रुद्रटस्य विशेषवर्णनं तु डाक्टरपीटर्सनस्य प्रथम'रिपोर्ट'पुस्तके (Jour. B. B. R. A. S. Vol. XVI. No. XLI. P. 14-20) द्रष्टव्यम्. १. मेधाविरुद्र इति कालिदासस्य नामान्तरमिति केचित्.

लक्ष्यानुसारीणि वा हृदयावर्जकानि वालंकारशास्त्राणि कृतानि, न तथा मया। अपि तु यथारुचीति न पौनरुक्त्यदोषावसरः॥

ग्रन्थस्याभिधेयसंबन्धौ व्याख्यायेदानीं प्रयोजनं विवक्षुराह—

अस्य हि पौर्वापर्यं पर्यालोच्याचिरेण निपुणस्य।
काव्यमलंकर्तुमलं कर्तुरुदारा मतिर्भवति॥ ३॥

अस्य काव्यालंकारस्य। हिशब्दो यस्मादर्थे। यस्मात्पौर्वापर्ये हेतुहेतुमद्भावम्। हेतुरेष ग्रन्थो हेतुमन्तोऽलंकाराः। हेतुकार्ययोश्च पौर्वापर्ये सिद्धमेव। अथवाद्यन्तोदित-ग्रन्थार्थं पर्यालोच्यावगत्य, अचिरेण शीघ्रमेव, निपुणस्य प्रवीणस्य, काव्यं कविभावम्, अलंकर्तुमलंकारसमन्वितं विधातुम्, अलमत्यर्थम्, कर्तुः कवेः, उदारा स्फारा योग्या वा, मतिर्भवति बुद्धिर्जायते। तस्मात्सप्रयोजनमिदमलंकारकरणमिति॥

अथ काव्यकरणस्यैव तावत्कि प्रयोजनमित्याह—

ज्वलदुज्ज्वलवाक्प्रसरः सरसं कुर्वन्महाकविः काव्यम्।
स्फुटमा कल्पमनल्पं प्रतनोति यशः परस्यापि॥ ४॥

ज्वलन्देदीप्यमानोऽलंकारयोगात्, उज्ज्वलो निर्मलो दोषाभावात्, वाचां गिरां प्रसरः प्रबन्धो यस्य स ज्वलदुज्ज्वलवाक्प्रसरः। सरसं सशृङ्गारादिकम्, कुर्वन्रचयन्, काव्यं कवेः कर्म, यत एवंगुणस्तत एव महाकविर्बृहत्काव्यकर्ता, स्फुटं प्रकटम्, आ कल्पं युगान्तस्थायि, अनल्पमस्तोकम्। जगद्व्यापीत्यर्थः। प्रतनोति विस्तारयति, यशः कीर्तिम्, परस्य काव्यनायकस्य संबन्धि। अपिशब्दोऽत्र विस्मये। चित्रमिदं यत्कविः स्वल्पायुरप्येवंविधं यशस्तनोति। आत्मनोऽपीति तु व्याख्याने 'स्फारस्फुरदुरुमहिमा' (१।२१) इत्याद्यनर्थकं स्यात्, गतार्थत्वात्॥

ननु देवगृहमठादिकं कारयित्वा स्वयमेव नायकः स्वयशो विस्तारयिष्यति, किं कवे-स्तदर्थं काव्यकरणेनेत्याशङ्क्याह—

तत्कारितसुरसदनप्रभृतिनि नष्टे तथाहि कालेन।
न भवेन्नामापि ततो यदि न स्युः सुकवयो राज्ञाम्॥ ५॥

तत्कारितसुरसदनप्रभृतिनीत्यत्र तच्छब्देनोत्तरत्र राज्ञामित्येतत्पदोपात्ताः काव्यना-यकाः परामृश्यन्ते। ततः काव्यनायकविधापितदेवगृहादौ कालपर्ययेण नष्टे नाशं गते सति। तथा हीति हिशब्दो यस्मादर्थे, तथाशब्द उपप्रदर्शने। न भवेन्न स्यात्, नामा-प्यभिधानमपि। आस्तां तावदन्वय इति। ततः सुरसदनादिनाशाद्धेतोः, यदि राज्ञां नायकानां सुकवयो न स्युः। तच्चरितकथाप्रबन्धकर्तार इति। राज्ञामिति काव्यनायको-पलक्षणम्॥

अथ यदि नाम राज्ञां यशस्तन्वन्ति तथापि किं तेषां यत्ते काव्यकृतां प्रवर्तन्त इत्याह—

इत्थं स्थास्नु गरीयो विमलमलं सकललोककमनीयम् ।
यो यस्य यशस्तनुते तेन कथं तस्य नोपकृतम् ॥ ६ ॥

इत्थम् 'स्फुटमा कल्पमनल्पम्' (१।४) इत्यनेन प्रकारेण, स्थास्नु स्थिरतरम्, गरीयः प्रभूतम्, दोषाभावाच्च विमलम्, अलमत्यर्थम्, सकललोककमनीयं सकलजनकान्तम्, यः कविर्यस्य राजादेर्यशस्तनुते तेन कथं तस्य नोपकृतम् । सर्वथोपकृतं भवतीत्यर्थः ॥

ननु यदि कविना परस्योपकृतम्, ततोऽपि किं तस्येत्याह—

अन्योपकारकरणं धर्माय महीयसे च भवतीति ।
अधिगतपरमार्थानामविवादो वादिनामत्र ॥ ७ ॥

गतार्थं न वरम् । चकारोऽन्योपकारकरणं चेत्यत्र योज्यः ॥

एवं धर्म एव कवेः काव्यकरणे प्रयोजनमित्यभिधायार्थकाममोक्षहेतुत्वमप्याह—

अर्थमनर्थोपशमं शमसममथवा मतं यदेवास्य ।
विरचितरुचिरसुरस्तुतिरखिलं लभते तदेव कविः ॥ ८ ॥

अर्थमिति । अर्थो धनम्, अनर्थोपशमो विपदभावः, शं सुखम्, असममसाधारणम् । इह लोके कामजं परत्र तु पारम्पर्येण मोक्षजम् । अथवा किमेभिर्बहुभिरुक्तैर्यदेवास्य कवेः संमतं तदेवाप्नोतीति । कीदृशः । विरचितसदलंकारदेवतास्तुतिः ॥

किमत्र प्रमाणमिति चेदित्याह—

नुत्वा तथाहि दुर्गां केचित्तीर्णा दुरुत्तरां विपदम् ।
अपरे रोगविमुक्तिं वरमन्ये लेभिरेऽभिमतम् ॥ ९ ॥

नुत्वेति । तथाहीत्युदाहरणोपदर्शने । दुर्गाग्रहणं देवतोपलक्षणार्थम् । तथाहि केचिन्निरुद्धोदयः शत्रुवश्यादिकां विपदं तीर्णाः । केचिद्वीरदेवादयो नीरजस्त्वं प्रापुः । अपरे शत्रुघ्नप्रभृतयोऽभिमतं वरं लब्धवन्तः । एवमन्येऽप्युदाहरणत्वेन तथाविधा ज्ञेया इति ॥

इह केचिद्विक्रमादित्यादिजनितं कविजनसत्कारं श्रुत्वाधुनातननृपेभ्यस्तथाऽवलोक्य प्रेरयेयुर्यथा नृपेभ्यः सकाशान्न किंचित्फलं तथा देवताभ्योऽपि सांप्रतं न काव्येन किंचित्फलं भविष्यतीत्याशङ्क्याह—

आसाद्यते स्म सद्यः स्तुतिभिर्येभ्योऽभिवाञ्छितं कविभिः ।
अद्यापि त एव सुरा यदि नाम नराधिपा अन्ये ॥ १० ॥

स्फुटार्थं न वरम् । यदि नामेति नामशब्दः परं शब्दार्थे । यदि परं नृपाः । अन्ये देवास्तु त एवेति ॥

काव्यकरणे प्रयोजनाप्रमेयतामाह—

कियदथवा वच्मि यतो गुरुगुणमणिसागरस्य काव्यस्य।
कः खलु निखिलं कलयत्यलमलघुयशोनिदानस्य ॥ ११ ॥

कियदिति। कियदथ वा भण्यते। यतो यथा सागरे मणीनामानन्त्यमेवं काव्ये गुणानामपीति तात्पर्यम्। खलुर्निश्चये॥

एवं प्रयोजनानन्त्ये सति कृत्यमाह—

तदिति पुरुषार्थसिद्धिं साधुविधास्यद्भिरविकलां कुशलैः।
अधिगतसकलज्ञेयैः कर्तव्यं काव्यममलमलम् ॥ १२ ॥

तदिति। तस्मात्पुरुषार्थसिद्धिं पूर्णां चिकीर्षुभिः काव्यं कर्तव्यम्। कीदृशैः। अधिगतसकलज्ञेयैः। न त्वनीदृशामपि काव्यकरणं संभवतीत्याह—अलममलम्। सनिर्मलकरणेऽन्येषामसामर्थ्यमित्यभिप्रायः॥

ननु ज्ञातसकलज्ञेयस्य तत्त्वादेव पुरुषार्थसिद्धिर्भविष्यति, किं काव्यकरणेनेत्याह—

फलमिदमेव हि विदुषां शुचिपदवाक्यप्रमाणशास्त्रेभ्यः।
यत्संस्कारो वाचां वाचश्च सुचारुकाव्यफलाः ॥ १३ ॥

फलमिति। हि यस्माज्जानतामिदमेव ज्ञानफलं यच्छुचिपदवाक्यप्रमाणशास्त्रेभ्यो विशदव्याकरणतर्कप्रबन्धेभ्यः सकाशात्संस्कारो वाचाम्। ननु वाक्संस्कारस्यापि किं फलमित्याह—वाचश्च सुचारुकाव्यफलाः। चः समुच्चये। सुन्दरकाव्यकरणमेव वाक्संस्कारस्य फलमित्यर्थः॥

यथा च काव्यं चारु भवति, यथा च चारु कर्तुं ज्ञायते तथाह—

तस्यासारनिरासात्सारग्रहणाच्च चारुणः करणे।
त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यासः ॥ १४ ॥

तस्येति। तस्य काव्यस्यासारनिरासादसमर्थोदिवक्ष्यमाणदोषत्यागात्, तथा सारग्रहणाद्गुणोक्तिवास्तवाद्यलंकारयोगाद्धेतोः, चारुत्वगुणोपेतस्य करणे त्रितयमिदं शक्तिर्व्युत्पत्त्यभ्यासलक्षणं व्याप्रियते। तस्य तत्र व्यापार इत्यर्थः। तथा च दण्डी—'नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्। अमन्दाश्चाभियोगोऽस्याः कारणं काव्यसंपदः॥' तत्र शक्त्या शब्दार्थौ मनसि संनिधीयेते। तयोः सारासारग्रहणनिरासौ व्युत्पत्त्या क्रियेते। अभ्यासेन शक्तेरुत्कर्षं आधीयत इति शक्त्यादिव्यापारः। असारनिरासात्सारग्रहणादिति च पदद्वयोपादानमुभययोगेन चारुत्वमिति ख्यापनार्थम्। तत्राप्यसारस्य प्रागुपन्यासः। तन्निरासस्य प्राधान्यख्यापनार्थः। सकलालंकारयुक्तमपि हि काव्यमेकेनापि दोषेण दुष्येत्, अलंकृतं वधूवदनं काणेनेव चक्षुषा। उक्तं च [दण्डिना]—'तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन। स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्'॥

अथ शक्तिस्वरूपमाह—

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य ।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः ॥ १५ ॥

मनसीति । असौ शक्तिर्यस्यामविक्षिप्ते चेतसि सदानेकप्रकारस्य वाक्यार्थस्य विस्फुरणम् । यस्यां चाक्लिष्टानि झगित्येवार्थप्रतिपादनसमर्थानि पदानि प्रतिभान्ति । यद्वशाद्धृदयंगमौ नानाविधौ शब्दार्थौ प्रतिभासेते सा शक्तिरित्यर्थः ॥

अस्या एव भेदानाह—

प्रतिभेत्यपरैरुदिता सहजोत्पाद्या च सा द्विधा भवति ।
पुंसा सह जातत्वादनयोस्तु ज्यायसी सहजा ॥ १६ ॥

प्रतिभेति । एषा च शक्तिरपरैर्दण्डिमुख्यैः प्रतिभेत्युक्ता । सा च द्विधा भवति । कथम् । सहजोत्पाद्या चेति । तयोश्च मध्यात्सहजा ज्यायसी प्रशस्यतरा । पुंसा सहोत्पन्नत्वात् ॥

यदि नाम पुंसा सहोत्पन्ना किमित्येतावता ज्यायसीत्याह—

स्वस्यासौ संस्कारे परमपरं मृगयते यतो हेतुम् ।
उत्पाद्या तु कथंचिद्व्युत्पत्त्या जन्यते परया ॥ १७ ॥

स्वस्येति । असौ सहजा शक्तिः स्वस्यात्मनः संस्कार उत्कर्ष एव परं केवलम् । अविद्यमानः परोऽन्यो यस्मादसावपरोऽभ्यासस्तं यतो मृगयतेऽन्वेषयति नोत्पत्तावतो ज्यायसी । उत्पत्तौ तु सहजातत्वमेव हेतुः । उत्पाद्या तु व्युत्पत्त्या परयानन्तरया कथंचिन्महता कष्टेन जन्यते । अतो न ज्यायसी सा ॥

इदानीं व्युत्पत्तिस्वरूपमाह—

छन्दोव्याकरणकलालोकस्थितिपदपदार्थविज्ञानात् ।
युक्तायुक्तविवेको व्युत्पत्तिरियं समासेन ॥ १८ ॥

छन्द इति । छन्दो जयदेवादि, व्याकरणं पाणिन्यादि, कला नृत्यादिविषयभरतादिप्रणीतशास्त्राणि, लोकाः स्वःप्रभृतयस्तेषु चराचरादिस्वरूपनियमः स्थितिः, पदानि नाममालापठिताः पर्यायशब्दाः, पदार्थस्तेषामेव पदानामभिधेयार्थविषयप्रवृत्तिनैयत्यम् । एतेषां षण्णां छन्दःप्रभृतीनां विज्ञानाद्विशिष्टावगमाद्धेतोर्यो युक्तायुक्तविवेक उचितानुचितत्वपरिज्ञानम् । यथात्रेदं छन्द उचितमनुचितं वेत्यादि सर्वेषु द्रष्टव्यम् । व्युत्पत्तिरियम् । समासेन संक्षेपेण ॥

तर्हि विस्तरेव्युत्पत्तेः किं स्वरूपमित्याह—

विस्तरतस्तु किमन्यत्तत इह वाच्यं न वाचकं लोके ।
न भवति यत्काव्याङ्गं सर्वज्ञत्वं ततोऽन्यैषा ॥ १९ ॥

विस्तरत इति । व्युत्पत्तिसंबन्धिनो विस्तारात्किमन्यद्विद्यते यदन्तःपाति न भवति । कुत इत्याह—यस्मादिह लोके न तद्वाच्यमभिधेयमस्ति, न वाचकः शब्दो विद्यते यत्काव्याङ्गं काव्योपकरणं न भवतीति । ततो हेतोरेषान्या विस्तृता व्युत्पत्तिः । ततः संक्षेपाद्वा सकाशात् । अन्येति द्वितीया । सर्वज्ञत्वमेव विस्तीर्णा व्युत्पत्तिरित्यर्थः । उक्तं च—'न स शब्दो न तद्वाच्यं न स न्यायो न सा कला। जायते यन्न काव्याङ्गमहो भारो महान्कवेः ॥' अभ्यासो लोकप्रसिद्ध एव ॥

केवलं तस्य स्थाननियमं कर्तुमाह—

अधिगतसकलज्ञेयः सुकवेः सुजनस्य संनिधौ नियतम् ।
नक्तंदिनमभ्यस्येदभियुक्तः शक्तिमान्काव्यम् ॥ २० ॥

अधिगतेति । वाक्यार्थः सुगमः । अत्राह—ननु यद्यधिगतसकलज्ञेयः शक्तिमांश्च तर्हि सुजनस्य सुकवेः संनिधानेऽभ्यस्यति । सत्यम् । छन्दोव्याकरणादिविषयलक्षणातिरिक्तमन्यदपि ज्ञेयं जानाति । यन्महाकविलक्ष्येषु दृश्यते । सुजनत्वाच्च निर्मत्सरो भूत्वा सर्वमसौ दर्शयति । तथाहि । छन्दसि पिङ्गलजयदेवाद्यनुक्तान्यपि वृत्तानि सुकविकाव्येषु दृश्यन्ते बहुशः । यथा माघस्य—'कृतसकलजगद्बोधो विधूतान्धकारोदयः क्षपितकुमुदतारकश्रीर्वियोगं नयन्कामिनः । गुरुतरगुणदर्शनादभ्युपेतालपदोषः कृती तव वरद करोतु सुप्रातमद्यामयं नायकः ॥' तथा भारवेः—'इह दुरधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम् । अमुमतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परम्' ॥' एवमन्येषामपि सन्ति । तथा व्याकरणे वर्वीष्ट-अजर्घाः-सस्ति-दर्द्रष्टि-ईट्टे-ईर्त्सति-जिह्रायकयिषति-अङ्डिषतीत्येवमादीनि पदानि न प्रयोज्यानि । काव्यस्य माधुर्यलालित्यविनाशप्रसङ्गात् । तथा क्षपि-मिलि-अर्थि-वचि-क्लीबप्रभृतयो धातवो धातुगणेषु पठिता अपि । सहेश्च परस्मैपदं प्रयोगदर्शनात्प्रयोक्तव्यम् । पदविषयं च यथा पक्ष्मशब्दोऽक्षिरोमस्वभिधानेषु पठितोऽन्यत्रापि दृश्यते । यथा माघस्य—'निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा' इति । एवमन्यदपि कलादिविषये द्रष्टव्यम् । यत्सुजनकविसंनिधानाज्ज्ञेयम् । नियतमित्यनेन सुकविसंनिधान एवाभ्यासः कार्य इति नियम इति । नक्तंदिनमित्यनेन तु यदैव पट्वी बुद्धिः क्षणश्च भवति तदैवाभ्यस्येत्, न पुनर्यथा कैश्चिदुक्तम् 'पश्चाद्रात्रे एव' । इति तु कवेः काव्यकरणेऽत्यन्तादराधानार्थम् ॥

पुनः काव्यस्य प्रयोजनान्तरमाह—

स्फारस्फुरदुरुमहिमा हिमधवलं सकललोककमनीयम् ।
कल्पान्तस्थायि यशः प्राप्नोति महाकविः काव्यात् ॥ २१ ॥

स्फार इति । स्फारो दृढः, स्फुरज्जनमनःसु प्रसरन्, अत एवोरुर्विस्तीर्णो महिमा यस्य कवेः सः । तथा यशः कीदृशम् । हिमधवलमित्यादि सुगमम् ॥

१. माघश्लोकस्य महामालिनीछन्दः, भारविश्लोकस्य च क्षमाछन्द इति टीकायां मल्लिनाथः.

ननु काव्यादेवंविधयशोभवने प्रमाणाभावाद्देवगृहादिकमेव कारयितव्यमित्येतन्निरस्यन्नष्टान्तपुरःसरं काव्यकरणे यत्नोपदेशमाह—

अमरसदनादिभ्यो भूता न कीर्तिरनश्वरी
भवति यदसौ संवृद्धापि प्रणश्यति तत्क्षये ।
तदलममलं कर्तुं काव्यं यतेत समाहितो
जगति सकले व्यासादीनां विलोक्य परं यशः ॥ २२ ॥

अमर इति । सुगमम् । तस्मात्स्थितमेतत्कवेः काव्यकरणादेव परं यशो भवतीति । उक्तं च—'यतः क्षणध्वंसिनि संभवेऽस्मिन्काव्यादृतेऽन्यत्क्षयमेति सर्वम् । अतो महद्भिर्यशसे स्थिराय प्रवर्तितः काव्यकथाप्रसङ्गः' ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः
प्रथमोऽध्यायः समाप्तः ।

द्वितीयोऽध्यायः ।

शास्त्रस्य काव्यकरणस्य च प्रयोजनमाख्यायेदानीं काव्यलक्षणं पृष्टः सन्नाह—

ननु शब्दार्थौ काव्यं शब्दस्तत्रार्थवाननेकविधः ।
वर्णानां समुदायः स च भिन्नः पञ्चधा भवति ॥ १ ॥

नन्विति । ननुशब्दः पृष्टप्रतिवचने । यथा 'अपि त्वं कटं करिष्यसि । ननु भोः करोमि' इति । शब्दश्चार्थश्च तौ काव्यमुच्यते । कवेः कर्माभिप्रायो वेति शब्दार्थः । कवेः काव्योपयोगिनोः शब्दार्थयोरन्योन्याव्यभिचारादेकतरोपादानेनैव द्वितीये लब्धे द्वितीयोपादानं काव्ये द्वयस्यापि प्राधान्यख्यापनार्थम् । अन्यथा हि शब्दार्थयोरेकतरोपादानेऽन्यतरस्यालंकारैर्विरहितमपि दोषैश्च युक्तमपि काव्यं साधु स्यात् । अद्वयोपादाने न तुल्यकक्षतया शब्दार्थौ द्वावपि काव्यत्वेनाङ्गीकृतौ भवतः । द्वयमेतत्समुदितमेव काव्यं भवतीति तात्पर्यम् । शब्दार्थौ काव्यमित्युक्तम्, अथ शब्दः किमुच्यत इत्याह—शब्दस्तत्रार्थवाननेकविधो वर्णानां समुदाय इति । तत्रेति शब्दार्थयोर्मध्यात् । शब्दोऽर्थवान् । साभिधेयोऽनेकविधोऽर्थवानिति स्वरूपविशेषणमात्रम् । यथा । कीदृशः शक्रः । वज्री सहस्राक्ष इति । न तु व्यवच्छेदकम् । काव्यलक्षणाख्यानेनैव निरर्थकस्य निरस्तत्वात् । कीदृशः शब्दः । वर्णानामकारादीनां समुदायः । वर्णानामिति बहुवचनमतन्त्रम् । तेनैकवर्णो द्विवर्णश्च शब्दः सिद्धो भवति । सोऽपि संभवतः कियद्भेद इत्याह—अनेकविधः । तद्यथा । कश्चिद्व्यक्तैकार्थावयवः । यथा घट इति । अत्र हि घकारादयो वर्णा व्यक्ताः प्रकटाः संभूय कुम्भाख्यमेकमर्थमाहुः । कश्चिद्व्यक्तपृथगर्थावयवः । यथा एति पचतीति वा । अत्र हि एकारादयो वर्णा व्यक्ताः पृथगर्थाश्च । तथापि हि धातुना क्रियाभिधीयते प्रत्ययेन तु कर्ता । कश्चिदव्यक्तैकार्थावयवः । यथा संपदादित्वात्क्विपि कृते 'अवनं ऊः' इति

पदम् । अत्र त्वकारवकारौ कृतादेशौ क्षीरनीरवदेकीभूतावक्रियामेवार्थमाहतुः । कश्चिदव्यक्तपृथगर्थावयवः । यथा 'ऐः' इति क्रियापदम् । अत्र हि आकारैकारौ पूर्ववदेकीभूतौ सकारश्च कृतादेशत्वादव्यक्तीभूतः पृथगर्थश्च । यत ऐकार आगतिक्रियामाह, सकारो युष्मदर्थे कर्तारमेकत्वं चेति । चतुर्भेदत्वादनेकविधत्वम् । यदि वा द्रव्यजातिक्रियागुणवाचित्वेन चातुर्विध्यम् । अन्ये तु वक्ष्यमाणवक्रोक्त्याद्यलंकारभेदेन शब्दस्यानेकविधत्वमाहुः । यदि पुनः पञ्चधेत्युत्तरपदापेक्षयानेकविधत्वमुच्यते तदा पञ्चधेत्यनर्थकं स्यात् । अनेनैवोक्तार्थत्वादिति । तं चैवंरूपं शब्दं केचित्पाणिन्यादयः सुप्तिङन्तरूपतया द्विभेदमाहुः, केचिच्चतुर्धेति । तद्वयं निरसितुमाह—स च भिन्नः पञ्चधा भवतीति । स चेति चकारः पुनरर्थे । ततश्चायमर्थः । स पुनर्वर्णसमुदायात्मकः शब्दो भिन्नो भेदेन व्यवस्थापितः सन्पञ्चधा भवति । ते पुनः प्रकारा नामाख्यातनिपातोपसर्गकर्मप्रवचनीयलक्षणाः पुरो भङ्क्त्यन्तरेण वक्ष्यन्ते ॥

अथ ये चतुर्धेत्याहुस्तेषामव्याप्तिदोषं प्रचिकटयिषुराह—

नामाख्यातनिपाता उपसर्गाश्चेति संमतं येषाम् ।
तत्रोक्ता न भवेयुस्तैः कर्मप्रवचनीयास्तु ॥ २ ॥

नामेति । वस्तुवाचि पदं नाम । क्रियाप्रधानं तिङन्तमाख्यातम् । नामाख्यातयोः समुच्चयाद्यर्थप्रख्यातिनिमित्तं निपाताः । क्रियाविशेषप्रतिनिबन्धनमुपसर्गाः । चशब्द एवार्थे । इति परिसमाप्तौ । एत एव चत्वारः शब्दविधा इति येषां सम्यङ् मतं तत्र तेषु नामादिषु मध्ये तैर्मेधाविरुद्रप्रभृतिभिः कर्मप्रवचनीया नोक्ता भवेयुः । तुरवधारणे भिन्नक्रमः । सप्तमीसंभावने । नैव संगृहीता भवन्तीति संभावयामि । यतस्तैरुपसर्गेष्वन्तर्भावः कृतः स चायुक्तो विद्यते । ह्युपसर्गेभ्यो नामादीनामिव कर्मप्रवचनीयानामपि पृथग्व्यापारभेदः । तथाहि—'वृक्षमभिविद्योतते विद्युत्' इति विद्युद्वृक्षयोर्लक्ष्यलक्षणसंबन्धोऽभिना द्योत्यते । उपसर्गेण तु क्रियाविशेषार्थाभिव्यक्तिरेव क्रियते । तथा कार्यभेदोऽपि तेषां दृश्यते । यथा षत्वणत्वादिकार्यस्योपसर्गा एव निमित्तम् । द्विर्वचनादिकस्य तु कर्मप्रवचनीया एवेति । तथा प्रयोगोऽप्युपसर्गाणां नियत एव प्राग्धातोः, न तु कर्मप्रवचनीयानामिति कथमिवोपसर्गेष्वेषामन्तर्भावः । नन्वव्ययानि स्वरादीनि भेदान्तरं विद्यत इति कथं षोढा न स्यादित्ययुक्तम् । स्वरादीनां स्वर्गादिमत्त्वभूतार्थवाचकत्वेन नामस्वेवान्तर्भावात् । यदि वा नैरुक्तानामव्ययानि निपात एवेति निपातग्रहणेन तेषां संग्रहः । गतयोऽप्युपसर्गा एवेति पञ्चधा शब्द इति स्थितम् ॥

ननु तथाप्युपगुराजपुरुषादयः शब्दसमुदाया व्यतिरिक्ता विद्यन्त इति कथमुक्तं पञ्चधेत्याशङ्क्याह—

नाम्नां वृत्तिर्द्वेधा भवति समासासमासभेदेन ।
वृत्तेः समासवत्यास्तत्र स्यू रीतयस्तिस्रः ॥ ३ ॥

नाम्नामिति। नाम्नां वृत्तिर्वर्तनं द्वेधा, समासवत्यसमासवती चेति। तयोरपि प्रकारविशेषमाह—तत्र तयोर्वृत्त्योर्मध्यात्समासवत्या वृत्तेस्तिस्रो रीतयो भवन्ति। रीतिर्भङ्गिर्विच्छित्तिरिति पर्यायाः॥

कास्ता इत्याह—

पाञ्चाली लाटीया गौडीया चेति नामतोऽभिहिताः।
लघुमध्यायतविरचनसमासभेदादिमास्तत्र॥ ४॥

पाञ्चालीति। चः समुच्चये। इति समाप्तौ। एतास्तिस्र एवेत्यर्थः। नामत इत्यनेन नाममात्रमेतदिति कथयति। न पुनः पञ्चालेषु भवा इत्यादि व्युत्पत्तितः। अतिप्रसङ्गात्। तर्हि केन विशेषेण तिस्र इत्याह—लघुमध्येत्यादि। लघु मध्यमायतं च विरचनं यस्य समासस्य तद्भेदात्। तत्रैत्युत्तरत्र योज्यते॥

अनियमे प्राप्ते नियमार्थमाह—

द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत्।
शब्दाः समासवन्तो भवति यथाशक्ति गौडीया॥ ५॥

द्वित्रिपदेति। द्वे त्रीणि वा यस्यां पदानि। द्वित्रिग्रहणस्योपलक्षणार्थत्वाच्चत्वारि वा समासवन्ति यस्यां सा पाञ्चाली रीतिर्भवति। यस्यां तु द्वितयादारभ्य पञ्च सप्त वा यावत्सा लाटीया। पञ्च सप्त वेति मतद्वयं तदुभयं संगृहीतम्। यस्यां तु समासवन्तः शब्दा अष्टभ्य आरभ्य यथाशक्ति भवन्ति। यावतः कर्तुं शक्नोति तावन्त इत्यर्थः। सा गौडीया॥

नन्वाख्यातेऽपि पचति प्रपचतीति वृत्तिद्वैविध्यं कथं न स्यादित्यत आह—

आख्यातान्युपसर्गैः संसृज्यन्ते कदाचिदर्थाय।
वृत्तेरसमासाया वैदर्भी रीतिरेकैव॥ ६॥

आख्यातानीति। आख्यातानि तिङन्तक्रियापदान्युपसर्गैः सार्धं संसृज्यन्ते, न तु समस्यन्ते। सुप्सुपेत्यधिकारात्। किं नित्यमेव। न। कदाचित्क्वचिदपि। किमर्थमित्याह—अर्थाय। यत उक्तम्—'धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्तते। तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा॥' तत्र बाधते यथा—प्रहरति प्रतिष्ठते इत्यादि। अनुवर्तते यथा—प्रहन्ति अभिहन्ति। विशिनष्टि यथा—प्रपचतीत्यादि। इदानीमसमासाया वृत्ते रीतिमाह—वृत्तेरसमासायाः समासरहितपदवृत्तेर्वैदर्भी नाम रीतिरेकैव। एताश्च रीतयो नालंकाराः, किं तर्हि शब्दाश्रया गुणा इति॥

पञ्चविधस्यापि शब्दस्य यत्रोपयोगस्तस्येदानीं वाक्यस्य लक्षणं कर्तुमाह—

वाक्यं तत्राभिमतं परस्परं सव्यपेक्षवृत्तीनाम्।
समुदायः शब्दानामेकपराणामनाकाङ्क्षः॥ ७॥

वाक्यमिति। तत्रेति पञ्चविधशब्दमध्यादन्यतरद्द्वित्रादिभेदानां समुदायो वाक्यम्।

नतु नामादीनां पञ्चानामेव युगपत्सद्भावे । कीदृशां शब्दानाम् । परस्परं सव्यपेक्षवृत्तीनाम् । अन्योन्यं साकाङ्क्षव्यापाराणाम् । न त्वेवंविधानां यथा—'आषाढी कार्तिकी मासी वचा हिङ्गु हरीतकी । पश्यतैतन्महच्चित्रमायुर्मर्माणि कृन्तति ॥' तथा एकपराणाम् । एकं वस्तु साधयितुमुद्यतानामित्यर्थः । तथा अनाकाङ्क्षः । साकाङ्क्षश्चेन्न भवति । यस्मादाख्यातं विना शब्दसमुदायः साकाङ्क्षो भवति । तमपेक्षत इत्यर्थः ॥

अथ वाक्यगुणानाह—

अन्यूनाधिकवाचकसुक्रमपुष्टार्थशब्दचारुपदम् ।
क्षोदक्षममक्षूणं[1] सुमतिर्वाक्यं प्रयुञ्जीत ॥ ८ ॥

अन्यूनेति । शब्दाश्च ते चारुपदानि च शोभनपदानि च शब्दचारुपदानि, ऊनानि चाधिकानि चोनाधिकानि, नितरामूनाधिकानि न्यूनाधिकानि, न तथा अन्यूनाधिकानि, तानि च तानि वाचकानि च, सुक्रमाणि च पुष्टार्थानि च शब्दचारुपदानि यत्र वाक्ये तत्तथाभूतं वाक्यं प्रयुञ्जीतेति संबन्धः । तत्रान्यूनग्रहणाद्यत्र कंचिच्छब्दं विना दुष्टार्थप्रतीतिर्विवक्षितार्थाप्रतिपत्तिरेव वा भवति तन्न्यूनपदं वाक्यं निरस्तम् । यथा—'संपदो जलतरङ्गविलोला यौवनं त्रिचतुराणि दिनानि । शारदाभ्रमिव पेलवमायुः किं धनैः परहितानि कुरुध्वम् ॥' अत्र हि धनशब्दादनन्तरं यावत्कार्यशब्दो न प्रयुक्तस्तावत् 'धनैः किमिति परहितानि कुरुध्वम्' । मा कुरुत इति दुष्टोऽर्थः प्रतीयते । विवक्षितार्थाप्रतीतिर्यथा—'सीसपडिच्छियगंगं पणमिय संझं नमह नाहं' । अत्र 'संझं'शब्दादनन्तरं 'ततः'शब्दमन्तरेण न ज्ञायते किं 'प्रणम्य संध्यां ततो नाथं नमत,' आहोस्वित् 'प्रणतसंध्यं नाथं नमत' इति । निश्शब्दग्रहणाद्यत्र विनापि पदमसाधारणविशेषणोपादानात्तदनुरूपकारकप्रयोगाद्वा विवक्षितपदार्थप्रतीतिस्तदूनमात्रं साध्वेव । यथा—'स वः पायात्कला चान्द्री यस्य मूर्धि विराजते । गौरीनखाग्रधारेव भग्नरूढा कचग्रहे ॥' अत्र ह्यसाधारणविशेषणैः शंभुरित्यनुक्तमपि लभ्यते । अनुरूपकारकप्रयोगात्पदार्थप्रतीतिर्यथा—'यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा । यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः ॥' अत्र छेदसेकालंकारा अनुक्ता अपि परश्वाद्युपादानात्प्रतीयन्ते । नहि तेषां छेदादेरन्यो व्यापार इति । अधिकग्रहणाद्यत्र शब्दान्तरेणोक्तेऽप्यर्थे पुनस्तदर्थपदं प्रयुज्यते तन्निरस्तम् । यथा—'स्फारध्वानाम्बुदालीवलयपरिकरालोकनं प्रेमदाम्नोः' इत्यत्रालीशब्देन मेघानां बाहुल्यं प्रतिपादितमिति तदर्थौ वलयपरिकरशब्दौ निष्प्रयोजनाविति । निग्रहणादधिकमात्रं साध्वेव । यथा—'नादेन यस्य सुरशत्रुविलासिनीनां काञ्च्यो भवन्ति शिथिला जघनस्थलेषु' । अत्र हि काञ्च्यास्तत्स्थानत्वादेव जघनस्थले लब्धे तदुपादानमधिकमात्रमिति । वाचकग्रहणमवाचकनिवृत्त्यर्थम् । यथा—'लावण्यसिन्धुरपरेव हि केयमत्र यत्रो-

---

१. 'अक्षूणहेतोरिव पांसुतल्पान्' इति विक्रमाङ्कदेवचरितम् (७।४०). 'अक्षुण्णम्' इति पाठः सम्यग्भाति.

त्पलानि शशिना सह संप्रवन्ते । उन्मज्जति द्विरदकुम्भतटी च यत्र यत्रापरे कदलिकाण्डमृणालदण्डाः ॥' अत्र शशिशब्देन मुखम्, उत्पलशब्देन नेत्रे, द्विरदकुम्भाभ्यां स्तनौ, कदलिकाण्डशब्देनोरू, मृणालदण्डशब्देन बाहू कवेर्विवक्षितौ । न च शब्दास्तथा वाचकाः, न च मुखादिषु शशिप्रभृतीनि पदानि यौगिकानि रूढानि वेत्यवाचकान्येव । उपमेयपदाप्रयोगाच्च रूपकभ्रान्तिरपि नास्ति । तथा दशरथ इति वक्तव्ये पङ्क्तिरथशब्दोऽप्यवाचकः संज्ञाशब्दत्वात्तस्य । न च दशसंख्यार्थो रथार्थो वा घटते । येन यौगिकरूढपदं स्यात् । तथा आम्रदेवादिषु चूतामरादयः शब्दा अवाचका इति । सुक्रमग्रहणं दुष्टक्रमनिवृत्त्यर्थम् । यथा—'वदन्त्यपर्णामिति तां पुराविदः' इत्यत्र हि इतिशब्देन पुराविदां संबन्धः, न त्वपर्णायाः । अपर्णायास्तु संबन्धे द्वितीया न स्यात् । यथा—'क्रमादमुं नारद इत्यबोधि सः' इत्यादौ इतिशब्दो हि वस्तुस्वरूपमात्रमवस्थापयतीति । लिङ्गार्थमात्रे प्रथमैव न्याय्या न द्वितीया । क्वापि च शब्दमात्रप्रतिपादनेन प्रथमापि न भवति । यथा—'गवित्ययमाह' इति । पुष्टार्थग्रहणमपुष्टार्थनिवृत्त्यर्थम् । एकशब्दप्रतिपाद्यार्थे निरभिप्रायबहुशब्दप्रयोगादपुष्टार्थता जायते । यथा—'पातु वो गिरिजामाता द्वादशार्धार्धलोचनः । यस्य सा गिरिजा माता स च द्वादशलोचनः ॥' इत्यत्र न त्रिलोचनशब्दाद्द्वादशार्धार्धलोचन इत्यादिभिः शब्दैरधिकोऽर्थः प्रतिपाद्यत इत्यपुष्टार्थता । शब्दग्रहणमपशब्दनिरासार्थम् । अपशब्दनिरासश्च यद्यपि व्युत्पत्तिद्वारेणैव कृतस्तथापि महाकवीनामप्यपशब्दपातदर्शनात्तन्निरासादरख्यापनाय पुनरभियोगः । तथाहि पाणिनेः पातालविजये महाकाव्ये—'संध्यावधूं गृह्य करेण' इत्यत्र गृह्येति क्त्वो ल्यबादेशः । तथा तस्यैव कवेः—'गतेऽर्धरात्रे परिमन्दमन्दं गर्जन्ति यत्प्रावृषि कालमेघाः । अपश्यती वत्समिवेन्दुबिम्बं तच्छर्वरी गौरिव हुं करोति ॥' इत्यत्र 'पश्यती' इदं लुप्तनकारं पदम् । तथा च भर्तृहरेः—'इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते' इत्यत्रात्मनेपदम् । यथा वा कालिदासस्य—'अवजानासि मां यस्मादतस्ते न भविष्यति । मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥' इत्यत्र हि अनाराध्येति भिन्नकर्तृ पूर्वकाले क्त्वा । यस्मादाराधनस्य राजा कर्ता भवनस्य प्रजेति । यथा च भारवेः—'गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः ।' इत्यत्रात्मनेपदमस्वाङ्गे । एवमन्येषामपि । चारुग्रहणं वर्वर्टीत्यादिदुःश्रवशब्दनिवृत्त्यर्थमिति । यथैवमेवंगुणयुक्ते काव्ये प्रसादगुणयोगात्प्रसाद एव काव्ये गुणः समाश्रितो भवति, न तु गाम्भीर्यमित्याह—क्षोदक्षमं प्रेरणसहं वाक्यं प्रयुञ्जीत । गाम्भीर्ययुतमिति तात्पर्यार्थः । किमेतावद्गुणमेव वाक्यमित्याह—अक्षूणमिति । समस्तदोषत्यागात्समस्तगुणसंग्रहाच्च परिपूर्णम् । एतेन 'असमर्थमप्रतीतं विसंधि' इत्यादि वक्ष्यमाणदोषत्यागाच्च वाक्यस्य प्रयोगार्हत्वमावेदितम् ॥

अथ पूर्वत्रासंगृहीतवाक्यगुणप्रतिपादनार्थमाह—

रचयेत्तमेव शब्दं रचनाया यः करोति चारुत्वम् ।
सत्यपि सकलयथोदितपदगुणसाम्येऽभिधानेषु ॥ ९ ॥

रचयेदिति। तमेव शब्दं विरचयेत्। सकलैर्यथोदितैर्यथाभिहितैः पदगुणैरन्यूनादिकैः साम्ये समानत्वे सत्यपि विद्यमानेऽप्यभिधानेषु। नामसु मध्ये रचनायाः शब्दसंदर्भरूपायाश्चारुत्वं सौन्दर्यं करोति॥

किमिति चारुत्वापादकं शब्दं रचयेदित्याह—

रचनाचारुत्वे खलु शब्दगुणः संनिवेशचारुत्वम्।
तर्वाल्युर्वर्षे तरुपङ्क्तिरसंकटैव मुने॥ १०॥

रचनेति। खलुर्यस्मादर्थे। यतो रचनाचारुत्वे गुम्फसौन्दर्ये सति संनिवेशः शब्दानां संहिताख्यं नैरन्तर्योच्चारणं तस्य चारुत्वलक्षणो यः शब्दगुणः स भवतीति। तत्रोदाहरणं यथा—तरूणामाली पङ्क्तिरुर्व्यैव महत्येव हे ऋषे मुने। एतदचारुरचनं वाक्यम्। एतत्समानार्थं चारुरचनं त्विदम्। यथा—तरुपङ्क्तिरसंकटैव मुने। अत एवंविधमेव वाक्यं प्रयोज्यम्, न त्वाद्यसममिति॥

वाक्यलक्षणमभिधाय तस्य भेदप्रदर्शनार्थमाह—

वाक्यं भवति द्वेधा गद्यं छन्दोगतं च भूयोऽपि।
भाषाभेदनिमित्तः षोढा भेदोऽस्य संभवति॥ ११॥

वाक्यमिति। वाक्यं च द्विविधं भवति। कथम्। एकं गद्यमुत्कलम्। अन्यच्छन्दोगतं छन्दोनिबद्धम्। भूयस्तथापि भाषाभेदात्षोढा। भेदो वाक्यस्य संभवतीति। षोढेत्यनेन यदुक्तं कैश्चिद्यथा—'प्राकृतं संस्कृतं चैतदपभ्रंश इति त्रिधा' इत्येतन्निरस्तं भवति॥

कास्ता भाषा इत्याह—

प्राकृतसंस्कृतमागधपिशाचभाषाश्च सूरसेनी च।
षष्ठोऽत्र भूरिभेदो देशविशेषादपभ्रंशः॥ १२॥

प्राकृतेति। सकलजगज्जन्तूनां व्याकरणादिभिरनाहितसंस्कारः सहजो वचनव्यापारः प्रकृतिः। तत्र भवं सैव वा प्राकृतम्। 'आरिसवयणे सिद्धं देवाणं अद्धमागहा बाणी' इत्यादि वचनाद्वा प्राक्पूर्वं कृतं प्राकृतं बालमहिलादिसुबोधं सकलभाषानिबन्धनभूतं वचनमुच्यते। मेघनिर्मुक्तजलमिवैकस्वरूपं तदेव च देशविशेषात्संस्कारकरणाच्च समासादितविशेषं सत्संस्कृताद्युत्तरविभेदानाप्नोति। अत एव शास्त्रकृता प्राकृतमादौ निर्दिष्टं तदनु संस्कृतादीनि। पाणिन्यादि व्याकरणोदितशब्दलक्षणेन संस्क्रियमाणत्वात्संस्कृतमुच्यते। तथा प्राकृतभाषैव किंचिद्विशेषलक्षणान्मागधिका भण्यते। तच्चेदं यथा—रसयोर्लशौ मागधिकायाम्। रेफस्य लकारो दन्त्यसकारस्य तालव्यशकारः। यथा—सुरा शुला, सरसी शलशी इत्यादि। तथा एत्वमकारस्य सौ पुंसि। यथा—एसो पुरिसो, एशे पुलिशे इत्यादि। पुंस्येवैत्वम्। तेन तं शलिलं। तथा अहं वयमोर्हगे आदेशः। यथा—हगे संपत्ते, हगे संपत्ता। तथा जय्ययोर्यकारो भवति। यथा—य्याणदि-

ण्याणवादी जाणइ जाणवदेयस्य च। अवय्यं मय्यं विप्पाहले। अवय्यं मय्यं विद्याधरः। तथा क्षस्य स्कोऽनादौ। यथा—यस्के लस्कसे यक्षो राक्षस इति। अनादावित्येव। क्षयजलधरः खय्यलहले इति न स्यात्। स्कः प्रेक्षाचक्ष्योः। प्रेक्षाचक्ष्योर्धात्वोः क्षस्य स्कादेशः। यथा—पेस्कदि आचस्कदि। तथा छस्य श्चो भवति। यथा—पिश्चिले आवण्णवश्चले। तथा षष्णोः संयोगस्थयोस्तालव्यशकारः। यथा—विश्णुः विहस्पदी कास्यगालं। अर्थस्थयोः थस्य स्तादेशः। यथा—एसे अस्ते एषोऽर्थः, समुपस्तिदे समुपस्थितः। तथा ञण्यन्यव्वीनां ञो भवति। यथा—ञ। अञ्जली अञ्जलिः। ण्य। पुञ्जकम्मे पुण्यकर्मा, पुञ्जाहं पुण्याहम्। न्यस्य च अभिमञ्ञुः अभिमन्युः, कञ्ञका कन्यका। व्रजेः कृतादेशस्य वव्वइ वज्जइ। तथा तस्य दकारोऽन्ते। यथा—मालेदि होदि य्याणदि इत्यादि। अन्यल्लक्षणं ग्रन्थान्तराल्लक्ष्याच्च ज्ञेयमिति। तथा प्राकृतमेव किंचिद्विशेषात्पैशाचिकम्। यथा णनोर्नकारः पैशाचिक्याम्। यथा—आगंनूनयनमतीत्यादि। तथा दस्य वा तकारः। यथा—वतनं वदनम्। प्राकृतलक्षणापवादश्चात्र। यथा टस्य न डकारः। यथा—पाटलिपुत्रम्। तथा पस्य न वकारः। यथा—पदीपो, अनेकपो। तथा कगचजतदपयवानामनादौ यथाप्रयोगं लोपः स्वरशेषता च न कर्तव्या। यथा क्रमेण—आकाशं, मिगंको, वचनं, रजतं, वितानं, मदनो, सुपुरिसो, दयालू, लावण्णं। एवं सुक्को, सुभगो, सूची, गजो, भवति, नदी इत्यादि च। तथा खघथधफभानां हो न भवति। यथा—मुखं मेघो रथो विद्याधरो विफलं सभा इत्यादि। तथा थठयोर्ढोऽपि न भवति। यथा—पथमं, पुथुवी, मठो, कमठो। तथा ह्रस्य ओ भवति। यथा—यत्रकोसलं, रात्रा लपितं। तथा हृदये यस्य पः। हितपकं। तथा सर्वत्र तकारो न विक्रियते। एति बिंबमित्यादिषु। इत्यादयोऽन्येऽपि प्राकृतविहिता व्यञ्जनादेशा न क्रियन्ते ते च बृहत्कथादिलक्ष्यदर्शनाज्ज्ञेया इति। सूरसेन्यपि प्राकृतमाश्रैव। केवलमयं विशेषः। यथा सूरसेन्यामस्वसंयोगस्यानादौ तस्य दो भवति यथा—तदो, दीसदि, होदि, अन्तारिदमित्यादिषु। अस्वसंयोगस्येति किम्। मत्तो, पमत्तो। स्वग्रहणात् निच्चिन्दो, अन्देउरमिति स्यादेव। अनादावित्येव। तेन तदेत्यादौ न भवति। तथा र्यस्य य्यो भवति। यथा लक्ष्यम्—अय्यउत्त, पय्याकुलीकदम्हि। यथालक्ष्यमित्येव। तेन कज्जपरवसो, वज्जकज्ज इत्यादौ न भवति। इह थध्वमां धो वा भवति। इध, होध, परित्तायध। पक्षे इथ, होह, परित्तायह। तथा पूर्वस्य पुरवो वा। यथा—न कोवि अपुरवो। पक्षे अपुव्वं पदं। तथा कट्टय करिय गट्टय गच्छिय इति क्त्वान्तस्यादेशः। तथा एदु भवं, जयदु भवं, तथा आमन्त्रणे भयवं कुसुमाउह इत्यादि। तथा इनः आ वा। यथा—भो कंचुइया। अतश्च। भो वयस्सा, भो वयस्स। तथा इलोप इदानीमि। यथा—किं दाणिं करइस्सं। निलज्जो दाणिं सो जणो। तथा अन्त्यान्मादिहेतोर्णो भवति। यथा—जुतण्णिमं, किण्णिमं, एवण्णेदं। यथाप्रयोगमित्येव। तेन किं एत्थं करइस्सं। तदस्ता भवति। यथा ता जाव पविसामि। तथा एवार्थे य्येव। यथा—मम य्येव एकस्स। हंजे चेट्याह्वाने। हंजे चतुरिए। हीमा-

णहे निर्वेदविस्मययोर्निपातः । यथा—हीमाणहे पलिस्संता हगे एदिणा नियविहिणो दुव्विलसिदेण । हीमाणहे जीवंतवच्छा मे जनणी । णं निपातो नन्वर्थे । यथा—णं भणामि । अम्महे हर्षे निपातः । हीहीभो विदूषकाणां हर्षे । शेषं प्राकृतसमं द्रष्टव्यमिति । तथा प्राकृतमेवापभ्रंशः । स चान्यैरुपनागराभीरग्राम्यत्वभेदेन त्रिधोक्तस्तन्निरासार्थमुक्तं भूरिभेद इति । कुतो देशविशेषात्कारणात् । तस्य च लक्षणं लोकादेव सम्यगवसेयम् । सामान्यं तु किंचिदिदम् । यथा न लोपोऽपभ्रंशेऽधोरेफस्य । यथा—प्रखुरभ्रायरवभ्रेणेत्यादि । तद्वदभूतोऽपि क्वाप्यधो रेफः क्रियते । यथा—व्राचालउव्रचव्रचउक्राखक्रूखीत्यादि । तथोदन्तस्य दकारो भवति । यथा—गोत्रुगंजिद्रुमलिदुचारितु इत्यादि । तथा ऋतः स्थाने ऋकारो वा भवति । यथा—तृणसमुगणिजई । पक्षे तणं इत्यादि लक्ष्यादवसेयम् । व्यत्ययो बहुलं भाषालक्षणस्य । यथा—थहकारयोः सूरसेन्यां धत्वमुक्तं मागध्यामपि भवति । आभीरीभाषा अपभ्रंशस्था कथिता क्वचिन्मागध्यामपि दृश्यते । सूरसेन्यामिदानींशब्दे इलोप उक्तः शुद्धप्राकृतेऽपि भवति । तथा कगचजतदपयादीनां पैशाचिक्यां स्वरशेषत्वाभावोऽभिहितः । खघथफभादीनां हत्वाद्यभावश्च सूरसेन्यामपि भवति । इत्याद्यन्यदपि सांकर्यं महाकविलक्ष्यादवसेयमिति । विशेषतस्तु भाषालक्षणं ग्रन्थान्तरादवसेयमिति ॥

एवं शब्दलक्षणं गुणदोषांश्चाभिधायेदानीं तस्यालंकारान्विवक्षुराह—

वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा परं चित्रम् ।
शब्दस्यालंकाराः श्लेषोऽर्थस्यापि सोऽन्यस्तु ॥ १३ ॥

वक्रोक्तिरिति । तथाशब्दः समुच्चये । अन्यैरनुक्तं चित्रं शब्दालंकारमध्ये समुच्चीयते । परमुत्कृष्टमपरं वा । अन्यदित्यर्थः । शब्दस्येत्यर्थनिवृत्त्यर्थम् । अतश्च कश्चिदाशङ्कते—शब्दालंकार एवायं श्लेषो न त्वर्थालंकारोऽपीति तं प्रत्याह—श्लेषोऽर्थस्यापीति किमयमेव श्लेषोऽर्थस्यापि नेत्याह—सोऽन्यस्तु । तुरवधारणे । सोऽन्यादृक्ष एवेत्यर्थः । तेन यदन्यैरभेदेन श्लेषलक्षणमवादि तदयुक्तमित्युक्तम् । नन्वलंकारोऽलंकार्याद्भिन्नो दृष्टः । यथा पुरुषात्कटकादयः । न चैवमत्र भेदमवगच्छाम इति सत्यम् । विद्यत एव भेदः । यथा—'किं गौरि मां प्रति रुषा' इति शब्दसमुदायोऽलंकार्य एव । तस्य यद्ग्रन्थान्तरेण व्याख्यानं सोऽलंकारः । अनुप्रासेऽपि प्रथमोक्ता वर्णा आवृत्ताश्चान्योन्यमलंकुर्वते । यथा हि—द्वौ साधू संगतौ परस्परमलंकुर्वाते इति । एवं यमके श्लेषे च द्रष्टव्यम् । चित्रेऽपि स्पष्टो वर्णक्रमोऽलंकार्यो भङ्ग्यन्तरकृतस्त्वलंकार इति ॥

यथोद्देशं निर्देश इति पूर्वं वक्रोक्तिलक्षणमाह—

वक्रा तदन्यथोक्तं व्याचष्टे चान्यथा तदुत्तरदः ।
वचनं यत्पदभङ्गैर्ज्ञेया सा श्लेषवक्रोक्तिः ॥ १४ ॥

वक्रा प्रतिपादकेन तस्मादुत्तरवचनादन्यथा प्रकारान्तरेणोक्तम् । तदन्यथोक्तं व्या-

चष्टे वक्ति चान्यथा । तस्योक्तस्योत्तरं ददातीति तदुत्तरदः । यद्वचनं यद्वाक्यम् । कैर्व्याचष्टे पदभङ्गैः । पदखण्डनयेत्यर्थः । सा श्लेषवक्रोक्तिर्ज्ञेया । वक्रोक्तिस्तु द्विविधा, श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । तल्लक्षणयोश्च वैलक्षण्यान्नैकं लक्षणमस्तीति भेदेनाभिधानमुपपन्नम् ॥

तत्रोदाहरणमाह—

किं गौरि मां प्रति रुषा ननु गौरहं किं
कुप्यामि कां प्रति मयीत्यनुमानतोऽहम् ।
जानाम्यतस्त्वमनुमानत एव सत्य-
मित्थं गिरो गिरिभुवः कुटिला जयन्ति ॥ १५ ॥

किमिति । इत्थमेवं गिरो वाचो गिरिभुवो गौर्याः कुटिला वक्रा जयन्ति । कथम् । प्रणयकुपितां गौरीं शंभुरनुनयन्नाह—हे गौरि उमे, मां प्रति मामुद्दिश्य किं तव रुषा रोषेण । तत्प्रसीदेत्यर्थः । एतदुत्तरदायिनी सान्यथा पदभङ्गैराह—ननु गौरहं किम् । ननुरक्षमायाम् । किमहं गौस्त्वया कृता यद्गौरित्यामन्त्रयसे । कां च प्रति । मया कोपः कृतः यदात्थ किमिमां प्रति रुषेति । पुनः शंभुराह—अतोऽस्मादनुमानतोऽनुमानाद्वक्रवचनलक्षणान्मयि विषये त्वं कुप्यसीत्यहं जाने । भूयो भवान्याह—त्वमनुमानत एव सत्यम् । न उमा अनुमा तस्या एव नतः । अस्मदनमनं केन तव ज्ञातमित्यर्थः ॥

इदानीं काकुवक्रोक्तिलक्षणमाह—

विस्पष्टं क्रियमाणादक्लिष्टा स्वरविशेषतो भवति ।
अर्थान्तरप्रतीतिर्यत्रासौ काकुवक्रोक्तिः ॥ १६ ॥

विस्पष्टमिति । यत्र स्वरविशेषादर्थान्तरप्रतीतिर्भवति । कीदृशात् । विस्पष्टं स्फुटं क्रियमाणादुच्चार्यमाणात् । कीदृशी अर्थान्तरप्रतीतिः । अक्लिष्टा कल्पनारहिता सा काकुवक्रोक्तिः ॥

तत्रोदाहरणम्—

शल्यमपि स्खलदन्तः सोढुं शक्येत हालहलदिग्धम् ।
धीरैर्नपुनरकारणकुपितखलालीकदुर्वचनम् ॥ १७ ॥

शल्यमिति । इदमनपराधकुपितखलवचनान्यसहमानं कञ्चित्समुद्दीपयन्नाह—आस्तामन्यत् । शल्यमपि काण्डमपि स्खलदन्तर्मध्ये मर्मघट्टनां कुर्वाणं सोढुं क्षन्तुं शक्येत । कीदृशम् । हालहलेन विषेण दिग्धं लिप्तम् । धीरैर्धैर्योपेतैर्न पुनरकारणकुपितखलालीकदुर्वचनमित्येकोऽर्थः । एतदेव वाक्यं काका स्वरविशेषेण वदन्समाश्वासयति—यथा अपि शल्यं स्खलदन्तः सोढुं शक्येत धीरैर्न पुनरकारणकुपितखलालीकदुर्वचनम्[1]।

१. उदाहृतोऽयं श्लोकः सरस्वतीकण्ठाभरणे द्वितीयपरिच्छेदे भोजेन.

यदि शल्यमपि सोढुं शक्यते तदा दुर्वचनं सुसहमेवेत्यर्थः । पूर्वपक्षे खलदुर्वचनस्य दुःसहतोक्ता, द्वितीये तु सुसहतेति भेदः ॥

अथानुप्रासलक्षणमाह—

एकद्वित्रान्तरितं व्यञ्जनमविवक्षितस्वरं बहुशः ।
आवर्त्यते निरन्तरमथवा यदसावनुप्रासः ॥ १८ ॥

एकेति । यद्व्यञ्जनं बहुशो बहून्वारानावर्त्यते । कीदृशम् । एकद्वित्रान्तरितम् । एकेन द्वित्रैर्वा व्यञ्जनैरन्तरितं व्यवहितम् । किं व्यवहितानुवर्तनमेवानुप्रासो नेत्याह—निरन्तरमथवा । एतेनैकव्यञ्जनश्लोकानामनुप्रासतोक्ता । व्यञ्जनग्रहणं स्वरनिरासार्थम् । ननु स्वरनिरासे कृतेऽनुप्रासस्याभाव एव स्यात् । स्वररहितस्यावृत्तेरनुपलम्भादित्याह—अविवक्षितस्वरम् । अविवक्षिताः स्वरा यत्र तथा । स्वरचिन्ता न क्रियत इत्यर्थः । बहुशोग्रहणादेकावृत्तिमात्रेण नानुप्रासः । किं तर्हि । एकद्वित्रान्तरितमनेकवारानावर्त्यते ततोऽनुप्रास इति ॥

सामान्येनानुप्रासलक्षणमभिधायेदानीमस्यैव भेदानाह—

मधुरा प्रौढा परुषा ललिता भद्रेति वृत्तयः पञ्च ।
वर्णानां नानात्वादस्येति यथार्थनामफलाः ॥ १९ ॥

मधुरेति । अस्यानुप्रासस्य पञ्च वृत्तयो भवन्ति । कुतः । वर्णानां व्यञ्जनानां नानात्वात् । व्यञ्जनानामावृत्त्यानुप्रासस्योक्तत्वाद्वर्णानामित्युक्तेऽपि व्यञ्जनानामिति गम्यते । कास्ताः । मधुरा, प्रौढा, परुषा, ललिता, भद्रा । इतिशब्दः परिसमाप्त्यर्थः । एता एव, न त्वष्टौ तिस्रो वा । तथा ह्यष्टौ हरिणोक्ताः । यथा—'महुरं फरुसं कोमलमोजस्सिं निट्ठुरं च ललियं च । गंभीरं सामण्णं च अद्धभणिती उनायचा ॥' अत्रौजस्विनिष्ठुरगम्भीराणां न तथा भेद इत्येकतरोपादानमेव न्याय्यम् । तथा वृत्तीनां मिश्रता सामान्यम् । तच्चानुक्तमपि लभ्यते । इत्येताः पञ्चैव । तथान्यैर्ग्राम्या परुषोपनागरिकेत्युक्तं तत्र त्वसंग्रह एवेति । कीदृश्यस्ताः । यथार्थनामफलाः सान्वयनामिकाः । कुतः । इति हेत्वर्थे । सा च माधुर्यान्मधुरा, प्रौढत्वात्प्रौढा, इत्यादि हेत्वर्थो द्रष्टव्यः ॥

इदानीमासां लक्षणमाह । तत्र मधुरायास्तावत्—

निजवर्गान्त्यैर्वर्ग्याः संयुक्ता उपरि सन्ति मधुरायाम् ।
तद्युक्तश्च लकारो रणौ च ह्रस्वस्वरान्तरितौ ॥ २० ॥

निजवर्गान्त्यैरिति । मधुरायां वर्ग्याः कचटतपवर्गवर्णा उपर्युपरिष्टात्संयुक्ताः सहिताः सन्ति विद्यन्ते । कैरित्याह—निजवर्गान्त्यैर्ङञणनमैर्वैः । तथा तद्युक्तस्तेन लकारेण युक्तो लकारः । रणौ च रेफणकारौ च । कीदृशौ । ह्रस्वस्वरेणान्तरितौ व्यवहितौ भवतः । नन्वेकव्यञ्जनावृत्तिरनुप्रासलक्षणमुक्तम्, तत्किमिह बहुवर्णसद्भाव उच्यते । सत्यम् । बहुत्वाद्वर्णानां बहवोऽनुप्रासा अपीति न दोषः । एतेषां च वर्णानां युगपत्प्रयोग एव

मधुरा वृत्तिरित्येव न द्रष्टव्यम्। किं तर्हि। एतेषां वर्णानां मध्यादन्यतमवर्णैरनुप्रासे मधुरा वृत्तिरिति॥

किमविशेषेणैते प्रयोक्तव्याः। नेत्याह—

तत्र यथाशक्ति रणौ द्विस्त्रिर्वा युक्तितो लकारं च।
पञ्चभ्यो न कदाचिद्वर्ग्यानूर्ध्वं प्रयुञ्जीत॥ २१॥

तत्रेति। तत्र तेषु वर्णेषु मध्ये रणौ यथाशक्ति यावतोः प्रयोगकरणे सामर्थ्यमस्ति तावत्प्रमाणौ प्रयोक्तव्यौ। माधुर्यलाभात्। युक्तितः संयोगाल्लकारं द्विस्त्रिर्वा प्रयुञ्जीत। वर्ग्यास्तु पञ्चभ्य ऊर्ध्वमधिकं न कदाचनापि प्रयुञ्जीत। माधुर्यभङ्गप्रसङ्गादित्यर्थः॥

एतदुदाहरणमाह—

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।
यदि सल्लीलोल्लापिनि गच्छसि तत्किं त्वदीयं मे॥ २२॥
अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम्।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥ २३॥ (युग्मम्)

भणेति। अनण्विति। कश्चित्परमहिलां निजदयितगृहं व्रजन्तीं वीक्ष्याह—भण वद त्वमेव हे तरुणि यदि त्वं निजदयितमन्दिरं व्रजसि तत्किम्। त्वदीयं परिसरणं मे निष्प्रयोजनमेव रणरणकं हृदयाकुलत्वं कुरुते। आनन्दस्यन्दि हर्षकारि सुन्दरं रम्यमिन्दुवन्मुखं यस्याः सामन्त्यते। तथा सल्लीलया सुविलासेनोल्लपितुं वक्तुं शीलं यस्याः सा चामन्त्यते। तथारुणचरणे लोहितक्रमे। कीदृशं परिसरणम्। अनणु तारं रणन्ती शब्दायमाना मणिमेखला रत्नरशना यत्र तत्। तथाविरतं शिञ्जानानि रणन्ति मञ्जूनि मधुराणि मञ्जीराणि चरणाभरणानि यत्र तत्। लक्षणं तु स्वधिया सर्वमायोज्यम्॥

अथ प्रौढामाह—

अन्त्यटवर्गान्मुक्त्वा वर्ग्ययणा उपरि रेफसंयुक्ताः।
कपयुक्तश्च तकारः प्रौढायां कस्तयुक्तश्च॥ २४॥

अन्त्यटवर्गानिति। प्रौढायां वृत्तौ वर्ग्याः कादयो यकारणकारौ चोपरिभागे रेफेण संयुक्ता भवन्ति। किं कृत्वा। अन्त्यान् ङञणनमान् टवर्गे च मुक्त्वा विहाय। तथा ककारपकाराभ्यामुपरिभागे तकारश्च युक्तो भवति। चः समुच्चये। तथा ककारस्तकारेणोपरिभागे संयुक्त इत्यर्थः॥

तत्रेदमुदाहरणम्—

कार्याकार्यमनार्यैरुन्मार्गनिरर्गलैर्गलन्मतिभिः।
नाकर्ण्यते विकर्णैर्युक्तोक्तिभिरुक्तमुक्तमपि॥ २५॥

कार्याकार्यमिति। येऽनार्या अशिष्टा उन्मार्गे कुमार्गे निरर्गला निरङ्कुशाः। स्वच्छन्दा

इत्यर्थः। तथा गलन्मतयो नश्यद्बुद्धयः। विकर्णा जडास्तैरेवंभूतैः कार्याकार्ये हिताहितमुक्तमुक्तमपि पुनःपुनर्भणितमपि नाकर्ण्यते न श्रूयते। कैरुक्तमित्याह—युक्ता संगता उक्तिर्वचनं येषां तैः। पयुक्ततकारस्य तयुक्तककारस्य च स्वयमुदाहरणं द्रष्टव्यमिति। एषा वृत्तिरन्यैरोज इत्युक्ता॥

अथ परुषामाह—

सर्वैरुपरि सकारः सर्वे रेणोभयत्र संयुक्ताः।
एकत्रापि हकारः परुषायां सर्वथा च शषौ॥ २६॥

सर्वैरिति। परुषायां वृत्तौ सर्वैरुक्तैरनुक्तैश्च वर्णैरुपरिभागे सकारो युक्तो भवति। तथा सर्वे वर्णा उक्ता अनुक्ता रेफेणोभयत्रोपर्यधोभागयोः पर्यायेण युगपद्वा युक्ता भवन्ति। तथा हकारो रेफेणैकत्रोपर्यधो वा युक्तो भवति। अपिशब्दो नियमार्थः। एकत्रैवेत्यर्थः। शकारषकारौ च सर्वथा सर्वेण प्रकारेण। रेफेणान्यैर्वा युक्तावसंयुक्तौ वेति सर्वथाशब्दार्थः॥

उदाहरणम्—

लिप्सून्सर्वान्सोऽन्तर्ब्रह्मोद्यैर्ब्राह्मणैर्वृतः पश्यन्।
जिह्रेत्यगर्ह्यबर्हिःशेषशयः कोषशून्यः सन्॥ २७॥

लिप्सूनिति। कश्चिन्महासत्त्वो दत्तसर्वस्वोऽत्र वर्ण्यते। स महासत्त्वोऽन्तर्मध्ये जिह्रेति लज्जते। किं कुर्वन्। पश्यन्। कान्। लिप्सूंल्लब्धुकामान्। सर्वान्याचकानित्यर्थः। कीदृशः। वृतः परिगतः। कैः। ब्रह्मोद्यैर्वेदपारगैर्ब्राह्मणैः। पुनः कीदृक्। अगर्ह्यैः प्रशस्तो यो बर्हिर्दर्भः स एव शेषमुर्वरितं तत्र शेते यः। तन्मात्र धन इत्यर्थः। लक्षणयोजना स्वयं कार्या॥

अथास्याः सर्वत्र प्रयोगनिवारणार्थमाह—

परुषाभिधायिवचनादनुकरणाच्चापरत्र नो परुषाम्।
रचयेदथागतिः स्यात्तत्रापि ह्रादयो हेयाः॥ २८॥

परुषेति। परुषाभिधायिवचनान्निष्ठुरत्वप्रतिपादनपरगिरोऽनुकरणाच्चान्यत्र परुषां वृत्तिं न रचयेत्। अथागतिर्गत्यन्तराभावः स्यात्, तत्रापि ह्रादयो हेयास्त्याज्याः। अत्यन्तपरुषत्वात्। केवलं शषादिप्रयोगः कार्यः॥

ललिताभद्रयोर्लक्षणमाह—

ललितायां घधभरसा लघवो लश्चापरैरसंयुक्तः।
परिशिष्टा भद्रायां पृथगथवा श्रव्यसंयुक्ताः॥ २९॥

ललितायामिति। ललितायां वृत्तौ घकारधकारभकाररेफसकारा भवन्ति। ते च लघवो न गुरवः। तथा लकारश्चापरैर्वर्णैरसंयुक्तः। आत्मना तु भवेदिति। भद्रायां तु

वृत्तौ परिशिष्टा वृत्तिचतुष्टयोपयुक्तवर्णशेषाः । ते च पृथगसंयुक्ताः सन्ति । युक्ताश्चेद्भवन्ति तदा श्रव्यैः श्रुतिसुखैर्योज्या इति ॥

ललितोदाहरणमाह—

मलयानिललनोच्छलमदकलकलकण्ठकलकललामः ।
मधुरमधुविधुरमधुपो मधुरयमधुना धिनोति धराम् ॥ ३० ॥

मलयेति । अयं मधुर्वसन्तोऽधुना धरां पृथ्वीं धिनोति प्रीणयति । किंभूतः । मलयानिलस्य मलयवायोर्यल्ललनं गमनं तेनोच्छलाः सोत्कण्ठा मदकला मदमधुरा ये कलकण्ठाः कोकिलास्तेषां यः कलकलः कोलाहलस्तेन ललामः श्रेष्ठः । अथवा स एव ललामो ध्वजो यस्य स तथा । अन्यच्च मधुरेण मधुना मकरन्देन विधुरा मत्ता भ्रमरा यस्य स तथा । अत्रान्ये उदाहृताः । घभसानां स्वयमुदाहरणं द्रष्टव्यम् ॥

भद्रोदाहरणमाह—

उत्कटकरिकरटतटस्फुटपाटनसुपटुकोटिभिः कुटिलैः ।
खेलेऽपि न खलु नखरैरुल्लिखति हरिः खरैराखुम् ॥ ३१ ॥

उत्कटेति । हरिः सिंहो न खलु नैव खेलेऽपि क्रीडायामप्याखुं मूषकमुल्लिखति विदारयति नखैः । कीदृशैः । उत्कटा दृढा ये करिकरटतटा द्विपगण्डस्थलानि तेषां यत्स्फुटं प्रकटं पाटनं दारणं तत्र सुष्ठु पटुर्दक्षा कोटिरग्रं येषां तैः । तथा कुटिलैरनृजुभिः खरैस्तीक्ष्णैः । अत्र कटखाः केवलाः पूर्वत्र न प्रयुक्ता इति परिशिष्टत्वम् ॥

अथाध्यायमुपसंहरन्यथैता वृत्तयो रचिता रमणीया भवन्ति तथाह—

एताः प्रयत्नादधिगम्य सम्यगौचित्यमालोच्य तथार्थसंस्थम् ।
मिश्राः कवीन्द्रैरघनाल्पदीर्घाः कार्या मुहुश्चैव गृहीतमुक्ताः ॥ ३२ ॥

एता इति । एताः पूर्वोक्ता वृत्तयः कवीन्द्रैः सुकविभिर्मिश्राः परस्परान्तरिताः कार्याः । किं कृत्वा । अधिगम्य ज्ञात्वा प्रयत्नात्तात्पर्येण । कथम् । सम्यगविपरीतम् । तथा औचित्यमर्थसंस्थं पात्रगतमभिधेयगतं चालोच्य विमृश्य । कीदृश्यः सत्यो मिश्राः कार्या इत्याह—अघनाल्पदीर्घाः । अघना असंहताः । वृत्तौ वृत्तिर्निरन्तरलग्ना न कार्या । यदि वा अघना असंयोगाक्षराः । एवंविधा अप्यल्पदीर्घाः कर्तव्याः । एकैव वृत्तिरत्यन्तमायता न कार्या । यदि वा अल्पानि दीर्घाणि दीर्घाक्षराणि यास्विति योज्यम् । एवंविधा अप्यलंकारान्तररहिता उद्वेगकारिण्यः श्रोतॄणां स्युरित्याह—कार्या मुहुः पुनःपुनर्गृहीतमुक्ताः । मुहुर्मोक्तव्यः कर्तव्यश्चानुप्रास इति ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतो
द्वितीयोऽध्यायः समाप्तः ।

तृतीयोऽध्यायः ।

अथेदानीं यमकलक्षणमाह—

तुल्यश्रुतिक्रमाणामन्यार्थानां मिथस्तु वर्णानाम् ।
पुनरावृत्तिर्यमकं प्रायश्छन्दांसि विषयोऽस्य ॥ १ ॥

तुल्येति । पुनरावृत्तिः पुनरुच्चारणं वर्णानां तद्यमकम् । कीदृशानाम् । तुल्या समाना श्रुतिः श्रोत्रेन्द्रियोपलब्धिः क्रमश्च परिपाटी येषाम् । श्रुतिग्रहणाद्यत्र वर्णविकारेण षत्वरत्वादिना वपुष्टा वपुस्ता इत्यादौ तथा पुनर्गता पुना रौतीत्यादौ च सत्यपि क्रमे तुल्यश्रुतित्वाभावस्तत्र यमकत्वनिरासः । क्रमग्रहणात्प्रतिलोमानुलोमसर्वतोभद्रानुप्रासादीनां यमकत्वनिरासः । नहि तेषु तुल्यश्रुतिसद्भावेऽपि तुल्यक्रमो विद्यते । मिथोऽन्यार्थानां परस्परं भिन्नार्थानाम् । इत्यनेन तु पुनरुक्तस्य यमकत्वव्युदासः । यथा 'अहो रूपमहो रूपमहो मुखमहो मुखम् । अहो कान्तिरहो कान्तिस्तस्याः सारङ्गचक्षुषः ॥' इत्यादिषु । अन्यार्थानामित्यत्रार्थशब्दः प्रयोजनवाच्यपि । तेनेहापि यमकत्वं सिद्धं भवति । 'विजृम्भितोद्दामरसेन चेतसा निरूप्यमाणं किमपि प्रिया वपुः । तदेव वैराग्यवता विभागशो निरूप्यमाणं किमपि प्रियावपुः ॥' अत्र हि वर्णानामेकाभिधेयत्वेऽपि प्रयोजनं भिद्यते । अस्य च यमकस्य प्रायो बाहुल्येन च्छन्दांसि पद्यं विषयः । प्रायोग्रहणाद्गद्यमपि क्वापीति ॥

अथ परोक्तयमकभेदान्निरस्यन्स्वाभिमतयमकभेदांल्लक्षणाभिधानायाह—

पूर्वं द्विभेदमेतत्समस्तपादैकदेशजत्वेन ।
पादार्धश्लोकानामावृत्त्या सर्वजं त्रेधा ॥ २ ॥

पूर्वमिति । पूर्वं मूलभेदापेक्षया एतद्यमकं द्विभेदम् । केन भेदेनेत्याह—समस्तेत्यादि । तत्र समस्तपादश्च समस्तपादौ च समस्तपादाश्चेत्येकशेषः । तथा एकदेशश्च एकदेशौ च एकदेशाश्चेति । समस्तपादजमेकदेशजं चेति भेदद्वयम् । अत्र च वक्ष्यमाणभेदाः सर्वेऽप्यन्तर्भवन्तीति पञ्चधा चतुर्दशधा चेति परोक्तवचनव्युदास इति । तत्र समस्तपादजप्रभेदानाह—पादार्धेत्यादि । पादावृत्त्या अर्धावृत्त्या श्लोकावृत्त्या च समस्तपादजं त्रेधा भवति ॥

तत्रापि पादावृत्तेस्तावद्भेदानाह—

पर्यायेणान्येषामावृत्तानां सहादिपादेन ।
मुखसंदंशावृतयः क्रमेण यमकानि जायन्ते ॥ ३ ॥

पर्यायेणेति । पर्यायेण क्रमेणान्येषां द्वितीयादीनां त्रयाणां पादानामादिपादेन सहावृत्तानां यमकितानां मुखसंदंशावृतिसंज्ञितानि क्रमेण यथासंख्यं यमकानि त्रीणि जायन्ते भवन्तीति ॥

तदुदाहरणानि क्रमेणाह—

चक्रं दहतारं चक्रन्द हतारम् ।
खड्गेन तवाजौ राजन्नरिनारी ॥ ४ ॥

चक्रमिति । कश्चिन्नृपमाह—हे राजन्, तव संबन्धिना खड्गेनाजौ रणे आरं रिपुसक्तं चक्रं समूहमरं शीघ्रं दहता घ्नता अरिनारी रिपुस्त्री भर्तृवधेन हता ताडिता सती चक्रन्द । क्रन्दितवतीत्यर्थः । इति प्रथमद्वितीयपादयमकं मुखसंज्ञम् ॥

अथ संदंशः—

सन्नारीभरणोमायमाराध्य विधुशेखरम् ।
सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय ॥ ९ ॥

सन्नारीति । कश्चिन्नृपस्याशिषमाह—त्वं विधुशेखरं हरमाराध्य ततः पृथिवीं जय । कीदृशं हरम् । सत्यश्च ता नार्यश्च सन्नार्यः साध्व्यः स्त्रियस्ता बिभर्ति पोषयतीति सन्नारीभरणः स चासावुमायश्च । उमा पार्वती तां याति गच्छति तथा सह संयुज्यते यस्तं तथाविधम् । त्वं कीदृशः । सन्नाः खिन्ना अरीभा रिपुद्विपा यत्र स तथाविधो रणः सङ्ग्रामो यस्य स तथा । पुनः कीदृशः । अमायो मायारहितः । सात्त्विक इत्यर्थः । अत्र प्रथमतृतीयपादयोः संदंशनामकं यमकम् ॥

अथावृत्तिः—

मुदारताडी समराजिराजितः प्रवृद्धतेजाः प्रथमो धनुष्मताम् ।
भवान्बिभर्तीह नगश्च मेदिनीमुदारताडीसमराजिराजितः ॥ ६ ॥

मुदेति । कश्चिच्चाटुकृन्नृपमाह—इह भवांस्त्वं नगश्चादिश्च मेदिनीं भुवं बिभर्ति पोषयति धारयते च । कीदृशस्त्वम् । मुदा हर्षेण, न तु भयेन, आरताडी रिपुसमूहताडनशीलः । तथा समराजिरे रणाङ्गणेऽजितोऽपरिभूतः । तथा प्रवृद्धतेजाः प्रथितप्रतापः । धनुष्मतां धानुष्काणां प्रथमो मुख्यः । नगः कीदृशः । उदारा उन्नता यास्ताड्यस्ताडिवृक्षास्तासां समा अविषमा या राजयः पङ्क्तयस्ताभी राजितः शोभितः । इह चतुर्थपादयमकमावृत्तिर्नाम ॥

भेदान्तरमाह—

प्रत्येकं पश्चिमयोरावृत्त्या पादयोर्द्वितीयेन ।
यमके संजायेते गर्भः संदष्टकं चेति ॥ ७ ॥

प्रत्येकमिति । पश्चिमयोस्तृतीयचतुर्थपादयोर्द्वितीयेन पादेन सहावृत्त्या प्रत्येकं पृथग्यमके संजायेते भवतो गर्भसंदष्टकसंज्ञिते ॥

तत्र गर्भोदाहरणम्—

यो राज्यमासाद्य भवत्यचिन्तः समुद्रतारम्भरतः सदैव ।
समुद्रतारं भरतः स दैवप्रमाणमारभ्य पयस्युदास्ते ॥ ८ ॥

य इति । यः पुरुषो राज्यं प्राप्य तस्य रक्षणादौ निश्चिन्तो भवति । तथा प्राप्तं राज्यमिति समुत्सहर्षः । यो रतारम्भरतः सदैव निधुवनप्रारम्भासक्तः । सततं स तथाविधनृपो भरतो भरेण समुद्रतारं जलनिधितरणं बाहुभ्यामारभ्य पयसि जलमध्य उदारते निष्क्रियो भवति । कथम् । दैवं पुराकृतं कर्म प्रमाणं यत्र तत्तथेति क्रियाविशेषणम् । यः प्राप्तराज्यो निरुद्यमः स बाहुतरणप्रवृत्तजलधिमध्यस्थितनिष्क्रियनरतुल्य इत्यर्थः । इति मध्यमपादयोर्गर्भो नाम यमकम् ॥

अथ संदष्टकम्—

इदं च येन स्वयमात्मभोग्यतां समस्तकाञ्चीकमनीयताकुलम् ।
नितम्बबिम्बं कथमस्तु नो नृणां स मस्तकाञ्ची कमनीयताकुलम् ॥ ९ ॥

इदमिति । कश्चिद्रागी परस्त्रियं दृष्ट्वा कंचिदाह—इदं नितम्बबिम्बं श्रोणीतटं येन स्वयमसहायेनात्मभोग्यतां स्वोपकारितामनीयत नीतं स तथाविधो नृणां पुंसां मस्तकाञ्ची शिरोवर्ती कथं नो अस्तु कथं मा भूत् । सौभाग्यातिशयवानित्यर्थः । कीदृशं कटीतटम् । आकुलं प्रयोगवशाच्चटुलमत एव समस्ता सम्यक्षिप्ता काञ्ची मेखला यतस्तत्समस्तकाञ्चीकम् । तथा च कमनीयताया रामणीयकस्य कुलं स्थानम् । अत्र द्वितीयचतुर्थपादयोः संदष्टयमकम् ॥

पुनराह—

अन्योन्यं पश्चिमयोरावृत्त्या पादयोर्भवेत्पुच्छः ।
सर्वैः सार्धं युगपत्प्रथमस्य तु जायते पङ्क्तिः ॥ १० ॥

अन्योन्यमिति । पश्चिमयोस्तृतीयचतुर्थपादयोः परस्परावृत्त्या पुच्छो नाम यमकं भवेत् । तथा प्रथमपादस्य सर्वैस्त्रिभिरन्यैः सार्धं युगपत्समकालमावृत्त्या पङ्क्तिर्नाम यमकं जायते ॥

तत्र पुच्छः—

उत्तुङ्गमातङ्गकुलाकुले यो व्यजेष्ट शत्रून्समरे सदैव ।
स सारमानीय महारि चक्रं ससार मानी यमहारिचक्रम् ॥ ११ ॥

उत्तुङ्गेति । कश्चिद्वीरो वर्ण्यते—स मानी मानवान्नरोऽरिचक्रं रिपुराष्ट्रं ससार जगाम । कीदृशः । यः समरे रणे । कीदृशे । उत्तुङ्गमातङ्गकुलाकुल उन्नतद्विपसमूहसंकुले सदैव सर्वदैव व्यजेष्टाभ्यभूत्, शत्रून्रिपून् । कथम् । सारमुत्कृष्टं महारि महद्भिररैर्युक्तं चक्रमायुधविशेषमानीयादाय । कीदृशो मानी । यमं युगमं कृतान्तमपि वा हन्तीति यमहा ॥

अथ पङ्क्त्युदाहरणम्—

सभाजनेनोपरि पूरितासौ सभाजने नोपरिपूरितासौ ।
सभा जनेनोऽपरिपूरितासौ सभाजने नोऽपरिपूरितासौ ॥ १२ ॥

सभाजनेनेति।'कस्यचिद्राज्ञो मन्त्रिणः पौरैस्तिरस्कृताः।ततस्तस्य स्वसभ्याधिक्षेपजातकोपस्यापरागभयात्पौराननिगृह्णतः कान्तिभ्रंशो बभूव। ततः कस्मिंश्चिदवसरे ते सभ्या लब्धावसराः सन्तः पौराणामुपरि कटकयात्रामदुः। ततस्ते पौरा निरायुधाः सन्तः पराजिग्यिरे। ततो राजा परितुष्टः पुनरात्मीयां कान्तिमाप' इति समुदायार्थः। पादानां त्वेवं योजना। कश्चित्सभ्यः परस्य कथयति—सभाजनेन सभ्यलोकेन। मन्त्रिजनेनेत्यर्थः। उपरि पृष्ठतः, पूः पौरजनता। इता प्राप्ता, असौ। एषां पौराणां पृष्ठतः सभ्या आगता इत्यर्थः। कदा। सभां सभालोकमजति क्षिपतीति सभाजनस्तस्मिन्पौरजने। न उपरिपु शत्रुसमीपे सभ्यसंनिधाने ऊरिता असयः खड्गा येन स ऊरितासिस्तस्मिन्नेवंविधे। अनुद्यतखड्ग इत्यर्थः। अत एव जनानामिनः स्वामी जनेनो राजा, सह भासा वर्तते इति सभाः सदीप्तिकः संवृत्तः। अन्यच्च कीदृशे पौरलोके। अपरिपूरिता अनाप्यायिता असवः प्राणा यस्यासौ तथोक्तस्तस्मिन्। मृततुल्य इत्यर्थः। तथा सभाजने। 'सभाज प्रीतिदर्शने' इत्यस्मात्कर्तरि ल्युट्। नोऽस्माकं प्रीतिकरे। पूजक इत्यर्थः। अत एवास्माकं पूर्वप्रक्रान्तो जनेनः, अवतीत्यूः। रक्षिता संपन्न इत्यर्थः। कथम्। अपगता रिपवो यत्रावने तत्तथेति क्रियाविशेषणम्। किंभूते पौरलोके। इतासौ इता प्राप्ता असुः अपूजा येन तस्मिन्। अधिगतमानभ्रंश इत्यर्थः। 'परिप्रतिगतार्थौ तु सु पूजायां यदा भवेत्। अतिरतिक्रमणे चैव नोपसर्गा इमे तदा ॥' इति सर्वपादजं पङ्क्तियमकम् ॥

भूयोऽपि भेदान्तरमाह—

परिवृत्तिर्नाम भवेद्यमकं गर्भावृतिप्रयोगेण।
मुखपुच्छयोश्च योगाद्युग्मकमिति पादजं नवमम् ॥ १३ ॥

परिवृत्तिरिति। पूर्वोक्तगर्भावृतियमकयोर्युगपद्योगे परिवृत्तिर्नाम यमकं भवति। तथा पूर्वोक्तमुखपुच्छयोर्युगपद्योगाद्युग्मकं नाम समस्तपादसंभवं नवमं यमकं भवति ॥

तत्र परिवृत्त्युदाहरणम्—

मुदा रतासौ रमणी यता यां स्मरस्यदोऽलं कुरुतेन वोढा।
स्मरस्यदोऽलंकुरुतेऽनवोढामुदारतासौ रमणीयतायाम् ॥ १४ ॥

मुदेति। एतन्मानिन्याः सखी अनुनयप्रत्याख्यानभयादपसृतं नायकमाह—असौ रमणी स्त्री त्वयि रता। मुदा प्रीत्या। न तु धनलोभादिना। यता त्वदागमनार्थं प्रयत्नपरा। यां त्वं वोढा परिणेता। अदोऽलं निःसंदेहं स्मरसि ध्यायसि। कीदृशस्त्वम्। कुरुतेनोपलक्षितः। कुत्सितं रुतं कुरुतं तेन। यत्पुरुषस्य धैर्यच्युतिप्रकाशकमत एव तत्स्मरणपरिज्ञानम्। ननु यदि सा मानिनी तत्किमनुनयार्थं त्वं प्रेषितेत्याह—यस्मादुदारतासौ औचित्यमिदम्। रमणीयतायां रमणीयत्वे। यत्स्मरस्यदः कामोद्रेकोऽलंकुरुते भूषयति। अनवोढां प्रगल्भां नायिकाम् ॥

१. नवीनेषु धातुपाठसिद्धान्तकौमुद्यादिपुस्तकेषु 'सभाज प्रीतिदर्शनयोः' इति पाठो दृश्यते.

अथ युग्मकम्—

विनायमेनो नयतासुखादिना विना यमेनोनयता सुखादिना।
महाजनोऽदीयत मानसादरं महाजनोदी यतमानसादरम् ॥ १६ ॥

विनेति। कश्चित्कंचिदाह—अयं महाजनः सत्पुरुषलोकः। एनोऽपराधं विना। अनपराध इत्यर्थः। अदीयत खण्ड्यते स्म। केन। यमेन। किं कुर्वता यमेन। नयतात्मसमीपं प्रापयता। तथासुखादिना प्राणभक्षणशीलेन। ऊनयता महाजनमूनीकुर्वता। सुखादिना सौख्यभक्षकेण। अथवा सुखादिनार्थेन न्यूनयता। कीदृशो महाजनः। विना विगता नरो यस्मात्। यमं प्रति पुरुषकारविफलत्वाद्विपुरुष इत्यर्थः। बहुलत्वात्को न भवति। यद्वा विनष्टो ना पुरुषो विना। पुनः महाजनः कीदृशः। मानसान्मानमहंकारं सादयतीति मानसादिपूणाम्। यदि वा मानसाच्चित्तात्सकाशात्सुखादिना। तथा महाजनोदी महमुत्सवमजन्ति क्षिपन्ति महाजा दुर्जनास्तानुदति प्रेरयतीति महाजनोदी। कथमदीयत। अरं शीघ्रम्। तथा यतमानसादरं यतमानानां मरणप्रतिक्रियाव्यापृतानां सादं खेदं राति ददातीति च क्रियाविशेषणम्॥

एतानि नव यमकानि समस्तपादस्योक्तानि। अधुना समस्तपादयोः समस्तपादानां चाह—

अर्धं पुनरावृत्तं जनयति यमकं समुद्गकं नाम।
श्लोकस्तु महायमकं तदेवमेकादशैतानि ॥ १६ ॥

अर्धमिति। प्रथममर्धं पुनरावृत्तं भूय उच्चरितं समुद्गकाख्यं यमकं जनयति करोति। नामशब्दः संस्थाननिषेधसूचनार्थः। तेन चित्रमध्येऽस्य नान्तर्भावः। अर्धद्वयसारूप्येण च समुद्गकसादृश्यम्। श्लोकः श्लोकान्तरे यमकितो महायमकं जनयति। तुः पुनरर्थे। श्लोक इत्येकवचनं द्वयोरभ्यादीनां च यमकत्वनिवृत्त्यर्थम्। यथालक्ष्येष्वदर्शनात्। एवं मुखादारभ्य महायमकान्तान्येकादशैतानि समस्तपादयमकानि भवन्ति॥

तत्र समुद्गकम्—

ननाम लोको विदमानवेन मही न चारित्रमुदारधीरम्।
न नामलोऽकोविदमानवेनमहीनचारित्रमुदारधीरम् ॥ १७ ॥

ननामेति। लोको जनो विदं पण्डितं ननाम प्रणतः। केन। आनवेन स्तुत्या। कीदृशः। महा उत्सवाः सन्त्यस्येति मही। तथारीन्रिपूंस्त्रायतेऽरित्रा मुत्प्रमोदो यस्य स तथाभूतो न च नैव। विदं कीदृशम्। अरीणां समूह आरं तस्य धीर्बुद्धिस्तामीरयतीति तं तथाविधम्। लोकस्तु न नामलः, अपि त्वमलो निर्मल एव। विदं पुनः कीदृशम्। अकोविदा मूर्खास्तेषां मानमहंकारं वान्ति गन्धयन्ति नाशयन्तीत्यकोविदमानवास्तेषामिनः स्वामी तम्। तथाहीनचारित्रमखण्डशीलम्। उदारो विपुलाशयो धीरो धैर्योपेतः। उदारं च धीरं चेति॥

अथ महायमकं श्लोकद्वयेनाह—

स त्वारं भरतोऽवश्यमबलं विततारवम् ।
सर्वदा रणमानैषीदवानलसमस्थितः ॥ १८ ॥
सत्त्वारम्भरतो वश्यमवलम्बिततारवम् ।
सर्वदारणमानैषी दवानलसमस्थितः ॥ १९ ॥

स इति । सत्त्वेति । स पूर्वप्रक्रान्तो वित् । तुशब्दः क्रियान्तरोपन्यासार्थः । आरम्भरिसमूहम्, भरतो भरेण, अवश्यं निश्चितम्, अबलं बलरहितम्, विततारवं कृतभयार्तिविस्तीर्णनिःस्वनम्, सर्वदा सदा, रणं समरम्, आनैषीदानीतवान् । कीदृशोऽसौ । अवानगच्छन् । कम् । अलसं निष्क्रियं जनम् । तथास्थितोऽस्थीनि शत्रूणां तस्यति क्षयं नयतीत्यस्थित इति । तथा सत्त्वेनावष्टम्भेनारम्भा ये तेषु रतः सक्तः । कीदृशमारम् । वश्यं वशगतमथवावश्यमनायत्तम्, अवलम्बिततारवं समाश्रिततरुसमूहम् । वित्कीदृशः । सर्वदारणमानैषी सर्वेषां यद्दारणं विनाशनं तेन मानमिच्छतीति कृत्वा, अत एव दवानलेन दवाग्निना समं तुल्यं स्थितं स्थितिर्यस्येति । शब्दश्लेषस्यास्य च महायमकस्यायं विशेषः । तत्रैकेनैव प्रयत्नेन वाक्यद्वयमुच्चार्यते, इह तु द्वाभ्याम् ॥

एवं समस्तपादजं यमकमाख्यायेदानीमेकदेशजमाह—

पादं द्विधा त्रिधा वा विभज्य तत्रैकदेशजं कुर्यात् ।
आवर्तयेत्तमंशं तत्रान्यत्रापि वा भूयः ॥ २० ॥

पादमिति । यच्छन्दोऽर्धादिभागं ददाति तस्य पादं द्विधा त्रिधा वा विभज्य द्विखण्डं त्रिखण्डं वा कृत्वा तत्र विभक्तैकोऽश एकदेशजं यमकं कुर्यात् । कथमित्याह—आवर्तयेद्यमकयेत्तमंशं विभक्तं भागम् । तत्रैवांशे प्रथमार्धानि प्रथमार्धेषु द्वितीयार्धानि द्वितीयार्धेष्वित्यादिक्रमेण । अन्यत्र वाप्यंशान्तरैर्भूयः प्रभूतमावर्तयेत् । अंशान्तरावृत्तौ बहवो भेदा भवन्तीत्यर्थः । अपिशब्दः समुच्चये ॥

तत्रैवावृत्त्या ये भेदाः संभवन्ति तानाह—

आद्यर्धान्यन्योन्यं पादावृत्तिक्रमेण जनयन्ति ।
दश यमकान्यपरस्मिन्परिवृत्त्या तद्वदन्यानि ॥ २१ ॥

आद्यर्धानीति । श्लोकपादचतुष्टयस्य प्रथमार्धान्यपरस्मिन्पादेऽन्योन्यं परस्परं पादावृत्तिक्रमेण समस्तपादद्वयेयमकवद्दश यमकानि जनयन्ति । तद्वत्तथैव चान्त्यान्यपि दश जनयन्ति । तानि च मुखसंदंशावृतिगर्भसंदष्टकपुच्छपङ्क्तिपरिवृत्तियुग्मकसमुद्गकसंज्ञानि ॥

किं पुनरेषामुदाहरणानि नोक्तानीत्याह—

एतदुदाहरणानां पादावृत्त्यैव दर्शितो मार्गः ।
इह विंशतिभेदमिदं यमकं नोदाहृतं तेन ॥ २२ ॥

एतदिति । समस्तपादावृत्तियमकोदाहरणैरेव पूर्वोक्तैरेतदुदाहरणानां दिक्प्रदर्शनं कृतमितीह विंशतिभेदं यमकं नोदाहृतमिति । यद्यपि चोभयत्राप्यत्रैकादशोऽपि भेदः संभवति । यथा यादृशानि प्रथमश्लोक आद्यन्तानि चार्धानि कृतानि तादृशान्येव तानि लोकान्तरे क्रियन्त इति कृत्वा तथापि महाकवीनां न क्वचिदेवंविधं लक्ष्यं दृश्यत इति दशैव भेदा उक्ताः ॥

इदानीमन्यत्र देश आवृत्त्या तानाह—

प्रथमतृतीयान्त्यार्धे तदनन्तरभागयोः परावृत्ते ।
अन्तादिकमिति यमकं व्यस्तसमस्ते त्रिधा कुरुतः ॥ २३ ॥

प्रथमेति । प्रथमपादान्त्यार्धं द्वितीयपादाद्यर्धं तृतीयपादान्त्यार्धं च चतुर्थपादाद्यर्धं परावृत्तं प्रत्येकं युगपच्चेत्यन्तादिकं नाम त्रिविधं यमकमन्ताद्योर्यमकनाद्भवतीति ॥

तत्रोदाहरणानि—

नारीणामलसं नाभि लसन्नाभि कदम्बकम् ।
परमास्त्रमनङ्गस्य कस्य नो रमयेन्मनः ॥ २४ ॥

नारीणामिति । नारीणां कदम्बकं स्त्रैणं कस्य मनश्चित्तं नो रमयेत्प्रीणयेत् । कीदृशम् । अलसं मन्थरगमनम् । तथा नाभि अबलात्वात्सभयम् । तथा लसन्ती मनोज्ञा नाभिर्यस्य तत्तथा । तथा परमास्त्रं प्रकृष्टायुधमनङ्गस्य ॥

द्वितीयोदाहरणमाह—

पश्यन्ति पथिकाः कामशिखिधूमशिखामिव ।
इमां पद्मालयालीनां लयालीनां महावलीम् ॥ २५ ॥

पश्यन्तीति । पद्मान्यालयो येषां ते च तेऽलयश्च भ्रमराश्च तेषां महावलीं दीर्घश्रेणीमिमां पथिकाः पान्थाः पश्यन्ति । कीदृशीम् । लयेनान्योन्यश्लेषेणालीनां संबद्धाम् । कामशिखिधूमशिखामिव स्मरानलधूमलेखामिव । इति व्यस्तोदाहरणे ॥

समस्तोदाहरणमाह—

पुष्यन्विलासं नारीणां सन्नारीणां कुलक्षयम् ।
आ कल्पं वसुधासार सुधासार जगज्जय ॥ २६ ॥

पुष्यन्निति । हे वसुधासार भूप्रधान नृप, आ कल्पं युगान्तं यावज्जगद्भुवनं जय । कीदृश । सुधासार अमृतवेगवर्ष । किं कुर्वन् । पुष्यन्पुष्टिं नयन् । कम् । विलासम् । कासाम् । नारीणाम् । तथा सन्नानामवसादं गतानामरीणां रिपूणां कुलक्षयमन्वयान्तं पुष्यन् । अन्तर्भावितकारितार्थोऽत्र पुषिः सकर्मकः ॥

भेदान्तराण्याह—

द्वैतीयमन्यमर्धं परिवृत्तमनन्तरे भवेन्मध्यम् ।
मध्यसमस्तान्तादिकयोगादपि जायते वंशः ॥ २७ ॥

द्वैतीयमिति । द्वितीयपादस्यान्त्यार्धं तृतीयपादाद्यर्धे परिवृत्तं मध्याख्यं यमकं जनयति । एतस्य मध्यस्य पूर्वोक्तसमस्तान्तादिकस्य योगे वंशो नाम यमकम् । समस्तग्रहणं व्यस्तान्तादिकनिवृत्त्यर्थम् । तन्निवृत्तिस्तु लक्ष्यादर्शनात्, न त्वसंभवात् । एवमन्यत्रापि द्रष्टव्यम् । अपिः समुच्चये ॥

तत्रोदाहरणमाह—

समस्तभुवनव्यापियशस्तरसेह ते ।
रसेहते प्रियं कर्तुं प्राणैरपि महीपते ॥ २८ ॥

समस्तेति । हे महीपते भूपते, तवेहात्र रसा पृथ्वी प्राणैरपि । आस्तां धनादिभिः । प्रियं हितं कर्तुमीहते चेष्टते । तरसा झगिति । कीदृशस्य ते । समस्तभुवनव्यापियशसः सकलजगद्व्यापिश्लोकस्य । इति मध्यः ॥

अथ वंशः—

ग्रीष्मेण महिमानीतो हिमानीतोयशोभितः ।
यशोऽभितः पर्वतस्य पर्व तस्य हि तन्महत् ॥ २९ ॥

ग्रीष्मेणेति । ग्रीष्मेण निदाघेन पर्वतस्य शैलस्य महिमा माहात्म्यमानीतः । कीदृशः । महद्धिमं हिमानी ततः स्रुतेन तोयेनाम्बुना शोभितो राजितः । हि यस्मात्तस्य पर्वतस्य तद्धिमानीतोयमभितः समन्ताद्यशो वर्तते । तथा पर्व महोत्सवश्च महन्महाप्रमाणम् ॥

पुनर्भेदमाह—

आवृत्तं प्रथमार्धौ द्वितीयमर्धं चतुर्थपादस्य ।
वंशश्च चक्रकाख्यं षष्ठं चान्तादिकं यमकम् ॥ ३० ॥

आवृत्तमिति । चतुर्थपादद्वितीयार्धं प्रथमपादाद्यर्धेन सहावृत्तं पूर्वोक्तवंशश्चेति यमकयोगे चक्रकं नाम यमकम् । षष्ठोऽन्तादिकभेदः । एकश्चकारो वंशकसमुच्चये द्वितीयश्च चक्रस्यान्तादिकमध्ये समुच्चयार्थः ॥

सभाजनं समानीय स मानी यः स्फुटन्नपि ।
स्फुटं न पिहितं चक्रे हितं चक्रे सभाजनम् ॥ ३२ ॥

सभाजनमिति । स एव मानी मनस्वी यश्चक्रे राष्ट्रे हितं चक्रेऽनुकूलं चकार । किं कृत्वा । सभाजनं सभालोकं समानीय सम्यगात्मसमीपं प्रापय्य । सभ्यानां विदितं कृत्वेत्यर्थः । कथं हितं चक्रे । पिहितं गुप्तम्, न स्फुटं प्रकटम् । अविकत्थनात् । किं कुर्वन्नपि । स्फुटन्नपि पीडितोऽपि । कीदृशं सभाजनम् । सभाजनं प्रीतिदर्शनम् । लक्षणं सर्वत्र स्वधिया योज्यम् । अत्र च सप्तमोऽप्येष भेदः संभवति । यत्र केवलमेव प्रथमार्धे चतुर्थान्त्यार्धमावर्त्यते स तु पूर्वकविलक्ष्येषु दृश्यमानोऽपि कथमपि नोक्तः ॥

अथाद्यन्तकभेदानाह—

प्रथमादिप्रथमार्धैः परिवृत्तान्यत्र सार्धमर्धानि ।
अन्त्यान्यनन्तराणां जनयन्त्याद्यन्तकं नाम ॥ ३२ ॥

प्रथमादीति । प्रथमद्वितीयतृतीयपादप्रथमार्धैः सार्धमनन्तराणां द्वितीयतृतीयचतुर्थपादानामन्त्यार्धानि परिवृत्तानि यमकितानि सन्त्याद्यन्तकसंज्ञकं यमकं जनयन्ति ॥

किमेकभेदमेवेदम् । नेत्याह—

इदमप्यन्तादिकवत्क्रमेण षोढैव भिद्यते भूयः ।
अस्योदाहरणानां तेनैव च दर्शितो मार्गः ॥ ३३ ॥

इदमिति । न केवलमन्तादिकमिदमप्याद्यन्तकं तेनैव क्रमेण षोढा षड्भिर्भेदैर्भिद्यते । भूयः पुनः । यथा प्रथमाद्यर्धे द्वितीयपादान्त्यार्धेन सह यमकिते तृतीयाद्यर्धे चतुर्थान्त्यार्धेन सह व्यस्तमाद्यन्तकं द्विधा । तदुभययोगे समस्तमिति तृतीयो भेदः । द्वितीयाद्यार्धे तृतीयान्त्यार्धेन सह मध्यनामा चतुर्थः । मध्यसमस्ताद्यन्तकयोगे वंशः पञ्चमभेदः । प्रथमान्त्यार्धचतुर्थाद्यर्धसारूप्ये वंशे च युगपत्कृते चक्रकं नाम षष्ठः । पूर्ववच्च सप्तमो भेदः संभवतीति । यत्र प्रथमाद्यर्धचतुर्थान्त्यभागयोः सारूप्यम् । अस्य च निदर्शनानां तेनैवान्तादिकेन मार्गो दर्शितो दिक्प्रदर्शनं कृतमिति नोदाहरणं दत्तम् ॥

भूयो भेदमाह—

प्रथमतृतीयाद्यर्धे तदनन्तरचरमयोः परावृत्ते ।
भवति समस्तान्तादिकयोगादप्यर्धपरिवृत्तिः ॥ ३४ ॥

प्रथमेति । प्रथमाद्यर्धे द्वितीयपादान्त्यार्धेन तृतीयाद्यर्धे चतुर्थान्त्यार्धेन यमकितं समस्तान्तादिकं चेत्युभययोगेऽर्धपरिवृत्तिर्नाम भवति ॥

यथा—

ससार साकं दर्पेण कंदर्पेण ससारसा ।
शरन्नवाना बिभ्राणा नाविभ्राणा शरं नवा ॥ ३५ ॥

ससारेति । कंदर्पेण कामेन साकं सार्धं दर्पेण वेगेन शरत्ससार प्रस्थिता । कीदृशी सा । ससारसा सह सारसैः पक्षिविशेषैर्वर्तते या सा । तथा नवानि नूतनान्यनांसि शकटानि यस्यां सा नवानाः । तथा शरं काण्डतृणविशेषं बिभ्राणा धारयमाणा । तथा भ्राणनं भ्राणः शब्दः । वीनां पक्षिणां भ्राणो विभ्राणो न विद्यते विभ्राणो यस्यां साविभ्राणा नैवंविधा । सपक्षिरुतेत्यर्थः । तथा नवा प्रत्यग्रा । तत्कालप्रवृत्तत्वात् ॥

पुनर्भेदान्तराण्याह—

पादसमुद्गकसंज्ञं तत्रावृत्तानि कुर्वत तच्च ।
अन्तरितानन्तरितव्यस्तसमस्तेषु पादेषु ॥ ३६ ॥

पादेति । चतुर्णामपि पादानां यान्यर्धानि तानि तत्रैव पादे परिवृत्तानि सन्ति । पादे पादे समुद्गकसादृश्यात्पादसमुद्गकं नाम यमकं कुर्वन्ति । तच्च पादेष्वन्तरितेषु व्यवहितेष्वनन्तरितेषु च तथा व्यस्तेषु केवलेषु समस्तेषु च पादेषु बहुधा भवति । ते च बहवः प्रकाराः पञ्चदश । कथमन्तरितं तावत्पञ्चधा । प्रथमतृतीययोर्द्वितीयेन, द्वितीयचतुर्थयोस्तृतीयेन, प्रथमतृतीयचतुर्थानां द्वितीयेन, प्रथमद्वितीयचतुर्थानां तृतीयेनान्तरणम् । इत्येकान्तरितं चतुर्भेदम् । प्रथमचतुर्थयोस्तु द्वितीयतृतीयाभ्यामिति द्व्यन्तरितमेकमेव । इत्यन्तरितं पञ्चभेदम् । अनन्तरितमपि प्रथमद्वितीययोर्युगपद्वितीयतृतीययोर्वा तृतीयचतुर्थयोर्वेति द्वियोगे त्रिभेदम् । त्रियोगेण तु प्रथमद्वितीयतृतीयानां द्वितीयतृतीयचतुर्थानां चेति द्विभेदम् । एवमेकत्रानन्तरितं तत्पञ्चधा । तथा व्यस्तेषु चतुर्षु पादेषु चत्वारो भेदाः, समस्तेषु त्वेक एव भेदः । इत्येवं सर्वे पञ्चदश ॥

तत्राद्येऽन्तरितभेदद्वये तथा पञ्चदशे समस्तजभेदे च दिक्प्रदर्शनायोदाहरणत्रयमाह । यथा—

मुदा सेनामुदासेनादसौ तामसमञ्जसम् ।
महीनाथमहीनाथ जयश्रीरालिलिङ्ग तम् ॥ ३७ ॥

मुदेति । असौ महीनाथो राजा तां सेनां मुदा हर्षेण इनात्स्वामिनः सेनाभर्तुः सकाशादुदास चिक्षेप । वियोजितवानित्यर्थः । कथम् । असमञ्जसमितस्ततः । अथानन्तरं महीनाथमहीना संपूर्णा जयलक्ष्मीरालिलिङ्ग परिषष्वजे ॥

द्वितीयोदाहरणमाह—

यत्त्वया शात्रवं जन्ये मदायतमदायत ।
तेन त्वामनुरक्तेयं रसायत रसायत ॥ ३८ ॥

यदिति । कश्चिद्राजानमाह—यद्यस्मात्त्वया शात्रवं शत्रुगणो जन्ये रणेऽदायतालूयत । तेन हेतुनेयं रसा पृथ्व्यनुरक्ता सती त्वामयतागता । 'अय गतौ' इत्यस्य रूपम् । कीदृशम् । शात्रवं मन्नातीति मत् रिपुमथनसमर्थम् । आयतं विस्तीर्णम् । यद्वा मदेनायतम् । कीदृशी रसा । आयतरसा त्वां प्रति दीर्घाभिलाषा ॥

तृतीयोदाहरणमाह—

रसासार रसासार विदा रणविदारण ।
भवतारम्भवतारं महीयतमहीयत ॥ ३९ ॥

रसासारेति । हे रसासार भूश्रेष्ठ, तथा रसानां शृङ्गारादीनामासार वेगवर्षतुल्य, तथा रणविदारण समरभेदक, भवता त्वया, विदा पण्डितेन, आरम्भवता सोद्योगेन, आरं शात्रवमहीयत हानिं नीतम् । जितमित्यर्थः । कीदृशम् । मह्यां पृथिव्यां यतं संबद्धम् । हर्म्यादिवियोजितत्वादिति । अन्यदेशावृत्तौ मनोहारित्वमाश्रित्यैते त्रिंशद्भेदा जाताः । यथान्तादिके षट्कमाद्यन्तके षट्कमिति द्वादश संभवन्ति । सप्तमभेदाभ्यां सह चतुर्दश ।

पञ्चदशार्धपरिवृत्तिः। तथामी पादसमुद्गकभेदाश्च पञ्चदशेति। यथेष्टं चावृत्तावसंख्याता भेदाः संभवन्ति। ते तु नोक्ताः। कविलक्ष्येष्वदर्शनादरम्यत्वाच्चेति॥

अधुना प्रकारान्तरमाह—

आवृत्तानि तु तस्मिन्नाद्यर्धान्यर्धशो विभक्तानि।
वक्रं तथा शिखान्त्यान्युभयानि च जायते माला॥ ४०॥

आवृत्तानीति। पादानामाद्यान्यर्धान्यर्धशः खण्डितानि तस्मिन्नेव खण्डितेऽर्धे यमकितानि वक्रं नाम यमकं जनयन्ति। तथान्त्यार्धान्यर्धीकृतानि तस्मिन्नेव यमकितानि शिखां जनयन्ति। वक्रशिखयोश्च युगपद्योगे माला भवति॥

क्रमेणैषामुदाहरणत्रयमाह—

घनाघनाभिनीलानामास्थामास्थाय शाश्वतीम्।
चलाचलापि कमले लीनालीनामिहावली॥ ४१॥

घनेति। इह कमले पद्मेऽलीनां भ्रमराणामावली पङ्क्तिर्लीना श्लिष्टा। कीदृक्। चलाचलापि चञ्चलापि। कीदृशामलीनाम्। घनाघना वार्षुकमेघास्तद्वदभिनीलानां श्यामानाम्। किं कृत्वा। लीनां शाश्वतीं स्थिरामास्थां वृत्तिमास्थाय कृत्वा। वक्रमिदम्॥

यासां चित्ते मानोऽमानो नारीर्भूयोऽरं ता रन्ता।
सारप्रेमा सन्नासन्ना जायेतैवानन्ता नन्ता॥ ४२॥

यासामिति। सन्ना सत्पुरुषो भूयः पुनररं शीघ्रं जायेतैव भवेदेव। कीदृशः। रन्ता रमणशीलः। रमेरन्तर्भूतकारितार्थाद्रमयितेत्यर्थः। कास्ताः। नारीः। कीदृशीः। अनन्ताः प्रचुरास्तथा आसन्ना अभ्यर्णाः। यासां नारीणां चित्ते मनसि मानोऽहंकारोऽमानोऽतिबहुः। कीदृशः। सन्ना नन्ता नम्रः। सारप्रेमा स्थिरप्रीतिः। इति शिखा॥

भीताभीता सन्नासन्ना सेना सेनागत्यागत्या।
धीराधीराह त्वा हत्वा संत्रासं त्रायस्वायस्वा॥ ४३॥

भीतेति। कश्चिद्दूतो राजानमाह—हे धीर निर्भय, आधीर मनोदुःखप्रेरक, सा परकीया सेना चमूः सेना सस्वामिका त्वा भवन्तमाह ब्रूते। कीदृशी। भीता त्रस्ता, अभीता संमुखमागता, सन्ना सखेदा, आसन्ना निकटवर्तिनी, आगत्य समेत्य, अगत्या गत्यन्तराभावेन। किं तदाह—हत्वा विनाश्य, संत्रासं भयम्, त्रायस्व पालय। पुनः कीदृशी। आयस्वा आयस्त्वत्सकाशादागमनमेव स्वं धनं यस्याः। इति माला॥

भूयोऽप्याह—

मध्यान्यर्धार्धानि तु मध्यं कुर्वन्ति तत्र परिवृत्त्या।
आद्यन्तान्याद्यन्तं काञ्चीयमकं तथैकत्र॥ ४४॥

मध्यानीति। तुः पुनरर्थे। मध्यान्यर्धार्धानि पुनस्तत्रैव मध्ये परिवृत्त्या मध्यं नाम

यमकं जनयन्ति । एवमाद्यन्तान्यर्धार्धानि परिवृत्त्याद्यन्तं नाम कुर्वन्ति । तदुभय-योगे समकालं काञ्चीयमकं जनयन्ति । तथाशब्दः समुच्चये ॥

तत्रोदाहरणत्रयं क्रमेणाह—

सन्तोऽवत बत प्राणानिमानिह निहन्ति नः ।
सदाजनो जनोऽयं हि बोद्धुं सदसदक्षमः ॥ ४५ ॥

सन्त इति । कश्चिदाह—हे सन्तः शिष्टाः, नोऽस्माकं प्राणानवत रक्षत । हि यस्मा-दयं जनो लोक इहात्रेमान्प्राणान्निहन्ति हिनस्ति । बतेति खेदे । कीदृशो जनः । सदा-जनः सतां क्षेप्ता । तथा सच्चासच्च युक्तायुक्तं बोद्धुं ज्ञातुमक्षमोऽसमर्थः । इति मध्यम् ॥

दीना दूनविषादीना शरापादितभीशरा ।
सेना तेन परासे ना रणे पुंजीवितेरणे ॥ ४६ ॥

दीना इति । कश्चित्कस्यापि कथयति—हे नः पुरुष, तेन केनापि वीरेण रणे समरे सेना चमूः परासे क्षिप्ता । कीदृशे रणे । पुंजीवितस्येरणे क्षेप्तरि । सेना कीदृशी । दीना निष्पौरुषा । तथा दूनः परितप्तो विषादी विषण्ण इनः स्वामी यस्याः सा तथाभूता । तथा शरैर्बाणैरापादिता भीर्भयं शरो हिंसा च यस्याः सा तथा । इत्याद्यन्तम् ॥

या मानीतानीतायामा लोकाधीरा धीरालोका ।
सेनासन्नासन्ना सेना सारं हत्वाह त्वा सारम् ॥ ४७ ॥

येति । कश्चिद्दूतः स्वसेनासंदेशं राज्ञः कथयति—सा त्वदीया सेना पृतना, आरं रिपु-समूहम्, हत्वा विनाश्य, आह ब्रवीति । त्वा भवन्तम् । किं ब्रवीति । सारं प्रधानं वस्तु । शत्रवो जिता इति निवेदयतीत्यर्थः । तस्यैव सारत्वादिति । कीदृशी । या मानिभिर्मनस्वि-भिरिताधिष्ठिता । तथा आनीतः संपादितः परबलस्वीकारेणायामो विस्तारो यस्याः सा तथाभूता । लोकानामाधीर्मनःपीडा ईरयति सा लोकाधीरा । तथा धीरो निर्भय आ-लोकः प्रेक्षणं यस्याः सा तथाभूता । सेना सदण्डनायका, असन्ना सोत्साहा, आसन्ना निकटा । इति काञ्चीयमकम् । पादसमुद्गकभेदवदन्तादिकादियमकभेदवच्चेहापि सर्व एव भेदा द्रष्टव्या इति ॥

'पादं द्विधा त्रिधा वा विभज्य' (३।२०) इत्युक्तम्, तत्र द्विधा विभक्ते यमकान्या-ख्यायेदानीं त्रिधा विभक्तस्याह—

पादस्त्रिधा विभक्तः सकलस्तस्यादिमध्यपर्यन्ताः ।
तेष्वपरत्रावृत्त्या दश दश यमकानि जनयन्ति ॥ ४८ ॥

पाद इति । यस्य पादस्य त्रिधा भागः संभवति स त्रिधा खण्डितस्ततश्च तस्यादि-मध्यान्तभागा अपरत्र पादान्तरे तेष्वेव प्रथमद्वितीयतृतीयभागेषु यथाक्रमं यमकिता दश दश यमकानि पूर्ववज्जनयन्ति । एवं त्रिंशद्यमकानि भवन्ति ॥

एतदाह—

सुमतिरिमानि त्रीण्यपि पादावृत्तिक्रमेण दशकानि ।
यमकानां जानीयात्तदुदाहरणानि तद्वच्च ॥ ४९ ॥

सुमतिरिति । एतानि यमकानां त्रीणि दशकानि प्राज्ञः पादावृत्तिक्रमेण मुखसंदंशादिसंज्ञाभिर्जानीयात् । तदुदाहरणान्यपि तद्वदेव तेनैव प्रकारेण । सर्वं चैतद्विधा विभक्तपाद इव यमकजातं ज्ञेयम् । केवलं तृतीयभागकृतो विशेषः ॥

तदेवाह—

अन्तादिकमिव षोढा विभिन्नमेतत्करोति तावन्ति ।
यमकान्याद्यन्तकवत्तथापरामर्धपरिवृत्तिम् ॥ ५० ॥

अन्तादिकमिति । यथान्तादिकमाद्यन्तकं च पूर्वत्र षोढा भिन्नं सत्प्रत्येकं षड्यमकानि जनितवत्तथेदमपि । तथापरामन्यामर्धपरिवृत्तिं द्वेधाविभक्तपादवज्जनयति । तथाशब्दस्योभयत्र योगः । इति त्रयोदश यमकानि ॥

एषामुदाहरणानि कानीत्याह—

तद्वदुदाहरणान्यपि मन्तव्यानि त्रयोदशैतेषाम् ।
कृत्वार्धशश्च भागानिहापि सर्वं तथा रचयेत् ॥ ५१ ॥

तद्वदिति । उदाहरणान्यपि तद्वदेव त्रयोदश ज्ञेयानि । उपलक्षणं चैतत् । पादसमुद्गकवदिहापि पञ्चदशानां भेदानां संभवात्केवलमिह भागत्रयस्य सादृश्यम् । तत्र तु द्वयस्य पुनरपि भेदानाह—कृत्वार्धशश्चेत्यादि । यथा पूर्वत्रार्धार्धानि कृत्वा वक्त्रशिखामालामध्याद्यन्तकाश्चीयमकानि कृतान्येवमिहापि कर्तव्यान्युदाहरणानि च देयानीति ॥

भूयो भेदान्तराण्याह—

स्थानाभिधानभाञ्जि त्रीण्यन्यानीति सन्ति यमकानि ।
आदिर्मध्येऽन्ते वा मध्योऽन्ते तत्र परिवृत्तः ॥ ५२ ॥

स्थानेति । त्रिधा विभक्ते पादेऽन्यानि त्रीणि वक्ष्यमाणानि यमकानि सन्ति । किंनामधेयानीत्याह—स्थानाभिधानभाञ्जीति । स्थानकृतमभिधानं भजन्ते यानि । कथमित्याह—आदिभागे मध्यभागेन यमकिते आदिमध्ययमकम् । आदिभागेऽन्त्येन चेत्तदाद्यन्तयमकम् । मध्यभागेऽन्त्येन यदि तदा मध्यान्तयमकम् ॥

तदुदाहरणत्रयं क्रमादाह—

स रणे सरणेन नृपो बलितावलितारिजनः ।
पदमाप दमात्स्वमतेरुचितं रुचितं च निजम् ॥ ५३ ॥

स इति । स कश्चिन्नृपो रणे समरे सरणेन यानेन तथा दमादुपशमाच्च हेतोः स्वमते-

निजबुद्धेरुचितं योग्यं रुचितमिष्टं च निजं स्वकीयं पदं स्थानमाप लेभे । कीदृशोऽसौ । बलिता बलित्वं तया वलितो वेष्टितोऽरिजनः शत्रुलोको येन स तथाविधः । इत्यादि-मध्यम् ॥

घनाघ नायं न नभा घनाघनानुदारयन्नेति मनोऽनु दारयन् ।
सखेऽदयं तामविलास खेदयन्नहीयसे गोरथवा न हीयसे ॥ ९४ ॥

घनेति । एतत्प्रावृषि पथिकस्य सुहृदोच्यते—हे घनाघ गृहाननुसरणाद्बहुपाप, अयमसौ नभाः श्रावणो मासो न नैति।अपि त्वायात्येव ।नभःशब्दो मासवाचकः पुंलिङ्गः । कीदृशो नभाः । घनाघनान्सजलजलदानुदारयन्विस्तारयन् । अनु पश्चाच्च मनश्चित्तं दारयन्विपाटयन् । तथा हे सखे अविलास निर्लील, तां कान्तामदयं निर्दयं खेदयन्नुद्वेजयन्नहीयसे सर्पायसे । अथवा गोर्बलीवर्दान्न हीयसे । बलीवर्द एवासीत्यर्थः । इत्याद्यन्तयमकम् ॥

असतामहितो महितो युधि सारतया रतया ।
स तयोरुरुचे रुरुचे परमेभवते भवते ॥ ९५ ॥

असतामिति । हे उरुरुचे विस्तीर्णकान्ते। अथवा उर्वी रुग्यस्य स तस्मै विस्तीर्णकान्तये । स कश्चिद्वीरो भवते तुभ्यं रुरुचे प्रीतिमुत्पादितवान् । तया जनप्रसिद्धया युधि रणे सारतयोत्कृष्टतया हेतुभूतया । कीदृश्या । रतया सक्तया । संबद्धयेत्यर्थः । कीदृशोऽसौ । असतां दुर्जनानामहितो द्रोहकारी । अत एव महितः पूजितः । भवते कीदृशाय । परमा उत्कृष्टा इभा हस्तिनो विद्यन्ते यस्य स तथा तस्मै ॥

अथोपसंहारं कुर्वन्ननियतदेशावयवयमकानामानन्त्यमाह—

यमकानां गतिरेषा देशावयवावपेक्षमाणानाम् ।
अनियतदेशावयवं त्वपरमसंख्यं सदेवास्ति ॥ ९६ ॥

यमकानामिति । देश आदिमध्यान्तलक्षणः । अवयवोऽर्धत्रिभागादिः । तौ देशावयवावपेक्षमाणानामत्यजतां यमकानां गतिरेषा परिपाटीयं पूर्वोक्ता । यत्तु यमकं देशावयवौ नापेक्षते तदपरमसंख्यमसंख्यातम् । तच्च महाकविलक्ष्येषु सदेव साध्वेवास्ति विद्यते । एतदुक्तं भवति—स्वेच्छाकृतत्वेनानन्तत्वात्तस्य लक्षणं कर्तुं न शक्यते । केवलं महाकविलक्ष्यदर्शनाज्ज्ञेयम् ॥

अत्र तु दिङ्मात्रप्रदर्शनार्थमाह—

कमलिनीमलिनी दयितं विना न सहते सह तेन निषेविताम् ।
तमधुना मधुना निहितं हृदि स्मरति सा रतिसारमहर्निशम् ॥ ९७ ॥

कमलिनीति । सालिनी भ्रमरी दयितं प्रियं विना कमलिनीं पद्मिनीं न सहते न क्षमते । तां दृष्ट्वा तप्यत इत्यर्थः । कीदृशीं कमलिनीम्। तेन दयितेन सह समं निषेवि-

ताम्। किं तर्हीदानीं करोतीत्याह—तं प्रियमधुनेदानीं मधुना वसन्तेन हृदि मनसि निहितमर्पितं रतिसारं रतप्रधानं सा स्मरति ध्यायति। अहर्निशं दिवानिशम्। अत्र न देशविभागेनावृत्तिर्नाप्यवयवविभागेन। यतो द्रुतविलम्बिताख्यं द्वादशाक्षरमेतद्वृत्तम्। अस्यार्धे षडक्षराणि। अत्र च प्रथममक्षरं मुक्त्वा त्रीणि यमकितानि॥

तथा—

कमलिनी सरसा सरसामियं विकसितानवमं नवमण्डनम्।
किमिति नाधिगता धिगतादृशं मधुकरेण बताणवता कृतम्॥ ९८॥

कमलिनीति। इयं कमलिनी पद्मिनी किमिति कस्मान्मधुकरेण भृङ्गेन नाधिगता न संप्राप्ता। धिक्कष्टम्। तेनाणवता शब्दवतातादृशमयुक्तं कृतम्। धिग्बतशब्दावत्र खेदाधिक्यं सूचयतः। कीदृशी। सरसा नूतना। विकसिता प्रफुल्ला। अत एव सरसां जलाशयानामनवमं श्रेष्ठं नवमण्डनं प्रत्यग्रालंकरणम्। अत्रापि देशावयवानपेक्षयावृत्तिः॥

अध्यायमुपसंहरन्यमकस्वरूपं विषयं चाह—

इति यमकमशेषं सम्यगालोचयद्भिः
सुकविभिरभियुक्तैर्वस्तु चौचित्यविद्भिः।
सुविहितपदभङ्गं सुप्रसिद्धाभिधानं
तदनु विरचनीयं सर्गबन्धेषु भूम्ना॥ ९९॥

इतीति। इति पूर्वोक्तं यमकमशेषं सर्वं समस्तपादैकदेशजं सम्यग्यथान्यायमालोचयद्भिः सत्कविभिरभियुक्तैः सावधानैः। तथा वस्तु च विषयभागमालोचयद्भिः। यथा कस्मिन्रसे कर्तव्यम्, क्व वा न कर्तव्यम्। यमकश्लेषचित्राणि हि सरसे काव्ये क्रियमाणानि रसखण्डनां कुर्युः। विशेषतस्तु शृङ्गारकरुणयोः। कवेः किलैतानि शक्तिमात्रं पोषयन्ति, न तु रसवत्ताम्। यदुक्तम्—'यमकानुलोमतदितरचक्रादिभिदो हि रसविरोधिन्यः। अभिधानमात्रमेतद्भङ्गिरिकादिप्रवाहो वा॥' प्रयोगस्तु तेषां खण्डकाव्येषु देवतास्तुतिषु रणवर्णनेषु च। तदेवाह—औचित्यविद्भिरिति। औचित्यं यमकादिविधानास्थानस्थानादिकं विदन्ति ये तैः। कीदृशं यमकम्। सुष्ठु विहिता हृदयंगमाः पदभङ्गा यत्र तत्तथाभूतम्। तथा सुप्रसिद्धान्यभिधानानि वस्तुवाचकशब्दा यत्र तत्तथाभूतं यमकम्। तदनु चौचित्यादिज्ञानानन्तरं विरचनीयम्। भूम्ना बाहुल्येन सर्गबन्धेषु महाकाव्येषु। नाटककथाख्यायिकादिषु पुनः स्वल्पमेवेत्यर्थः॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेत-
स्तृतीयोऽध्यायः समाप्तः।

चतुर्थोऽध्यायः ।

यमकं व्याख्याय श्लेषं व्याचिख्यासुराह—

वक्तुं समर्थमर्थं सुश्लिष्टाक्लिष्टविविधपदसंधि ।
युगपदनेकं वाक्यं यत्र विधियेत स श्लेषः ॥ १ ॥

वक्तुमिति । यत्रालंकारे युगपत्तुल्यकालमेकप्रयत्नेनैवानेकं द्व्यादिकं वाक्यं विधीयेत स श्लेषः । युगपत्पदग्रहणान्महायमकादीनां श्लेषत्वनिवृत्तिः । कीदृशम् । वाक्यमर्थमभिधेयं वक्तुं भणितुं समर्थं शक्तम् । अनेकमितोऽपि द्रष्टव्यम् । तथा सुष्ठु श्लिष्टः सुप्रयोजितोऽक्लिष्टः कष्टकल्पनारहितो विविधो नानाविधः पदानां सुप्तिङन्तानां संधिरेकीभावो यत्र तत्सुश्लिष्टाक्लिष्टविविधपदसंधीति ।

सामान्यलक्षणमभिधाय विशेषाभिधानाय श्लेषप्रकारानाह—

वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानाम् ।
अत्रायं मतिमद्भिर्विधीयमानोऽष्टधा भवति ॥ २ ॥

वर्णपदेति । अत्र शब्दालंकारेष्वयं श्लेषो मतिमद्भिर्विधीयमानो धीमद्भिः क्रियमाणोऽष्टधाष्टप्रकारो भवति । केषां विधीयमान इत्याह—वर्णेत्यादि । वर्णश्च पदं च लिङ्गं च भाषा च प्रकृतिश्च प्रत्ययश्च विभक्तिश्च वचनं च वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानि तेषाम् । वर्णपदादिविषयभेदात्तन्नामाष्टधा श्लेष इत्यर्थः । अत्रेति परमतनिरासार्थम् । अन्यैर्ह्यविशेषेण शब्दार्थयोः श्लेषोऽभ्यधायि । वर्णादिनिर्देशादेवाष्टविधत्वे लब्धेऽष्टधेति नियमार्थम् । भेदे सत्यष्टधैव नान्यथेत्यर्थः । केचिद्धि पदेषु लिङ्गमन्तर्भावयन्ति । प्रत्यये च विभक्तिवचने । विभक्तौ च वचनम् । तदेतन्न चारु । भेददर्शनात् । तथाहि हार इति भूषणं मुक्ताकलापः, हरणं हारो मोषः, हरस्यायं हारः, कोऽप्यर्थः । इत्यत्र पदश्लेषेऽपि लिङ्गश्लेषो न विद्यते । सर्वत्र पुंलिङ्गत्वात् । तथा पद्मो निधिः, पद्मं कमलम्, पद्मा श्रीरिति लिङ्गश्लेषेऽपि पदमभिन्नम् । तथा तपनस्यायं तापयतीति वा तापनः । इत्यादिषु प्रत्ययभेदेऽपि विभक्तिवचनभेदो न विद्यते । तथा सतां मुख्यः पुरःसरः सन्मुख्यः सच्छोभनं मुखं यासां ताः सन्मुख्यः । इत्यत्र वचनभेदेऽपि विभक्तिभेदो न विद्यते । इति भेदप्रतीतेर्न शोभनोऽन्तर्भाव इति ॥

यथोद्देशस्तथा निर्देश इत्यादौ वर्णश्लेषलक्षणमाह—

यत्र विभक्तिप्रत्ययवर्णवशादैकरूप्यमापतति ।
वर्णानां विविधानां वर्णश्लेषः स विज्ञेयः ॥ ३ ॥

यत्रेति । यत्र विविधानां नानारूपाणां वर्णानामैकरूप्यं साम्यमागच्छति स वर्णश्लेषः । विरूपाणां कथं सादृश्यमित्याह—विभक्तिबलात्प्रत्ययबलाद्वर्णबलाच्चेति ।

उदाहरणमिदम्—

साधौ विधावपर्तावपराहावास्थितं विषादमितः।
आयासि दानवत्त्वं तद्धर्म्यं परमकुर्वाणः॥ ४॥

साधाविति। अत्र महासत्त्वो दरिद्रो वर्ण्यते—कश्चिन्नरो दानवतो भावो दानवत्त्वं दातृत्वं तत्पुराकृतमकुर्वाणोऽसंपादयन्विषादमितः प्राप्तः। कीदृशं दातृत्वम्। विधिर्दैवं तस्मिन्नास्थितमायत्तम्। दैवाधीनमित्यर्थः। दैवेऽनुकूले भवतीति भावः। कीदृशे विधौ। सहाधिभिर्वर्तत इति साधिस्तस्मिन्। नित्यमेव मनःपीडावह इत्यर्थः। तथापर्तौ सदा संनिधानादपगतोऽर्तुः कालविशेषो यस्य सोऽपर्तुस्तस्मिन्। तथापराहावविद्यमानः परः प्रतिपक्षो यस्यासावपरः स चासावहिश्च सर्पश्च पीडाकारित्वादपराहिस्तस्मिन्। अपरस्याहेर्नकुलादिर्हिंसको भवति, अस्य तु नैव। अन्यच्च कीदृशं दानवत्त्वम्। आयास्यघटनादभीक्ष्णं खेददायि। तथा धर्म्यं स्वभावतो धर्मादनपेतम्, अत एव परं श्रेष्ठम्। एष एकस्य वाक्यस्यार्थः॥ अपरस्य तु—साधावित्यादि कश्चिद्बाणासुरमाह—हे दानव दनुसुत, त्वं बाणो बाणाख्य इतोऽस्मात्प्रदेशाद्विषादं कालकूटभक्षकं शिवमायास्यागच्छसि। कीदृशं शिवम्। विधौ चन्द्रमस्यास्थितमास्था संजातास्येति तम्। कीदृशे विधौ। साधौ सुन्दरे। तथापगता ऋतिर्गमनं यस्यासावपर्तिस्तस्मिन्। सदावस्थिते। तथापगतो राहुर्विधुंतुदो यस्मादसौ तथाविधस्तस्मिन्। किमिति तत्सकाशमायासीत्याह—तस्य हर्म्यं स्थानं तद्धर्म्यं यतः परमोत्कृष्टा कुर्भूमिः। निर्वाणपदमित्यर्थः। साधावित्यादाविकारोकारयोः समीविभक्तिवशादैकरूप्यम्। आस्थितमितः प्रभृतिषु प्रत्ययवशात्। तद्धर्म्यमित्यत्र धकारहकारवर्णवशादिति। परमकुर्वाण इत्यत्रैकत्रौष्ठ्योऽन्यत्र दन्त्यौष्ठ्यो वकारस्तत्कथमेकरूपता वर्णानाम्। सत्यम्। यमकश्लेषचित्रेषु ववकारयोरोष्ठ्यदन्त्यौष्ठ्ययोरभेदो दृश्यते। यथा—'तस्यारिजातं नृपतेरपश्यदबलं वनम्। ययौ निर्भरसंभोगैरपश्यदवलम्बनम्॥' तथा नकारणकारयोश्च न भेदः। यथा—'वेगं हे तुरगाणां जयन्नसावेति भङ्गहेतुरगानाम्' इति शिवभद्रस्य। विसर्जनीयभावाभावयोश्च न विशेषः। यथा—'द्विषतां मूलमुच्छेत्तुं राजवंशादजायथाः। द्विषद्भयस्त्रस्यसि कथं वृकयूथादजा यथा॥' अत्र ह्येकत्राजायथा इति विसर्गान्तं क्रियापदम्, अपरत्र यथाशब्दोऽव्ययम्। तथान्त्ययोर्मकारनकारयोश्च न भेदः। यथा—'प्रापयाशुरथं वीर समीरसमरंहसम्। द्विषतां जहि निःशेषपृतनाः समरं हसन्॥' अत्र हि समरंहसमिति मान्तम्, हसन्निति नान्तं पदम्। तथा व्यञ्जनात्परस्यैकस्य व्यञ्जनस्य द्वयोर्वा न विशेषः। यथा—'शुक्ले शुक्लेशनाशं दिशति' इत्यादौ शुक्ले शुक्ले यमकः। तस्मिंश्चैकत्र शुक्लगुणयुक्ते, अन्यत्र शुचः क्लेशस्य च नाशं दिशतीत्यर्थः। अत्र ह्येकत्र ककाराल्लकार एवैकं व्यञ्जनम्, अन्यत्र ककारो लकारश्च द्वयमिति॥

अथ पदश्लेषः—

यस्मिन्विभक्तियोगः समासयोगश्च जायते विविधः।
पदभङ्गेषु विविक्तो विज्ञेयोऽसौ पदश्लेषः॥ ९॥

यस्मिन्निति । यत्र वाक्ये विभक्तियोगो विविधो नानासमासयोगश्च जायते । केषु । पदभङ्गेषु सत्सु । विविक्तः स्फुटः स पदश्लेषः ॥

उदाहरणमिदम्—

सुरतरुतलालसगलन्नयनोदकलालसत्कुचारोहम् ।
समराजिदन्तरुचिरस्मिते नमदसौ शरीरमदः ॥ ६ ॥
नवरोमराजिराजितवलिवलयमनोहरतरसारं भाः ।
धवलयति रोहितानवमद्धचानमदाहितस्तनि ते ॥ ७ ॥(युग्मम्)

सुरेति । नवरोमेति । कश्चिच्चाटुकृत्प्रियामाह—हे समराजिदन्तरुचिरस्मिते अविषमदन्तपङ्क्तिकान्तहसिते, तवासौ भा एषा दीप्तिरद एतच्छरीरं वपुर्धवलयति शुक्लयति । कीदृशम् । सुरतरुतेषु निधुवनमणितेषु लालसो लम्पटो गलः कण्ठो यस्य तत्तथाभूतम् । तथा प्रियसंनिधानाद्यन्नयनोदकमानन्दलोचनवारि तस्य यो लालः प्रसरणं तेन सञ्शोभनः कुचारोहः स्तनोच्छ्रायो यत्र तत्तथाभूतम् । तथा नमत्स्तनाभोगभारान्नम्रम् । तथा नवा नूतना या रोमराजी रोमलेखा तया राजितं भूषितं यद्वलिवलयं वलयाकारं वलित्रयं तेन मनोहरतरं रम्यतरं तच्च तत्सारमुत्कृष्टं चेति समासः । रोहत्युत्तिष्ठतीति रोहि तानवं कृशत्वं यस्य तद्रोहितानवं यन्मध्यमुदरं तत्रानमन्तौ कठिनत्वादलम्बमानावाहितावस्थितौ स्तनौ यस्यास्तस्या आमन्त्रणं हे रोहितानवमध्यानमदाहितस्तनि । एष एकस्य वाक्यस्यार्थः ॥ अपरस्य तु यथा—कश्चित्खड्गप्रहरणो धानुष्कं स्पर्धिनमुद्दिश्य वयस्यानाह—यतोऽहमेवंविशिष्टस्तेन हेतुना मदसावस्मत्खड्गे न वरो न श्रेष्ठः कोऽसौ शरीरमदः । शरा विद्यन्ते येषां ते शरिणो धानुष्कास्तानीरयति क्षिपत्यभिभवतीति शरीरस्तस्य मदः । जितधनुर्धरोऽहमिति कृत्वा यो दर्प इत्यर्थः । यतः कीदृशोऽहम् । सुरतरुतलेषु देववृक्षाधोभागेष्वलसा मन्दा ये गलन्नया भ्रश्यन्नीतयः । विषयासक्ता इत्यर्थः । तेषां नोदस्ततः पातनं तत्र या कला विज्ञानं तया लसञ्शोभमानः क्षौ पृथिव्यां चारो वल्गनं यस्य स तथाविधोऽहम् । खड्गविद्यया स्वर्गस्थानपि पातयामीत्यर्थः । तथा समरं रणमा समन्ताज्जयन्त्यभिभवन्तीति समराजितो ये शूरास्तेषामप्यन्ते विनाशे रुचिरभिलाषो यस्य स एवंविधोऽस्मि भवामीति । अधुना वयस्यानामन्त्रयते—अमराजिरेषु देवाङ्गनेष्वजितमपराभूतं यद्बलिबलं बलिदानवसैन्यं तस्य यमनं बन्धनं तत्रोहस्तर्कश्चिन्ता तत्र रतो विष्णुस्तस्येव रसस्तात्पर्यमारम्भश्चानुष्ठानं येषां ते तथाभूता भवन्त आमन्त्र्यन्ते । कीदृशे मदसौ । धवा वृक्षविशेषास्तेषु लयो दुर्गधिया संश्रयस्तेन तिरोहितमन्तरितमनवं बहुदिवसभवं यन्मद्ध्यानं मदीयचिन्तनम् । दुर्गस्था वयमतः स किं करिष्यतीति कृत्वा । तेन मच्चिन्तान्तर्धानेन मदो येषां ते च तेऽहिताश्च शत्रवश्च तेषु स्तनिते तद्दारणाच्छणच्छणायमाने । खड्ग इत्यर्थः । अथवा धवाः पुरुषास्तेषां लयः स्वपौरुषकर्मकौशलम् । अनवम उत्कृष्टो ध्यानमदो नीतिशास्त्रचिन्तादर्पो येषां तेऽनवम-

ध्यानमदा मन्त्रिप्राया उच्यन्ते । धवलयेन कर्मकौशलेन तिरोहिता न्यकृता अनवमध्यानमदा यैस्ते तथा ते च तेऽहिताश्च शत्रवस्तेषु स्तनिते शब्दिते । अन्योऽप्यत्र यदि भङ्गः संभवति सोऽपि तद्विदा विचार्य कर्तव्य एव ॥

अथ लिङ्गश्लेषः—

स्त्रीपुंनपुंसकानां शब्दानां भवति यत्र सारूप्यम् ।
लघुदीर्घत्वसमासैर्लिङ्गश्लेषः स विज्ञेयः ॥ ८ ॥

स्त्रीपुमिति । यत्र स्त्रीपुंनपुंसकलिङ्गानां सारूप्यं भवत्यसौ लिङ्गश्लेषः । कैः कृत्वा । लघुदीर्घत्वसमासैरिति क्वचिद्दीर्घस्य लघुत्वेन । ह्रस्वत्वेनेत्यर्थः । क्वचिद्ह्रस्वस्य दीर्घत्वेन क्वचित्समासेन चेति ॥

उदाहरणम्—

देवी मही कुमारी पद्मानां भावनी रसाहारी ।
सुखनी राज तिरोऽहितमहिमानं तस्य सद्धारी ॥ ९ ॥

देवीति । कश्चिद्राजानमाशास्ते—त्वं राज शोभस्व । तथा तिरश्चीनं यथा भवत्येवमहितं शत्रुं तस्य क्षयं नय । 'तसु उपक्षये' इत्यस्य रूपम् । कीदृशस्त्वम् । दीव्यतीति देवी क्रीडारतः, मही उत्सववान्, कुत्सितांश्चौरादीन्मारयतीति कुमारी । अथवा कुः पृथ्वी मारः कामस्तौ विद्येते यस्य स कुमारी । तथा पद्मानां श्रियां भावं सत्तां नयति भृत्येष्विति भावनी । सेवकानां लमक्षीप्रद इत्यर्थः । रसां भुवमाहरत्यात्मसात्करोतीति रसाहारी । यदि वा रसैर्मधुरादिभिराहरतीति रसाहारी । सुखं नयति भृत्यानिति सुखनीः, सतः शिष्टान्धारयति पोषयतीति सद्धारी, शोभनहारवान्वा । कीदृशम् । अहितमहिमानमहेर्वृत्रस्येव मानोऽहंकारो यस्य तं तथाविधम् । अयमेकस्य वाक्यस्यार्थः ॥ अपरस्य तु—मही पृथ्वी राजति शोभते । देवीति पूजापदम् । कीदृशी मही । कुमार्यकृतविवाहा नित्यतरुणी वा । पद्मानां नलिनानां भावन्युत्पादिका । रसाञ्जलादीनाहरति गृह्णातीति । 'कर्मण्यणन्तादी' । सुखनिः शोभनाकरा । तथानन्तस्य शेषस्य रोहित आरोपितो महिमा माहात्म्यं यया । स्वयमात्मधारणे शक्तयाप्यनन्तस्य लोके माहात्म्यख्यापनार्थमात्मभरस्तयार्पित इत्यर्थः । सद्विधमानं वस्तुजातं धरतीति । 'कर्मण्यणन्तादी ।' देवीत्यादौ दीर्घत्वे रसाहारीत्यादौ दीर्घत्वे समासे च सारूप्यं दीर्घस्य । ह्रस्वत्वं त्वन्यत्र स्वधिया द्रष्टव्यम् ॥

अथ भाषाश्लेषः—

यस्मिन्नुच्चार्यन्ते सुव्यक्तविविक्तभिन्नभाषाणि ।
वाक्यानि यावदर्थं भाषाश्लेषः स विज्ञेयः ॥ १० ॥

यस्मिन्निति । यत्र यावदर्थं कवेर्यावन्तोऽर्था विवक्षितास्तावन्ति वाक्यान्युच्चार्यन्ते स

भाषाश्लेष इति । कीदृशानि । सुव्यक्तं स्फुटं यथा भवत्येवं विविक्ताः पृथगुपलभ्यमानविवेका भिन्ना द्वित्राद्या भाषा येषु तानि तथाविधानि ॥

तत्र संस्कृतप्राकृतश्लेषोदाहरणम्—

[1]सरसबलं स हि सूरोऽसङ्गामे माणवं धुरसहावम् ।
मित्तमसीसरदवरं ससरणमुद्धर इमं दबलम् ॥ ११ ॥

सरसबलमिति । कश्चित्कंचिदाह—स सूरो रविरिमं तं माणवं रोगित्वात्कुत्सितंमनुष्यमसीसरत्सारयामास । गतियुक्तं चकारेत्यर्थः । कीदृशम् । सरसं गतिलाभात्प्रत्यग्रं बलं शक्तिर्यस्य तं तथाभूतम् । हि स्फुटम् । क्व सति पूर्वमसीसरदसङ्गामे न विद्यते सङ्गो यत्रासावसङ्गः स चासावामश्च तस्मिन् । असंपर्कयोग्ये रोगे सतीत्यर्थः । पुनः कीदृशं माणवम् । धुरसहावं धुरि प्रथममसहासमर्था अवा रक्षितारो वैद्या यस्य । पूर्वं वैद्यत्यक्तमित्यर्थः । सूरः कीदृशः । मिन्मेद्यति स्निह्यति । कृपणेषु दयापर इत्यर्थः । कीदृशम् । तमवरं सरोगत्वादश्रेष्ठम् । तथा दवं लातीति दवलमुपतापयुक्तम् । कीदृशः । ससरणमुद्धरः सह सरणेन ज्ञानेन वर्तन्ते ये ते ससरणा योगिनस्तेषां मुदं हर्षं धारयति पुष्णातीति कृत्वेति संस्कृतवाक्यार्थः । प्राकृतस्य तु—काचिद्भर्तारमुद्दिश्य सखीमाह—हे सखि, स शूरोऽस्मद्भर्ता मित्रं सुहृदं सङ्ग्रामे रण उद्धरति रक्षति । कीदृशम् । शरैर्बाणैः शबलं कर्बुरम् । तथा मानेन गर्वेण बन्धुरो रम्यः स्वभावो यस्य तं तथाभूतम् । तथासीश्वराणां खड्गयोधिनां दवरमुपतापदम् । तथा सह शरणेन वर्तते यस्तं सशरणं परित्राणार्थिनामार्तिहरम् । यद्येवंविधं तत्किमिति तेनोद्रियत इत्याह—मन्दबलं मन्दमसमर्थं बलं यस्य तं तथाभूतम् । बहुयोधनादक्षमसैन्यमिति ॥

इदानीं संस्कृतमागध्युदाहरणम्—

[2]कुललालिलावलोले शलिलेशे शालशालिलवशूले ।
कमलाशवलालिबलेऽमाले दिशमन्तकेऽविशमे ॥ १२ ॥

कुलेति । कश्चिज्जातसंसारभयो वक्ति—एवंविधेऽन्तके मृत्यौ सति ए विष्णौ विषये या दिङ्मार्गस्तां दिशमविशं प्रविष्टोऽस्मि । कीदृशेऽन्तके । कुलानि लालयन्ति पोषयन्ति तच्छीलाः कुललालिनः सत्पुरुषास्तेषां लावे छेदे कर्तव्ये लोलो लम्पटो यस्तस्मिन् । तथा शलन्तीति शलाः सोद्यमास्ते विद्यन्ते यत्र देशे स शली । यद्वा शलं खड्गकोषवध्रोऽस्ति येषां ते शलिनः खड्गयोधास्तांल्लिशत्यल्पीकरोतीति शलीलेशस्तस्मिन् । तथा शालैर्गृहैः शालन्ते श्लाघन्त इत्येवंशीलाः शालशालिनस्तांल्लुनातीति शालशालिलवः स चासौ शूलं च । पीडाकरत्वात् । तथा कमला लक्ष्मीस्तस्याः शवा दरिद्रा-

१. प्राकृतच्छाया—'शरशबलं सखि शूरोऽसङ्ग्रामे मानबन्धुरस्वभावम् । मित्रमसीश्वरदवरं सशरणमुद्धरति मन्दबलम् ॥' २. मागधीछाया—'कुरारालिरावरोलं सलिलं तत्सारसालिरवशूरम् । कमलासवलालिवरं मारयति शाम्यतो विषमम् ॥'

17674

स्तेष्वपि ललति विलसतीत्येवंशीलं बलं सैन्यं यस्य स तथा तस्मिन् । तथामाले । 'मल धारणे ।' मलनं मालो न विद्यते मालो यस्यासावमालस्तस्मिन् । अनिवार्य इत्यर्थः । एष संस्कृतवाक्यार्थः ॥ मागधस्य तु—शे शलिले तत्सलिलं जलं शमन्तके शाम्यतः शमिनोऽपि मालेदि.मारयति । कीदृशं तत् । कुरराः पक्षिविशेषास्तेषामालिः पङ्क्तिस्तदीयै रावैः शब्दै रोलः कलकलो यत्र तत्तथाभूतम् । तथा सारसालिरवेण सारसश्रेणिवाशितेन शूरं तद्विरहिमारणसमर्थम् । तथा कमलानां पद्मानामासवं मकरन्दाख्यं लान्ति ये ते च तेऽलिनश्च भ्रमरास्तैर्वरं श्रेष्ठं यत्तत् । तथा विषमं वियोगिभीषणमेवंविधं शरदि सलिलं विलोक्य मुनयोऽपि क्षुभ्यन्ति । इति मागधवाक्यार्थः ॥

इदानीं संस्कृतपिशाचभाषाश्लेषोदाहरणमाह—

[1]कंमनेकतमादानं सुरतनरजतु च्छलं तदासीनम् ।
अप्पतिमानं खमते सोऽगनिकानं नरं जेतुम् ॥ १३ ॥

कमिति । कस्यचित्केनचित्पौरुषस्तुतिः कृता । ततोऽन्यस्तामसहमान आह—हे सुरतनः निधुवनपुरुष, ते तव पौरुषं न रणे इत्यामन्त्रणपदाभिप्रायः । तथा खमते शून्यबुद्धे, यस्त्वया वर्ण्यते स कं नरं जेतुमजतु गच्छतु । नास्त्येवासौ पुरुषो यं सोऽभिभविष्यतीत्यर्थः । कीदृशं नरम् । अनेकतमान्यादानान्युत्पत्तिस्थानानि यस्य तं तथाभूतम् । तथा छलं तदासीनं तां मायामाश्रितम् । आश्रयणार्थः 'आसिः' सकर्मकः । तथापां पतेरप्पतेर्वरुणस्येव मानो गर्वो यस्य तम् । तथागस्येव मन्दरस्येव निकाना दीप्तिर्यस्य तम् । अथवा न गच्छतीत्यगो निकानो यस्येत्यन्यथास्य वाक्यस्यार्थः । अथवा यदा न सन्त्येवंविधास्तदा सर्वमेव तेन यतो जितमतः स कमिव नरं जेतुमजत्विति स्तुतिरेवात्रार्थः । इति संस्कृतवाक्यार्थः ॥ पैशाचस्य तु—केनचिद्वेश्यानामुपकारः कृतः । ताभिस्तु तस्य न कृत इति सोऽत्र वर्ण्यते—स पूजितगणिकः पुरुषो गणिकानां वेश्यानामप्पतिमानमप्रतीपमपूजनं न क्षमते न सहते । किमर्थम् । रञ्जयितुमात्मरञ्जनाय । इदानीं मां ताः पूजयन्त्वित्यवमर्थम् । कीदृशीनां गणिकानाम् । कामविषये कृतामोदानां कृतहर्षाणाम् । तथा सुरन(स्वर्ण)रजताभ्यामुच्छलन्त्यो विलसन्त्यो दास्यो यासाम् । पिशाचभाषायां कगचजतदपयवानां लोपो न क्रियत इत्यादिपूर्वोक्तं लक्षणम् ॥

इदानीं संस्कृतसूरसेनीवाक्योदाहरणमाह—

[2]तोदी सदिगगणमदोऽकलहं स सदा बलं विदन्तरिदम् ।
आर दमेहावसरं सासदमारं गदासारम् ॥ १४ ॥

तोदीति । कश्चिन्नरो रणस्थो वर्ण्यते—स कश्चिच्छूरो वित्पण्डित इदमारमरिसक्तं

१. पैशाचीछाया—'कामे कृतामोदानां सुवर्णरजतोच्छलद्दासीनाम् । अप्रतिमानं क्षमते स गणिकानां न रञ्जयितुम् ॥' २. सूरसेनीछाया—'ततो दृश्यते गगनमदः कलहंसशतावलम्बितान्तरितम् । आर तमेघावसरं शाश्वतमारं गतासारम् ॥'

बलं सैन्यमन्तर्मध्य आर ससार। कीदृशोऽसौ। तुदति परानिति तोदी। तथा देशनं दिगुपदेशो व्यूहरचनादिविषयः सह दिशा वर्तत इति सदिक्। तथा न गणेन सहायवर्गेण मदो यस्यासावगणमदः। स्वभुजबलसहायकापेक्ष इत्यर्थः। सदा सर्वकालमेव। कीदृशं बलम्। अकलहं परिभूतत्वान्निर्वैरम्। अत एव दमेहाया उपशमचेष्टाया अवसरः कालो यस्य तत्तथाभूतम्। तथास्यन्ते क्षिप्यन्त इत्यासाः शरास्तान्यन्ति खण्डयन्तीत्यासदा धानुष्काः सह तैर्वर्तत इति सासदम्। तथा गदाभिः सारमुत्कृष्टम्। एष संस्कृतवाक्यार्थः॥ सूरसेन्यास्तु—शरदि नभो वर्ण्यते—तो इति ततः प्रावृषोऽनन्तरं दृश्यतेऽवलोक्यते। गगनं नभः। अद एतत्। कीदृशम्। कलहंसशतैरवलम्बितं चान्तरितं च। तथा आरतो निवृत्तो मेघानां घनानामवसरः कालो यत्र। यदि वा आरता उपरता मेघानामाप एव शरा बाणा यत्र तत्तथाभूतम्। तथा शाश्वतः स्थिरो मारः कामो यत्र। तथा गत आसारो वेगवर्षो यतस्तत्तथाभूतम्॥

अथ संस्कृतापभ्रंशयोः श्लेषोदाहरणमाह—

धीरागच्छदुमे हतमुद्दुद्धरवारिसदःसु।
अभ्रमदप्प्रसराहरणुरविकिरणा तेजःसु॥ १९॥

धीरेति। अत्र काचिद्गौरीसखी गङ्गायाः सपत्न्या व्यसनेन गौरीमानन्दयति—यथा हे उमे गौरी, धीरा स्वस्था भवेति क्रिया गम्यते। यतः, अभ्रेगगने मावत्युद्धतो भवति यः स तथाविधोऽपां जलानां प्रसरो यस्याः सा अभ्रमदप्प्रसरा गङ्गा अवेरिव गङ्गरिकाया इव किरणं विक्षेपणं निर्वासनं यस्याः साविकिरणा। अहर्दिवसमपि। 'कालाध्वनोरत्यन्तसंयोगे–' इति कर्म। अत एव हतमुद्गतहर्षा। तत एव चाणुः कृशा सत्यगच्छदपतत्। क्व। तेजःसु। कीदृशेषु। उद्गता धरा पृथ्वी प्रलयापन्निमग्ना सती यस्मात्तदुद्धरं तच्च तद्वारि च समुद्रजलं च तदेव सदो गृहं येषां तानि तथाविधानि तेषु। वडवानलतेजःस्वित्यर्थः। हरनिर्वासनदुःखिता सती गङ्गात्मानं वडवानलेन्धनीचकारेति भावार्थः। एष संस्कृतवाक्यार्थः॥ अथवा काचित्सखी गौर्याः पुरतो हरस्मरं वर्णयति—हे उमे, धीर्बुद्धिरागच्छदागता। कथमहतमुदनष्टहर्षं यथा भवति तथोद्गता निवृत्ता हरवारिणो हरनिषेधकाः शत्रवो यत्र कर्मणि तदुद्धरवारि यथा भवति। यथास्माकं बुद्धिस्तुष्टिश्चाभूत्तथा हरेणारयो जिता इत्यर्थः। सा च धीः सदःसु सभासु तेजःसु च परतेजोविषयेऽभ्रमत्प्रसृता। तेजस्तस्तारेत्यर्थः। कीदृशी धीः। सर्वगत्वादपामिव प्रसरो गतिर्यस्याः साभ्रप्रसरा। अहर्दिवसम्। सदेत्यर्थः। अणुः कृशाग्रीया। तथाविकिरणा निरसितुमशक्या। इति संस्कृतवाक्यार्थः॥ अपभ्रंशस्य तु—वर्षावर्णनम्—हे धीराः, गच्छत्वपसरतु। किम्। तन्मेघकृतं तमो मेघतमः। कीदृशम्। दुर्धरा दुर्वारा वार्षिका वर्षासु भवा दस्यवश्चोरा यत्र। यदि वा वार्षिका मेघा एव दस्यवश्चौरास्तेजसो हरणाद्यत्र।

१. अपभ्रंशच्छाया—'धीरा गच्छतु मेघतमो दुर्धरवार्षिकदस्यु। अभ्रमदप्रसरा हरणं रविकिरणास्ते यस्य॥'

तथा यस्य मेघतमसस्ते रविकिरणाः सूर्यकरा हरणं हर्तारः। कीदृशाः। अभ्रमदप्रसरा भ्रमो भ्रान्तिर्न भ्रमो निश्चयस्तं ददातीत्यभ्रमदः प्रसरो येषां ते तथाविधाः। यथावस्थितं वस्तुस्वरूपं ये प्रकाशयन्तीत्यर्थः॥

अथ भाषाश्लेषस्य प्रकारान्तरमाह—

वाक्ये यत्रैकस्मिन्ननेकभाषानिबन्धनं क्रियते।
अयमपरो विद्वद्भिर्भाषाश्लेषोऽत्र विज्ञेयः॥ १६॥

वाक्य इति। यत्रैकस्मिन्नेव वाक्येऽनेकभाषा निबध्यन्ते सोऽयमपरः पूर्वस्मादन्यो भाषाश्लेषोऽत्र ज्ञातव्यः। पूर्वत्रानेकार्थोऽनेकाभिर्भाषाभिरुक्तः, इह त्वेक एवार्थो बह्वीभिर्भाषाभिरुच्यत इति तात्पर्यार्थः॥

उदाहरणम्—

समरे भीमारम्भं विमलासु कलासु सुन्दरं सरसम्।
सारं सभासु सूरिं तमहं सुरगुरुसमं वन्दे॥ १७॥

समर इति। तमहं सूरिं वन्दे स्तौमि। कीदृशम्। समरे रणे भीमारम्भं भीषणोद्योगम्। विमलासु कलासु सुन्दरं निर्मलकलाविषये शोभनम्। सरसं शृङ्गारादिरसोपेतम्। तथा सभासु सदःसु सारमुत्कृष्टम्। अत एव सुरगुरुसमं बृहस्पतितुल्यम्। अयमेकत्रार्थे संस्कृतप्राकृतश्लेषः। समसंस्कृतप्राकृतशब्दरचितत्वात्। एवमुत्तरत्रापि समसंस्कृतमागधशब्दरचितत्वादित्यादि द्रष्टव्यम्॥

समसंस्कृतमागधशब्दोदाहरणमाह—

शूलं शलन्तु शं वा विशन्तु शबला वशं विशङ्का वा।
अशमदशं दुःशीला दिशन्ति काले खला अशिवम्॥ १८॥

शूलमिति। दुःशीला दुष्टचारित्राः खलाः शत्रवोऽशिवं पीडादिकं दिशन्ति ददति यतोऽतस्ते शबलाः पातकिनः शूलं वा शलन्त्वधिरोहन्तु। शं वा सुखं वा विशन्त्वधिगच्छन्तु। वशं पराधीनतां वा यान्तु। विशङ्काः स्वच्छन्दा वा भवन्तु तच्चिन्तामपि न कुर्मः। कीदृशमशिवम्। अविद्यमानः शम उपशमो यस्यां सा तथाविधा दशावस्था यत्र तदशमदशम्॥

संस्कृतपैशाचिकयोः श्लेषोदाहरणमाह—

चम्पककलिकाकोमलकान्तिकपोलाथ दीपिकानङ्गी।
इच्छति गजपतिगमना चपलायतलोचना लपितुम्॥ १९॥

चम्पकेति। काचिन्नायिका गजेन्द्रसमगमना चञ्चलदीर्घलोचना च। तथा चम्पककलिकावत्कोमलकान्ती रम्यरुचो कपोलौ यस्याः सा तथाविधा। तथानङ्गस्येयमानङ्गी दीपिका। तया कामस्य प्रकाशितत्वात्। सा लपितुं वक्तुमिच्छति॥

अथ संस्कृतसूरसेनीश्लेषमाह—

अधरदलं ते तरुणा मदिरामदमधुरवाणि सामोदम् ।
साधु पिबन्तु सुपीवरपरिणाहिपयोधरारम्भे ॥ २० ॥

अधरेति । मदिरामदेन मधुरा वाणी यस्याः सा संबोध्य भण्यते । ते तवाधरदलमोष्ठपल्लवं तरुणा युवानः साधु यथा भवत्येवं पिबन्तु चुम्बन्तु । कीदृशम् । सामोदं सुगन्धि । किंविशिष्टे । सुष्ठु पीवरो मांसलः परिणाही परिमण्डलः पयोधरारम्भः कुचाभोगो यस्याः सैवमामन्त्र्यते ॥

संस्कृतापभ्रंशश्लेषमाह—

क्रीडन्ति प्रसरन्ति मधु कमलप्रणयि लिहन्ति ।
भ्रमरा मित्र सुविभ्रमा मत्ता भूरि रसन्ति ॥ २१ ॥

क्रीडन्तीति । कश्चित्कंचिदाह—हे मित्र, भ्रमरा मत्ताः सन्तः क्रीडन्ति विचरन्ति। प्रसरन्तीतस्ततो गच्छन्ति । तथा मधु मकरन्दं कमलप्रणयि पद्मसंबद्धं लिहन्त्यास्वादयन्ति । कीदृशाः । सुष्ठु विभ्रमो येषां ते तथाविधाः । तथा भूरि प्रभूतं रसन्ति शब्दायन्ते । अन्योऽपि मत्त एवंविधो भवति ॥

भाषाश्लेषमुपसंहरन्नाह—

एवं सर्वासामपि कुर्वीत कविः परस्परं श्लेषम् ।
अनयैव दिशा भाषारूप्यादी रचयेद्यथाशक्ति ॥ २२ ॥

एवमिति । यथा संस्कृतभाषाया अन्याभिर्भाषाभिः सह श्लेषः कृत एवमन्यासामपि परस्परं कर्तव्योऽसौ । तद्यथा—प्राकृतभाषाया मागधिकापैशाचीसूरसेन्यपभ्रंशैः सह, मागधिकायाः पैशाचीसूरसेन्यपभ्रंशैः, पैशाच्याः सूरसेन्यपभ्रंशाभ्याम्, सूरसेन्या अपभ्रंशेन । एते दश भेदाः प्राच्यैः सह द्वियोगे सर्व एव पञ्चदश भेदा भवन्ति । तथानयैव दिशानेनैव न्यायेन त्र्यादीस्तिस्रश्चतस्रः पञ्च षड्वा युगपच्छिष्टा भाषा यथासामर्थ्यमेकवाक्यतया भिन्नवाक्यतया वा रचयेत् । तत्र त्रियोगे विंशतिर्भेदाः । यथा—सं० प्रा० मा० १, सं० प्रा० पै० २, सं० प्रा० सू० ३, सं० प्रा० अ० ४, प्रा० मा० पै० ५, प्रा० मा० सू० ६, प्रा० मा० अ० ७, मा० पै० सू० ८, मा० पै० अ० ९, पै० सू० अ० १०, सं० मा० पै० ११, सं० मा० सू० १२, सं० मा० अ० १३, प्रा० पै० सू० १४, प्रा० पै० अ० १५, प्रा० सू० अ० १६, सं० पै० सू० १७, सं० पै० अ० १८, प्रा० सू० अ० १९, सं० सू० अ० २० । चतुर्योगे तु पञ्चदश । तद्यथा—सं० प्रा० मा० पै० १, सं० प्रा० मा० सू० २, सं० प्रा० मा० अ० ३, प्रा० मा० पै० सू० ४, प्रा० मा० पै० अ० ५, मा० पै० सू० अ० ६, सं० मा० पै० सू० ७, सं० मा० पै० अ० ८, सं० पै० सू० अ० ९, प्रा० पै० सू० अ० १०, सं० प्रा० सू० अ० ११, सं० मा० सू० अ० १२, सं० प्रा० पै० सू० १३, सं०

प्रा० पै० अ० १४, प्रा० मा० सू० अ० १५ । पञ्चयोगे षट्। तद्यथा—सं० प्रा० मा० पै० सू० १, सं० प्रा० मा० पै० अ० २, सं० मा० पै० सू० अ० ३, सं० प्रा० पै० सू० अ० ४, सं० प्रा० मा० सू० अ० ५, प्रा० मा० पै० सू० अ० ६ । षड्योगे त्वेक एव भेदः ॥

तत्र षड्योगादिकप्रदर्शनायैकार्थश्लेषमेकमुदाहरणमाह—

अकलङ्ककुल कलालय बहुलीलालोल विमलबाहुबल ।
खलमौलिकील कोमल मङ्गलकमलाललाम लल ॥ २३ ॥

अकलङ्केति । हे एवंविध, त्वं लल क्रीड । कीदृश । अकलङ्ककुल निर्मलान्वय । कलालय कलावास । बहुलीलालोल प्रचुरविलासलम्पट । विमलबाहुबल प्रकटभुजपराक्रम । खलमौलिकील दुर्जनशिरःशङ्को । कोमल कमनीय । मङ्गलकमलाललाम जयलक्ष्मीचिह्न । अत्रैकस्मिन्नर्थे भाषाषट्कस्यापि समानं रूपम् ॥

अथ प्रकृतिश्लेषमाह—

सिद्ध्यति यत्रान्यैः सारूप्यं प्रत्ययागमोपपदैः ।
प्रकृतीनां विविधानां प्रकृतिश्लेषः स विज्ञेयः ॥ २४ ॥

सिद्ध्यतीति । यत्र प्रत्ययैरागमैरुपपदैश्चान्यैस्तैरेव प्रकृतीनां तु नानाप्रकाराणां सारूप्यं समानरूपता सिद्ध्यति स प्रकृतिश्लेषः ॥

तत्रोदाहरणमाह—

परहृदयविदसुरहितप्राणनमत्काव्यकृत्सुधारसनुत् ।
सौरमनारं कलयति सदसि महत्कालचित्सारम् ॥ २५ ॥

परेति । देवासुरयुद्धं वर्ण्यते—सौरं सुरसमूहः कर्तृ कलयति कलिं गृह्णाति । युद्ध्यत इत्यर्थः । क्व सन्तः । अस्यन्ते क्षिप्यन्ते यत्र तत्सदस्तत्र सदसि युद्धे । सौरं कीदृशम् । परहृदयानि रिपुवक्षांसि विध्यतीति परहृदयवित् । तथासुरहितानां दानवपक्षपातिनां प्राणनं जीवनं मश्नातीत्यसुरहितप्राणमत् । तथा काव्यं दानवगुरुं कृन्तति पीडयतीति काव्यकृत् । तथा सुधारसममृतरसं नौति स्तौतीति सुधारसनुत् । तथा देवत्वान्न विद्यते नारं नरसमूहो यत्र तदनारम् । तथा महत्प्रभूतम् । तथा काले कृत्यकरणसमये चिच्चैतन्यं ज्ञानं यस्य तत्कालचित् । तथा सहारेणारिसमूहेन वर्तते यत्तत्सारं यथा भवत्येवं कलयति । एष एकस्य वाक्यस्यार्थः ॥ परस्यापि तादृशान्येव पदानि । सौरं सूरिसमूहः सारमुत्कृष्टं वस्तु न्याय्यं वा सदसि सभायां कलयति परिच्छिनत्ति । किं कुर्वत्सौरम् । महत्पूजयत्पूज्यजनम् । तथा परहृदयवित्परचित्तज्ञम् । तथासुरहितानां प्राणवर्जितानां प्राणनेन प्रत्युज्जीवनेन माद्यति हृष्यतीत्यसुरहितप्राणनमत् । तथा काव्यं कविकर्म करोतीति काव्यकृत् । तथा शोभनो धारो मर्यादादिधारणं येषां ते सुधाराः सुजनास्तान्स्यन्ति घ्नन्ति ये ते सुधारसाः खलास्तान्नुदति प्रेरयतीति सुधारसनुत् । तथा न विद्यत आरमरिसमूहो यस्य

तदनारम् । तथा कलानां समूहः कालं चिनोत्यर्जयतीति कालचित् । अत्र प्रकृतयो व्यधिविदिप्रभृतयो भिन्नाः । प्रत्ययाः क्विबादय उभयत्रापि त एव । परहृदयादीन्युपपदानि च तान्येव । आगमश्च कालचिदादिपदेऽतोऽन्तागमादिकोऽनन्यः । ननु चैकत्र पक्षेऽतोऽन्तोऽस्ति द्वितीये नास्तीति कथमनन्यः । सत्यम् । नास्यान्योऽस्तीत्यनन्यो द्वितीयपक्षेऽन्यागमाभावादुच्यत इति सुस्थम् ॥

अथ प्रत्ययश्लेषः—

यत्र प्रकृतिप्रत्ययसमुदायानां भवत्यनेकेषाम् ।
सारूप्यं प्रत्ययतः स ज्ञेयः प्रत्ययश्लेषः ॥ २६ ॥

यत्रेति । यत्र प्रकृतिप्रत्ययसमुदायानां बहूनां प्रत्ययात्सकाशात्सारूप्यं समानरूपता भवति स प्रत्ययश्लेषो ज्ञातव्यः ॥

उदाहरणम्—

तापनमाजं पावनमारं हारं पराप दासेयः ।
कारं चारणमाहितमाज दरं साधनं बहुशः ॥ २७ ॥

तापनमिति । एष दासेयो दासीपुत्रश्चौरो हारं मुक्ताकलापं ह्रियमाणं वा वस्तु पराप मुषित्वा प्राप्तवान् । कीदृशम् । तापयतीति तापनम् । बन्धादिहेतुत्वात् । तथा अज्यते क्षिप्यतेऽनेनेत्याजयतीति वा आजम् । चौरो हि चारकादौ क्षिप्यते । तथा पावयतीति पावनः शुद्धिकृन्मारो मरणं यत्र तत्पावनमारम् । तथा स दासेयो हरणकाले दरं भयमाज क्षिप्तवान् । कीदृशं दरम् । सधनादीश्वरादागतं साधनम् । आहितं हृदये निहितम् । पुनः कीदृशं दरम् । करयोरिदं कारम् । तथा चरणयोः पादयोरिदं चारणम् । करचरणखण्डनादिभयं नाजीगणदित्यर्थः । यतोऽसौ बहून्श्यतीति बहुशः । बहवस्तेन धनाद्यपहारतस्तनूकृता इत्यर्थः । एष एकोऽर्थः ॥ द्वितीयस्तु—आसेय आरं गतिं परापत्प्राप्तवान् । 'षिञ् बन्धने' । आसेतव्य आसेयो मोक्षमप्राप्तो ज्ञानी भण्यते । ईषत्कर्मबन्धनात् । कीदृशमारम् । तपनस्येमं तापनम् । अजस्येममाजम् । पवनस्येमं पावनम् । हरस्येमं हारम् । सूर्यविष्णुवायुरुद्राणां संबन्धिनीं गतिं लेभ इत्यर्थः । यतोऽसौ कारं क्रियामाजत्यक्तवान् । कीदृशं कारम् । चारयति गमयति संसारे प्राणिनमिति चारणम् । पुनः कीदृशम् । अहितानां रागादीनामिदमाहितम् । किं तत् । साध्यतेऽनेनेति साधनम् । रागादीनामुपकरणमित्यर्थः । कथं साधनम् । बहुशोऽनेकशः । अरं शीघ्रम् । अत्र प्रत्ययवशात्प्रकृतिप्रत्ययसमुदायानां सारूप्यम् ॥

अथ विभक्तिवचनश्लेषः—

सारूप्यं यत्र सुपां तिङां तथा सर्वथा मिथो भवति ।
सोऽत्र विभक्तिश्लेषो वचनश्लेषस्तु वचनानाम् ॥ २८ ॥

सारूप्यमिति । यत्र सारूप्यं समानरूपता सुपां स्यादीनां तिङां त्यादीनां मिथः पर-

स्परं सर्वथा सर्वप्रकारैर्भवति सोऽत्र श्लेषाधिकारे विभक्तिश्लेषो ज्ञेयः । वचनानां त्वेकवचनादीनां मिथः सारूप्ये वचनश्लेषः ॥

तत्र तावद्विभक्तिश्लेषोदाहरणम्—

आयामो दानवतां सरति बले जीवतां न नाकिरताम् ।
नयदानवाँछलामः किमभूरसि दारुणः सहसा ॥ २९ ॥

आयाम इति । जीवतां प्राणभृतां दानवतां दानं ददतां सतां संबन्धिनि बले सैन्य आयामो विस्तारः सरति प्रसरति । न नाकिरतां न विक्षिपताम् । कार्पण्येन गलेऽर्थिनं गृह्णतां नेत्यर्थः । कुतः । यतो नयश्च दानं च ते विद्येते यस्यासौ नयदानवान्पुरुषो ललामो भूषणं जगतः । तथा किमः कुत्साया अभूरस्थानं किमभूः । तथा सहसा बलेनासिदारुणः खड्गभीषणश्च ललामः । इत्येकोऽर्थः ॥ अपरस्तु—केचित्सुरा बलिनामानमसुरमूचुः—हे बले वैरोचन, दानवतामसुरत्वमायाम आगच्छामः । कथम् । सरति सप्रीतीति कृत्वा । न पुनर्जीवतां बृहस्पतिताम् । किंभूताम् । नाकिषु देवेषु रतां सक्तां नाकिरताम् । तस्मान्नय प्रापय दानवानसुरान् । येन तेषां मध्ये ललामो विलसामः । किमसि त्वं दारुणः काष्ठादभूः संजातः सहसा । येनास्माकं वचनं न शृणोषीत्यर्थः । अत्रायाम इत्यादयो य एव स्याद्यन्तास्त एव त्याद्यन्ताः शब्दा इति सारूप्यम् ॥

अथ वचनश्लेषोदाहरणम्—

आर्योऽसि तरोमाल्यः सत्योऽनतकुक्षयः स्तवावाच्यः ।
सन्नाभयो युवतयः सन्मुख्यः सुनयना वन्द्यः ॥ ३० ॥

आर्य इति । कश्चिदुत्साह्यते—असि त्वं वन्द्यो वन्दनीयः, यत आर्यो विशिष्टः । तथा तरो बलं माल्यमलंकरणं यस्यासौ तरोमाल्यः । सत्योऽवितथवाक् । अनतानामप्रणतानां कोर्भूमेः क्षयो नाशहेतुरनतकुक्षयः । स्तवैः स्तुतिभिरवाच्यो वक्तुमशक्यः । तथा सन्नानां क्षीणानामभयो न विद्यते भयं यस्मादिति सन्नाभयः । तथा यूनस्तरुणांस्तयतेऽभियुङ्क्ते इति युवतयः । सतां साधूनां मुख्य आद्यः । तथा शोभनो नयोऽस्येति सुनयः स चासौ ना च । सुनीतिपुरुष इत्यर्थः । एष एकवचनेनैकस्य वाक्यस्यार्थः ॥ अपरस्य तु—कश्चिद्राजानमाह—तव संबन्धिन्य आर्योऽरिसक्ता युवतयस्त्रियो वन्द्यो ग्रहानीता एवंविधाः । असिता रोमाली यासां तास्तथाभूताः । तथा सत्यः साध्व्यः । नतकुक्षयः कृशोदर्यः । अवाच्योऽधोमुख्यः । तथा सती रम्या नाभिर्यासां ताः सन्नाभयः । तथा सच्छोभनं मुखं यासां ताः सन्मुख्यः । शोभने नयने यासां ताः सुनयनाः । अत्रार्य इत्यादीनि पदानि बहुवचनान्तानीति वचनश्लेषः ॥

एवं श्लेषलक्षणमभिधाय पूर्वकविलक्ष्यसंग्रहाय लक्षणशेषमाह—

भाषाश्लेषविहीनः स्पृशति प्रायोऽन्यमप्यलंकारम् ।
धत्ते वैचित्र्यमयं सुतरामुपमासमुच्चययोः ॥ ३१ ॥

भाषेति । अयं पूर्वोक्तश्लेषो भाषाश्लेषरहितः प्रायो बाहुल्येनान्यमप्यलंकारमर्थविषयं व्यतिरेकादिकं स्पृशति । श्लेषस्याप्यौपम्यादिभिः सह संकरो भवतीत्यर्थः । अपिशब्दो विस्मये । प्रायोग्रहणमसाकल्यप्रतिपादनार्थम् । अन्यमलंकारं स्पृशति परं न सर्वमेवेत्यर्थः । तत्रापि सुतरामतिशयेन वैचित्र्यं रम्यत्वमयं श्लेष उपमासमुच्चययोर्धत्ते धारयति । उपमासाहचर्यात्समुच्चयोऽप्यत्रौपम्यभेदो गृह्यते ॥

नन्वत्र श्लेषवाक्यद्वये शब्दमात्रं श्लिष्टं भवति, न त्वर्थे इति साम्याभावस्ततश्च कथमुपमासमुच्चयाभ्यां स्पर्शो घटत इत्याशङ्क्याह—

स्फुटमर्थालंकारावेतावुपमासमुच्चयौ किं तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः ॥ ३२ ॥

स्फुटेति । स्फुटं सत्यमर्थालंकारावेतावुपमासमुच्चयौ न कदापि स्वरूपं त्यजतः । किं तु शब्दमात्ररूपं सामान्यं साधारणं धर्ममाश्रित्य संभवतः । ताभ्यां योगो घटत इत्यर्थः । अर्थतो न सादृश्यं किं तु वाक्यद्वयसाधारणशब्दाश्रयं सादृश्यं विद्यत इति तात्पर्यार्थः ॥

उदाहरणमाह—

यदनेकपयोधिभुजस्तवैव सदृशोऽस्यहीनसुरतरसः ।
ननु बलिजितः कथं ते सदृशस्तदसौ सुराधिकृतः ॥ ३३ ॥

यदिति । कश्चिदुच्यते—त्वं तवैव सदृशो नान्यस्येत्यनन्वयानामुपमाविशेषणद्वारेण साम्यमाह—कीदृशस्त्वम् । अनेकपानां द्विपानां योद्धा भुजो बाहुर्यस्यासावनेकपयोधिभुजः । तथाहीनः परिपूर्णः सुरतरसो निधुवनरसो यस्यासावहीनसुरतरसः । तव कीदृशस्य । अनेकांश्चतुरः पयोधीन्समुद्रान्भुनक्ति रक्षतीत्यनेकपयोधिभुक्तस्य । तथाहीनामिनो नागराजः सुरा देवास्तेषामिव तरो बलं यस्यासावहीनसुरतरास्तस्य । अत्र प्रथमानिर्दिष्टमुपमेयं षष्ठीनिर्दिष्टमुपमानमनयोस्तु न वस्तुतः किंचिदपि साम्यमस्ति, किं तु तत्प्रतिच्छायशब्दप्रयोगात्साम्यं प्रतिभासते । एवमुत्तरत्रापि योज्यम् । किमिति । त्वं तवैव सदृशो न त्विन्द्रस्येत्याह—नन्वित्यादि । ते तव कथमसौ सदृश इति व्यतिरेकोऽयमलंकारः । कीदृशस्य ते । बलिनः समर्थाञ्जयत्यभिभवतीति बलिजित्तस्य बलिजितः । तथा सुराणामाधोन्मनःपीडाः कृन्ततीति सुराधिकृत्तस्य सुराधिकृतः । इन्द्रस्तु कीदृशः । बलिनाम्ना दानवेन जितः पराभूतः । तथा सुरैरधिकृतो राज्ये नियोजितः । एवं त्वं सुराणामाधीञ्छिनत्सि, स तु सुरैरधिकृत इति स्फुट एव तवेन्द्रस्य च विशेषः । यत्तच्छब्दौ हेत्वर्थौ । नन्वमर्षे । यस्मात्त्वं तवैव सदृशस्तस्मात्तव कथमिन्द्रः सदृशो भवतीत्यर्थः ॥

उपमासमुच्चयोदाहरणमाह—

वसुधामहितसुराजितनीरागमना भवांश्च वर्षाश्च ।
सुरचितवराहवपुषस्तव च हरेश्चोपमा घटते ॥ ३४ ॥

वसुधेति। त्वं वर्षीश्च सदृशौ। त्वं तावत्कीदृशः। वसु धनम्, धाम तेजः, ताभ्यां हितमनुकूलं सुरैर्देवैरजितमपराभूतं नीरागं रागरहितं मनश्चित्तं यस्य स तथोक्तस्त्वम्। वर्षीस्तु वसुधायां भुवि महितं पूजितं सुष्ठु राजितं शोभितं नीरागमनं जलागतिर्यासु तास्तथोक्ताः। चशब्दावत्र समुच्चयार्थौ। साधारणविशेषणादौपम्यस्य सद्भावः। शुद्धाया उपमाया उदाहरणमाह—सुरचितेत्यादि। तव विष्णोश्च साम्यं घटते। कीदृशस्य तव। सुष्ठु रचितं वरं श्रेष्ठमाहवं समरं पुष्णाति पुष्टिं नयतीति यस्तस्य सुरचितवराहवपुषः। हरेस्तु सुरैर्देवैश्चितं व्याप्तं वराहवपुः सूकरशरीरं यस्य स तथा तस्य। अत्रापि साधारणशब्दयोगात्साम्यम्, न त्वर्थतः॥

अथ श्लेषमुपसंहरन्नाह—

शब्दानुशासनमशेषमवेत्य सम्य-
गालोच्य लक्ष्यमधिगम्य च देशभाषाः।
यन्नादधीत्य विविधानभिधानकोषा-
ञ्श्लेषं महाकविरिमं निपुणो विदध्यात्॥ ३९॥

शब्दानुशासनमिति। इदमिदं च कृत्वा ततो महाकविरिमं श्लेषं कुर्यात्। किं कृत्वा। शब्दानुशासनं व्याकरणं समग्रं सम्यग्ज्ञात्वा। तथा लक्ष्यमुदाहरणं महाकविकृतमालोच्य। तथा सूरसेन्यादिदेशभाषा विदित्वा। तथाभिधानकोषान्नाममाला अधीत्य पठित्वेति। एतच्च कृत्वा निपुणः कुशलो महाकविश्च यः स श्लेषं कुर्यादिति॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेत-
श्चतुर्थोऽध्यायः समाप्तः।

पञ्चमोऽध्यायः।

वक्रोक्त्यनुप्रासयमकश्लेषान्निरूप्य क्रमप्राप्तं चित्रं प्रतिपादयितुमाह—

भङ्ग्यन्तरकृततत्क्रमवर्णनिमित्तानि वस्तुरूपाणि।
साङ्कानि विचित्राणि च रच्यन्ते यत्र तच्चित्रम्॥ १॥

भङ्ग्यन्तरेति। यत्र काव्ये वस्तूनां चक्रादीनां रूपाणि संस्थानानि रच्यन्ते निबध्यन्ते तच्चित्रसादृश्यादाश्चर्याद्वा चित्रं नामालंकारः। काव्ये कथं वस्तुरूपाणि रच्यन्त इति प्रश्ने विशेषणद्वारेण युक्तिमाह—भङ्ग्यन्तरेण चक्रादिविच्छित्तिलक्षणेन प्रकारेण कृतः स सकललोकप्रसिद्धः क्रमो रचनापरिपाटी येषां ते च ते वर्णाश्चाक्षराणि च ते निमित्तं कारणं येषां वस्तुरूपाणां तानि तथोक्तानि। तथा सहाङ्केन स्वनामचिह्नेन वर्तन्त इति साङ्कानि। तथा विचित्राणि चान्यानि च सर्वतोभद्रानुलोमप्रतिलोमादीनि। चकारो वस्तुरूपेषु मध्ये सर्वतोभद्रादिसमुच्चयार्थः॥

सामान्यतश्चित्रलक्षणमभिधाय विशेषेणाभिधातुं तद्भेदानाह—

तच्चक्रखड्गमुसलैर्बाणासनशक्तिशूलहलैः ।
चतुरङ्गपीठविरचितरथतुरगगजादिपदपाठैः ॥ २ ॥
अनुलोमप्रतिलोमैरर्धभ्रममुरजसर्वतोभद्रैः ।
इत्यादिभिरन्यैरपि वस्तुविशेषाकृतिप्रभवैः ॥ ३ ॥
भेदैर्विभिद्यमानं संख्यातुमनन्तमस्मि नैतदलम् ।
तस्मादेतस्य मया दिङ्मात्रमुदाहृतं कवयः ॥ ४ ॥

तदिति । अनुलोमेति । भेदैरिति । तदेतच्चित्रं यस्मादित्यादिभिरुक्तैरन्यैरनुक्तैरपि । भेदैः कीदृशैः । वस्तुविशेषाकारात्प्रभवन्ति जायन्ते ये तैर्विभिद्यमानं भेदेन व्यवस्थाप्यमानमनन्तमसंख्यातं तत्संख्यातुं संख्यया प्रतिपादयितुं नालं न समर्थोऽस्म्यहम् । तस्मादेतस्य मया दिङ्मात्रमुदाहृतं दर्शितं हे कवयः । इत्यादिभिर्भेदैरित्युक्तं तानेव दर्शयति—तच्चक्रेत्यादि । चक्रादीनि प्रतीतानि न वरम् । बाणासनं धनुः । चतुरङ्गपीठं द्यूतकारिविदितचतुरङ्गफलकस्तत्र रचितै रथतुरगगजादिपदपाठैः । पठ्यतेऽनेनेति पाठः श्लोकः । आदिग्रहणान्नरपदसंग्रहः । क्रमव्युत्क्रमाभ्यां यः सदृशः सोऽनुलोमप्रतिलोमश्लोकः । अर्धभ्रमणादर्धभ्रमः । सर्वतस्तु भ्रमणात्सर्वतोभद्रः । आदिग्रहणात्पद्मगोमूत्रिकादिसंग्रहः ॥

किं पुनस्तेषां वस्तुरूपाणां विरचने लक्षणमित्याह—

यन्नाम नाम यत्स्यात्तदाकृतिर्लक्षणं मतं तस्य ।
तल्लक्ष्यमेव दृष्ट्वावधार्यमखिलं तदन्यदपि ॥ ५ ॥

यदिति । चक्रादिकं प्रसिद्धं नाम संज्ञा यस्येति विग्रहः । तद्यन्नाम । द्वितीयस्तु नामशब्दः प्राकाश्ये । तदेवंविधं वस्तु यत्स्यात्तदाकृतिस्तदाकारस्तस्य चित्रस्य लक्षणमभिहितम् । यदनुकार्यस्य चक्रादेर्नाम संस्थानं च तदेवानुकरणस्य करणीयमित्यर्थः । तच्च चित्रलक्षणमखिलं समग्रं माघादिमहाकविरचितं लक्ष्यमुदाहरणमेव दृष्ट्वावधार्यं ज्ञेयम् । ततो वस्तुरूपादन्यदपि सर्वतोभद्रादिकं लक्ष्यमेव दृष्ट्वावधार्यम्, अथवा ततो लक्ष्योक्ताद्वस्तुरूपादन्यदपि मत्स्यबन्धादिकं स्वधियैवाभ्यूह्यम् । मार्गं दृष्ट्वान्यथापि करणं न दोषायेत्यर्थः । तेन चक्रारनेमिपद्मदलादावनियम उक्तो भवतीति स्थितमेतत् ॥

तत्राष्टभिः श्लोकैर्गोमूत्रिकृतखड्गादिवस्तुरूपान्तरैश्चक्रमाह—

मारारिशक्ररामेभमुखैरासाररंहसा ।
सारारब्धस्तवा नित्यं तदर्तिहरणक्षमा ॥ ६ ॥
माता नतानां संघट्टः श्रियां बाधितसंभ्रमा ।
मान्याथ सीमा रामाणां शं मे दिश्यादुमादिजा ॥७॥ खड्गबन्धः ॥ (युग्मम्)

मारेति। मातेति। उमा गौरी शं सुखं मे मह्यं दिश्याद्देयात्। कीदृशी। आदिजा जगदादिभवा। तथा मारारिः शंभुः, शक्र इन्द्रः, रामो जामदग्न्यो दाशरथिर्वा, इभमुखो गणाधिपस्तैरासाररंहसा वेगवर्षवद्वेगेनादरावेशात्सार उत्कृष्ट आरब्धः प्रकृतः स्तवः स्तुतिर्यस्याः सा। तथा नित्यं सदा तेषां मारारिप्रभृतीनामर्तेः पीडाया हरणेऽपनयने क्षमा समर्था। तथा नतानां मातेव माता। वत्सलत्वात्। तथा संघट्टः समूहः। कासां श्रियामृद्धीनाम्। तथा बाधितो नाशितो भक्तानां संभ्रमो भयं यया सा तथाभूता। तथा मान्या पूज्या। अथ सीमा मर्यादा रामाणां स्त्रीणाम्। सर्वोत्तमेत्यर्थः। अनेन संदानितकेन[1] खड्ग उत्पद्यते। आद्यः श्लोकः फलरूपोऽपरो मुष्टिरूपः। 'सा'शब्दः फलान्ते तैक्ष्ण्याकारी 'दिजा' इति मुष्टेरुपरि 'मा'शब्दौ तत्र साधारणौ। अस्य न्यासः॥

अथ मुसलधनुषी—

मायाविनं महाहावा रसायातं लसद्भुजा।
जातलीलायथासारवाचं महिषमावधीः॥ ८॥ मुसलम्॥
मामभीदा शरण्या मुत्सदैवारुक्प्रदा च धीः।
धीरा पवित्रा संत्रासात्त्रासीष्ठा मातरारम॥ ९॥ धनुः॥ (युग्मम्)

मायाविनमिति। मामिति। हे मातः, सा त्वं संत्रासाद्भयान्मां त्रासीष्ठा रक्ष। आरम व्यापारान्तरान्निवर्तस्व। पश्य मामित्यर्थः। या त्वं महिषं महिषासुरमावधीर्हतवतीति संबन्धः। कीदृशं महिषम्। मायाविनं छद्मपरम्। त्वं तु महाहावा महान्हावश्चेष्टाविशेषो यस्याः सा। रसेन दर्पेणायातं महिषम्। त्वं लसद्भुजा लसन्तौ भुजौ यस्याः। तथा जातलीला संपन्नविलासा। महिषमयथासारवाचमयथासारा मर्यादोल्लङ्घिनी वाग्यस्य। तथा त्वमभियमभयं ददासीत्यभीदा। शरणे साधुः शरण्या। मुत्प्रहृष्टा। सदैव सर्वकालमरुक्प्रदा नीरोगत्वदायिनी। चः समुच्चये। धीर्बुद्धिः। तद्धेतुत्वात्। धीरा निर्भया। पवित्रा पावनी। अत्राद्यश्लोकेन मुसलम्—मध्ये तनु पार्श्वयोः स्थूलमेकत्र प्रान्ते तीक्ष्णम्। तत्र मध्ये 'वारसा' इत्यक्षरत्रयं साधारणमन्ते 'जा' इति। द्वितीयश्लोकेन धनुः—तत्राद्यमर्धं कुटिलं वंशभागे, द्वितीयं गुणाकारं 'मा'शब्दोऽधस्तनकोटिप्रान्ते, तदुपान्ते च मकारो द्विरावृत्ति, 'धी'शब्दश्च शिखारूपः। न्यासः॥

अथ शरः—

माननापरुषं लोकदेवीं सद्रस सन्नम।
मनसा सादरं गत्वा सर्वदा दास्यमङ्ग ताम्॥ १०॥ शरः॥

माननेति। अङ्गेति कोमलामन्त्रणे। हे सद्रस सुभक्तिभरेणार्द्रहृदय, सर्वदा सदा सादरं सप्रयत्नं मनसा चेतसा तां लोकदेवीं भुवनदेवतां सन्नम सम्यक्प्रणम। दासभावं गत्वाभ्युपेत्य। माननया पूजनयापगता रुट् क्रोधो यस्यास्तां माननापरुषम्। सापराधेऽपि

१ संदानितकमिति युग्मस्य संज्ञान्तरम्. २ सर्वेषां बन्धानां न्यासो ग्रन्थसमाप्तौ द्रष्टव्यः.

पूजया सप्रसादामित्यर्थः। अत्र प्रथमपादेन दण्डः, द्वितीयेन फलम्, तृतीयचतुर्थाभ्यां वाजावटनी च। न्यासः॥

अथ शूलम्—

मा मुषो राजस स्वासूंछ्लोककूटेशदेवताम्।
तां शिवावाशितां सिद्ध्याध्यासितां हि स्तुतां स्तुहि॥११॥ शूलम्॥

मा मुष इति। हे राजस रजोगुणयुक्त, स्वासूनात्मप्राणान्मा मुषो मा हार्षीः। तां लोककूटानां जनसमूहानामीशा राजानस्तेषां देवतां स्तुहि नुहि। कीदृशीम्। शिवेन शंभुना वाशितामाहूतां शिवाभिर्वा वाशितां कृतकलकलाम्। सिद्ध्या कार्यसिद्ध्याध्यासितां समधिष्ठिताम्। स्तुतां जगतेति। त्रिशिखमेतेन शूलमुत्पद्यते। प्रथममर्धं दण्डभागे द्वितीयं त्वावर्तपरावर्तैः शिखासु। तत्र सर्वशिखामूले 'तां'शब्दो वारपञ्चकमुच्चार्यते। शिखायामेकस्यां 'शिवा', द्वितीयायां 'सिद्ध्या', मध्यमायां 'स्तुहि'। न्यासः॥

अथ शक्त्यादीनि—

माहिषाख्ये रणेऽन्या नु सा नु नानेयमत्र हि।
हिमातङ्गादिवामुं च कं कम्पिनमुपप्लुतम्॥१२॥ शक्तिः॥
मातङ्गानङ्गविधिनामुना पादं तमुद्यतम्।
तङ्गयित्वा शिरस्यस्य निपात्याहन्ति रंहसा॥१३॥ हलम्॥
इतीक्षिता सुरैश्चक्रे या यमाममायया।
महिषं पातु वो गौरी सायतासिसितायसा॥१४॥ रथपदम्॥ (विशेषकम्)

माहिषेति। मातङ्गेति। इतीति। सा गौरी वो युष्मान्पातु रक्षतु। या सुरैरित्थमीक्षिता सती महिषं यमामं यमगामिनं मृतममाययाच्छद्मना चक्रे कृतवती। किंभूता। आयतैर्दीर्घैरसिभिः सितो बद्ध आयोऽर्थागमो यैस्तान्दानवादीन्स्यति हिनस्ति या सा तथोक्ता। केक्षिता। माहिषाख्ये रणे महिषासुरसंबन्धिनि समरे। कथमीक्षिता। नानानेकप्रकारम्। तदेव नानात्वमाह—अन्या नु सा न्विति। नुर्वितर्के। अत्र रण इयं देवी किमन्या स्यादुत सैव। भयानकत्वादनिश्चयः। तथैवंवादिभिः सुरैरीक्षिता यथामुं महिषं कं कुत्सितम्। कम्पिनं कम्पयुक्तम्। कुत इव। हिमातङ्गादिव हिमर्तेरिव। तथोपप्लुतं मदोद्धतमाहन्ति मारयति। केनाहन्ति। अमुना प्रत्यक्षदृष्टेन मातङ्गानङ्गविधिना। सदर्पत्वाद्गजविधिना, सलीलत्वादनङ्गविधिना। किं कृत्वा। तं लोकप्रसिद्धं पादमुद्यतमुत्पाटितं तङ्गयित्वा भ्रमयित्वा। तदनन्तरं चास्य महिषस्य शिरसि रंहसा वेगेन निपात्य निःक्षिप्य। इत्यादि जल्पद्भिः सुरैरीक्षिता यमामं चक्र इति संबन्धः। देवतास्तुत्या चैतदत्र सूच्यते—यथा प्रायेण चित्रस्य देवतास्तुतिर्विषयो न सरसं काव्यमिति। अत्राद्यश्लोकेन मध्यतन्वी तीक्ष्णप्रान्ता शक्तिरुत्पद्यते। तत्र 'हिमातं' इत्यक्षरत्रयं मध्ये, 'नुसा'

अधः, 'कं' उपरि । तत्र 'हि' द्विरावृत्तिः, 'मातंनुकं' एते द्विरावृत्तयः । द्वितीयश्लोकेन हलम् । तत्र हलप्रविष्टेषाशल्यभागे 'तं'शब्दः, 'मा' तस्य पृष्ठे, 'नामु' फलतीक्ष्णाग्रे, 'गानङ्गविधि पादं तमुद्य'वर्णाः फलेऽनुलोमविलोमश्रेणिद्वयस्थाः, 'गयित्वा शिरस्यस्य' इतीषायाम्, 'निपात्या' हलोर्ध्वभागे, हकारो हलोर्ध्वभागे कीलिकाशल्यमध्ये, हकारोर्ध्वे 'न्ति', हकाराग्रे 'रं', हकारपृष्ठे 'सा' । मारारिप्रमुखैरेभिरंष्टभिः श्लोकैरष्टारं चक्रमुत्पद्यते । अत्र पूर्वार्धान्यष्टाराः । अन्त्यार्धानि त्वेका नेमिः । 'मा'शब्दो नाभिः सर्वसाधारणः । अर्धान्त्यश्लोकान्त्याक्षराणि च । अत्र च चक्रे स्वनामाङ्कभूतोऽयं श्लोकः कविनान्तर्भावितो यथा—

'शतानन्दापराख्येन भट्टवामुकसूनुना ।
साधितं रुद्रटेनेदं सामाजा धीमतां हितम् ।।'

अस्यार्थः—वामुकाख्यभट्टसुतेन शतानन्द इत्यपरनाम्ना रुद्रटेन कविना साधितं निष्पादितमिदं चक्रं काव्यं वा । कीदृशेन । साम गीतिविशेषमजति प्राप्नोतीति सामाक्, तेन सामाजा । सामवेदपाठकेनेत्यर्थः । तच्च धीमतां बुद्धिमतां हितमुपकारकम् । न्यासः । तृतीयश्लोकेन रथपदानि पूर्यन्ते । रथपदन्यायेन युक्पादयोरावृत्तिनिवृत्तिभ्यां पाठः ।।

अथ तुरगपदपाठः—

सेना लीलीलीना नाली लीनाना नानालीलीली ।
नालीनालीले नालीना लीलीली नानानानाली ।। १९ ।।

सेनेति । तत्र—सेना, लीलीलीनाः, न, आली, लीनानाः, नान्नालीलीली, न, आलीनाली, ईले, ना, आलीनाः, लीलीली, नानाना, अनाली, इति पदानि । पदार्थस्त्वयं यथा—कश्चिद्वक्ति—अहं ना पुरुषः सेनाः पृतना ईले स्तौमि। 'ईड स्तुतौ' । वर्तमानायां ए। सेनाः स्तौम्यहमिति संबन्धः । यद्वा परोक्षायां 'ईले' इति रूपम् । बहुलत्वादाम्प्रत्ययाभावः । ततः कश्चिन्ना सेना ईले । तुष्टावेत्यर्थः । कीदृशीः सेनाः । लीला विद्यते येषां लीलिनस्तौतीत्येवंशीलो लीलीली स इनः स्वामी यासां ता लीलीलीनाः । ना कीदृशः । आलमनर्थोऽसत्यं वा विद्यते यस्य स आली एवंविधो न । तथा लीनानि संबद्धान्यनांसि शकटानि शकटारूढा वा जना यस्य स लीनानाः । तथा नानाप्रकारा आल्यः पङ्क्तयो नानाल्यस्तासां लीः श्लेषस्तां लान्ति गृह्णन्ति ये ते नानालीलीलाः पुरुषा विद्यन्ते यस्य स नानालीलीली । व्यूहाश्रितनरनायक इत्यर्थः । तथा आलीनानामाश्रितानामाली अनर्थकरः आलीनाली एवंविधो न । सेवकानुकूल इत्यर्थः । कीदृशीः सेनाः । आलीना आश्लिष्टाः । ना कीदृशः । लीलिनी लीलावती सुखितत्वात्प्राणिनामिला भूर्येषां ते लीलीला नृपास्ते यस्य सन्ति स लीलीली । तथा नानाप्रकारो ना मनुष्यो यस्य स नानाना । तथा आली मूर्ख उच्यते आलमस्यास्तीति वा न आली अनाली । प्राज्ञ इत्यर्थः । अत्र तुरगपदपरिज्ञानाय श्लोको यथा—'कशङ्गे-

नागभटाय तथखेवेत्ररावघे । षजेथाढेपचेमेठे दोणसछलडेफडे ॥' अमुं श्लोकं 'सेनाली' इत्यादि प्रस्तुतंश्लोकोपरिभागे यथाक्रमाक्षरं लिखित्वा तत एतच्छ्लोकगतमात्रकापठितकादिवर्णक्रमानुमिततुरगपदक्रमेण प्रस्तुतः श्लोक उच्चेय इति ॥

अथ गजपदपाठमाह—

ये नानाधीनावा धीरा नार्धीवा राधीरा राजन् ।
किं नानाशं नाकं शं ते नाशङ्कन्तेऽशं ते तेजः ॥ १६ ॥

य इति । अत्र—ये, नानाधीनावाः, धीराः, न, अधीवाः, राधीराः, राजन्, किं, नानाशं, नाकं, शं, ते, न, आशङ्कन्ते, अशं, ते, तेजः, इति पदानि । पदार्थस्त्वेवम्—यथा कश्चिद्राज्ञः कस्यापि सेवकानभिनन्दति—हे राजन्, ये तदीयभृत्या एवंगुणयुक्तास्ते किं नाकस्येदं नाकं स्वर्गसक्तं शं शिवं सुखमाशङ्कन्ते । नत्र उत्तरत्र संबन्धः । किंशब्दकाक्वावश्यं तेषां स्वर्गसुखं भवतीत्यर्थः । कीदृशा ये । नानाविधा आधयो यस्य स नानाधिः स चासाविनश्च प्रभुस्तमवन्ति विनाशाद्रक्षन्तीति नानाधीनावाः । तथा धीराः सत्त्वयुक्ताः । तथा दुष्टा धीर्बुद्धिरधीस्तां वान्ति गच्छन्त्याश्रयन्त्यधीवा एवंविधा न । तथा 'राधो हिंसायाम्' । राधिनो हिंसकास्तानीरयन्तीति राधीराः । शं कीदृशम् । नानाविधा आशाः सुखाभिलाषा यत्र तन्नानाशम् । किं च ते तव संबन्धि यत्तेजस्तदशं दुःखरूपमित्येवं नाशङ्कन्ते । प्रभुतेजोऽस्माकं नाशायेति चेतसि नैव कुर्वन्तीत्यर्थः । अत्र गजपदन्यायेन श्लोक उत्पद्यते । स च श्लोकगतप्रथमनवमद्वितीयदशमतृतीयैकादशचतुर्थद्वादशादिक्रमेण उच्चेय इति ॥

अथ प्रतिलोमानुलोमपाठं स्रग्धरावृत्तमाह—

वेदापन्ने स शक्के रचितनिजरुगुच्छेदयत्नेऽरमेरे
देवासक्तेऽमुदक्षो बलदमनयदस्तोददुर्गासवासे ।
सेवासर्गादुदस्तो दयनमदलवक्षोदमुक्ते सवादे
रेमे रत्नेऽयदच्छे गुरुजनितचिरक्लेशसन्नेऽपदावे ॥ १७ ॥

वेदापन्न इति । स कश्चिद्गुणिप्रियो रत्ने गुणवति जने रेमे ननन्द । 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' । वेदानापन्नो वेदापन्नस्तत्र । अधीतवेद इत्यर्थः । तथा शक्के प्रियंवदे । तथा रचितः कृतो निजाया रागद्वेषात्मिकाया रुजो बाधाया उच्छेद उन्मूलने यत्नो येन तस्मिन्रचितनिजरुगुच्छेदयत्ने । तथा न रमन्ते सुजनेषु धर्मे वा ये ते अरमा दुर्जनास्तानीरयति यस्तस्मिन्नरमेरे । तथा देवेष्वासक्तो देवासक्तस्तस्मिन्देवासक्ते । देवपूजोद्यत इत्यर्थः । स कीदृशः । न मोदन्ते प्रमोदं यान्तीत्यमुन्दि अक्षाणीन्द्रियाणि यस्य सोऽमुदक्षो जितेन्द्रियः । तथा बलदमनयदः शक्त्युपशमनीतिदाता । रत्ने कीदृशे । तोदस्य व्यथाया दुर्गा इव दुर्गाः परानभिभूतास्तानप्यस्यन्ति क्षिपन्तीति तोददुर्गासास्तेषां वासे निलये । शूराणामपि शूरा यमाश्रिता इत्यर्थः । स कीदृशः । सेवायां परप्रणतौ सर्गे

उत्साहस्तत उदस्तो निवृत्तः। स्वाधीन इत्यर्थः। रत्ने कीदृशे। दयनं दानं रक्षा वा तेन यो मदलवो गर्वकणिका तेन यः क्षोदः परिकत्थनं तेन मुक्ते रहिते। प्रियं कृत्वाप्यगर्वित इत्यर्थः। यद्वा अदयनेन निर्दयत्वेन मदलवेन गर्वलेशेन क्षोदेन हिंसया च मुक्ते। तथा सह वादेन वर्तते सवादस्तस्मिन्। प्रमाणशास्त्रज्ञ इत्यर्थः। तथा अयन्नगच्छन्नच्छो नैर्मल्यं यस्य तत्रायदच्छे। शुद्धिमतीत्यर्थः। तथा गुरुभिः पूज्यैर्जनितो यश्चिरं क्लेशः शुश्रूषाश्रमस्तेनैव सन्ने श्रान्ते। न त्वन्येन। तत्र वा सन्ने सक्ते। तथा अपदान्पदभ्रष्टानवतीत्यपदावः। यदि वापगतो दाव उपतापो यस्य तस्मिन्निति। यथैवायं श्लोकः क्रमेण पठ्यते, एवं व्यतिक्रमेणापीति प्रतिलोमानुलोमः॥

अथार्धभ्रममाह—

सरसायारिवीरालीरसनव्याध्यदेश्वरा।
सा नः पायादरं देवी याव्यायागमदध्यरि॥ १८॥

सरसेति। सा ईश्वरा देवी गौरी नोऽस्मानरं शीघ्रं पायादव्यात्। या अगमद्गता। कथम्। अध्यरि रिपूनधिकृत्य। कीदृश्यगमत्। अव्याया विगत आयोऽर्थागमो यस्याः सा व्याया, न व्याया अव्याया। सलाभेत्यर्थः। तथा अयनमायः, सरसः सरोष आयो रणे गमनं यस्याः सा सरसाया, सा चासावरिवीराली च शत्रुसुभटपङ्क्तिस्तस्या रसनेनास्वादनेन हिंसया विशेषेण भक्तानामाधीर्मनोदुःखान्यत्ति नाशयतीति सरसायारिवीरालीरसनव्याध्यदा। यदि वा सरसाया अरिवीराल्या रसेन भावेन नव्या स्तुत्या। आध्यदा दुःखनाशिका। अर्धभ्रमणादर्धभ्रमोऽयम्। न तु सर्वतोभद्रवत्सर्वत्र भ्राम्यति। न्यासः॥

अथ मुरजबन्धः—

सरलाबहलारम्भतरलालिबलारवा।
वारलाबहलामन्दकरला बहलामला॥ १९॥

सरलेति। सर्वभाषाभिरमागधिकाभिः शरद्वर्णने श्लोकोऽयम्। तत्र कीदृशी शरद्वर्तते। सरलो दीर्घ आ समन्ताद्बहलेन प्रभूतेनारम्भेण तरलानां चञ्चलानामलिबलानां भ्रमरसैन्यानामारवः शब्दो यस्यां सा सरलाबहलारम्भतरलालिबलारवा। तथा वारलाभिर्हंसीभिर्बहला संतता। यदि वा वारेण परिपाट्या लावो लवनं येषां तानि तथाविधानि हलानि हलकृष्टधान्यक्षेत्राणि यस्यां सा तथाविधा। तथा करं लान्ति गृह्णन्ति ये ते करला नृपाः। अमन्दा यात्रायां सोद्यमाः करला यस्यां सा तथाविधा। तथा बहलानि प्रभूतान्यामलान्यामलकीफलानि यस्यां सा तथाविधा। यदि वा बहलमत्यर्थममला निर्मला बहलामला। अत्र मुरजत्रयमर्धमुरजौ चान्ते भवतः। न्यासः॥

अथ सर्वतोभद्रमाह—

रसा साररसा सार सायताक्ष क्षतायसा।
सातावात तवातासा रक्षतस्त्वस्त्वतक्षर॥ २०॥

रसेति । कश्चिद्राजानमाह—हे सार उत्कृष्ट, तव रक्षतः पालयतः सतः सा रसा पृथ्वी साररसा उत्कृष्टरसास्तु भवतु । हे आयताक्ष दीर्घलोचन, तथा सा क्षतायसा चास्तु । क्षतो नाशित आयोऽर्थागमो यैस्ते क्षतायाश्चौरादयस्तान्स्यत्यन्तं नयतीति कृत्वा । तथा सातं सुखमवतीति सातावा । श्रेयस्करीत्यर्थः । अस्त्विति सर्वत्र योज्यम् । हे अत । अतति नित्यमेवोद्यमं भजत इत्यर्थः । तथा अतासा अक्षया रसा । भवत्वित्यत्रापि योगः । तुर्नियमे । रक्षत एव, न त्ववलिप्तस्य । तथा हे अतक्षर तक्षणं तक्षस्तनूकरणं तं राति ददातीति तक्षरः, न तक्षरोऽतक्षरः । पुष्टिद इत्यर्थः । चतुर्दिशं वाच्यत्वात्सर्वभद्रोऽयं श्लोकः ॥

आदिग्रहणसंग्रहीतं पद्माद्युदाहरणमाह—

या पात्यपायपतितानवतारिताया
यातारितावपति वाग्भुवनानि माया ।
यामानिना वपतु वो वसु सा स्वगेया
यागे स्वसासुररिपोर्जयपात्यपाया ॥ २१ ॥

येति । सा इना स्वामिनी गौरी वो युष्मभ्यं यामानष्टावपि प्रहरान्नित्यं वसु धनं वपतु जनयतु । या अपायपतितानापद्गतान्प्राणिनः पाति रक्षतीति । किंभूता सती । अवतारितः प्रापित आयोऽर्थागमो यया सावतारिताया । तथा याता निवृत्तारिता शत्रुभावो यस्यां सा यातारिता । निर्मत्सरेत्यर्थः । तथा या वाक् वचनरूपा सती भुवनानि जगन्त्यावपति व्याप्नोति । या च तत्त्वतो ज्ञातुमशक्यत्वान्मायेव माया । या च यागे यज्ञे स्वेनात्मनैव गेया स्तुत्या । वाग्रूपत्वात्तस्याः । तथा या चासुररिपोर्विष्णोः स्वसा भगिनी । या च जयं सर्वोत्कर्षवर्तनं भक्तानां पाति रक्षतीति जयपा । तथातिक्रान्ता अपाया अनर्था यया सात्यपाया । निरापदेत्यर्थः । इदमष्टदलं पद्ममिति पूर्वं भणन्ति तत्र सम्यग्बुध्यते । चतुर्दलं तु बुध्यते । यथा 'या'शब्दोऽत्र कर्णिका अष्टवारान्परावर्त्यते । दलानि द्वादशाक्षराणि । तत्र पार्श्ववर्तिनश्चत्वारश्चत्वारो वर्णा दलसंधिगतत्वाद्द्विरावर्त्यन्ते ॥

अथानुलोमविलोमविपर्यस्ताक्षरपाठेन श्लोकाच्छ्लोकान्तरोत्पत्तिमाह। तत्राद्यः श्लोकः—

समरणमहितोपा यास्तनामारिपाता
वनरतिसरमाया वानरा मापसारम् ।
अमरततवरालीमानमासाद्य नेदु
रणमहिमततांशा धीरभावेऽसिराते ॥ २२ ॥

समरणेति । सुग्रीवाङ्गदप्रभृतयोऽत्र वानरा वर्ण्यन्ते—वानरा नेदुः । जगदुरित्यर्थः । कीदृशाः । समौ तुल्यौ रणमहौ सङ्ग्रामोत्सवौ येषां ते समरणमहा इन्द्रजित्प्रभृतयस्ते विद्यन्ते येषां ते समरणमहिनो रावणादयस्तांस्तुपन्ति हिंसन्ति ये ते समरणमहितोपाः ।

तथा यान्ति गच्छन्तीति या अभियोगिनः, अस्तः परित्यक्तो नामो नतिर्यैस्तेऽस्तनामा, याश्च तेऽस्तनामाश्च ते च तेऽरयश्च शत्रवश्च तान्पातयन्ति नाशयन्तीति यास्तनामारिपाताः। यदि वा समशब्दः सर्वनामसु । ततः समरणेषु सर्वसमरेषु महितः पूजित उपायो येषां ते च तेऽस्तनामारिपाताश्चेति समासः । तथा वने रतिर्येषां ते वनरतयो मुनयस्तान्सरन्ति जिघांसयाभिगच्छन्तीति वनरतिसरा राक्षसादयस्तान्मीनन्तीति कर्मण्यणि वनरतिसरमायाः। कथं नेदुः। मापसारम्। मा प्रतिषेधे ततश्चाविद्यमानोऽपसारश्छेदो यत्र कर्मणि तन्मापसारम्। किं कृत्वा नेदुः। अमरैर्देवैस्तता विस्तारिता दत्ता या वराली वरपरम्परा तया मानं पूजां गर्वं वासाद्य प्राप्य । तथा रणमहिम्ना युद्धमाहात्म्येन तता व्याप्ता आशा दिशो यैस्ते तथोक्ताः । कदा नेदुः । धीरभावे धैर्येऽसिना खड्गेन राते दत्ते सति ॥

अस्माच्छ्लोकादेकाक्षरव्यवधानेन द्वयोर्द्वयोश्च विपर्ययपाठेनायं श्लोको निर्याति। यथा—

सरमणाहिमतोयापास्तमानारितापा
वरनतिरसमावायानमारा परं सा ।
अरमत बत रामा लीनसामाद्यदूने
रमणहितमताधीशारवे भासितेरा ॥ २३ ॥

सरमणेति । काचिन्मानिनी प्रसन्नात्र वर्ण्यते—सा रामा युवतिरधीशारवे दयितवचसि परमतिशयेनारमत प्रीतिं कृतवती । बत विस्मये । चित्रं मानिन्यपि प्रसन्ना यत् । कीदृशी । रमणो दयितः स एव संतापापहारित्वाद्धिमतोयं नीहारजलम्, सह तेन वर्तते या सा सरमणहिमतोया । अत एवापास्तो निरस्तो मानारितापो गर्वशत्रुजनितोपतापो यया सापास्तमानारितापा । तथा वरा श्रेष्ठा नतिर्मानपरित्यागेन प्रणतिर्यस्याः सा वरनतिः । यद्वा वरे भर्तरि नतिर्यस्याः । तथा असमा सर्वोत्कृष्टा । तथा अवति रक्षत्यात्मानं प्रियं वेत्यवा । न विद्यते यानं गमनमस्येत्ययानः स्थिरो मारः कामो यस्याः सायानमारा । तथा लीनं संबद्धं साम कोमलवचनं यस्याः सा लीनसामा । प्रियभाषिणीत्यर्थः । कीदृशेऽधीशारवे । आद्यः प्रधानभूतः, दून उपतप्तो गद्गदः, आद्यश्च दूनश्च तत्राद्यदूने । रामा कीदृशी । रमणस्य प्रियस्य हिता च मता च । अनुकूलत्वादिष्टेत्यर्थः । तथा भासिता शोभिता इरा वाणी यस्याः सा भासितेरा । मधुरवागित्यर्थः । अस्माच्छ्लोकात्तथैव पूर्वश्लोको निर्याति । एवमन्येऽपि चित्रप्रकारा महाकाव्येभ्योऽवधार्याः । सर्वेषां स्वरूपदर्शनं कर्तुमशक्यमानन्त्यादिति । एतेषु यमकश्लेषचित्रोदाहरणेषु व्याख्यानान्तराण्यपि महामतिकृतानि दृष्टानि, परमेकैकमेव चार्वित्येकैकमेव लिखितम् । यत उक्तं सुधीभिः—'व्याख्यानमनेकविधं लिङ्गमबोधस्य धूम इव वह्नेः । स्पष्टं मार्गमजानन्स्पृशत्यनेकान्पथो मुह्यन्' इति ॥

अथ य एते मात्राच्युतादयस्ते किमलंकाराः, उत नेत्याशङ्क्याह—

मात्राबिन्दुच्युतके प्रहेलिका कारकक्रियागूढे ।
प्रश्नोत्तरादि चान्यक्रीडामात्रोपयोगमिदम् ॥ २४ ॥

मात्रेति । च्युतकशब्दो गूढशब्दश्चोभयत्र संबध्यते । ततश्च मात्राच्युतकबिन्दुच्युतकप्रहेलिकाकारकगूढक्रियागूढानि प्रश्नोत्तरादि । चः समुच्चये । अन्यत्पूर्वालंकारेभ्यो व्यतिरिक्तं तत्क्रीडामात्रोपयोगम् । मात्रग्रहणेनाल्पप्रयोजनतां सूचयति । अल्पप्रयोजनत्वादेवालंकारमध्ये न संगृहीतम् । काव्येषु च दर्शनाद्वक्तव्यमिति ॥

तल्लक्षणं यथाक्रममाह—

मात्राबिन्दुच्यवनादन्यार्थत्वेन तच्च्युते नाम ।
स्पष्टप्रच्छन्नार्था प्रहेलिकाव्याहृतार्था च ॥ २५ ॥
प्रच्छन्नत्वाद्भवतस्तद्गूढे कारकक्रियान्तरयोः ।
प्रश्नानां च बहूनामुत्तरमेकं भवेद्यत्र ॥ २६ ॥
प्रश्नोत्तरं तदेतद्व्यस्तसमस्तादिभिर्भवेद्बहुधा ।
भेदैरनेकभाषं.....च भिद्यते ॥ २७ ॥

मात्राबिन्दुच्यवनादिति । प्रच्छन्नत्वादिति । प्रश्नोत्तरमिति । मात्रायाः स्वरस्य, तथा बिन्दोरनुस्वारस्य च्यवनाद्भ्रंशाद्धेतोरन्यार्थत्वेन भिन्नाभिधेयत्वेन तच्च्युते मात्राबिन्दुच्युते भवतो नाम । प्रहेलिका द्विधा । स्पष्टप्रच्छन्नार्थाव्याहृतार्था च । तत्र स्पष्टः पदारूढत्वात्प्रच्छन्नश्च प्रश्नवाक्य एवान्तर्गतत्वेन भ्रमकारित्वादर्थो यस्याः सा तथाविधा । तथासाधारणविशेषणोपादानादेवाधिगतत्वेनाव्याहृतः साक्षादनुक्तोऽर्थो यस्यां सा तथाभूता द्वितीया । तथा कर्त्रादिकारकाणां गूढत्वादप्रकटत्वात्कारकगूढम् । क्रियापदानां तु प्रच्छन्नत्वात्क्रियागूढम् । तथा प्रश्नोत्तरमेतद्यत्र बहूनां प्रश्नानां वचनस्यातन्त्रत्वादेकस्य द्वयोर्वैकमेवोत्तरं भवेत् । एतच्च प्रश्नोत्तरं व्यस्तसमस्तादिभिः, आदिग्रहणाद्गतप्रत्यागतैकालापकप्रतिलोमानुलोमादिभिर्भेदैर्बहुधा भवेत् । तथैकभाषत्वेनानेकभाषत्वेन च भिद्यते ॥

अधुनैतेषामेव यथाक्रममेकैकमुदाहरणं दिक्प्रदर्शनार्थमाह—

नियतमगम्यमदृश्यं भवति किल त्रस्यतो रणोपान्तम् ।
कान्तो नयनानन्दी बालेन्दुः खे न भवति सदा ॥ २८ ॥

नियतेति । त्रस्यतो बिभ्यतो नरस्य । किलेति सत्ये । रणोपान्तं समरनिकटं नियतं निश्चितमगम्यमप्राप्यमदृश्यमनवलोकनीयं भवति । इत्येकवाक्यार्थः । अत्र मात्रया ककारगतेकाररूपया च्युतयान्य एवार्थो भवति । मात्राच्युतके च सर्वत्र मात्रापगमेऽप्यकारान्तत्वावस्थितिः । उच्चारणार्थत्वादकारस्य । तत्रान्योऽर्थो यथा—कलत्रस्य दाराणां तो-

रणोपान्तं तोरणनिकटं राजपथो नियतमगम्यमदृश्यं च भवति। कुलवधूत्वादिति। बिन्दुच्युतकमाह—कान्त इत्यादि। कश्चित्कंचिदाह—एष बालेन्दुरपूर्णचन्द्रः खे वियति सदा न भवति। कान्तः कमनीयः। अत एव नयनानन्दी नयनानन्दकरः। अत्र बिन्दौ च्युतेऽर्थान्तरं भवति। इदं काचित्सखीमाह—हे बाले मुग्धे, कान्तो वल्लभो नयनानन्दी दुःखेन क्लेशेन भवति सदा। तस्मान्मैनं तिरस्कार्षीरिति शेषः। व्यञ्जनच्युतकाक्षरच्युतकेत्यादिग्रहणात्संगृहीते तदुदाहरणे अप्यनयैव दिशा द्रष्टव्ये॥

अथ स्पष्टप्रच्छन्नार्थप्रहेलिकामाह—

कानि निकृत्तानि कथं कदलीवनवासिना स्वयं तेन।
कथमपि न दृश्यतेऽसावन्वक्षं हरति वसनानि॥ २९॥

कानीति। कदलीवनवासिना रम्भावनगतेन नरेण कानि निकृत्तानि कानि च्छिन्नानि। कथं केन प्रकारेणेति प्रश्ने। स्पष्टोऽपि प्रच्छन्नोऽर्थः। स चायम्—कानि शिरांसि मस्तकानि निकृत्तानि। कथम्। कदलीव रम्भेव। केन। असिना खड्गेन। कियन्ति। नव नवसंख्यानि। स्वयमात्मना। तेन दशाननेन। कथंशब्दोऽत्र विस्मये। चित्रमिदं यत्स्वयं तृणराजषदात्मनः शिरांसि च्छिन्नानीत्यर्थः। प्रश्नोत्तरात्त्वस्या अयमेव विशेषो यत्प्रश्नवाक्येनैवोत्तरदानम्। अथ व्याहृतार्थामाह—कथमपीत्यादि। असौ कश्चिदन्वक्षं प्रत्यक्षमेव वसनानि वस्त्राणि हरति। अथ च कथमपि न दृश्यते नावलोक्यते। अतः कोऽयं स्यात्। अत्रासाधारणविशेषणोपादानाद्वायुरिति गम्यते। नान्यस्य चौरादेरेवंविधा शक्तिरिति। प्रश्नोत्तराच्चास्या वायुर्वातः समीर इत्याद्यनियतशब्दत्वं विशेषः॥

अथ कारकगूढमाह—

पिबतो वारि तवास्यां सरिति शरावेण पातितौ केन।
वारि शिशिरं रमण्यो रतिखेदादपुरुषस्येव॥ ३०॥

पिबत इति। कश्चित्कंचिदाह—तवास्यां सरिति नद्यां शरावेण वर्धमानकेन भाजनविशेषेण जलं पिबतः केन पातितौ। कौ पातिताविति साकाङ्क्षत्वात्कर्मात्र गूढम्। तच्चैवं प्रकटम्—हे एण मृग, तवास्यां सरिति वारि पिबतः केन शरौ बाणौ पातिताविति। अथ क्रियागूढम्—वारि शिशिरेत्यादि। वारि जलम्, शिशिरं शीतलम्, रमण्यो नार्यः, रतिखेदान्निधुवनायासादपुरुषस्येव। अत्र क्रिया गुप्ता। सा चेयम्—रमण्यो रतिखेदाद्वारि शिशिरमुषस्येव प्रभात एवापुः पीतवत्यः॥

अथ प्रश्नोत्तरमाह—

उद्यन्दिवसकरोऽसौ किं कुरुते कथय मे मृगायाशु।
कथयानिन्द्राय तथा किं करवाणि क्षणितुकामः॥ ३१॥

अहिणवकमलदलारुणिण माणु फुरन्तिण केण ।
जाणिज्जई तरुणीअणस्स निद्धा(?) भण अहरेण ॥ ३२ ॥

उद्यन्निति । अहिणवेति । कश्चिन्मूर्खत्वेन मृगः सन्कंचन पृच्छति—यथा मह्यं मृगाय त्वं कथय । एष दिवसकरः सूर्य उद्यनुदयं प्रामुवन्किं कुरुत इत्येकः प्रश्नः । अपरमाह—अनिन्द्रायाशङ्काय मह्यं कथय निवेदय । क्षणितुकामः शब्दितुकामः सन्नहं किं करवाणि किं करोमीति द्वितीयः । उत्तरानुरोधेन चात्र मृगायेत्यनिन्द्रायेति च प्रश्नवाक्येऽभिहितम् । वक्तृबहुत्वख्यापनार्थमनेकभाषत्वख्यापनार्थं तृतीयप्रश्नोऽयं प्राकृते । यथा—अहिणवेत्यादि । कश्चित्सुहृदमाह—अभिनवकमलदलारुणेन स्फुरता केन तरुणीजनस्य मानो लक्ष्य इति भण वद । निद्धेत्यामन्त्रणपदम् (?) । अत्र यथाक्रमं यथाभाषं चोत्तरमाह—अहरेणेति । तत्र—अहर्दिनम् । एण हे मृग । तथा अहरेऽनिन्द्र । अण शब्दं कुरु । तथा प्राकृतोत्तरम्—अहरेणाधरेण । ओष्ठेनेत्यर्थः । इत्युत्तरत्रयं युगपदुक्तम् । एतदनेकवक्तृकमनेकभाषं व्यस्तसमस्तं च प्रश्नोत्तरम् । एकवक्तृकं त्र्यादिभाषं च प्रश्नोत्तरजातमन्यत्र विस्तरादवगन्तव्यम् ॥

अथाध्यायमुपसंहरन्नाह—

इत्थं स्थितस्यास्य दिशं निशम्य शब्दार्थवित्क्षोदितचित्रवृत्तः ।
आलोच्य लक्ष्यं च महाकवीनां चित्रं विचित्रं सुकविर्विदध्यात् ॥३३॥

इत्थमिति । अस्य चित्रस्येत्थं पूर्वोक्तप्रकारेण स्थितस्य दिशं मार्गं निशम्य श्रुत्वा तथा महाकवीनां लक्ष्यमुदाहरणं चालोच्य विमृश्य ततः सुकविश्चित्रमलंकारं चित्रं नानाविधं विदध्यात्कुर्यात् । किंविशिष्टः सन् । शब्दार्थौ वेत्ति शब्दार्थवित् । तथा क्षोदितानि पर्यालोचितानि चित्राणि नानाविधानि वृत्तानि तनुमध्यादीनि येन स तथाविधः । यतः किल न सर्वेण वृत्तेन सर्वं चित्रं कर्तुं पार्यते । तथालोच्य वीक्ष्य, लक्ष्यमुदाहरणम्, महाकवीनां सुकवीनाम् । चित्रकरणे किल लक्षणाभावाल्लक्ष्यदर्शनमेव महानुपाय इति कृत्वा ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः
पञ्चमोऽध्यायः समाप्तः ।

षष्ठोऽध्यायः ।

शब्दस्यालंकारानभिधायेदानीं तद्दोषानभिधित्सुराह—

पदवाक्यस्थो दोषो वाक्यविशेषप्रयोगनियमेन ।
यः परिहृतस्ततोऽन्यस्तदतिव्याप्तिश्च संह्रियते ॥ १ ॥

पदवाक्यस्थ इति । पूर्वम् 'अन्यूनाधिक–'(२।८) इत्यादिना ग्रन्थेन काव्योपयोगिनो वाक्यविशेषस्य प्रयोगे नियमेन यः पदस्थो वाक्यस्थश्च दोषः परिहृतः, ततो दोषादन्यो-

ऽसमर्थाप्रतीतादिकः समिति संप्रति ह्रियते परिह्रियते । तथा तस्मान्न्यूनादिकस्यासमर्थादिकस्य च दोषस्य यातिव्यात्तिरतिप्रसक्तिः सा च संह्रियते संकोच्यते । ननु पूर्वत्र वाक्यस्थ एव दोषः परिहृतो न पदस्थस्तत्कथमिहोच्यते पदवाक्यस्थ इति । सत्यम् । अन्यूनाधिकविशेषणविशिष्टैः पदैर्वाक्यस्य नियमितत्वात्पदस्थोऽपि दोषस्तेन परिहृत एवेति । तर्हि पदग्रहणमत्र न कर्तव्यमाशङ्कानिरासार्थम् । यतः कश्चिदाशङ्कयेत यथा वाक्यस्थ एव दोषस्तेन परिहृतो न पदस्थ इति । तथा पदग्रहणाभावे ततोऽन्य इति । वक्ष्यमाणदोषोऽपि पदस्योक्तो न स्यादिति । पृथक्करणं तु तस्य दोषस्य महीयस्त्वख्यापनार्थम् । न्यूनाधिकादिदोषो हि नेत्रोत्पाटतुल्यः । असमर्थादिकस्तु पटलनिभः ॥

अथ तानेवान्यान्दोषानाह—

असमर्थमप्रतीतं विसंधि विपरीतकल्पनं ग्राम्यम् ।
अव्युत्पत्ति च देश्यं पदमिति सम्यग्भवेद्दुष्टम् ॥ २ ॥

असमर्थमिति । इतिशब्दो हेतौ, स च प्रत्येकं संबध्यते । असमर्थमिति हेतोः पदं दुष्टं भवेत् । एवमप्रतीतमित्यादौ बोध्यम् । सम्यक्शब्दो नियमार्थः । अवश्यं दुष्टमित्यर्थः । चशब्दः समुच्चये । अन्यैरनुक्तं व्युत्पत्तिरहितं देश्यमसमर्थादिदोषमध्ये समुच्चीयत इत्यर्थः ॥

यथोद्देशस्तथा लक्षणमिति पूर्वमसमर्थलक्षणमाह—

पदमिदमसमर्थं स्याद्वाचकमर्थस्य तस्य न च वक्तुम् ।
तं शक्नोति तिरोहिततत्सामर्थ्यं निमित्तेन ॥ ३ ॥

पदमिति । यत्पदं तस्य निर्दिष्टार्थस्य वाचकम् । अथ च तमेवार्थं वक्तुं न शक्नोति तदसमर्थम् । वाचकं चेत्कथं न शक्नोतीत्याह—निमित्तेन केनचिच्छब्दान्तरसंबन्धादिना तिरोहितं स्थगितं तत्रार्थे सामर्थ्यं वाचकत्वं यस्य तत्तमभिधातुं न शक्नोतीति । एतेनावाचकत्वदोषादसामर्थ्यं दोषभेद उक्तः ॥

सामान्येनाभिधायैतदेव विशेषेणाह—

धातुविशेषोऽर्थान्तरमुपसर्गविशेषयोगतो गतवान् ।
असमर्थः स स्वार्थे भवति यथा प्रस्थितः स्थास्नौ ॥ ४ ॥

धातुविशेष इति । धातुविशेषस्तिष्ठत्यादिरुपसर्गविशेषेण प्रादिना योगतः संबन्धाद्धेतोरर्थान्तरं गतिनिवृत्त्यादिलक्षणादन्यमर्थं गतवान्प्राप्तः सन्स्वार्थेऽसमर्थो भवति । तमर्थं वक्तुं न शक्नोतीत्यर्थः । यथा प्रस्थितशब्दः स्थास्नावर्थे । विशेषग्रहणमुभयत्र न सर्वो धातुः सर्वेणोपसर्गेण संबन्धे सत्यर्थान्तरं याति । अपि तु कश्चिदेव केनचिदेवेत्यस्यार्थस्य सूचनार्थम् । तथाहि प्रेण योगे तिष्ठत्यादिरेवार्थान्तरं याति न तु यातिप्रभृतिः । तथा तिष्ठतिरपि प्रेण योगे न त्ववादिना । आकुलनिधनादीनि कलधौतकार्तस्वरवच्छब्दान्तराण्येव । न नामोपसर्गयोग उदाहृतः ॥

प्रकारान्तरेणासमर्थमाह—

इदमपरमसामर्थ्यं धातोर्यत्पठ्यते तदर्थोऽसौ ।
न च शक्नोति तमर्थं वक्तुं गमनं यथा हन्ति ॥ ५ ॥

इदमिति । इदमन्यदसामर्थ्यं धातोः, यत्तदर्थोऽसौ धातुः पठ्यते न च तं निर्दिष्टमर्थं वक्तुं शक्नोति । यथा 'हन् हिंसागत्योः' इति पाठेऽपि । हन्तीत्युक्ते हिनस्तीति प्रतीयते न च गच्छतीति । यमकश्लेषचित्रेषु गत्यर्थोऽपि दृश्यते । अतं एवाल्पोऽयं दोषः ॥

पुनः प्रकारान्तरमाह—

शब्दप्रवृत्तिहेतौ सत्यप्यसमर्थमेव रूढिबलात् ।
यौगिकमर्थविशेषं पदं यथा वारिधौ जलभृत् ॥ ६ ॥

शब्देति । यौगिकं संबन्धजं क्वचिदर्थविशेषेऽसमर्थमेवावाचकमेव पदम् । तत्र तदर्थस्याभाव इति चेन्न । शब्दप्रवृत्तिहेतौ सत्यपि विद्यमानेऽपि । अपिर्विस्मये । चित्रमिदमित्यर्थः । यदि शब्दप्रवृत्तिहेतुत्वं कथं तर्ह्यसमर्थत्वमित्याह—रूढिबलात्प्रसिद्धिबलात् । क्वचिदेव किंचिदेव शब्दरूपं वाचकत्वेन रूढमतस्तत्रैव प्रवर्तते नान्यत्र । एवकारोऽवधारणे । असमर्थमेव न तु समर्थम् । उदाहरणं यथा वारिधौ जलभृदिति । जलधारणक्रियालक्षणे प्रवृत्तिनिमित्ते सत्यपि जलभृच्छब्दो वारिधिं समुद्रमभिधातुमसमर्थः । मेघ एव तस्य रूढित्वादिति ॥

भूयोऽपि भेदान्तरमाह—

निश्चीयते न यस्मिन्वस्तु विशिष्टं पदे समानेन ।
असमर्थं तच्च यथा मेघच्छविमारुरोहाश्वम् ॥ ७ ॥

निश्चीयत इति । यस्मिन्पदे तदर्थाभिधायिन्यपि विशिष्टं वस्तु न निश्चीयते तदप्यसमर्थम् । कथं न निश्चीयत इत्याह—समानत्वात् । समानस्तुल्यो मानः परिच्छेदो विवक्षितेऽन्यत्र च वस्तुनि येन पदेन तत्तथा तद्भावस्तत्त्वम् । तस्मादनेकार्थवाचकत्वादित्यर्थः । यथा मेघच्छविमारुरोहाश्वमित्युक्ते मेघानामनेकवर्णानां दर्शनान्न निश्चयः कर्तुं पार्यते । यत्र तु निश्चयस्तत्समानार्थमपि साध्वेव । यथा—'लक्ष्मीकपोलसंक्रान्तकान्तपत्रलतोज्ज्वलाः । दोर्द्रुमाः पान्तु वः शौरेर्घनच्छाया महाफलाः ॥' अत्र हि शौरिः कृष्णवर्ण इति ॥

इदानीमस्यैवासमर्थदोषस्यातिव्याप्तिं संहर्तुमाह—

यत्पदमभिनयसहितं कुरुतेऽर्थविशेषनिश्चयं सम्यक् ।
नैकमनेकार्थतया तस्य न दुष्येदसामर्थ्यम् ॥ ८ ॥

यदिति । यत्पदं विशेषणभूतमनेकार्थतया विवक्षितविशिष्टार्थविशेषनिश्चयं सम्यक्कुरुते । किंभूतं सदभिनयसहितम् । तस्य । सामर्थ्य 'निश्चीयते न यस्मिन्' (६।७) इत्यनेन प्राप्तं दोषाय न भवति॥

नन्वर्थस्य शब्दो वाचको न त्वभिनयः, तत्कथं तेनार्थविशेषनिश्चयः क्रियत इत्याह—

शब्दानामत्र सदानेकार्थानां प्रयुज्यमानानाम् ।
निश्चीयते हि सोऽर्थः प्रकरणशब्दान्तराभिनयैः ॥ ९ ॥

शब्दानामिति । हि यस्मादत्र काव्येऽनेकार्थानां शब्दानां प्रयुज्यमानानां स विवक्षितोऽर्थः प्रकरणेन प्रस्तावेन शब्दान्तरसंनिधानेन वाभिनयेन वा निश्चीयते । तत्र प्रकरणे यथा—'महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम्' । इत्यत्र हिमवानेव महीभृदुच्यते । शब्दान्तरेण यथा—'कोपादेकतलाघातनिपतन्मत्तदन्तिनः । हरेर्हरिणयुद्धेषु कियान्व्याक्षेपविस्तरः ॥' अत्र दन्तिहरिणशब्दसंनिधानादिह एव हरिर्निश्चीयते । अभिनयने त्वर्थविशेषप्रतीतावुदाहरणं सूत्रकार एव दास्यति । यतः प्रकरणशब्दान्तरे प्रसिद्धत्वादुपमाने । अभिनयस्तु प्रस्तुतत्वादुपमेयः । तथा ताभ्यां विवक्षितार्थनिश्चयस्तथाभिनयेनापीत्यर्थः ॥

तदेवोदाहरणमाह—

सा सुन्दर तव विरहे सुतनुरियन्मात्रलोचना सपदि ।
एतावतीमवस्थां याता दिवसैरियन्मात्रैः ॥ १० ॥

सेति । अत्रेयन्मात्रैतावच्छब्दौ महति स्वल्पे च वर्तेते । ततोऽभिनयेन विशेषप्रतीतिर्यथा—हे सुन्दर सा सुतनुस्तव विरहे इयन्मात्रलोचना । प्रस्तुत्यभिनयेन विशाललोचनेति निश्चीयते । तथैतावतीमवस्थां यातेति । अत्रोर्ध्वीकृतकनिष्ठिकाङ्गुल्या कृशत्वं प्रतीयते । दिवसैरियन्मात्रैरित्यत्र पञ्चाङ्गुलिदर्शनेन स्वल्पत्वं चेति ॥

अथाप्रतीतमाह—

युक्त्या वक्ति तमर्थं न च रूढं यत्र यदभिधानतया ।
द्वेधा तदप्रतीतं संशयवदसंशयं च पदम् ॥ ११ ॥

युक्त्येति । तदप्रतीतं यद्युक्त्या गुणक्रियायोगेन तं विवक्षितमर्थं वक्ति प्रतिपादयति । अथ च तत्रार्थाभिधानतया वाचकत्वेन न रूढं न प्रसिद्धं तच्चाप्रतीतं द्वेधा । कथं संशयवदसंशयं वेति ॥

तत्र संशयवद्यथा—

साधारणमपरेष्वपि गुणादि कृत्वा निमित्तमेकस्मिन् ।
यत्कृतमभिधानतयार्थे संशयवद्यथा हिमहा ॥ १२ ॥

साधारणमिति । यत्पदं गुणक्रियादिनिमित्तमुद्दिश्यान्येष्वप्यर्थेषु साधारणं सदेकस्मिन्विशिष्टेऽर्थेऽभिधानतया संज्ञात्वेन कृतं न तु विशेषणत्वेन तदनेकार्थतयैकत्र निश्चयानुत्पादनात्संशयवदप्रतीतम् । उदाहरणं यथा—हिमहेति । अत्र हिमहननलक्षणया क्रियायैतत्पदं रवौ वह्नौ च साधारणम् । अभिधानतया चैकत्रापि न रूढम् । अत एकत्र

प्रयुज्यमानं संशयं कुर्वीत । अथ किमेतत् 'शब्दप्रवृत्तिहेतौ सत्यपि' (६।६) इत्यनेनासमर्थ-लक्षणेन न परिहृतम् । नेत्युच्यते । यतो यदेकत्र रूढमन्यत्र तु तदर्थसद्भावेऽपि न प्रयो-गार्हं तत्तस्य विषयः । इह तु यत्कचिदपि न रूढं युक्त्या च तदर्थवाचकत्वं तदेकत्रार्थे-ऽनुचितमिति स्फुट एव भेदः । तथा 'निश्चीयते न यस्मिन्' (६।७) इत्यस्याप्ययमविषयः । यतस्तत्र विशेषणपदं संशयकारि निषेध्यम् ॥

अथासंशयमाह—

पदमपरमप्रतीतं यद्यौगिकरूढशब्दपर्यायैः ।
कल्पितमर्थे तस्मिन्यथाश्वयोषिन्मुखार्चिष्मान् ॥ १३ ॥

पदमिति । अपरमिदं पदमप्रतीतं यद्यौगिकानां संबन्धजानामथ च रूढानां संज्ञात्वेन प्रसिद्धानां पर्यायैस्तस्मिन्विवक्षितेऽर्थे कल्पितमभिधानतया प्रयुक्तम् । यथा वडवामुखा-नलशब्दे वाच्येऽश्वयोषिन्मुखार्चिष्मानिति शब्दः । स ह्यश्विमुखसादृश्यादौर्वाग्नौ यौगिको रूढिशब्दश्च । तत्र वडवापर्यायोऽश्वयोषिदिति, अनलस्यार्चिष्मानिति । मुखशब्दः स्व-रूपेण प्रयुक्तः । केचित्त्वश्वयोषिद्वदनवह्निरिति पठन्ति । एवंविधं पदं विवक्षितमर्थं नि-र्विकल्पमेव प्रत्यापयति । केवलं न तथा रूढमिति दुष्टम् । यथा माघस्य—'तुरङ्गकान्तामु-खहव्यवाहज्वालेव भित्त्वा जलमुल्ललास' । अल्पश्चायं दोषः, महाकविभिरपि प्रयुक्त-त्वात् । अथ किमेतावसमर्थाप्रतीतदोषाववाचकत्वेन परिहृतौ । नेत्युच्यते । यतो यत्किंचिदपि तमर्थं नाभिधत्ते तदवाचकम् । इह तु पदमर्थाभिधायकमेव । केवलं पदान्तरसंनिधाना-दसामर्थ्यमरूढ्या चाप्रतीतत्वमागतमिति ॥

अथ विसंधिपदमाह—

यस्यादिपदेन समं संधिर्न भवेद्भवेद्विरुद्धो वा ।
तदिति विसंधि स इत्थं मन्थरया भरत आहूतः ॥ १४ ॥

यस्येति । यस्य द्वितीयपदस्यादिपदेन सार्धं संधिः संधानं न भवेद्भवन्नपि विरुद्धार्थ-त्वाविरुद्धो वा भवेत्तत्पदं विसंधि । विरुद्धार्थो विशब्दः । ननूभयाश्रयत्वात्संधेः किमिति द्वितीयपदमेव विसंधि भण्यते, न त्वाद्यम् । सत्यम् । यतो द्वितीयपदे सत्येव विसंधि-त्वमायाति । ततस्तस्य तदुक्तम् । उभयत्रोदाहरणमाह—स इत्यादि । स भरतो मन्थ-रया कुब्जयेत्थमाहूत आकारितः । स इत्थमिति, भरत आहूत इति चासंध्युदाहरणम् । मन्थरयाभरत इति तु विरुद्धसंधिनिदर्शनम् । संहितापाठे सति पदभङ्गवशान्मन्थरे याभे मैथुने रत इति प्रतीपोऽर्थो गम्यते ॥

नन्वेवं विसंधिपदे दूषिते सति सर्वमेव पूर्वकविलक्ष्यं दूषितं स्यादित्याशङ्क्य वि-शेषमाह—

तत्रासत्संधि पदं कृतमसकृदयुक्तितो भवेद्दुष्टम् ।
दूरं तु वर्जनीयं विरुद्धसंधि प्रयत्नेन ॥ १५ ॥

तत्रेति । तत्र द्वयोर्मध्याद्यदसंधि तदसकृत्कृतं पुनःपुनः प्रयुक्तमयुक्तितः पूर्वोत्तरपदासंश्लेषादुष्टं भवति । यथा—'कान्ते इन्दुशिरोरत्ने आदधाने उदंशुनी । पातां वः शंभुशर्वाण्यावितो दुःखाकुलाद्भवात् ॥' इत्यादि । विरुद्धसंधि पुनः पदं दूरमतिशयेन प्रयत्नतो वर्जनीयमेव ॥

अथ विपरीतकल्पनमाह—

पूर्वार्थप्रतिपन्थी यस्यार्थः स्पष्ट एव संभवति ।
विपरीतकल्पनं तद्भवति पदमकार्यमित्रमिव ॥ १६ ॥

पूर्वार्थेति । यस्य पदस्य पूर्वार्थप्रतिपन्थी विवक्षितार्थविरोधी स्पष्ट एवाव्याख्यात एवार्थः संभवति तद्विपरीतार्थप्रतिभासनाद्विपरीतकल्पनम् । निदर्शनमाह—अकार्यमित्रमिवेति । अत्र ह्यकार्यमकृत्रिमं मित्रमकारणबन्धुरित्ययमर्थो विवक्षितोऽप्यकार्ये पापे मित्रमिति विरोध्यर्थो झगित्येव प्रतिभाति । ननु विरुद्धसंधित्वेन किं न परिहृतमेतत् । न परिहृतम् । तत्र हि पदद्वयसंधिविषयं पूर्वार्थविरोधित्वम्, इह तु संध्यभावेऽपीति ॥

अथ ग्राम्यमाह—

यदनुचितं यत्र पदं तत्तत्रैवोपजायते ग्राम्यम् ।
तद्वक्तृवस्तुविषयं विभिद्यमानं द्विधा भवति ॥ १७ ॥

यदिति । यत्पदं यत्र विषयेऽनुचितमयोग्यं तत्तत्रैव ग्राम्यमुपजायते । एतदुक्तं भवति न स्वाभाविकं पुरुषस्येव शब्दस्य ग्राम्यत्वम्, अपि तु विषयभेदेन। तच्च ग्राम्यं वक्तृवस्तुविषयत्वेन भिद्यमानं सद्विधा द्विभेदं भवति । अत्र यद्वस्तुनि वक्तुमुचितं वक्तरि त्वनुचितं तद्वक्तृविषयं ग्राम्यम् । विपरीतं तु वस्तुविषयमिति ॥

तत्र वक्तृग्राम्यमाह—

वक्ता त्रिधा प्रकृत्या नियतं स्यादधममध्यमोत्तमया ।
तत्र च कश्चित्किंचिन्नैवार्हति पदमुदाहर्तुम् ॥ १८ ॥

वक्तेति । वक्ताधममध्यमोत्तमया प्रकृत्या स्वभावेन त्रिधा त्रिप्रकारो भवति । तत्राधमा हीनजातयो दासचेटादयः, मध्यमाः प्रतीहारपुरोहितसार्थवाहादयः, उत्तमा मुनिनृपतिप्रभृतयः । अथ बालयुववृद्धलक्षणादिकापि प्रकृतिः किं नोच्यते । तत्रापि हि परस्परं व्यवहाराद्यनौचित्यमस्त्येव । सत्यम्। अर्थविषयमेव तद्ग्राम्यत्वम्। तच्च तत्रैव परिहरिष्यते 'ग्राम्यत्वमनौचित्यं व्यवहाराकारवेषवचनानाम्' इत्यनेन । तत्र तेष्वधममध्यमोत्तमेषु वक्तृषु मध्ये कश्चिद्वक्ता किंचित्पदमुदाहर्तुं वक्तुं नैवार्हति न योग्यो भवति ॥

तत्र दिङ्मात्रप्रदर्शनायाह—

तत्रभवन्भगवन्निति नार्हत्यधमो गरीयसो वक्तुम् ।
भट्टारकेति च पुनर्नैवैतानुत्तमप्रकृतिः ॥ १९ ॥

तत्रभवन्निति । गरीयस उत्तमान्सुरमुनिप्रभृतींस्तत्रभवन्भगवञ्शब्दवाच्यानप्यधमो वक्तैवमादिभिः शब्दैर्वक्तुं नार्हति न योग्यो भवति । वक्तृविषयं पदमिदमनुचितम् । तथैतान्गरीयसो भट्टारकशब्दयोग्यानप्यन्य उत्तमस्वभावो राजादिर्वक्तुं नार्हति । इतिशब्दौ स्वरूपनिर्देशार्थौ । चशब्दोऽनुक्तस्वामिप्रभृतिशब्दसमुच्चयार्थः । भट्टारकेति स्वामिन्नित्यादि वेत्यर्थः ॥

इदानीं वस्तुविषयं ग्राम्यमाह—

तत्रभवन्भगवन्निति नैवार्हत्युत्तमोऽपि राजानम् ।
वक्तुं नापि कथंचिन्मुनिमपि परमेश्वरेशेति ॥ २० ॥

तत्रभवन्निति । उत्तमो मुनिमन्त्रिप्रभृतिस्तत्रभवदादिपूजापदानि वक्तुं योग्योऽपि राजानमेभिः पूजापदैर्वक्तुं नार्हति । वस्तुविषयमेतदनौचित्यम् । राजा हि परमेश्वरादिभिः शब्दैर्वाच्यो न तु तत्रभवदादिभिरिति । तथा स एवोत्तमो राजा मुनिं तपोधनं परमेश्वरेशेत्यादिभिरामन्त्रणपदैः कदाचिदपि वक्तुं नार्हति । नियतविषया हि शब्दास्तेऽन्यत्र केलिं विना प्रयुज्यमाना अनौचित्यशतां गमयेयुरिति ग्राम्यत्वं तेषाम् । आस्तां तावदधम उत्तमोऽपि नार्हतीत्यपिशब्दार्थः । दिङ्मात्रप्रदर्शनं चैतत् । विस्तरस्तु भरतादवगन्तव्यः ॥

भूयोऽपि ग्राम्यविशेषमाह—

पदमिदमनुचितमपरं सभ्यासभ्यार्थवाचि सभ्येऽर्थे ।
तद्धि प्रयुज्यमानं निदधाति मनस्यसभ्यमपि ॥ २१ ॥

पदमिति । इदमपरं पदमनुचितं ग्राम्यं यत्सभ्यासभ्यार्थवाचकं सत्सभ्येऽर्थे प्रयुज्यमानम् । सभायां पर्षदि वक्तुं योग्यः सभ्यस्ततोऽन्योऽसभ्योऽर्थः । कुतोऽनुचितम् । हियस्मादर्थे । यतस्तत्प्रयुज्यमानं सन्मनसि चेतस्यसभ्यमप्यर्थं निदधाति स्फुरयति । नन्वेवंविधस्य पदस्योभयार्थवाचकत्वादसभ्योऽपि प्रयोगो न स्यात्ततश्चास्य प्रयोगोच्छेद एवागतः । नैतत् । अदुष्टो ह्यर्थो दुष्टेन दूष्यते न तु दुष्टः साधुनेति ॥

निदर्शनमाह—

वारयति सखी तस्या यथा यथा तां तथा तथा सापि ।
रोदितितरां वराकी बाष्पभरक्लिन्नगण्डमुखी ॥ २२ ॥

वारयतीति । तस्या नायिकायाः सखी यथा यथा तां वारयति तथा तथा सा वराकी रोदितितराम् । कीदृशी । बाष्पभरेण क्लिन्नगण्डमार्द्रकपोलं मुखं यस्याः सा तथाविधा । अत्र क्लिन्नगण्डशब्दावार्द्रकपोले सभ्येऽर्थे प्रयुक्तावपि पूययुक्तपिटकत्वलक्षणमसभ्यमप्यर्थं स्फुरयतः । यतोऽसभ्यद्वययोगाच्चात्र विशेषणविशेष्यभावे सति दुष्टतरार्थत्वम् ॥

अथैतदतिव्याप्तिपरिहारार्थमाह—

अर्थविशेषवशाद्वा सभ्येऽपि तथा क्वचिद्विभक्तेर्वा।
अनुचितभावं मुञ्चति तथाविधं तत्पदं सदपि ॥ २३ ॥

अर्थेति। ग्राम्यं यत्पदं तत्तथाविधं ग्राम्यं सदपि क्वचित्सभ्येऽर्थे ऽचितभावं ग्राम्यत्वं मुञ्चति। कुतोऽर्थविशेषवशाद्वा, विभक्तेर्वा। वाशब्दौ विकल्पार्थौ। विशिष्टसभ्यार्थप्रयोगाद्वा विभक्तिविशेषाद्वेत्यर्थः। अपिर्विस्मये संभावने वा। तथाशब्दः समुच्चयार्थः। पदमेतद्दोषाभावमध्ये समुच्चीयते। क्वचिच्छब्दो विरलत्वप्रतिपादनार्थः। क्वचिदेवार्थविशेषे न सर्वत्रेत्यर्थः ॥

निदर्शनमाह—

कथमिव वैरिगजानां मदसलिलक्लिन्नगण्डभित्तीनाम्।
दुर्वारापि घटासौ विशांपते दारिता भवता ॥ २४ ॥

कथमिति। निगदसिद्धम्। अत्रार्थविशेषो गजो वीररश्च। कथं तर्हि नायिकायां बाहुल्येन दृश्यते। यथा—'धृतबिसवलये निधाय पाणौ मुखमधिरूषितपाण्डुगण्डलेखम्। नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ ॥' कामिनीलक्षणोऽर्थविशेषोऽत्रापीति चेत्तर्हि 'वारयति सखी तस्याः'(६।२२) इति दुष्टत्वे कथमुदाहरणम्। पाण्डुशब्दसंनिधानादत्रानुप्रासत्वेन रम्यत्वाददोष इति नोत्तरम्। विनापि पाण्डुशब्दप्रयोगं दर्शनात्। 'दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः' इत्यादिषु। तस्मात्पूर्वकविलक्ष्याणां बहूनां दुष्टत्वमायाति। अत्रोच्यते—क्लिन्नशब्दसंनिधानादेव गण्डशब्दस्यासभ्यत्वं स्फुरति न त्वन्यदा। इत्येतदेव दर्शयितुमुदाहरणे तथैव प्रयुक्तवानिति। विशांपते इत्यत्र षष्ठीबहुवचनवशान्न विट्शब्देन विष्ठालक्षणोऽसभ्यार्थो मनसि निधीयते ॥

भूयोऽपि ग्राम्यविशेषानाह—

मञ्जीरादिषु रणितप्रायान्पक्षिषु च कूजितप्रभृतीन्।
मणितप्रायान्सुरते मेघादिषु गर्जितप्रायान् ॥ २५ ॥
दृष्ट्वा प्रयुज्यमानानेवंप्रायांस्तथा प्रयुञ्जीत।
अन्यत्रैतेऽनुचिताः शब्दार्थत्वे समानेऽपि ॥ २६ ॥ (युग्मम्)

मञ्जीरादिष्विति। दृष्ट्वेति। वाच्येऽर्थे तुल्येऽप्येतेष्वेतान्धातून्पूर्वकविभिः प्रयुज्यमानान्दृष्ट्वा तेष्वेव निबध्नीयात्। नान्यत्र। यतस्तल्लक्ष्यमेवान्यत्र व्यवस्थाकारि। मञ्जीरं नूपुरम्। आदिग्रहणाद्रशनाघण्टाभ्रमरादिसंग्रहः। रणितप्रायानिति प्रायग्रहणं सदृशार्थवृत्तिक्वणिशिञ्जिगुञ्जत्यार्थम्। प्रभृतिग्रहणं वाशत्यार्थम्। सुरतग्रहणं व्यापारान्तरनिवृत्यर्थम्। मेघादिष्वित्यत्रादिग्रहणं सिंहगजार्थम्। प्रायग्रहणं ध्वनत्यार्थम्। एवंप्रायानिति ये शास्त्रेषु सामान्येन पठ्यन्ते। अथ च विशेष एव दृश्यन्ते। यथा—हेषति-

रश्वेषु । भणतिः पुरुषेषु । कणतिः पीडितेषु । वातिर्वायौ । न त्वन्यत्र । नहि दृश्यते पुरुषो वातीति । एवमन्येऽपि द्रष्टव्याः । अन्यत्रैतेऽनुचिताः । मेघादिषु रणत्यादय इत्यर्थः । अपिशब्दो विस्मये । चित्रमिदं यच्छब्दार्थे समानेऽपि ग्राम्यत्वमेषां वस्तुविषयेणैव । ग्राम्यत्वे नास्मिन्दोषे परिहृते पुनर्वचनं प्रपञ्चार्थम् ॥

अथ देश्यमाह—

प्रकृतिप्रत्ययमूला व्युत्पत्तिर्नास्ति यस्य देश्यस्य ।
तन्मडहादि कथंचन रूढिरिति न संस्कृते रचयेत् ॥ २७ ॥

प्रकृतीति । विशिष्टदेशे भवं देश्यम् । महाराष्ट्रादिदेशप्रसिद्धम् । देशीयं पदं संस्कृते न रचयेत् । यस्य पदस्य प्रकृतिप्रत्ययमूला व्युत्पत्तिर्न विद्यते तच्च मडहादि । तत्र मडह-डहहोरणघुंघुलमकंदोडएलहुक्कसयरुयअलंबकुसुमालवाणवालादिकं यथाक्रमं सूक्ष्मश्रेष्ठ-वस्त्रपटमण्डपपद्महरिद्राञ्जलिसुवर्णकारकुक्कुटचौरशक्रादिवाचकं कथंचिदपि नैव रचयेदि-त्यर्थः । ननु देश्यप्राकृतभेदत्वात्कथं संस्कृते प्रयोगप्रसङ्ग इत्याह—रूढिरिति । रूढि-भ्रान्त्या न बध्नीयात् । कश्चिद्ध्यात्मदेशप्रसिद्धार्थं शब्दं सर्वत्रायं वाचक इति मन्यमानः प्रयुञ्जीत । 'व्युत्पत्तिर्यस्य नास्ति' इति वचनात्तु सव्युत्पत्तिकं देश्यं कदाचित्प्रयुञ्जीतेत्युक्तं भवति । यथा दूवौयां छिन्नोद्भवाशब्दः । ताले भूमिपिशाचः । शिवे महानटः । वृक्षे परशुरुजः । समुद्रनवनीतं चन्द्रामृतयोः । जले मेघक्षीरशब्दः । एवमन्येऽपि ॥

अथ दोषानुपसंहर्तुमाह—

इत्थं पददोषाणां दिङ्मात्रमुदाहृतं हि सर्वेषाम् ।
तस्मादनयैव दिशा ततोऽन्यदभ्यूह्यमभियुक्तैः ॥ २८ ॥

इत्थमिति । इत्थमनेन पूर्वोक्तप्रकारेण पददोषाणां सर्वेषां दिगेव दिङ्मात्रं हि यैस्मादुदा-हृतं निदर्शितं तस्मादनयैव दिशान्यदपि दोषजातं स्वयमूहनीयम् ॥

पूर्वमुक्तमधिकपदं वाक्यं न प्रयोक्तव्यमथ च दृश्यते क्वचिदसकृत्प्रयोगस्तदतिव्या-प्तिसंहारमाह—

वक्ता हर्षभयादिभिराक्षिप्तमनास्तथा स्तुवन्निन्दन् ।
यत्पदमसकृद्ब्रूयात्तत्पुनरुक्तं न दोषाय ॥ २९ ॥

वक्तेति । वक्ता प्रतिपादको हर्षभयादिभिराक्षिप्तचित्तः सन्यत्पदमेकस्मिन्नेवार्थे पुनः पुनर्वक्ति तत्पुनरुक्तत्वं दोषाय न भवति । अपि त्वलंकारायेत्यर्थः । आदिग्रहणाद्विस्म-यशोकादिसंग्रहः । तथाशब्दः समुच्चये ॥

निदर्शनमाह—

वद वद जितः स शत्रुर्न हतो जल्पंश्च तव तवास्मीति ।
चित्रं चित्रमरोदीद्धा हेति परा हते पुत्रे ॥ ३० ॥



जय जय वैरिविदारण कुरु कुरु पादं शिरःसु शत्रूणाम् ।
धिग्धिक्तमरिं यस्त्वामप्रणमन्स्वं विनाशयति ॥ ३१ ॥

वदेति । जयेति । अत्र वद वदेति हर्षे । तव तवास्मीति भये । चित्रं चित्रमिति विस्मये । हा हेति शोके । जय जयेति स्तुतौ । कुरु कुर्विति त्वरायाम् । धिग्धिगिति निन्दायाम् । अन्यन्निगदसिद्धम् ॥

भूयोऽप्याह—

यत्पदमर्थेऽन्यस्मिंस्तत्पर्यायोऽथवा प्रयुज्येत ।
वीप्सायां च पुनस्तन्न दुष्टमेवं प्रसिद्धं च ॥ ३२ ॥

यदिति । यत्पदमन्यमर्थमभिधातुं द्विः प्रयुज्यते तत् । तथा तस्य प्रयुक्तपदस्य पर्यायो वाचको यः प्रयुज्येत । तथा वीप्साप्रतिपादनार्थं वा यत्पुनः पदं प्रयुज्येत तत्पदं न पुनरुक्तदोषदुष्टं भवति । एवं प्रसिद्धं च । इत्येवं वीप्सातुल्यरूपेण प्रकारेण यत्कविलक्ष्येषु प्रसिद्धं तदपि पुनरुक्तं न दोषाय । यथा कलकलरणरणकादिकम् । तथैव लोके प्रसिद्धत्वादिति । ननु तुल्यपदस्य तत्पर्यायपदस्य वान्यार्थत्वेन वीप्सावाचकस्य वीप्साप्रतिपादकत्वेन तदर्थत्वादेव पुनरुक्तिर्न दुष्टा तत्किमनेनेति सत्यम् । किं तु कश्चिदतिमन्दमतिः पुनः प्रयोगं दृष्ट्वा दुष्टत्वमाशङ्केतेति ॥

क्रमेण निदर्शनमाह—

गजरक्तरक्तकेसरभारः सिंहोऽत्र तनुशरीरोऽपि ।
दिशि दिशि करिकुलभङ्गं वारंवारं स्वरैः कुरुते ॥ ३३ ॥

गजेति । प्रथमेऽत्र पादे रक्तशब्दावन्यार्थौ । एको रुधिरवाचकोऽपरस्तु रञ्जनक्रियाभिधायी । तनुशरीर इत्यत्र तनुशब्दस्तानवाभिधायी तत्पर्यायः शरीरशब्दः कायवाचकः । दिशि दिशीति वीप्सायाम् । सर्वस्यां दिशीत्यर्थः । वारंवारमिति लोकप्रसिद्धम् । अन्यदपि लोकप्रसिद्धं दृश्यते । यथा—'मानिनीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृह्णन् । मन्दमन्दमुदितः प्रययौ खं भीत भीत इव शीतमयूखः ॥' तथा—'ता किंपि किंपि ता कह विअब्बो निम्मीलियच्छीहिम् । कडुओसहं व पिज्जइ अहरो घेरस्स तरुणीहिम् ॥' उद्भटस्तु सर्वत्रात्र पुनरुक्ताभासालंकारत्वमाचष्टे ॥

प्रकारान्तरमाह—

यच्च प्रतिपत्ता वा न प्रतिपद्येत वस्तु सकृदुक्तम् ।
तत्र पदं वाक्यं वा पुनरुक्तं नैव दोषाय ॥ ३४ ॥

यदिति । यद्वस्तु सकृदेकवारमुक्तं सत्प्रतिपत्ता । वाशब्दोऽवधारणे । प्रतिपत्तैव न प्रतिपद्येत । तत्र वस्तुनि वाच्ये पदं वाक्यं वा नैव दोषाय । चः समुच्चये । तच्च पदं निर्दोषपदमध्ये समुच्चीयत इत्यर्थः ॥

उदाहरणमाह—

किं चिन्तयसि सखे त्वं वच्मि त्वामस्मि पश्य पश्येदम् ।
ननु किं न पश्यसीदृक्पश्य सखे सुन्दरं स्त्रैणम् ॥ ३५ ॥

किमिति । कश्चिन्मित्रमाह—हे सखे, इदमीदृक्सुन्दरं रम्यं स्त्रैणं स्त्रीसमूहं पश्येति । तेन त्वन्यगतचित्तत्वान्न श्रुतमतः स पुनराह—किं चिन्तयसीत्यादि । अत्र पश्य पश्येति पदपौनरुक्त्यं नन्वित्यादि तु वाक्यपौनरुक्त्यम् । ननुरभिमुखीकरणे ॥

भूयोऽप्याह—

अन्याभिधेयमपि सत्प्रयुज्यते यत्पदं प्रशंसार्थम् ।
तस्य न दोषाय स्यादाधिक्यं पौनरुक्त्यं वा ॥ ३६ ॥

अन्येति । प्रशंसालक्षणादर्थादन्यदभिधेयं वाच्यं यस्य पदस्य तदित्थंभूतमपि सत्प्रशंसार्थं प्रयुज्यते यतस्तस्याधिक्यं पौनरुक्त्यं वा दोषाय न भवति । अन्याभिधेयस्य हि प्रस्तुतार्थानुपयोगिनः प्रयोगे सत्याधिक्यं स्यात् । पदान्तरेणैवोक्ततदर्थस्य तु पौनरुक्त्यं स्यात् । ननु यद्यन्याभिधेयं कथं प्रशंसार्थं प्रयोगः, प्रयोगश्चेन्नान्याभिधेयमिति । सत्यम् । अन्याभिधेयस्यापि प्रशंसार्थगमकतास्तीति । यथा मुनिशार्दूलः, कर्णतालः, केशपाशः, नृपपुंगवः, गोनागः, अश्वकुञ्जरः । तथा चूतवृक्षः, मलयाचलः, इत्यादिषु शार्दूलादिशब्दानां व्याघ्रादिवाचित्वेनान्याभिधेयत्वेऽपि, वृक्षादीनां तु पदान्तरोक्तार्थत्वेऽपि प्रशंसार्थगमकत्वेन न दुष्टतेति ॥

निदर्शनमाह—

नासीरोद्धतधूलीधवलितसकलारिकेशहस्तस्य ।
अविलङ्घ्योऽयं महिमा तव मेरुमहीधरस्येव ॥ ३७ ॥

नासीरेति । नासीरं सैन्यं तदुत्खातधूल्या धवलिताः सकलारीणां केशहस्ताः केशकलापा येन तस्य तवाविलङ्घनीयो महिमा । कस्येव । मेरुमहीधरस्येव मेरुपर्वतस्य यथा । अत्र हस्तशब्दस्य पाणिवाचकस्यान्यार्थस्यापि नाधिक्यम् । महीधरशब्दस्य च मेरुपदान्तरेण गतार्थस्य न पौनरुक्त्यम् । प्रशंसार्थत्वादिति ॥

परस्परं संबद्धपदं वाक्यं प्रयुञ्जीतेति यदभ्यधायि तदतिव्याप्तिं संजिहीर्षुराह—

यस्मिन्नेकमर्थं स्वयमेवालोचयेत्तदर्थानि ।
जल्पन्पदानि तेषामसंगतिर्नैव दोषाय ॥ ३८ ॥

यस्मिन्निति । यस्मिन्वाक्ये वक्तानेकार्थवाचकानि पदानि जल्पन्स्वयमेवानेकमर्थमालोचयति तेषां तद्वाक्यपदानामसंगतिर्नैव दोषाय । विवक्षावशेन हि शब्दाः प्रयुज्यन्ते । वक्ता चेत्स्वयं विलक्षणमनेकमर्थं वक्तुकामोऽन्योन्यमसंबद्धानि पदानि ब्रूते तत्किमसांगत्यम् । असंबद्धत्वाच्च दोषाशङ्का चेति स्वयंग्रहणात्परेण यत्र प्रतिपाद्यस्तत्रासंगतिर्दु-

ष्टैव । यथा—'आषाढी कार्तिकी माघी वचा हिङ्गु हरीतकी । पश्यतैतन्महच्चित्रमायुर्मर्माणि कृन्तति' ॥

उदाहरणमाह—

कुसुमभरः सुतरूणामहो नु मलयानिलस्य सेव्यत्वम् ।
सुमनोहरः प्रदेशो रूपमहो सुन्दरं तस्याः ॥ ३९ ॥

कुसुमभर इति । एतत्कश्चित्कामी मलयोद्याने तरुणीं दृष्ट्वा स्वयमेव पर्यालोचयति । तन्निगदसिद्धम् ॥

इदानीं वाक्यदोषमाह—

वाक्यं भवति तु दुष्टं संकीर्णं गर्भितं गतार्थं च ।
यत्पुनरनलंकारं निर्दोषं चेति तन्मध्यम् ॥ ४० ॥

वाक्यमिति । तुः पुनरर्थे । वाक्यं पुनः संकीर्णगर्भितगतार्थरूपं दुष्टं भवति । ननु वाक्यस्य पदात्मकत्वात्पदद्वारेणैव तद्दोष उक्त इति किं पुनरुच्यते । सत्यम् । किं तु सन्ति तादृशानि वाक्यानि येषु पददोषाभावेऽपि वाक्यस्य दुष्टता भवति । यथा—'गौरीक्षणं भूधरजाहिनाथः पत्रं तृतीयं दयितोपवीतम् । यस्याम्बरं द्वादशलोचनाख्यः काष्ठासुतः पातु सदा शिवो वः ॥' कुसुमभर इत्यादौ वाक्यार्थानामसंगतिरिह तु वाक्यानामिति विशेषः । ननूपादेयत्वादलंकारनिर्देश एव न्याय्यः, ततोऽन्यत्सर्वमनुपादेयमिति सेत्स्यति, किं संकीर्णादिलक्षणोक्तिप्रयासेनेत्यत आह—यत्पुनरित्यादि । यदलंकारशून्यं निर्दोषं च तन्मध्यमवाक्यम् । एतदुक्तं भवति—यदि हेयोपादेयपक्षद्वयमेव स्यात्तदालंकारनिर्देश एवं । यावता तृतीयं मध्यमपि वाक्यं विद्यत एवेति सर्वमेव वक्तव्यम् ॥

अथ संकीर्णलक्षणमाह—

वाक्येन यस्य साकं वाक्यस्य पदानि सन्ति मिश्राणि ।
तत्संकीर्णं गमयेदनर्थमर्थं न वा गमयेत् ॥ ४१ ॥

वाक्येनेति । यस्य वाक्यस्य वाक्यान्तरेण सह मिश्राणि पदानि भवन्ति तत्संकीर्णं नाम । किमित्येतावता तस्य दुष्टत्वमत आह—गमयेदनर्थम् । यतः कारणाद्विवक्षितमर्थं वा न गमयेत्ततस्तद्दुष्टमित्यर्थः ॥

उदाहरणमाह—

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणैनम् ।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम् ॥ ४२ ॥

किमिति । काचित्सखी मानिनीं वक्ति—किमिति कस्मात्पादगतं हृदयनाथं प्रियं बहुगुणं न पश्यसि । ननु मनसस्तमोरूपं कोपं मुञ्च त्यज । एनं च प्रियं कण्ठे गृहाण । इत्येवंविधो वाक्योऽत्र विवक्षितः । पदानां तु मिश्रत्वाद्दुष्टोऽर्थो गम्यते । यथा—पाद-

पतितं कोपं कस्मान्न पश्यसि । एनं च कोपं बहुगुणं गृहाण । मनसो हृदयाच्च तमोरूपं हृदयनाथं वल्लभं मुञ्च त्यजेति ॥

गर्भितमाह—

यस्य प्रविशेदन्तर्वाक्यं वाक्यस्य संगतार्थतया ।
तद्गर्भितमिति गमयेन्निजमर्थं कष्टकल्पनया ॥ ४३ ॥

यस्येति । यस्य वाक्यस्यान्यद्वाक्यं समृद्धार्थत्वेनान्तर्मध्ये प्रविशेत्तद्गर्भितं नाम । का तस्य दुष्टतेत्याह—गमयेन्निजमर्थमभिधेयं कष्टकल्पनया क्लेशेनेति ॥

निदर्शनमाह—

योग्यो यस्ते पुत्रः सोऽयं दशवदन लक्ष्मणेन मया ।
रक्षैनं मृत्युमुखं प्रसह्य लघु नीयते विवशः ॥ ४४ ॥

योग्य इति । अङ्गदमुखेन लक्ष्मणो रावणमाह—हे दशवदन, योग्यो यस्ते तव पुत्रः सोऽयं मया लक्ष्मणेन प्रसह्य हठान्मृत्युमुखं विवशः परवशः संल्लघु शीघ्रं नीयते तस्माद्रक्षैनम् । अत्र रक्षैनमिति गर्भवाक्यं यावन्मध्यान्नोद्धृत्य पृथक्कृतं तावन्मूलवाक्यं कष्टकल्पनयार्थं गमयति ॥

गतार्थमाह—

यस्यार्थः सामर्थ्यादन्यार्थैरेव गम्यते वाक्यैः ।
तदिति प्रबन्धविषयं गतार्थमेतत्ततो विद्यात् ॥ ४५ ॥

यस्येति । यस्य वाक्यस्यार्थोऽभिधेयं प्रयोजनं वान्याभिधेयैर्वाक्यैर्गम्यते । एवकारो भिन्नक्रमे । गम्यत एवेत्येवं द्रष्टव्यम् । कथं गम्यते सामर्थ्यात् । अन्यार्थानामपि तदर्थाभिधानशक्तियुक्तत्वादित्यर्थः । तदित्येवंप्रकारं वाक्यं गतार्थम् । अथ कथमत्र नोदाहृतमित्याह—तदेतत्प्रबन्धविषयं विपुलग्रन्थगोचरमतस्ततः प्रबन्धादेव विद्याज्ज्ञानीयात् । नान्यथाख्यातुं शक्यत इति । प्रबन्धे दर्श्यते यथा किरातार्जुनीयकाव्ये हिमाचलवर्णने—'मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः । दधतमुच्चशिलान्तरगोपुराः पुर इवोदितपुष्पवना भुवः ॥' इत्यनेन श्लोकेन मणयोऽप्सरस उद्यानानि च सन्त्यतः सेव्योऽयं पर्वत इति प्रतिपाद्यते । एतच्चान्यार्थैर्वाक्यान्तरैरेव कथितम् । तद्यथा—'रहितरत्नचयान्न शिलोच्चयानपलताभवना न दरीभुवः । विपुलिनाम्बुरुहा न सरिद्बधूरकुसुमान्दधतं न महीरुहः ॥' 'दिव्यस्त्रीणां सचरणलाक्षारागा रागायाते निपतितपुष्पापीडाः । पीडाभाजः कुसुमचिताः साशंसं शंसन्त्यस्मिन्सुरतविशेषं शय्याः ॥'

अत्र यदेतन्मध्यमं वाक्यमुक्तमेतत्कविना किं कर्तव्यमुत नेत्याह—

पुष्टार्थालंकारं मध्यममपि सादरं रचयेत् ।
गामभ्याजेति यथा यत्किंचिदतोऽन्यथा तद्धि ॥ ४६ ॥

पुष्टेति । मध्यममपि वाक्यं सादरं रचयेत् । किमविशेषेण नेत्याह—पुष्टो हृदयावर्जकोऽर्थ एवालंकारो यस्य तत्तथाभूतम् । एतदुक्तं भवति—यद्यपि वक्रोक्त्यादयोऽलंकारा न सन्ति तथापि तद्विवक्षितोऽर्थः सरस उत्कृष्टो वा विधेयः । यथा—'भ्रूभेदो गुणितश्चिरं नयनयोरभ्यस्तमामीलनं रोद्धुं शिक्षितमादरेण हसितं मौनेऽभियोगः कृतः । धैर्यं कर्तुमपि स्थिरीकृतमिदं चेतः कथंचिन्मया बद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता ॥' अपिशब्दो मध्यवाक्यस्यादुष्टवाक्यमध्ये समुच्चयार्थः । अन्यालंकारविरहात्तत्र कस्यचिदनादरः स्यादिति सादरग्रहणम् । अथ किमित्यपुष्टार्थं मध्यं नाद्रियत इत्याह—यत्किंचिदित्यादि । हि यस्मादतः पुष्टार्थालंकाराद्यदन्यथान्यादृशमपुष्टार्थं तद्यत्किंचित् । नात्यादरणीयमित्यर्थः । किमिव । यथा—गामभ्याजेति । 'देवदत्त गामभ्याज शुक्लां दण्डेन' इत्यत्र न शब्दार्थदोषो नापि कश्चिदलंकारो न चैतत्पुष्टार्थमतोऽत्र नादरो नाप्यनादरः । विषयस्त्वस्य कथासंधिसंहारौ । यथा—'श्रियः कुरूणामधिपस्य पालनीम्' इत्यादि । यथा च—'इति व्याहृत्य विबुधान्विश्वयोनिस्तिरोदधे' इत्यादि ॥

अथ सर्वेषामेव शब्ददोषाणां विषयविशेषे साधुत्वं दर्शयितुमाह—

अनुकरणभावमविकलमसमर्थादि स्वरूपतो गच्छन् ।
न भवति दुष्टमतादृग्विपरीतक्लिष्टवर्णं च ॥ ४७ ॥

अनुकरणेति । असमर्थादिदोषैर्दुष्टमपि पदं वाक्यं वाविकलं परिपूर्णं स्वरूपतोऽनुक्रियमाणं दोषाय न भवति । अर्थभेदेन शब्दान्तरत्वादिति भावः । अनुचिकीर्षया प्रयुक्तमथ च प्रतिपादनायासमर्थं तदविकलग्रहणेन दुष्टमिति दर्श्यते । तथातादृशा भिन्नस्वरूपत्वादसदृशा विपरीता दुष्टक्रमाः क्लिष्टा लुप्ता वर्णा यस्य तत्तथाविधम् । तदपि पदं न दोषाय । यथा विकटनितम्बायाः पतिमनुकुर्वाणा सखी प्राह—'काले माषं सस्ये मासं वदति शकाशं यश्च सकाशम् । उष्ट्रे लुम्पति रं वा षं वा तस्मै दत्ता विकटनितम्बा ॥' इत्यादि ॥

इतिश्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः
षष्ठोऽध्यायः समाप्तः ।

सप्तमोऽध्यायः ।

शब्दार्थौ काव्यमित्युक्तम् । तत्र शब्दलक्षणप्रभेदालंकारदोषा अभिहिताः । इदानीमर्थस्य तान्विवक्षुराह—

अर्थः पुनरभिधावान्प्रवर्तते यस्य वाचकः शब्दः ।
तस्य भवन्ति द्रव्यं गुणः क्रिया जातिरिति भेदाः ॥ १ ॥

अर्थ इति । पुनःशब्दो लक्षणविभागार्थः । वर्णसमुदायात्मकः शब्दः । अभिहितोऽर्थः पुनः । स यस्य वाचकोऽभिधायकः शब्दः प्रवर्तते । इत्यनेन त्वर्थस्य शब्दवाच्यत्वाभि-

धानेन शब्दार्थयोर्भिन्नत्वं वाच्यवाचकभावश्च दर्शितो भवति । श्रोत्रेन्द्रियग्राह्यो हि शब्दः । तदन्येन्द्रियग्राह्यस्त्वर्थः । शब्दे चोच्चारिते सत्यर्थः प्रतीयत इति । तथा शब्दार्थौ काव्यमित्युक्तम्, अतश्चक्षुर्निकोचमूर्धकम्पाङ्गुलिदर्शनादिप्रतिपादितार्थस्य काव्यत्वनिवृत्त्यर्थं प्रवर्तते यस्य वाचकः शब्द इत्युक्तम् । वाचकस्यापि वाच्यसिद्ध्यर्थं विशेषणमाह—अभिधा प्रतीतिः सा विद्यते यस्य स तथा । ध्वनौ हि प्रतीयमानार्थसंभव इति । प्रतीतिश्च यस्य यो विद्यमानस्तेन यः सन्सोऽर्थः । यस्तु न विद्यते तत्र प्रतीत्यभावान्नासावर्थ इत्युक्तं भवति । लक्षणमभिधाय प्रभेदानाह—तस्येत्यादि । इति परिसमाप्त्यर्थः । तस्यार्थस्यैतावत एव द्रव्यगुणक्रियाजातिलक्षणाश्चत्वारः प्रभेदाः ॥

तेषां च यथोद्देशं लक्षणं वाच्यमिति कृत्वा द्रव्यस्य तावदाह—

जातिक्रियागुणानां पृथगाधारोऽत्र मूर्तिमद्द्रव्यम् ।
दिक्कालाकाशादि तु नीरूपमविक्रियं भवति ॥ २ ॥

जातीति । अत्रैतेषु मध्ये द्रव्यं मूर्तिमदिन्द्रियग्राह्यमुच्यते । गुणस्य द्रव्यत्वनिवृत्त्यर्थमाह—पृथक्प्रत्येकं जातिगुणक्रियाणामाधार आश्रयः । जात्यादयो हि न कदाचिदपि द्रव्यं विना भवन्तीति । पृथग्ग्रहणं तु केवलानामपि जात्यादीनामाधारत्वे द्रव्यत्वप्रतिपत्त्यर्थम् । अन्यथा हि समुदितानामेव य आधारस्तदेव द्रव्यं स्यात् । ततश्च निष्क्रियत्वात्पाषाणादीनां द्रव्यत्वं न स्यात् । मूर्तिमदिति वचनाद्दिगादीनां द्रव्यत्वं न स्यात् । अथ चेष्यतेऽत आह—दिक्कालेत्यादि । तुः पूर्वस्माद्विशेषे । मूर्तं द्रव्यमुच्यते । दिक्कालाकाशात्ममनांसि पुनर्नीरूपाण्यपि द्रव्यमित्यर्थः । तत्र नीरूपत्वादविक्रियं भवति । मूर्तिमत्पुनः सविकारमेव ॥

अथ द्रव्यभेदानाह—

नित्यानित्यचराचरसचेतनाचेतनैर्बहुभिः ।
भेदैर्विभिन्नमेतद्द्विधा द्विधा भूरिशो भवति ॥ ३ ॥

नित्येति । एतद्द्रव्यं नित्यानित्यादिभिर्भेदैर्बहुभिर्द्विधा द्विधा विभिन्नं सद्भूरिशोऽनेकशो भवति । आदिग्रहणात्सवचनावचनव्यक्ताव्यक्तस्थूलसूक्ष्मनक्तंचरदिवाचरस्थलजजलजप्रभृतयो भेदा गृह्यन्ते । बहुग्रहणमानन्त्यप्रतिपादनार्थम् । न च वाच्यं चराचरयोः सचेतनाचेतनयोश्च न विशेष इति । वृक्षादयो ह्यचरा अपि सचेतनाः ॥

अथ गुणः—

द्रव्यादपृथग्भूतो भवति गुणः सततमिन्द्रियग्राह्यः ।
सहजाहार्यावस्थिकभावविशेषादयं त्रेधा ॥ ४ ॥

द्रव्यादिति । द्रव्यादपृथग्भूतो द्रव्यसमवायी गुणो भवति । जातिक्रिययोर्द्रव्यस्थत्वाद्गुणत्वं स्यादित्याह—सततमिन्द्रियग्राह्यः सर्वदैव प्रत्यक्षगम्यः । नानुमेय इत्यर्थः । जातिक्रिये तु न प्रत्यक्षगम्ये । गुणं च केचिदुत्पाद्यसहजत्वेन द्विधेति ब्रुवते तन्निरासार्थ-

माह—सहजेत्यादि। तत्र सहजो गुणो यथा—क्षत्रिये शौर्यम्। काके काण्र्यम्। आहार्यो यथा—शास्त्राभ्यासात्पाण्डित्यम्। पटे रागः। आवस्थिको यथा—फलानां लौहित्यम्। केशानां शौक्ल्यम्॥

अथ क्रिया—

नित्यं क्रियानुमेया द्रव्यविकारेण भवति धात्वर्थः।
कारकसाध्या द्वेधा सकर्मिकाकर्मिका चेति॥ ९॥

नित्यमिति। धात्वर्थः क्रिया भवति। 'क्रियाभावो धातुः' इति वचनात्। सा तु न प्रत्यक्षा। किं तु द्रव्यस्य तण्डुलादेर्विकारेण वैक्लेदादिनानुमेया। गमनादिका तु देशान्तरप्राप्त्यादिनेति। सा च कारकैः कर्तृकर्मादिभिः साध्या निष्पाद्या। यदुक्तम्—'सर्वकारकनिर्वर्त्या कर्तृकर्मद्वयाश्रया। आख्यातशब्दनिर्देश्या धात्वर्थः केवलं क्रिया॥' सापि सकर्मिकाकर्मिकात्वभेदेन द्वेधा। आद्या ग्रामं गच्छतीत्यादिका। द्वितीया आस्ते शेते इत्यादिका। नियतानियतकर्मिकात्वसमुच्चयार्थश्च शब्दः। तत्राद्या कटं करोतीति। द्वितीया वहति भारम्, वहति नदी॥

अथ जातिः—

भिन्नक्रियागुणेष्वपि बहुषु द्रव्येषु चित्रगात्रेषु।
एकाकारा बुद्धिर्भवति यतः सा भवेज्जातिः॥ १०॥

भिन्नेति। बहुषु द्रव्येषु यतो यद्वशादेकाकारा समाना बुद्धिर्भवति सा जातिर्भवेदिति। कदाचित्समानगुणक्रियायोगात्सा बुद्धिर्भवेदित्याह—भिन्नेत्यादि। भिन्नौ विलक्षणौ क्रियागुणौ येषु तेष्वपि। कदाचिदत्यन्तमवयवसादृश्याद्वा सा स्यादित्याह—चित्रगात्रेष्विति। चित्रं नानारूपं काणकुशकुब्जादिकं गात्रं येषां तेषु। सा च जातिस्त्रिष्वपि द्रव्यक्रियागुणेषु समवेतेति त्र्याश्रया॥

अथासामेव द्रव्यगुणक्रियाजातीनामन्यथात्वनियममाह—

सर्वः स्वं स्वं रूपं धत्तेऽर्थो देशकालनियमं च।
तं च न खलु बध्नीयान्निष्कारणमन्यथातिरसात्॥ ११॥

सर्व इति। सर्वोऽर्थो द्रव्यगुणक्रियाजातिलक्षणः स्वं स्वमात्मीयं स्वभावं देशकालनियमं च धत्ते। नियते क्वापि देशे काले च नियताकारश्चार्थो भवतीत्यर्थः। ततः किमित्याह—तं चेत्यादि। चशब्दो हेतौ। खल्ववधारणे। ततः कारणात्तमर्थमन्यथा नैव बध्नीयादित्यर्थः। तत्र ये नित्या भावास्तेषां वर्तमानेन निर्देशो न्याय्यः। अतीतानां तु भूतेन। अनागतानां भविष्यत्कालेन। एवं चराचरसचेतनाचेतनादिषु द्रष्टव्यम्। देशकालनियमश्च यथा—हिमवति हिमस्य सदा सद्भावोऽन्यत्र तु शीतकाले। एवमन्यदपि। निष्कारणग्रहणं कारणसद्भावेऽन्यथात्वस्यादुष्टत्वख्यापनार्थम्। यथा शुकसारिकादीनां व्यक्तवचनत्वे मनुष्यप्रयत्नः कारणमिति। कुतः पुनर्निष्कारणस्यान्यथाभिधानप्रसङ्ग

इत्याह—अतिरसादिति। अतिरसहृतहृदयानां हि प्रायशो मर्यादोल्लङ्घनमपि भवति। एतदुक्तम्—'गणयन्ति नापशब्दं न वृत्तभङ्गं क्षयं न वार्थस्य। रसिकत्वेनाकुलिता वेश्यापतयः कुकवयश्च'॥

यद्यन्यथात्वं निवार्यते तर्हि कथं दिगाकाशादिष्वमूर्तेषु मूर्तधर्माः कविभिर्वर्ण्यन्ते। यथा—निर्मला दिशः। निर्मलं नभ इति। तथा विचेतनेषु सचेतनधर्मा इत्याह—

सुकविपरम्परया चिरमविगीततयान्यथा निबद्धं यत्।
वस्तु तदन्याद्दशमपि बध्नीयात्तत्प्रसिद्ध्यैव ॥ ८॥

सुकवीति। पूर्वसुकवीनां परम्परया समूहेन चिरं बहुपूर्वकालेऽविगीततयाविगानेन निर्दोषतयेति यावत्। यद्वस्त्वन्यथा निबद्धं तदन्याद्दशमपि तत्प्रसिद्ध्यैव बध्नीयात्। न त्वात्मबलेन। महाकविप्रसिद्धिरेवात्र प्रमाणमित्यर्थः॥

सप्रभेदमर्थमभिधाय सांप्रतं तदलंकारानाह—

अर्थस्यालंकारा वास्तवमौपम्यमतिशयः श्लेषः।
एषामेव विशेषा अन्ये तु भवन्ति निःशेषाः ॥ ९॥

अर्थस्येति। उक्तलक्षणस्यार्थस्य वास्तवादयश्चत्वारोऽलंकारा भवन्ति। चतुर्भिः प्रकारैरसौ भूष्यत इत्यर्थः। नन्वन्येऽपि रूपकादयोऽलंकाराः सन्ति तत्किमिति चत्वार एवोक्ता इत्याह—एषामेवेत्यादि। तुर्हेतौ। एषामेव सामान्यभूतानां चतुर्णां ते भेदा यतस्ततो मूलभेदत्वेन नोक्ता इत्यर्थः॥

यथोद्देशस्तथा लक्षणमिति वास्तवलक्षणमाह—

वास्तवमिति तज्ज्ञेयं क्रियते वस्तुस्वरूपकथनं यत्।
पुष्टार्थमविपरीतं निरुपममनतिशयमश्लेषम् ॥ १०॥

वास्तवमिति। यद्वस्तुस्वरूपकथनं क्रियते तद्वास्तवमिति ज्ञेयम्। वस्तुन इदं वास्तवमिति कृत्वा। इतिशब्दोऽर्थनिर्देशे। वास्तवशब्दवाच्यः सोऽर्थ इत्यर्थः। पुष्टार्थग्रहणमपुष्टार्थनिवृत्त्यर्थम्। तेन 'गोरपत्यं बलीवर्दस्तृणान्यत्ति मुखेन सः। मूत्रं मुञ्चति शिश्नेन अपानेन तु गोमयम्॥' अस्य वास्तवत्वं न भवति। अविपरीतग्रहणं विवक्षितविपरीतार्थस्य वास्तवत्वनिवृत्त्यर्थम्। यथा—'दन्तान्निर्दलयद्रसां च जडयत्तालु द्विधा स्फोटयन्नाड्यः संघटयद्गलद्गलबिलादान्त्राणि संकोचयत्। इत्थं निर्मलकर्करीस्थमसहप्रालेयवाताहतं नाधन्याः प्रचुरं पिबन्त्यनुदिनं प्रोन्मुक्तधारं पयः॥' अत्र हि पयसः शीतलत्वमाह्लादकत्वं च विवक्षितम्। तद्विपरीतं च प्रतीयते। निरुपमादिग्रहणं त्वनुवादमात्रम्। न तूपमातिशयश्लेषाणां वास्तवत्वनिवृत्तये। पृथगुपादानादेव तेषामन्यत्वसिद्धेः॥

अथ वास्तवप्रभेदानाह—

तस्य सहोक्तिसमुच्चयजातियथासंख्यभावपर्यायाः।
विषमानुमानदीपकपरिकरपरिवृत्तिपरिसंख्याः ॥ ११॥

हेतुः कारणमाला व्यतिरेकोऽन्योन्यमुत्तरं सारम् ।
सूक्ष्मं लेशोऽवसरो मीलितमेकावली भेदाः ॥ १२ ॥ (युग्मम्)

तस्य वास्तवस्य वक्ष्यमाणलक्षणाः सहोक्त्यादयस्त्रयोविंशतिरिमे भेदा भवन्ति ।।

सांप्रतमेषां परिपाट्या लक्षणमाह—तत्र सहोक्तिः—

भवति यथारूपोऽर्थः कुर्वन्नेवापरं तथाभूतम् ।
उक्तिस्तस्य समाना तेन समं या सहोक्तिः सा ॥ १३ ॥

भवतीति । योऽर्थः कर्तृभूतः प्रधानं यथारूपो यादृगात्मा यद्गुणयुक्तो भवति । कथं भवति—अपरमन्यमर्थं कर्मलक्षणमप्रधानं तथाभूतम् । तथाशब्दः प्रकारे । तथाप्रकारमात्मगुणसदृशं कुर्वन्नेवेति । एवकारोऽन्यकालनिवृत्त्यर्थः । कुर्वन्नेव भवति । न तु भूत्वा करोति, कृत्वा भवतीत्यर्थः । अतस्तस्य कुर्वतोऽर्थस्य तेन कार्येणार्थेन समं समाना तुल्या योक्तिः सा सह सार्धमुक्तिः सहोक्तिः । हेतुहेतुमद्भावोऽत्र सहार्थः । एकवचनमिहातन्त्रम् । तेन बहूनामप्यर्थानां सहोक्तिर्भवतीति ॥

निदर्शनमाह—

कष्टं सखे क्व यामः सकलजगन्मन्मथेन सह तस्याः ।
प्रतिदिनमुपैति वृद्धिं कुचकलशनितम्बभित्तिभरः ॥ १४ ॥

कष्टमिति । कश्चिद्विरही मित्रमिदमाह—हे सखे, कष्टं क्व व्रजामः । यतस्तस्यास्तरुण्याः स्तनकलशभरो नितम्बभित्तिभरश्चानुदिनं सकलस्य जगतो यो मन्मथस्तेन सह वृद्धिमुपैति । तां प्रति कामो वर्धत इत्यर्थः । अत्र प्रधानभूतः कुचकलशनितम्बभित्तिभरो वृद्धिगुणयुक्तोऽपरमर्थं मन्मथाख्यं वृद्धियुक्तं करोतीति । ततस्तस्य तथा कुर्वतः सहोक्तिरिति लक्षणयोजना ॥

अस्या एव प्रकारान्तरमाह—

यो वा येन क्रियते तथैव भवता च तेन तस्यापि ।
अभिधानं यत्क्रियते समानमन्या सहोक्तिः सा ॥ १५ ॥

य इति । योऽर्थः कर्मभूतो येन कर्तृभूतेन क्रियते तस्य कर्मभूतस्य तेन कर्तृभूतेनार्थेन । कीदृशेन । तथैव तादृशधर्मयुक्तेन भवता । सहाभिधानं यत्क्रियते सान्या सहोक्तिः । वाशब्दः प्रकारार्थः । प्रकारान्तरेण सहोक्तिरित्यर्थः ॥

उदाहरणमाह—

भवदपराधैः सार्धं संतापो वर्धतेतरां तस्याः ।
क्षयमेति सा वराकी स्नेहेन समं त्वदीयेन ॥ १६ ॥

भवदिति । कस्याश्चिन्मानिन्याः सखी नायकमन्यचित्तमिदमाह—तस्यास्त्वत्कान्तायाः संतापस्त्वदीयापराधैः सहातीव वर्धते । अत एव सा वराकी त्वदीयेन स्नेहे-

न सार्धं क्षयं गच्छति । अत्र संतापस्य वराकीक्षयस्य च शब्देन प्राधान्यम् । अपराधस्नेहयोस्तु तत्कारणयोरप्राधान्यम् । अत एव तृतीया । तत्त्वतस्तु भवदपराधा वर्धन्ते तस्याः संतापेन सह । भवत्स्नेहश्च क्षीयते तया सहेति । यदा त्वेवमुच्यते तदा पूर्वैव सहोक्तिरिति । पूर्वस्यां कर्तुः प्राधान्यं क्रियमाणस्य गुणभावः । इह तु क्रियमाणस्य प्राधान्यं कुर्वतस्त्वप्राधान्यमिति भेदः ॥

प्रकारान्तरमाह—

अन्योन्यं निरपेक्षौ यावर्थावेककालमेकविधौ ।
भवतस्तत्कथनं यत्सापि सहोक्तिः किलेत्यपरे ॥ १७ ॥

अन्योन्यमिति । यावर्थौ पूर्वोक्तसहार्थाभावात्परस्परं निरपेक्षावेकविधौ समानधर्मयुक्तौ तुल्यकालं भवतस्तयोर्यत्सह कथनं सापि किल सहोक्तिरित्यपरे केचित् । किलशब्दोऽत्रारुचौ । अरुचिश्चोक्तसहार्थाभावादिति ॥

निदर्शनमाह—

कुमुददलैः सह संप्रति विघटन्ते चक्रवाकमिथुनानि ।
सह कमलैर्ललनानां मानः संकोचमायाति ॥ १८ ॥

कुमुददलैरिति । प्रदोषवर्णनमेतत्सुगममेव । अत्र न कुमुददलैश्चक्रवाकाणां तैर्वा तेषां विघटना क्रियते । अपि तु कालेन । तथा न कमलैर्मानस्य मानेन वा तेषां संकोचो जन्यते । अपि तु रात्र्या, शशिना वा । औपम्यं न विवक्षितम् ॥

अथ समुच्चयमाह—

यत्रैकत्रानेकं वस्तु परं स्यात्सुखावहाद्येव ।
ज्ञेयः समुच्चयोऽसौ त्रेधान्यः सदसतोर्योगः ॥ १९ ॥

यत्रेति । यत्र समुच्चये एकत्राधारेऽनेकं वस्तु द्रव्यगुणक्रियाजातिलक्षणं परमुत्कृष्टं शोभनत्वेन वा स्यात्स समुच्चयः । तथा सुखावहाद्येवेति । सुखमावहत्युत्पादयतीति सुखावहम् । आदिग्रहणाद्दुःखावहादिपरिग्रहः । एवशब्दः समुच्चये । सुखावहादि च यत्रानेकं द्रव्यादि स्यात्सोऽपि समुच्चय इत्यर्थः । तथा त्रेधान्यः सदसतोर्योगः । त्रेधा त्रिविधः, अन्यः प्रकारान्तरेण समुच्चयः । कीदृशः । सदसतोर्योग इति । सतोः सुन्दरयोर्योग इत्येकः । असतोरसुन्दरयोर्योग इति द्वितीयः । सदसतोः सुन्दरासुन्दरयोर्योगस्तृतीयः । अत्र च सदसतां योग इति बहुवचनेन निर्देशे न्याय्ये द्विवचननिर्देशो द्वयोरेव सतोरसतोः सदसतोर्वा समुच्चयो नान्यथा इति ख्यापनार्थः ॥

एतदुदाहरणानि क्रमेणाह—

दुर्गं त्रिकूटं परिखा पयोनिधिः प्रभुर्दशास्यः सुभटाश्च राक्षसाः ।
नरोऽभियोक्ता सचिवैः प्लवंगमैः किमत्र वो हास्यपदे महद्वयम् ॥ २० ॥

दुर्गमिति । निगदसिद्धमेव । अत्रैकं वस्त्वत्र शब्दवाच्यम् । अनेकं तु त्रिकूटदुर्गादिकम् । शोभनत्वेनोत्कृष्टं यथा—'उमा वधूर्भवान्दाता याचितार इमे वयम्' इत्यादि । अशोभनत्वेन यथा—'क्लीबो विरूपो मूर्खश्च मर्महा मत्सरान्वितः । चित्रं तथापि न धनी दुर्भगः खलु मानवः ।।' इति । गुणाद्युत्कर्षोदाहरणानि स्वयमूह्यानि ।।

सुखावहाद्युदाहरणान्याह—

सुखमिदमेतावदिह स्फारस्फुरदिन्दुमण्डला रजनी ।
सौधतलं काव्यकथा सुहृदः स्निग्धा विदग्धाश्च ॥ २१ ॥

सुखमिति । एष सुखावहद्रव्यसमुच्चय आधारोऽत्रेह शब्दवाच्यः । वस्तूनि सितरजनीप्रभृतीनि ।।

तरलत्वममालिन्यं पक्ष्मलतामायतिं सुमाधुर्यम् ।
आधास्यन्नस्त्रत्वं मदनस्तव नयनयोः कुरुते ॥ २२ ॥

तरलत्वमिति । कामस्त्वदीयनयनयोरस्त्रत्वं करिष्यंस्तरलत्वादीनि कुरुत इति तात्पर्यार्थः । एष गुणसमुच्चयः । तरलत्वादिगुणानां सुखावहानां नयनाधारे समुच्चितत्वादिति।।

प्रस्फुरयन्नधरोष्ठं गात्रं रोमाञ्चयन्गिरः स्खलयन् ।
मण्डयति रहसि तरुणीः कुसुमशरस्तरलयन्नयने ॥ २३ ॥

प्रस्फुरयन्निति । एष क्रियासमुच्चयः । तरुणीष्वाधारेषु स्फुरणादिक्रियाणां समुच्चितत्वादिति । द्रव्यादीनां तूद्देशो वस्तुग्रहणेन कृतः । जातिसमुच्चयस्तु न संभवति । नह्येकत्रानेका जातिर्विद्यते । दुःखावह इत्याद्युदाहरणानि तु 'राज्यभ्रंशो वने वासो दूरे माता पिता मृतः । एकैकमपि तद्दुःखं यदब्धिमपि शोषयेत् ।।' इत्यादीनि द्रष्टव्यानि ।।

अथ सतोर्योगः—

सामोदे मधु कुसुमे जननयनानन्दने सुधा चन्द्रे ।
क्वचिदपि रूपवति गुणा जगति सुनीतं विधातुरिदम् ॥ २४ ॥

सामोद इति । स्रष्टुरिदं सुनीतं सुकृतं भद्रकं यत्सामोदकुसुमादिषु मध्वादीनां सतां योगः कृत इत्यर्थः ।।

अथासतोर्योगः—

आलिङ्गिताः करीरैः शम्यस्तप्तोषपांसुनिचयेन ।
मरुतोऽतिखरा ग्रीष्मे किमतोऽन्यदभद्रमस्तु मरौ ॥ २५ ॥

आलिङ्गिता इति । ग्रीष्मकाले मरुदेशे यत्करीरैः शमीवृक्षा मिश्रीभूताः । तथा तप्तानामूषपांसूनां चयैर्मिश्राः प्रचण्डा वायवः । किमतोऽन्यदपरमभद्रमशिवम् । इत्यसतोर्योगः ।।

अथ सदसतोर्योगः—

कमलवनेषु तुषारो रूपविलासादिशालिनीषु जरा।
रमणीष्वपि दुश्चरितं धातुर्लक्ष्मीश्च नीचेषु ॥ २६ ॥

कमलेति। सुगममेव योजनम् ॥

प्रकारान्तरमाह—

व्यधिकरणे वा यस्मिन्गुणक्रिये चैककालमेकस्मिन्।
उपजायेते देशे समुच्चयः स्यात्तदन्योऽसौ ॥ २७ ॥

व्यधिकरण इति। वाशब्द एवशब्दार्थे भिन्नक्रमः। ततश्च यस्मिंसन्मुच्चये गुणक्रिये भिन्नाधिकरणे एकस्मिन्देशे समकालमुपजायेते असौ समुच्चयस्तदन्यः। ततः पूर्वसमुच्चयादपर इत्यर्थः। गुणक्रिये एव व्यधिकरणे इत्यवधारणं तु गुणक्रियाधिकरणयोर्वस्तुनोर्देशाधिकरणमेकमेवेति कृत्वा ॥

निदर्शनमाह—

विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च।
प्रखलमुखानि नराधिप मलिनानि च तानि जातानि ॥ २८ ॥

विदलितेति। अत्र नैर्मल्यगुणस्य बलमाधारो मालिन्यस्य तु खलमुखानीति। चशब्दावेककालत्वसूचनार्थौ। एवं गुणसमुच्चयः ॥

क्रियासमुच्चयस्तु यथा—

दैवादहमत्र तया चपलायतनेत्रया वियुक्तश्च।
अविरलविलोलजलदः कालः समुपागतश्चायम् ॥ २९ ॥

दैवादिति। अत्र वियोगक्रिया वियोगिनि स्थिता, समुपागमनक्रिया तु वर्षाकाले ॥

अथ जातिः—

संस्थानावस्थानक्रियादि यद्यस्य यादृशं भवति।
लोके चिरप्रसिद्धं तत्कथनमनन्यथा जातिः ॥ ३० ॥

संस्थानेति। यस्य पदार्थस्य यत्संस्थानादि यादृशं भवति तस्य यदनन्यथा तेनैव प्रकारेण कथनं सा जातिरिति योगः। यच्छब्दस्तु सर्वनामत्वात्सामान्येन सर्वसंग्रहार्थः। विशेषरूपतया हि तत्संस्थानादि कथयितुमानन्त्यान्न शक्यते। अनुक्तं तर्हि कथं कविना ज्ञातव्यमित्याह—लोके चिरप्रसिद्धमिति। यद्यपि पुराणादिषु किंचिदुक्तं तथापि लोकरूढिवशात्सम्यक्तदवगम इति। तत्र संस्थानं स्वाभाविकं रूपम्। यथा—'एतत्पूतनचक्रमक्रमकृतग्रासार्धमुत्कैर्वृकानुत्पुष्णत्परितो नृमांसविघसैराघर्घरं क्रन्दतः। खर्जूरद्रुमदग्नजङ्घमसितत्वग्बद्धविष्वक्ततस्नायुग्रन्थि घनास्थिपञ्जरजरत्कङ्कालमालोक्यते ॥' इत्यादि। अवस्थानं स्थानकादि। यथा—'स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम्।

ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥' इत्यादि । क्रियाव्यापारो यथा—'प्रहरकमपनीय स्वं निदिद्रासतोच्चैः प्रतिपदमुपहूतः केनचिज्जागृहीति । मुहुरविशद्वर्णा निद्रया शून्यशून्यां ददर्पि गिरमन्तर्बुध्यते नो मनुष्यः ॥' इत्यादि । आदिग्रहणाद्विभवेषादिकं च द्रष्टव्यम् । यथा—'वल्लीवल्कपिनद्धधूसरशिराः स्कन्धे दधद्दण्डकं ग्रीवालम्बितमूर्जयन्मणिः परिकुथत्कौपीनवासाः कृशः । एकः कोऽपि पटच्चरं चरणयोर्बद्ध्वाध्वगः श्रान्तवानायातः क्रमुकत्वचा विरचितां भिक्षापुटीमुद्वहन् ॥' इत्यादि । अथ वास्तवस्य जातेश्च को विशेषः, यो वृक्षस्य धवस्य च । वास्तवं हि वस्तुस्वरूपकथनम्, तच्च सर्वेष्वपि तद्भेदेषु सहोक्त्यादिषु स्थितम् । जातिस्त्वनुभवं जनयति । यत्र परस्थं स्वरूपं वर्ण्यमानमेवानुभवमिवैतीति स्थितम् ॥

अथैतद्विशेषप्रतिपादनार्थमाह—

शिशुमुग्धयुवतिकातरतिर्यक्संभ्रान्तहीनपात्राणाम् ।
सा कालावस्थोचितचेष्टासु विशेषतो रम्या ॥ ३१ ॥

शिशुरिति । सा जातिः शिशुप्रभृतीनां याः कालोचिता अवस्थोचिताश्च चेष्टाः क्रियास्तास्वतिशयतो रम्या भवति ॥

तत्र शिशूनां यथा—

धूलीधूसरतनवो राज्यस्थितिरचनकल्पितैकनृपाः ।
कृतमुखवाद्यविकाराः क्रीडन्ति सुनिर्भरं डिम्भाः ॥ ३२ ॥

धूलीति । एषा शिशूनामवस्थोचिता चेष्टा । कालोचिता तु स्वयं द्रष्टव्या ॥

मुग्धयुवतीनां यथा—

हरति सुचिरं गाढाश्लेषे यदङ्गकमाकुला
स्थगयति तथा यत्पाणिभ्यां मुखं परिचुम्बने ।
यदतिबहुशः पृष्टा किंचिद्ब्रवीत्यपरिस्फुटं
रमयतितरां तेनैवासौ मनोऽभिनवा वधूः ॥ ३३ ॥

हरतीति । एषा मुग्धयुवतीनामवस्थोचिता चेष्टा । मुग्धग्रहणं मुग्धयुवतीनामेव जातिसौन्दर्यं न प्रौढानां चेष्टास्विति ज्ञापनार्थमिति । कातराद्युदाहरणानि ग्रन्थान्तराद्दृष्टव्यानि । 'नष्टं वर्षवरैर्मनुष्यगणनाभावादकृत्वा त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः । त्रस्यद्भिः सहसा निजस्य सदृशं नाम्नः किरातैः कृतं कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥' एषा कातरचेष्टा । तिरश्चां यथा—'उत्खाय दर्पचलितेन सहैव रज्ज्वा कीलं प्रयत्नपरमानवदुर्ग्रहेण । आकुल्यकारि कटकस्तुरगेण तूर्णमश्वेति विद्रुतमनुद्रवतान्यमश्वम् ॥' अतर्कितोपनतभयसुखदुःखकुतूहलादिहृतचित्तानां संभ्रान्तानां यथा—'प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्वरागमेव । उत्सृष्टलीलागतिरा

गवाक्षादलक्तकाङ्कां पदवीं ततान ॥' इत्यादि । हीनपात्राणां यथा—'उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसान्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्धवा । आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्कादङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥' एवमन्यदपि द्रष्टव्यमिति ॥

अथ यथासंख्यमाह—

निर्दिश्यन्ते यस्मिन्नर्था विविधा यथैव परिपाट्या ।
पुनरपि तत्प्रतिबद्धास्तथैव तत्स्याद्यथासंख्यम् ॥ ३४ ॥

निर्दिश्यन्त इति । यत्र विविधा नानारूपा अर्था यथैव परिपाट्या येनैव क्रमेण पूर्वं निर्दिश्यन्ते पुनरपि तथैव परिपाट्या तत्प्रतिबद्धास्तेषु पूर्वनिर्दिष्टेषु विशेष्यस्य विशेषणभावेन प्रतिबद्धास्तदनुयायिनो निर्दिश्यन्ते तद्यथासंख्यं स्यात् । अर्था इति बहुवचनस्यात्यन्त्रत्वाद्वयोरपि यथासंख्यं भवति । यथैव परिपाट्येति परिपाटी कवेः क्रमविवक्षा गृह्यते ॥

अथैतस्यैव विशेषार्थमाह—

तद्द्विगुणं त्रिगुणं वा बहुषूद्दिष्टेषु जायते रम्यम् ।
यत्तेषु तथैव ततो द्वयोस्तु बहुशोऽपि बध्नीयात् ॥ ३५ ॥

तदिति । तद्यथासंख्यं बहुषूद्दिष्टेषु प्रधानार्थेषु यद्यस्माद्द्विगुणं त्रिगुणं वा रम्यं जायते, तस्माद्धेतोस्तेषूद्दिष्टेषु तथैव द्विस्त्रिर्वा बध्नीयात् । नान्यथा । द्वयोः पुनरुद्दिष्टयोर्बहुशोऽपि बध्नीयात् । सुखावहत्वादिति ॥

तत्र त्रिगुणोदाहरणमाह—

कज्जलहिमकनकरुचः सुपर्णवृषहंसवाहनाः शं वः ।
जलनिधिगिरिपद्मस्था हरिहरचतुरानना ददतु ॥ ३६ ॥

कज्जलेति । अत्र हरिहरब्रह्माणस्त्रय उद्देशिनः । त्रिविशेषणयोगाच्च त्रैगुण्यम् ॥

द्वयोर्बहुगुणोदाहरणमाह—

दुग्धोदधिशैलस्थौ सुपर्णवृषवाहनौ घनेन्दुरुची ।
मधुमकरध्वजमथनौ पातां वः शार्ङ्गशूलधरौ ॥ ३७ ॥

दुग्धेति । अत्र मधुमथनमकरध्वजमथनौ द्वावुद्देशिनौ, चत्वारि तद्विशेषणानीति ॥

अथ भावः—

यस्य विकारः प्रभवन्नप्रतिबद्धेन हेतुना येन ।
गमयति तदभिप्रायं तत्प्रतिबन्धं च भावोऽसौ ॥ ३८ ॥

यस्येति । यस्य विकारवतो येनाप्रतिबद्धेनानैकान्तिकेन हेतुना विकारः कार्यं प्रभवन्नुत्पाद्यमानस्तस्य विकारवतः संबन्धिनमभिप्रायं प्रतिपत्तुर्गमयति, तथा स एव विकार-

स्तयोर्विकारहेतुविकारयोः प्रतिबन्धं च कार्यकारणभावं गमयति, असावेवंरूपो भावनामालंकारो भण्यते । भवत्यस्मादभिप्रायनिश्चय इति कृत्वा । ननु विरुद्धमिदम् । अप्रतिबद्धश्चेत्कथं हेतुरथ हेतुः कथमप्रतिबद्धो नाम । अपि च योऽप्रतिबद्धेन हेतुना जन्यते स कुतस्तत्प्रतिबन्धं गमयति, विद्यते चेत्प्रतिबन्धो न तर्ह्यप्रतिबद्धो हेतुरिति । सत्यमेतत् । किं तु महाकविलक्ष्यमेवंविधं दृश्यतेऽनुभूयते च । न च दृष्टे किंचिदनुपपन्नं नाम ॥

निदर्शनमाह—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥ ३९ ॥

ग्रामेति । कस्याश्चित्तरुण्या नववञ्जुलमञ्जरीसनाथकरं ग्रामतरुणं पश्यन्त्या मुखमालिन्यमभवदित्यर्थः । वञ्जुलो वृक्षविशेषः । अत्र विकारो मुखमालिन्यं तस्य हेतुर्वञ्जुलमञ्जरीदर्शनं तच्चाप्रतिबद्धम् । सर्वदा तद्दर्शने तदभावादिति । तच्च मालिन्यं तरुण्या भावं प्रतिपत्तुः प्रकाशयति । नूनमनया तस्य तरुणस्य वञ्जुलगहने संकेतोऽकारि, कर्मान्तरव्यासङ्गाच्च न तत्र संप्राप्ता, तं च मञ्जर्या गतप्रत्यागतं विज्ञाय सुखाद्वञ्चितास्मीति खिन्ना संपन्ना । मुखमालिन्यं चास्य मञ्जरीसनाथकरत्वस्य प्रतिबन्धं गमयति । अन्यथा कथं तद्दर्शनेन तदुत्पद्यते ॥

प्रकारान्तरमाह—

अभिधेयमभिदधानं तदेव तदसदृशसकलगुणदोषम् ।
अर्थान्तरमवगमयति यद्वाक्यं सोऽपरो भावः ॥ ४० ॥

अभिधेयमिति । यद्वाक्यं कर्तृ, तदेव पदारूढमेवाभिधेयं वाच्यमभिदधानं प्रतिपादयत्सदर्थान्तरं वक्त्रभिप्रायरूपं गमयति सोऽपरोऽन्यो भावभेदः । कीदृशमर्थान्तरम् । तेन पदारूढेनार्थेनासदृशा विलक्षणा गुणदोषा विधिप्रतिषेधादयो यस्य तत्तथोक्तम् । एतेन चान्योक्तिसमासोक्त्योर्भीवत्वं निषिद्धम् । तत्र हीतिवृत्तसादृश्यं वर्तते । औपम्यभेदात्तयोरिति ॥

निदर्शनमाह—

एकाकिनी यदबला तरुणी तथाह-
मस्मिन्गृहे गृहपतिश्च गतो विदेशम् ।
किं याचसे तदिह वासमियं वराकी
श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ ॥ ४१ ॥

एकाकिनीति । तरुणपथिकस्य वासं याचमानस्य काचित्साभिलाषा योषिदिदं प्रकटप्रतिषेधार्थं वाक्यमाह । एतेन चोक्तपदार्थेन विलक्षणो वासानुमतिविधिलक्षणो भावोऽवगम्यते ॥

अथ पर्यायः—

वस्तु विवक्षितवस्तुप्रतिपादनशक्तमसदृशं तस्य ।
यद्जनकमजन्यं वा तत्कथनं यत्स पर्यायः ॥ ४२ ॥

वस्त्विति । यद्वस्तु विवक्षितस्य मनोगतस्य वस्तुनः प्रतिपादनसमर्थं तस्य कथनं यत्स पर्यायोऽलंकारः । समासोक्त्यन्योक्त्योः पर्यायत्वनिवृत्त्यर्थमाह—असदृशं तस्य । तस्य वाच्यस्य वस्तुनोऽसदृशमतुल्यम् । भावसूक्ष्मयोः पर्यायोक्तनिवृत्त्यर्थमाह—अजनकमजन्यं वेति । अयमर्थः—प्रथमभावे विकारलक्षणेन कार्येण विकारवतोऽभिप्रायो यथा गम्यते तथा स्वजनकेन सह प्रतिबन्धश्चेति गमकस्य जन्यतास्ति । द्वितीयभावसूक्ष्मयोस्तु वस्त्वन्तरप्रतीतिजननाज्जनकतेति तेषां व्यवच्छेदकमिदं विशेषणद्वयम् । इह तु विवक्षितवस्तुप्रतिपादकं वस्तु न तथाभूतम् । वाच्यवाचकभावशून्यमित्यर्थः । द्वितीयभावे हि वक्तुरभिप्रायरूपमर्थान्तरं वाक्येन गम्यते । सूक्ष्मे तु युक्तिमदर्थोऽपि शब्दोऽर्थान्तरमुपपत्तिमद्गमयति । इह तु स एवार्थः पर्यायेणोच्यते । न त्वभिप्रायरूपार्थान्तरप्रतीतिरिति ॥

उदाहरणमाह—

राजन्नहासि निद्रां रिपुबन्दीनिबिडनिगडशब्देन ।
तेनैव यदन्तरितः स कलकलो बन्दिवृन्दस्य ॥ ४३ ॥

राजन्निति । राज्ञश्चाटुवचनमिदम् । अत्र बन्दीनिगडरवेण निद्रामोक्षकथनं यद्वस्तु तस्य तावन्मात्रमेव न तात्पर्यमपि तु त्वया रिपूञ्जित्वा तन्नार्यो हृता इति निखिलरिपुविजयः पर्यायेण प्रतिपाद्यते ॥

प्रकारान्तरमाह—

यत्रैकमनेकस्मिन्ननेकमेकत्र वा क्रमेण स्यात् ।
वस्तु सुखादिप्रकृति क्रियेत वान्यः स पर्यायः ॥ ४४ ॥

यत्रेति । अनेकस्मिन्नाधारे क्रमेणैकं वस्तु यत्र स्वयमेव स्यात्स पर्यायः । अथवैकस्मिन्नाधारेऽनेकं यत्र स्यात्सोऽपि पर्यायः । कीदृशमेकमनेकं वा वस्त्वित्याह—सुखादिप्रकृति । सुखदुःखादिस्वरूपमित्यर्थः । स्यादिति कर्तृनिर्देशात्कर्मण्यप्राप्तं पर्यायत्वमाह—क्रियेत वेति । तदेवं चतुर्विधः पर्यायः ॥

उदाहरणमाह—

कमलेषु विकासोऽभूदुदयति भानावुपेत्य कुमुदेभ्यः ।
नभसोऽपससार तमो बभूव तस्मिन्नथालोकः ॥ ४५ ॥

कमलेष्विति । अत्रैको विकासोऽनेकस्मिन्वस्तुनि कुमुदकमलाख्ये क्रमेण भवति । तथैकस्मिन्नभसि तमः प्रकाशश्च । अनेकवस्तु सुखरूपम् । एते कर्तर्युदाहरणे ॥

कर्मण्याह—

आच्छिद्य रिपोर्लक्ष्मीः कृता त्वया देव भृत्यभवनेषु।
दत्तं भयं द्विषद्भ्यः पुनरभयं याचमानेभ्यः॥ ४६॥

आच्छिद्येति। अत्रैका लक्ष्मीरनेकत्र रिपुषु भृत्येषु च कृता। तथैकस्मिन्द्विषल्लक्षणे वस्तुनि भयाभये च दुःखसुखरूपे क्रमेण दत्ते। पूर्वत्र पर्यायशब्दस्य शब्दान्तरेण कथनमर्थः। इह तु परिपाटी॥

अथ विषममाह—

विषम इति प्रथितोऽसौ वक्ता विघटयति कमपि संबन्धम्।
यत्रार्थयोरसन्तं परमतमाशङ्क्य तत्सत्त्वे॥ ४७॥

विषम इति। असावलंकारो विषम इति प्रथितो विषमनामा प्रसिद्धो यत्रार्थयोः संबन्धं घटनां वक्ता प्रतिपादको विघटयति। कीदृशं संबन्धम्। असन्तमविद्यमानम्। ननु यद्यसन्संबन्धस्तर्हि स्वयं विघटित एव किमस्य विघटनीयमित्याह—तस्य सत्त्वे सद्भावे परमतं पराभिप्रायमाशङ्क्य। परमतेन सन्तं कृत्वेत्यर्थः॥

उदाहरणमाह—

यो यस्य नैव विषयो न स तं कुर्यादहो बलात्कारः।
सततं खलेषु भवतां क्व खलाः क्व च सज्जनस्तुतयः॥ ४८॥

य इति। केनचित्कस्यचिदग्रे उक्तममुना खलेनासौ सज्जनः स्तुत इति। स त्वसहमानस्तमाह—अहो भवतां खलेषु दुर्जनविषये बलात्कारः पक्षपातः। यतस्तदनुकूलं ब्रूथ। कस्मात्ते तत्स्तुतिं न कुर्वन्तीत्याह—यस्य खलस्य यो न विषयः सज्जनस्तवादिः स तं नैव कुर्यात्। किमिति खलानां शिष्टस्तवादिर्न विषय इत्याह—क्व खलाः क्व च सज्जनस्तुतय इति। अत्र खलस्तुत्योरसत्त्वेव संबन्धः परमते सत्त्वाशङ्क्या विघटितः। इदं चात्रोदाहरणम्—'निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः' इत्यादि॥

प्रकारान्तरमाह—

अभिधीयते सतो वा संबन्धस्यार्थयोरनौचित्यम्।
यत्र स विषमोऽन्योऽयं यत्रासंभाव्यभावो वा॥ ४९॥

अभिधीयत इति। यत्रार्थयोर्विद्यमानस्य संबन्धस्य केवलमनौचित्यमुच्यते सोऽन्योऽयं विषमाख्योऽलंकारः। अथवा यत्रासंभाव्यस्य भावः सत्ताभिधीयते सोऽपि विषमः। अनुचितार्थोऽत्र विषमशब्दः॥

उदाहरणमाह—

रूपं क्व मधुरमेतत्क्व चेदमस्याः सुदारुणा व्यसनम्।
इति चिन्तयन्ति पथिकास्तव वैरिवधूं वने दृष्ट्वा॥ ५०॥

रूपमिति । अत्र रूपव्यसनयोरर्थयोरेकत्र रिपुस्त्रियां विद्यमानयोरनौचित्यम् । यत्र हि रूपं न तत्र व्यसनम् । यदाह—'अलभ्यशोकाभिभवेयमाकृतिः' इति । अथवासंभाव्यस्य रूपस्यातिव्यसनस्य च भावोऽत्र कथ्यत इति साधारणमेकमुदाहरणम् ॥

भूयोऽपि भेदान्तराण्याह—

तदिति चतुर्धा विषमं यत्राण्वपि नैव गुर्वपि च कार्यात् ।
कार्यं कुर्यात्कर्ता हीनोऽपि ततोऽधिकोऽपि न वा ॥ ९१ ॥

तदिति । तद्विषममिति वक्ष्यमाणेन प्रकारेण चतुर्धा चतुष्प्रकारम् । कथमित्याह—यत्र कुतश्चित्कार्याद्धेतोररावपि स्वल्पमपि कार्यं कर्ता नैव कुर्यादित्येकः प्रकारः । गुर्वपि कुर्यादिति द्वितीयः । अत्र च हीनाधिकत्वं कर्ता नापेक्षते । तथा हीनोऽशक्तोऽपि कर्ता तत्कार्यं कुर्यादिति तृतीयः । तथाधिकोऽपि न वा नैव कुर्यादिति चतुर्थः । अत्र कार्ययोरणुत्वगुरुत्वापेक्षा न कर्तव्या । कार्यादिति च सर्वेषु योज्यम् । अन्यत्र वैषम्यनिरासार्थम् । अपिशब्दा विस्मयार्थाः । चशब्दः समुच्चये पूर्वापेक्षः । अत्रानौचित्यमशक्यकर्तृत्वं च विषमशब्दार्थः । विषममिति नपुंसकनिर्देशो विषमालंकारयुक्तकाव्यापेक्षयेति ॥

एतदुदाहरणानि चत्वार्यार्याद्वयेनाह—

त्वद्भृत्यावयवानपि सोढुं समरे क्षमा न ते क्षुद्राः ।
असिधारापथपतितं त्वं तु निहन्या महेन्द्रमपि ॥ ९२ ॥
त्वं तावदाःस्व दूरे भृत्यावयवोऽपि ते निहन्त्यहितान् ।
का गणना तैः समरे सोढुं शक्रोऽपि न सहस्त्वाम् ॥ ९३ ॥

त्वदिति । त्वमिति । अत्राणुत्वख्यापनार्थोऽवयवशब्दः । ततोऽरावपि भृत्यावयवसहनलक्षणं कार्यं रिपवः कर्तुमशक्ताः । नृपभयाशङ्कनात्कार्याद्धेतोः । तथा गुर्वपि शक्रहननं कार्यात्सत्त्वान्नृपेण क्रियते । तथा हीनोऽपि भृत्यावयवो रिपुवधं कार्यं तेजस्विनृपसंपर्कात्कीर्त्याशया वा करोति । तथाधिकोऽपि शक्रः कर्ता राजसहनलक्षणं तद्भयात्कार्यान्न करोति ॥

भूयोऽप्याह—

यत्र क्रियाविपत्तेर्न भवेदेव क्रियाफलं तावत् ।
कर्तुरनर्थश्च भवेत्तदपरमभिधीयते विषमम् ॥ ९४ ॥

यत्रेति । यत्र क्रियाविपत्तेः कर्मनाशाद्धेतोर्न केवलं तावत्कर्तुः क्रियाफलं न भवेद्यावतानर्थश्च भवेत्तदपरमन्यद्विषममभिधीयते । दारुणार्थश्चात्र विषमशब्दः । यथा—'विषममिदं वनम्' इति ॥

निदर्शनमाह—

उत्कण्ठा परितापो रणरणकं जागरस्तनोस्तनुता ।
फलमिदमहो मयातं सुखाय मृगलोचनां दृष्ट्वा ॥ ९५ ॥

उत्कण्ठेति। अत्र सुखाय मृगलोचनां स्त्रियं दृष्ट्वा न केवलं सुखं न प्राप्तं यावदनर्थं उत्कण्ठादिकः प्राप्तः। क्रियाविपत्तिरत्र दर्शनच्छेदः॥

अथानुमानम्—

वस्तु परोक्षं यस्मिन्साध्यमुपन्यस्य साधकं तस्य।
पुनरन्यदुपन्यस्येद्विपरीतं चैतदनुमानम्॥ ९६॥

वस्त्विति। साध्यं परोक्षं वस्तु यत्र प्रथममुपन्यस्य पुनस्तस्य साधकं हेतुं कविरुपन्यस्येत्तदनुमानमलंकारः। तथापि विपरीतं चेति पूर्वं साधकोपन्यासः पश्चात्साध्यनिर्देशो यत्र तच्चानुमानम्। वास्तवलक्षणेनैवापुष्टार्थस्य परिहृतत्वादग्निरत्र धूमादित्यलंकारत्वं न भवति। साधकमिति जातावेकवचनम्। तेन द्वयोर्बहुषु च साधकेषु भवति। यथा—'स्पष्टाक्षरमिदं यत्नान्मधुरं स्त्रीस्वभावतः। अल्पाङ्गत्वादनिर्ह्रादि मन्ये वदति सारिका॥' साधकग्रहणादेव वस्तुनः साध्यत्वे लब्धे साध्यग्रहणमवस्तुत्वेन सिद्धस्याभावस्यापि वस्तुत्वप्रतिपत्त्यर्थम्। यत्साध्यं तद्भावरूपमभावरूपं वा भवत्विति क्त्वाप्रत्ययेनैव पुनः शब्दार्थे लब्धे साध्यसाधकयोश्च विलक्षणत्वादन्यत्वे सिद्धे पुनरन्यपदग्रहणं बहूनां साधकानामुपन्यासे सत्यनुमानोज्ज्वलत्वख्यापनार्थम्। साधकमुपन्यस्येत्पुनश्चान्यदुपन्यस्येदिति शब्दशक्त्यैव वा भूयस्ता प्रतीतिः॥

उदाहरणमाह—

सावज्ञमागमिष्यन्नूनं पतितोऽसि पादयोस्तस्याः।
कथमन्यथा ललाटे यावकरसतिलकपङ्क्तिरियम्॥ ९७॥

सावज्ञमिति। अत्र पादपतनं साध्यमुपन्यस्य ललाटगतयावकरसतिलकपङ्क्तिः साधकमुपन्यस्तम्॥

तथा—

वचनमुपचारगर्भं दूरादुद्गमनमासनं सकलम्।
इदमद्य मयि तथा ते यथासि नूनं प्रियं कुपिता॥ ९८॥

वचनमिति। अत्र वचनादीनि पूर्वं साधकान्युपन्यस्तानि पश्चात्कुपितत्वं साध्यमिति वैपरीत्यम्॥

अथ भेदान्तराण्याह—

यत्र बलीयः कारणमालोक्याभूतमेव भूतमिति।
भावीति वा तथान्यत्कथ्येत तदन्यदनुमानम्॥ ९९॥

यत्रेति। यत्रालंकारे बलवत्तरकारणदर्शनेनान्यदिति कार्यमभूतमेवानुत्पन्नमेव भूतत्वेन भावित्वेन वा कथ्येत तत्तथेति पूर्ववद्यथापूर्वं साध्यमुपन्यस्य साधकोपन्यासः साधकं चोपन्यस्य साध्योपन्यास इत्येवं चतुर्धा तदन्यत्पूर्वोक्तादपरमनुमानम्॥

उदाहरणान्याह—

अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः ।
अयमायातः कालो हन्त मृताः पथिकगेहिन्यः ॥ ६० ॥

अविरलेति । अत्रादौ बलवतः कालस्य साधकस्योपन्यासः पश्चात्साध्यस्य मरणस्य भाविनोऽपि मृता इति भूतत्वेन निर्देशः ॥

तथा—

दिष्ट्या न मृतोऽस्मि सखे नूनमिदानीं प्रिया प्रसन्ना मे ।
ननु भगवानयमुदितस्त्रिभुवनमानन्दयन्निन्दुः ॥ ६१ ॥

दिष्ट्येति । अत्र प्रिया प्रसादस्य साध्यस्य भाविनो भूतत्वेनादावुपन्यासः पश्चाच्चन्द्रोदयस्य बलवतः साधनस्येति भूतोदाहरणम् ॥

भाविन्याह—

यास्यन्ति यथा तूर्णं विकसितकमलोज्ज्वलादमी सरसः ।
हंसा यथैवमेतां मलिनयति घनावली ककुभम् ॥ ६२ ॥

यास्यन्तीति । अत्र हंसगमनस्य साध्यस्यादौ भावित्वेन निर्देशः पश्चात्साधनस्य बलवतो घनावलीलक्षणस्येति ॥

तथा—

वहति यथा मलयमरुद्यथा च हरितीभवन्ति विपिनानि ।
प्रियसखि तथेह न चिरादेष्यति तव वल्लभो नूनम् ॥ ६३ ॥

वहतीति । अत्र पूर्वं बलवतो मलयवातादिकस्य साधकस्य निर्देशः । पश्चाद्वल्लभागमनस्य साध्यस्य भावित्वेनेति ॥

अथ दीपकम्—

यत्रैकमनेकेषां वाक्यार्थानां क्रियापदं भवति ।
तद्वत्कारकपदमपि तदेतदिति दीपकं द्वेधा ॥ ६४ ॥

यत्रेति । यत्रानेकेषां वाक्यार्थानामेकं क्रियापदं भवति तद्वत्कर्त्रादिकारकपदं वा तदित्यमुना प्रकारेण दीपकं द्वेधा । क्रियादीपकं कारकदीपकं चेत्यर्थः ॥

अथास्यान्वर्थभेदान्दर्शयितुमाह—

आदौ मध्येऽन्ते वा वाक्ये तत्संस्थितं च दीपयति ।
वाक्यार्थानिति भूयस्त्रिधैतदेवं भवेत्षोढा ॥ ६५ ॥

आदाविति । तदिति द्विविधं दीपकं पद्यादिलक्षणवाक्यस्यादौ मध्येऽन्ते वावस्थितं

वाक्यार्थान्दीपयति प्रकाशयतीत्यन्वर्थबलादादिदीपकं मध्यदीपकमन्तदीपकं चेति त्रिविधम्। एवं चैतत्षोढा षड्विधं भवेदिति॥

तदुदाहरणानि यथाक्रममाह—

कान्ता ददाति मदनं मदनः संतापमसममनुपशमम्।
संतापो मरणमहो तथापि शरणं नृणां सैव॥ ६६॥

कान्तेति। इदमादिक्रियादीपकम्॥

तारुण्यमाशुमदनं मदनः कुरुते विलासविस्तारम्।
स च रमणीषु प्रभवञ्जनहृदयावर्जनं बलवत्॥ ६७॥

तारुण्यमिति। इदं मध्यक्रियादीपकम्॥

नवयौवनमङ्गेषु प्रियसङ्गमनोरथो हि हृदयेषु।
अथ चेष्टासु विकारः प्रभवति रम्यः कुमारीणाम्॥ ६८॥

नवेति। इदमन्तक्रियादीपकम्॥

निद्रापहरति जागरमुपशमयति मदनदहनसंतापम्।
जनयति कान्तासंगमसुखं च कोऽन्यस्ततो बन्धुः॥ ६९॥

निद्रेति। इदमादिकर्तृदीपकम्॥

स्रंसयति गात्रमखिलं ग्लपयति चेतो निकाममनुरागः।
जनमसुलभं प्रति सखे प्राणानपि मङ्क्षु मुष्णाति॥ ७०॥

स्रंसयतीति। इदं मध्यकर्तृदीपकम्॥

दूरादुत्कण्ठन्ते दयितानां संनिधौ तु लज्जन्ते।
त्रस्यन्ति वेपमानाः शयने नवपरिणया वध्वः॥ ७१॥

दूरादिति। इदमन्तकर्तृदीपकम्॥ एवं कर्मादिषु कारकेषूदाहरणानि द्रष्टव्यानि। अस्य च दीपकस्य प्रायोऽलंकारान्तरैः समावेश इष्यते। तथा ह्यायोरुदाहरणयोः कारणमालायाः सद्भावः। तृतीयचतुर्थपञ्चमेषु वास्तवसमुच्चयस्य। षष्ठे जातेः॥

अथ परिकरः—

साभिप्रायैः सम्यग्विशेषणैर्वस्तु यद्विशिष्येत।
द्रव्यादिभेदभिन्नं चतुर्विधः परिकरः स इति॥ ७२॥

सेति। यद्द्रव्यगुणक्रियाजातिलक्षणं चतुर्विधं वस्तु साभिप्रायैर्विशेषणैः सम्यग्विशिष्येत स इत्यमुना प्रकारेण चतुष्प्रकारः परिकरालंकारो भवति। साभिप्रायग्रहणं वस्तुस्वरूपमात्राभिधानकल्पितानां विशेषणानां निरासार्थम्। यथा—'न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः।' इत्यत्र भूर्जत्वचां कुञ्जरबिन्दुशोणाः इति विशेषणं

वस्तुस्वरूपमात्राख्यापकमिति । सम्यग्ग्रहणं तु कविविवक्षिताभिप्रायाप्रत्यायकविशेषणानां निवृत्त्यर्थम् । तस्य भवन्ति द्रव्यमित्याद्यर्थचातुर्विध्याभिधानादेव तत्त्वावगमे सति द्रव्यादिभेदभिन्नं चतुर्विध इति यत्कृतं तत्कैश्चित्क्रियाया अवस्तुत्वमुक्तं त्रिविधश्च परिकरोऽभ्यधायि तन्मतनिरासार्थमिति ॥

तदुदाहरणानि यथाक्रममाह—

उचितपरिणामरम्यं स्वादु सुगन्धि स्वयं करे पतितम् ।
फलमुत्सृज्य तदानीं ताम्यसि मुग्धे मुधेदानीम् ॥ ७३ ॥

उचितेति । काचित्सखीमाह—हे मुग्धे स्वल्पप्रज्ञे, एवंविधं फलं तदानीमुत्सृज्येदानीं मुधैव वृथैव ताम्यसि खिद्यस इत्यर्थः । अत्र फलवस्तुनो विशेषणानि साभिप्रायाणि । अयं चाभिप्रायः—योग्यपरिपाकसुन्दरता सुस्वादुरसता सौगन्ध्यं स्वयं हस्तपतनं चैकैकमपरित्यागकारणम् । त्वया त्वेतत्सकलगुणयुतं फलं त्यजन्त्या स्वयं जानन्त्यैव महाननुतापोऽङ्गीकृत एव । तत्किमिदानीं खेदेनेति । अथवात्रेदमुदाहरणम्—'कर्ता द्यूतच्छलानां जतुमयभवनादीपनो योऽभिमानी कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः । राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं क्वास्ते दुर्योधनोऽसौ कथय न तु रुषा द्रष्टुमभ्यागतौ स्वः ॥' इदं द्रव्योदाहरणम् ॥

कार्येषु विघ्नितेच्छं विहितमहीयोपराधसंवरणम् ।
अस्माकमधन्यानामार्जवमपि दुर्लभं जातम् ॥ ७४ ॥

कार्येष्विति । मानिनी नायकमिदमाह । अत्रार्जवं गुणस्तद्विशेषणान्यन्यानि साभिप्रायाणि । तथाह्यार्जवे सति मुग्धतया यदेव कार्येषु सुरतेषु गुष्मदादिरिच्छति तदेव क्रियते । तथा महीयसां गुरूणामपराधानां संवरणमाच्छादनं भवति । तच्चार्जवमस्माकमधन्यानां दुष्प्रापं जातम् । अयमभिप्रायः—नाहमृज्वी येनैतानार्जवगुणान्मयि संभाव्य मां प्रसादयसीति ॥

क्रियापरिकरस्तु—

सततमनिर्वृतमानसमायाससहस्रसंकटक्लिष्टम् ।
गतनिद्रमविश्वासं जीवति राजा जिगीषुरयम् ॥ ७५ ॥

सततमिति । अत्र जीवतीति क्रिया । तद्विशेषणान्यनिर्वृतमानसमित्यादीनि । तेषामभिप्रायो राज्यगर्हादिकः । एवं विधं राज्ञो जीवनं गर्हितमित्यर्थः ॥

अथ जातिपरिकरमाह—

अत्यन्तमसहनानामुरुशक्तीनामनिघ्नवृत्तीनाम् ।
एकं सकले जगति स्पृहणीयं जन्म केसरिणाम् ॥ ७६ ॥

अत्यन्तमिति । अत्र केसरिणामिति सिंहजातिः । तद्विशेषणान्यसहनानामित्यादीनि ।

अभिप्रायस्तु तैः सिंहानां महत्त्वप्रतिपादनमेव । कथमन्यथा तज्जन्मनि स्पृहा भवेत् । अथवात्रैवमुदाहरणम्—'कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलः क्षुधाक्षामो वृद्धः पिठरककपालार्दितगलः । व्रणैः पूतिक्लिन्नैः कृमिकुलचितः स्वापबहुलः शुनीमन्वेति श्वा तमपि मदयत्येव मदनः' ॥

अथ परिवृत्तिः—

युगपद्दानादाने अन्योन्यं वस्तुनोः क्रियेते यत् ।
क्वचिदुपचर्येते वा प्रसिद्धितः सेति परिवृत्तिः ॥ ७७ ॥

युगपदिति । यदन्योन्यं परस्परं वस्तुनोर्युगपत्समकालं दानादाने त्यागग्रहणे क्रियेते सेत्यमुना प्रकारेण परिवृत्तिर्नामालंकारो भवति । अथवा क्वचिदसती दानादाने यदुपचर्येते सा परिवृत्तिः । कथमसत उपचार इत्याह—प्रसिद्धितः । प्रसिद्ध्या हि न किंचिदपि विरुध्यते । अन्यथा गगनादीनामपि मूर्तधर्मवर्णनमयुक्तं स्यादिति भावः ॥

उदाहरणे द्वाभ्यामार्याभ्यामाह—

दत्त्वा दर्शनमेते मत्प्राणा वरतनु त्वया क्रीताः ।
किं त्वपहरसि मनो यद्ददासि रणरणकमेतदसत् ॥ ७८ ॥

दत्त्वेति । कश्चिद्व्यसनी वक्ति । इदमत्र दर्शनसमकालमेव प्राणक्रयस्तथा चित्तहरणसमकालमेव हृदयोत्कलिकादानमुपचरितम् ॥

अथ परिसंख्या—

पृष्टमपृष्टं वा सद्गुणादि यत्कथ्यते क्वचित्तुल्यम् ।
अन्यत्र तु तदभावः प्रतीयते सेति परिसंख्या ॥ ७९ ॥

पृष्टमिति । यद्गुणादि गुणक्रियाजातिलक्षणं वस्तु क्वचिन्नियतैकवस्तुन्याधारे विद्यमानं कथ्यते । कीदृशम् । सत्तुल्यं साधारणम् । अन्यत्रापि विद्यमानं सदित्यर्थः । यद्येवं कस्मात्क्वचित्कथ्यत इत्याह—अन्यत्र वस्त्वन्तरे तस्याभावः प्रतीयते । कथने कृते सति तच्च क्वचित्पृष्टं कथ्यते क्वचिदपृष्टमिति द्विधा । पृष्टग्रहणं वाक्ये प्रश्नस्योपादानार्थम् । सेत्यमुना प्रकारेण परिसंख्या भण्यते ॥

उदाहरणानि यथा—

किं सुखमपारतन्त्र्यं किं धनमविनाशि निर्मला विद्या ।
किं कार्यं संतोषो विप्रस्य महेच्छता राज्ञाम् ॥ ८० ॥

किमिति । अत्र सुखो गुणं धनं त्वविनाशित्वगुणयुक्तं पृष्टम् । तथा किं कार्यमित्यत्र द्विजनृपकर्तृका क्रिया पृष्टा । तेषां चान्यत्र सत्त्वेऽप्यपारतन्त्र्ये विद्यायां संतोषे महेच्छतायां च सद्भावः कथितः । अन्यत्र तदभाव एव प्रतीयते । अपारतन्त्र्यमेव सुखमित्याद्यवधारणप्रतीतेरिति । जातौ तु के ब्राह्मणा येषां सत्यमित्यादि द्रष्टव्यम् ॥

अपृष्टोदाहरणमाह—

कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ॥ ८१ ॥

कौटिल्यमिति । इदं कौटिल्यादिषु गुणेषूदाहरणम् । द्रव्यक्रियाजातिषु तु स्वयं द्रष्टव्यानि । लक्षणयोजना च कर्तव्येति ॥

अथ हेतुः—

हेतुमता सह हेतोरभिधानमभेदकृद्भवेद्यत्र ।
सोऽलंकारो हेतुः स्यादन्येभ्यः पृथग्भूतः ॥ ८२ ॥

हेत्विति । हेतुमता कार्येण सह हेतोः कारणस्य यत्राभिधानमभेदकृदभेदेन भवेत्स हेतुर्नामालंकारः । अन्येभ्योऽलंकारेभ्यः पृथग्भूतो विलक्षणः । अत्र वालंकारग्रहणमन्येभ्यः पृथग्भूत इति च परमतनिरासार्थम् । तथा हि नाम हेतुसूक्ष्मलेशानामलंकारत्वं नेष्टम् । एषां चालंकारत्वं विद्यते । वाक्यार्थालंकरणान्न चान्यत्रान्तर्भावः शक्यते कर्तुमिति ॥

उदाहरणमाह—

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ।
रम्योऽयमेति संप्रति लोकोत्कण्ठाकरः कालः ॥ ८३ ॥

अविरलेति । अविरलानां कमलानां विकासहेतुत्वाद्वसन्तकाल एव तथोच्यते । एवं सकलालिमदश्चेत्यादावपि द्रष्टव्यम् । न त्वविरलानां कमलानां विकासो यत्रेत्यादि बहुव्रीहिः कर्तव्यः । तदा त्वभेदो न स्यात् । उदाहरणदिग्गियम् । इदं तूदाहरणं यथा—'आयुर्घृतं नदी पुण्यं भयं चौरः सुखं प्रिया । वैरं द्यूतं गुरुर्ज्ञानं श्रेयो ब्राह्मणपूजनम्' ॥

अथ कारणमाला—

कारणमाला सेयं यत्र यथा पूर्वमेति कारणताम् ।
अर्थानां पूर्वार्थाद्भवतीदं सर्वमेवेति ॥ ८४ ॥

कारणेति । सेयं कविप्रसिद्धा कारणमाला यस्यामर्थानां मध्याद्यथापूर्वं यो यः पूर्वः स स उत्तरेषामर्थानां कारणभावं याति । कथं याति पूर्वस्मादर्थादिदमुत्तरोत्तरार्थजातं सर्वमेव भवतीत्यमुना प्रकारेणेति ॥

उदाहरणमाह—

विनयेन भवति गुणवान्गुणवति लोकोऽनुरज्यते सकलः ।
अभिगम्यतेऽनुरक्तः ससहायो युज्यते लक्ष्म्या ॥ ८५ ॥

विनयेनेति । अत्र पूर्वः पूर्वो विनयादिरुत्तरोत्तरस्य गुणवत्त्वादेर्निमित्तम् ॥

अथ व्यतिरेकः—

यो गुण उपमेये स्यात्तत्प्रतिपन्थी च दोष उपमाने ।
व्यस्तसमस्तन्यस्तौ तौ व्यतिरेकं त्रिधा कुरुतः ॥ ८६ ॥

य इति । उपमेये यो गुणः स्यादुपमाने च तस्य गुणस्य प्रतिपन्थी विरुद्धो यो दोषस्तौ गुणदोषौ व्यतिरेकमलंकारं त्रिधा त्रिविधं कुरुतः । कथमित्याह—व्यस्तसमस्तन्यस्ताविति । तत्र गुण एवोपमेये न्यस्यते न तूपमाने दोष इत्येकः प्रकारः । तथोपमाने दोषो न्यस्यते, न तूपमेये गुण इति द्वितीयः । एवं व्यस्तभेदौ द्वौ । तथोपमेये गुणोऽपि न्यस्यते, उपमाने च दोषोऽपीति समस्तन्यासे एक एव प्रकार इति त्रैविध्यम् । गुणश्चात्र हृदयावर्जकार्थविशेषो गृह्यते, न तु द्रव्यगुणक्रियाजातिषु प्रसिद्धः । दोषोऽपि चोक्तगुणविपक्ष एव । न चात्रौपम्यालंकारभेदत्वमाशङ्कनीयम् । सादृश्याभावात् । उपमानोपमेयपदोपादानं तु व्यतिरेकसिद्ध्यर्थम् । नह्यन्यथा संघटते गुणिनः सदोषेण सहौपम्यविघटनं व्यतिरेक इति कृत्वा ॥

तदुदाहरणान्याह—

सकलङ्केन जडेन च साम्यं दोषाकरेण कीदृक्ते ।
अभुजंगः समनयनः कथमुपमेयो हरेणासि ॥ ८७ ॥

सकलङ्केनेति । सकलङ्केत्यार्यार्धम् । अत्रोपमाने दोषन्यास उपमेये गुणवत्ता प्रतीयते । अभुजंग इत्याद्युत्तरार्धम् । अत्रोपमाने सदोषत्वं गम्यते ॥

तरलं लोचनयुगलं कुवलयमचलं किमेतयोः साम्यम् ।
विमलं मलिनेन मुखं शशिना कथमेतदुपमेयम् ॥ ८८ ॥

तरलमिति । अत्रोपमेये गुण उपमाने दोषश्च न्यस्त इति समस्तो भेदः ॥

भेदान्तरमाह—

यो गुण उपमाने वा तत्प्रतिपन्थी च दोष उपमेये ।
भवतो यत्र समस्तौ स व्यतिरेकोऽयमन्यस्तु ॥ ८९ ॥

य इति । सोऽयं व्यतिरेकोऽन्यः पूर्वविलक्षणः, यत्रोपमाने गुणस्य न्यास उपमेये च दोषस्य । तौ समस्तौ न्यसनीयौ । व्यस्तयोरपि केचिदिच्छन्ति । यथा—'अभ्यर्णवर्ति दाह्यं वस्तु तदानीं विदह्याग्निः । शाम्यति यस्तेन कथं समो ननु स्यात्प्रियाविरहः ॥' तथा—'स्वदन्नेव तदात्वेऽपि बाधितोऽपि न शाम्यति । यः स दासेरकः क्षुद्रक्ष्वेडतुल्यः किमुच्यते ॥' तदेतदयुक्तम् । पूर्वेणैव सिद्धत्वात् । सर्वोऽप्यात्मीयधर्मोत्कर्षो गुणः । स चात्रोपमेये विद्यत इति ॥

उदाहरणमाह—

क्षीणः क्षीणोऽपि शशी भूयो भूयो विवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥ ९० ॥

क्षीण इति । अत्र शश्युपमानं क्षीणोऽपि वृद्धिगुणयुक्तो निर्दिष्टः । यौवनं तूपमेयं क्षयदोषयुक्तमिति ॥

अथान्योन्यमाह—

यत्र परस्परमेकः कारकभावोऽभिधेययोः क्रियया ।
संजायेत स्फारिततत्त्वविशेषस्तदन्योन्यम् ॥ ९१ ॥

यत्रेति । यत्राभिधेययोः पदार्थयोः परस्परमन्योन्यं क्रियया हेतुभूतयैको निर्विलक्षणः कारकभावः कर्त्रादिकारकत्वं संजायेत । कीदृशः । स्फारितः परिपोषितस्तत्त्वविशेषो विशिष्टधर्मो येन स तथाभूतः । तदन्योन्यमलंकारः । परस्परग्रहणं 'सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः' इत्यन्योन्यनिवृत्त्यर्थम् । एकग्रहणं तु 'कृष्णद्वैपायनं पार्थः सिषेवे शिष्यवत्ततः । असावध्यापयेत्तं तु विद्यां योगसमन्विताम् ॥' इत्येतन्निवृत्त्यर्थम् ॥

उदाहरणमाह—

रूपं यौवनलक्ष्म्या यौवनमपि रूपसंपदस्तस्याः ।
अन्योन्यमलंकरणं विभाति शरदिन्दुसुन्दर्याः ॥ ९२ ॥

रूपमिति । अत्र रूपयौवनयोरलंकरणक्रिययैकः कारकभावः कर्तृत्वलक्षणः । तेन च रूपस्य दीर्घनयनत्वादिको विशेषः स्फारितः । यौवनस्यापि वपुर्विभागश्चतुरस्रशोभादिकत्वविशेषः स्फारितः ॥

अथोत्तरम्—

उत्तरवचनश्रवणादुन्नयनं यत्र पूर्ववचनानाम् ।
क्रियते तदुत्तरं स्यात्प्रश्नादप्युत्तरं यत्र ॥ ९३ ॥

उत्तरेति । उत्तरवचनानि श्रुत्वा यत्र पूर्ववचनानि निश्चीयन्ते तदुत्तरम् । तथा प्रश्नाच्चोत्तरं यत्र स्यात्तदप्युत्तरम् । इति द्विधेदम् । अस्य चाद्योत्तरभेदस्यानुमानस्य चायं विशेषो यत्तत्र सामान्येन हेतुहेतुमद्भावः साध्यते । अत्र तु न हेतुहेतुमद्भावो वाक्ये निबध्यते । किं तु श्रोता श्रुत्वोत्तरवचनानि तदनुसारेण पूर्ववचनानि निश्चिनोतीति ॥

उदाहरणम्—

भण मानमन्यथा मे भ्रुकुटिं मौनं विधातुमहमसहा ।
शक्नोमि तस्य पुरतः सखि न खलु पराङ्मुखीभवितुम् ॥ ९४ ॥

भणेति । अत्रास्मान्नायिकोक्तादुत्तरात्सखीवचनान्युच्चीयन्ते । नूनमस्याः सखीभिरुक्तं यथा सापराधस्य प्रियस्य भ्रुकुटिमौनपराङ्मुखीभावान्कुरुष्वेति ॥

द्वितीयोदाहरणमाह—

किं स्वर्गादधिकमुखं बन्धुसुहृत्पण्डितैः समं लक्ष्मीः ।
सौराज्यमदुर्भिक्षं सत्काव्यरसामृतास्वादः ॥ ९५ ॥

किमिति। इति प्रश्नादुत्तरम्। अथास्य परिसंख्यायाश्चायं विशेषो यत्तत्र नियमप्रतीतिरेतदेवात्रैव वेति। इह तु प्रश्नादुत्तरमात्रम्, न तु नियमप्रतीतिः॥

अथ सारम्—

यत्र यथासमुदायाद्यथैकदेशं क्रमेण गुणवदिति।
निर्धार्यते परावधि निरतिशयं तद्भवेत्सारम्॥ ९६॥

यत्रेति। यो यः समुदायो यथासमुदायम्, यो य एकदेशो यथैकदेशमित्यव्ययीभावः। यथासमुदायाद्यथैकदेशं क्रमेण निर्धार्यते पृथक्क्रियते। कथम्, परावधि। परमुत्कृष्टममेकदेशमवधिं कृत्वा। निर्धारणं च गुणक्रियाजातिभिः संभवति। अत आह—गुणवदिति। गुणवत्त्वेन, न तु क्रियाजातिभ्याम्। क्रमेणेति चाक्रमनिवृत्त्यर्थम्। तेनेह सारत्वं न भवति यथा—'नदीषु गङ्गा नगरीषु काञ्ची पुष्पेषु जाती रमणीषु रम्भा। सदोत्तमत्वं पुरुषेषु विष्णुरैरावणो गच्छति वारणेषु॥' नह्यत्र शृङ्खलाकटकवन्निर्धारणम्। कस्तर्ह्यसौ। ऽलंकारः, साराभास इत्युच्यते। सर्वत्र हि संपूर्णलक्षणाभावे आभासत्वं कविभिर्व्यवस्थापितम्। निरतिशयग्रहणमतिशयालंकारत्वनिवृत्त्यर्थम्। अन्यरूपत्वात्तस्य। सारत्वमुत्कर्षस्तत्र चातिशयालंकाराशङ्केति। अथवाप्याक्षेपिकगुणवत्त्वनिवृत्त्यर्थमिति॥

उदाहरणम्—

राज्ये सारं वसुधा वसुंधरायां पुरं पुरे सौधम्।
सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम्॥ ९७॥

राज्य इति। अत्र सप्ताङ्गराज्यसमुदायाद्वसुधाख्यैकदेशस्य, ततोऽपि पुरस्येत्यादि गुणवत्त्वेन निर्धारणम्॥

अथ सूक्ष्मम्—

यत्रायुक्तिमदर्थो गमयति शब्दो निजार्थसंबद्धम्।
अर्थान्तरमुपपत्तिमदिति तत्संजायते सूक्ष्मम्॥ ९८॥

यत्रेति। प्रतिपाद्येऽर्थे यस्य युक्तिर्न विद्यतेऽसावयुक्तिमदर्थः शब्दो यत्रात्मीयार्थसंबद्धमर्थान्तरं गमयति प्रत्यापयति तत्सूक्ष्मम्। ननु यस्य निजार्थेऽपि युक्तिर्नास्ति तस्य कुतस्तत्संबन्धे स्यादित्याह—उपपत्तिमदिति। इतिहैतौ। यतोऽर्थान्तरे तत्संबद्धे घटना विद्यते। अत एव सूक्ष्मावगमकारणात्सूक्ष्ममिति नाम॥

उदाहरणमाह—

आदौ पश्यति बुद्धिर्व्यवसायोऽकालहीनमारभते।
धैर्यं व्यूढमहाभरमुत्साहः साधयत्यर्थम्॥ ९९॥

आदाविति। व्यवसायः कर्मण्युद्योगः। धैर्यमसंमोहः। उत्साहः शक्तिः। अत्र पुनर्बुद्धेर्दर्शनम्, व्यवसायस्यारम्भः, धैर्यस्य भरवहनम्, उत्साहस्य च साधनमचेतनत्वान्न घटते।

इत्येते शब्दा यथोक्तेऽर्थेऽनुपपन्नाः । करणभावो ह्येषां घटते, न कर्तृत्वम् । बुद्ध्यादिसंबद्धे तु देवदत्तादौ सर्वमुपपद्यत इति कृत्वा । यदा बुद्धिमानर्थं पश्यति तदा बुद्धिः पश्यतीत्याद्युच्यत इति ॥

अथ लेशः—

दोषीभावो यस्मिन्गुणस्य दोषस्य वा गुणीभावः ।
अभिधीयते तथाविधकर्मनिमित्तः स लेशः स्यात् ॥ १०० ॥

दोषीभाव इति । यस्मिन्गुणस्य दोषभावो दोषस्य च गुणभावो विधीयते । कीदृशः । तथाविधं गुणस्य दोषीकरणं दोषस्य गुणीकरणं वा कर्म निमित्तं यस्य स तथोक्तः । वाशब्द एकयोगेऽपि लेशत्वख्यापनार्थः । अन्यथा यत्रोभययोगस्तत्रैव स्यादिति ॥

उदाहरणमाह—

अन्यैव यौवनश्रीस्तस्याः सा कापि दैवहतिकायाः ।
मथ्नाति यया यूनां मनांसि दूरं समाकृष्य ॥ १०१ ॥

अन्येति । अत्र यौवनस्य गुणस्यापि युवचेतोमथनाद्दोषीभावः ॥

अथ दोषस्य गुणभावोदाहरणमाह—

हृदयं सदैव येषामनभिज्ञं गुणवियोगदुःखस्य ।
धन्यास्ते गुणहीना विदग्धगोष्ठीरसापेताः ॥ १०२ ॥

हृदयमिति । सुगममेव ॥

अथावसरः—

अर्थान्तरमुत्कृष्टं सरसं यदि वोपलक्षणं क्रियते ।
अर्थस्य तदभिधानप्रसङ्गतो यत्र सोऽवसरः ॥ १०३ ॥

अर्थान्तरमिति । तत्रार्थस्य न्यूनस्य यदुत्कृष्टमुदात्तं सश्रृङ्गारादिकं वार्थान्तरमुपलक्षणं क्रियते सोऽवसरालंकारः । किमर्थं क्रियत इत्याह—तस्योत्कृष्टत्वादेरभिधानप्रसङ्गेन । उत्कृष्टत्वं सरसत्वं वा न्यूनस्याभिधातुमित्यर्थः ॥

उदाहरणम्—

तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी ।
निवसन्बाहुसहायश्चकार रक्षः क्षयं रामः ॥ १०४ ॥

तदिति । अत्र साक्षाद्रामवासस्तत्कृतश्च राक्षसक्षय उत्कृष्टो वनस्योत्कृष्टत्वख्यापनायोपलक्षणत्वेन कृतः ॥

द्वितीयोदाहरणमाह—

सा सिप्रानाम नदी यस्यां मङ्क्षूर्मयो विशीर्यन्ते ।
मज्जन्मालवललनाकुचकुम्भास्फालनव्यसनात् ॥ १०५ ॥

सेति । अत्र मालवतरुणीलक्षणं सश्रृङ्गारं वस्तु सरसत्वाभिधानायोपलक्षणं सिप्रायाः कृतम् ॥

अथ मीलितम्—

तन्मीलितमिति यस्मिन्समानचिह्नेन हर्षकोपादि ।
अपरेण तिरस्क्रियते नित्येनागन्तुकेनापि ॥ १०६ ॥

तदिति । तन्मीलितमित्यलंकारः, यत्र हर्षकोपभयाद्यमपरेण वस्तुना हर्षादितुल्यचिह्नेन स्वाभाविकेन कृत्रिमेण वा तिरस्क्रियते । अपिर्विस्मये । इतिः प्रकारे ॥

उदाहरणम्—

तिर्यक्प्रेक्षणतरले सुस्निग्धे च स्वभावतस्तस्याः ।
अनुरागो नयनयुगे सन्नपि केनोपलक्ष्येत ॥ १०७ ॥

तिर्यगिति । अत्र नयनयुगस्य स्वाभाविकतिर्यक्प्रेक्षणादियुक्तस्य यादृशी चेष्टा तादृश्येवानुरागयुक्तस्येत्यसौ नित्येन तेनापह्नूयते ॥

मदिरामदभरपाटलकपोलतललोचनेषु वदनेषु ।
कोपो मनस्विनीनां न लक्ष्यते कामिभिः प्रभवन् ॥ १०८ ॥

मदिरेति । अत्र कोपसदृशचिह्नेन मदिरामदेनागन्तुकेन कोपस्तिरस्क्रियते ॥

अथैकावली—

एकावलीति सेयं यत्रार्थपरम्परा यथालाभम् ।
आधीयते यथोत्तरविशेषणा स्थित्यपोहाभ्याम् ॥ १०९ ॥

एकेति । सेयमेकावलीनामालंकारो यत्रार्थानां परम्परा यथालाभमाधीयते न्यस्यते । कीदृशी सा । यो य उत्तरोऽर्थः स स पूर्वस्य विशेषणं यस्यां सा तथाविधा । एतेन समुच्चयस्यैकावलीत्वं निषिद्धम् । कथं यथोत्तरविशेषणा, कथं वाधीयत इत्याह—स्थित्यपोहाभ्यामिति । स्थितिर्विधिरपोहो व्यवच्छेदस्ताभ्यामिति ॥

यथाक्रममुदाहरणे—

सलिलं विकासिकमलं कमलानि सुगन्धिमधुसमृद्धानि ।
मधु लीनालिकुलाकुलमलिकुलमपि मधुररणितमिह ॥ ११० ॥

सलिलमिति । अत्र सलिलाद्यर्थपरम्परा यथोत्तरकमलादिविशेषणा यथालाभं विधिमुखेन निर्दिष्टा ॥

नाकुसुमस्तरुरस्मिन्नुद्याने नामधूनि कुसुमानि ।
नालीनालिकुलं मधु नामधुरक्काणमलिवलयम् ॥ १११ ॥

नेति । अत्र निषेधरूपेण तर्वादिकार्यपरम्परा यथोत्तरकुसुमादिविशेषणा निहितेति ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः
सप्तमोऽध्यायः समाप्तः ।

अष्टमोऽध्यायः ।

वास्तवं सप्रभेदमाख्यायेदानीमौपम्यमाह—

सम्यक्प्रतिपादयितुं स्वरूपतो वस्तु तत्समानमिति ।
वस्त्वन्तरमभिदध्याद्वक्ता यस्मिंस्तदौपम्यम् ॥ १ ॥

सम्यगिति । यत्र प्रस्तुतं वस्तुस्वरूपविशेषेण सम्यगनन्यथा प्रतिपादयितुं वस्त्वन्तरमप्रस्तुतं वक्ताभिदध्यात्तदौपम्यं नामालंकारः । ननु वस्त्वन्तरोक्त्या कथं वस्तुस्वरूपं विशेषतः प्रतिपाद्यत इत्याह—तत्समानमिति । इतिहेतौ । यतो वस्त्वन्तरं प्रकृतवस्तुसदृशमतस्तेन तत्सम्यक्प्रतिपाद्यते । 'सर्वः स्वं स्वं रूपम्' (७।७) इत्यादिना सम्यक्त्वे लब्धे सम्यग्ग्रहणं विशिष्टसम्यक्त्वार्थम् । अभिदध्यादिति । कर्तृपदेनैव वक्तरि लब्धे वक्तृग्रहणं रक्तविरक्तमध्यस्थादिवक्तृविशेषप्रतिपत्त्यर्थम् । तेन यो यादृशो वक्ता येन स्वरूपेण वक्तुमिच्छति तादृशमेव वस्त्वन्तरमभिदध्यात्तदौपम्यम् । रक्तो यथा—'अमृतस्येव कुण्डानि सुखानामिव राशयः । रतेरिव निधानानि योषितः केन निर्मिताः ॥' इत्यादि । विरक्तो यथा—'एता हसन्ति च रुदन्ति च कार्यहेतोर्विश्वासयन्ति च नरं न च विश्वसन्ति । तस्मान्नरेण कुलशीलसमन्वितेन वेश्याः श्मशानसुमना इव वर्जनीयाः ॥' इत्यादि । मध्यस्थस्तु स्वरूपमात्रं वक्ति यथा—'दर्शनादेव नटवद्धरन्ति हृदयं स्त्रियः । सुविश्वस्तेऽप्यविश्वस्ता भवन्ति च चरा इव ॥' यत्रोपमानोपमेयभावः श्रौतः प्रातीतिको वा तदौपम्यमिति तात्पर्यम् । तेन संशयादयोऽप्येतद्भेदा एवेति ॥

सामान्यमभिधाय तद्भेदानाह—

उपमोत्प्रेक्षारूपकमपह्नुतिः संशयः समासोक्तिः ।
मतमुत्तरमन्योक्तिः प्रतीपमर्थान्तरन्यासः ॥ २ ॥
उभयन्यासभ्रान्तिमदाक्षेपप्रत्यनीकदृष्टान्ताः ।
पूर्वसहोक्तिसमुच्चयसाम्यस्मरणानि तद्भेदाः ॥ ३ ॥

उपमेति । उभयेति । तस्यौपम्यस्योपमादय एते एकविंशतिर्भेदाः ॥

यथोद्देशस्तथा लक्षणमिति पूर्वमुपमालक्षणमाह—

उभयोः समानमेकं गुणादि सिद्धं भवेद्यथैकत्र ।
अर्थेऽन्यत्र तथा तत्साध्यत इति सोपमा त्रेधा ॥ ४ ॥

उभयोरिति । उभयोः प्रस्तावादुपमानोपमेययोः समानं साधारणमेकमद्वितीयं गुणादि गुणसंस्थानादि यथा येन प्रकारेणैकत्रोपमाने सिद्धं प्रतीतम्, तथा तेनैव प्रकारेणान्यत्रार्थे उपमेये साध्यत इत्येवं प्रकारोपमा । सा च त्रेधा—वाक्योपमा, समासोपमा, प्रत्ययोपमेति । अभिधानस्य मानभेदेनेत्यत्र चैकत्रेति सामान्योक्तावपि 'प्रसिद्धमुपमानम्' इति न्यायादुपमानं लभ्यते ॥

अथैतद्भेदत्रयमाह—

वाक्योपमात्र षोढा तत्र त्वेका प्रयुज्यते यत्र ।
उपमानमिवादीनामेकं सामान्यमुपमेयम् ॥ ६ ॥

वाक्येति । अत्रोपमायां वाक्योपमा तावत्षट्प्रकारेति । एतच्च ब्रुवता वाक्योपमा प्रथमेत्युक्तं भवति । तेन पृथगुद्देशाभावो न दोषाय । तत्र तासु षट्सु मध्यादियमेका प्रथमा, यस्यामुपमानः प्रयुज्यते । तथेवादीनामिववत्सदृशयथातुल्यनिभादीनां साम्यवाचकानां मध्यादेकम् । तथा सामान्यमुपमानोपमेययोः साधारणधर्माभिधायकं पदम् । तथोपमेयमिति चतुष्टयम् । तुशब्दो लक्षणान्तरेभ्योऽस्य विशेषणार्थः । ननु यदीवादीनामेकमेव प्रयुज्यते कथं तर्हि 'दिने दिने सा परिवर्धमाना' इत्यादिष्वनेकेषां प्रयोगः । सत्यम् । औपम्यानामनेकत्वात् । अत्र त्वनेकं कारकमुपमानोपमेयतया निर्दिष्टम् । यथा—'ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् । शरैरुल्लैरिवोदीच्यानुद्धरिष्यन्नसानिव ॥' अत्रेवादीनामपि बहूनां प्रयोगो न्याय्यः । एवं हि परिपूर्णमौपम्यं भवति । यत्र तु बहूनामप्यौपम्य एक एवेवादिः प्रयुज्यते तत्र गतार्थत्वादप्रयोगो बोद्धव्यः । यथा—'सा भूधराणामधिपेन तस्याम्' इत्यादौ । अत्र हि नीताविव मेनायाम्, उत्साहगुणेनेव नगेन, संपदिव पार्वती जनितेति व्याख्यानम् । इत्यलं विस्तरेण ॥

उदाहरणमाह—

कमलमिव चारुवदनं मृणालमिव कोमलं भुजायुगलम् ।
अलिमालेव सुनीला तवैव मदिरेक्षणे कबरी ॥ ६ ॥

कमलमिति । अत्र कश्चित्कामी मुखादिकं वस्तु सम्यक्स्वरूपतः कमलादिगतचारुत्वादियुक्तं प्रतिपादयितुं वस्त्वन्तरं कमलादिकं तत्समानत्वात्प्रायुक्तवानित्यौपम्यम् । तथोभयोः कमलमुखयोः समानमेकं चारुत्वं यथैकत्र कमले सिद्धं तथोपमेये मुखे साध्यत इत्युपमालक्षणम् । तथा कमलमुपमानम्, इवशब्दः, चार्विति सामान्यम्, वदनमुपमेयम्, इति चतुष्टयं समस्तमिति वाक्योपमालक्षणम् । एवमन्यत्रापि लक्षणयोजना कर्तव्या ॥

अथ द्वितीयामाह—

इयमन्या सामान्यं यत्रेवादिप्रयोगसामर्थ्यात् ।
गम्येत सुप्रसिद्धं तद्वाचिपदाप्रयोगेऽपि ॥ ७ ॥

इयमिति । इयमन्या द्वितीया वाक्योपमा, यस्यां सामान्यं साधारणो धर्मस्तद्वा-

चिपदाप्रयोगेऽपि गम्यते । नन्वप्रयुक्तस्य पदस्य कथमर्थो गम्यत इत्याह—इवादिप्रयोगसामर्थ्यात् । इवादयो हि कस्य सादृश्यप्रतिपादनाय प्रयुज्यन्ते । यदि च प्रयुक्तैरपि तैरसौ न गम्यते तदानर्थकस्तेषां प्रयोगः स्यात् । यद्येवमुच्छेद एव सामान्यपदप्रयोगस्येत्याह—सुप्रसिद्धमिति । लोकप्रसिद्धमेव गम्यते नान्यदिति ॥

उदाहरणमाह—

शशिमण्डलमिव वदनं मृणालमिव भुजलतायुगलमेतत् ।
करिकुम्भाविव च कुचौ रम्भागर्भाविवोरू ते ॥ ८ ॥

शशीति । अत्र यथाक्रमं चारुत्वकोमलत्वोत्तुङ्गत्वगौरत्वान्यनुक्तान्यपि प्रसिद्धत्वात्प्रतीयन्ते ॥

तृतीयामाह—

वस्त्वन्तरमस्त्यनयोर्न समिति परस्परस्य यत्र भवेत् ।
उभयोरुपमानत्वं सक्रममुभयोपमा सान्या ॥ ९ ॥

वस्त्वन्तरमिति । अनयोर्वस्तुनोर्वस्त्वन्तरं समं तुल्यं नास्तीत्यतः कारणाद्यस्यामुभयोरुपमानोपमेययोः क्रमेण परस्परमुपमानत्वं स्यात्सोभयोपमा । अन्या पूर्वविलक्षणा । इयमपि सामान्यस्य प्रयोगाप्रयोगाभ्यां द्विविधा ॥

प्रयोगोदाहरणं स्वयमाह—

शशिमण्डलमिव विमलं वदनं ते मुखमिवेन्दुबिम्बमपि ।
कुमुदमिव स्मितमेतत्स्मितमिव कुमुदं च धवलमिदम् ॥ १० ॥

शशिमण्डलमिति । अप्रयोगे तु यथा—'खमिव जलं जलमिव खं हंस इव शशी शशाङ्क इव हंसः । कुमुदाकारास्तारास्ताराकाराणि कुमुदानि' ॥

चतुर्थीमाह—

सा स्यादनन्वयाख्या यत्रैकं वस्त्वनन्यसदृशमिति ।
स्वस्य स्वयमेव भवेदुपमानं चोपमेयं च ॥ ११ ॥

सेति । न विद्यतेऽन्वयो वस्त्वन्तरानुगमो यस्यामित्यनन्वयसंज्ञा सोपमा, यस्यामेकमेव वस्तु स्वयमेवोपमानमुपमेयं चात्मन एव भवेत् । कस्मात्, अनन्यसदृशमिति हेतोः । ननु यद्यन्यस्यात्रानुगमाभावस्तत्कथमौपम्यलक्षणमुपमालक्षणं वा घटते । नैष दोषः । यतोऽनन्यसमत्वं लक्षणं वस्तुनः सम्यक्स्वरूपं च यदा युगपद्विवक्षति वक्ता तदा सम्यक्स्वरूपप्रतिपादनं वस्त्वन्तराभिधानं विना न घटते । तदभिधाने चानन्यसमत्वं दुर्घटमिति कृत्वैकमेव वस्तूपमानोपमेयरूपतया विभिद्य वक्ति । अतः सामान्यमौपम्यलक्षणमुपमालक्षणं चास्ति । वस्त्वन्तरानन्वयश्चेत्यनन्वयोपमालक्षणम् ॥

सुश्लिष्टमुदाहरणमाह—

आनन्दसुन्दरमिदं त्वमिव त्वं सरसि नागनासोरु ।
इयमियमिव तव च तनुः स्फारस्फुरदुरुरुचिप्रसरा ॥ १२ ॥

आनन्देति । हे करिकरोरु, त्वमिव त्वं सरसि गच्छसीत्यादयन्वयः ॥

पञ्चमीमाह—

सा कल्पितोपमाख्या यैरुपमेयं विशेषणैर्युक्तम् ।
तावद्भिस्तादृग्भिः स्यादुपमानं तथा यत्र ॥ १३ ॥

सेति । यैर्यादृशैर्यत्संख्यैश्च विशेषणैर्युक्तमुपमेयम्, तादृग्भिरेव तत्संख्यैश्चोपमानमपि युक्तं यस्यां सा कल्पितोपमाख्या । कल्पिता चासावुपमा च तथाविधाख्या संज्ञा यस्या इति । विशेषणैरित्यतन्त्रम् । तेनैकस्य द्वयोश्च संग्रहः । किं तु बहुभिरौज्ज्वल्यं भवति ॥

उदाहरणम्—

मुखमापूर्णकपोलं मृगमदलिखितार्धपत्रलेखं ते ।
भाति लसत्सकलकलं स्फुटलाञ्छनमिन्दुबिम्बमिव ॥ १४ ॥

मुखमिति । अत्र मुखमुपमेयं परिपूर्णकपोलं मृगमदलिखितार्धपत्रलेखमिति विशेषणद्वयोपेतम् । शशिबिम्बमुपमानमपि स्फुरत्शोभशकलं स्फुटकलङ्कं चेति ॥

षष्ठीमाह—

अनुपममेतद्वस्त्वित्युपमानं तद्विशेषणं चासत् ।
संभाव्य सयद्यर्थं या क्रियते सोपमोत्पाद्या ॥ १५ ॥

अनुपममिति । उत्पाद्यत इत्युत्पाद्या । उत्पाद्यानामोपमा सा, या क्रियते । किं कृत्वा । उपमानमुपमानविशेषणं च संभाव्य संभवि कृत्वा । कुतः । अनुपममुपमानविकलमेतद्वस्त्विति कारणात् । कीदृशम् । अपमानसदविद्यमानम् । असतः कथं संभव इत्याह—सयद्यर्थं यदिचेदादिशब्दसहितमित्यर्थः । उपलक्षणं च सयद्यर्थशब्दः । यस्मादभूतपूर्वासंभवादिप्रयोगेऽपि भवति । यथा माघस्य—'मृणालसूत्रामलमन्तरेण स्थितश्चलच्चामरयोर्द्वयं सः । भेजेऽभितःपातुकसिद्धसिन्धोरभूतपूर्वां रुचमम्बुराशेः ॥' इत्यादि ॥

उदाहरणम्—

कुमुददलदीधितीनां त्वक्संभूय च्यवेत यदि ताभ्यः ।
इदमुपमीयेत तया सुतनोरस्याः स्तनावरणम् ॥ १६ ॥

कुमुदेति । अत्र कुमुददलदीधितित्वगुपमानम्, तद्विशेषणं च्यवनं च द्वयमपि सयद्यर्थं संभावितम् । तथा—'सुवृत्तमुक्ताफलजालचित्रितं भवेदखण्डं यदि चन्द्रमण्डलम् । श्रमाम्बुबिन्दूत्कररराजितं ततो मुखं रताक्तित्युपमीयते प्रिये ॥' 'ततो मुखं तेन तवोपमीयते'

इति वा पाठः। अत्र पूर्णचन्द्रमण्डलस्य सुवृत्तमुक्ताफलजालचित्रितत्वं विशेषणमेव संभावितमिति॥

एवं वाक्योपमां षड्विधामभिधायेदानीं समासोपमामाह—

सामान्यपदेन समं यत्र समस्येत तूपमानपदम्।
अन्तर्भूतेवार्था सात्र समासोपमा प्रथमा॥ १७॥

सामान्येति। उपमानपदं चन्द्रकमलादिकं सामान्यपदेन सुन्दरशब्दादिना यत्र समस्येत सा समासोपमासु मध्ये प्रथमा। तुर्विशेषे। विशेषस्तु वाक्योपमातः समासकृत एव। यद्युपमा कथमिवादिपदं न श्रूयत इत्याह—अन्तर्भूत इवार्थ औपम्यं यस्याः सा तथोक्ता॥

उदाहरणम्—

मुखमिन्दुसुन्दरमिदं बिसकिसलयकोमले भुजालतिके।
जघनस्थली च सुन्दरि तव शैलशिलाविशालेयम्॥ १८॥

मुखमिति। अत्रेन्दुरिव सुन्दरमित्यादि विग्रहः॥

प्रकारान्तरमाह—

पदमिदमन्यपदार्थे समस्यतेऽथोपमेयवचनेन।
यस्यां तु सा द्वितीया सर्वसमासेति संपूर्णा॥ १९॥

पदमिति। इदं पूर्वोक्तं सामान्योपमानसमासपदमथानन्तरमुपमेयवचनेनान्यपदार्थे यत्र समस्यते सा सर्वपदसमासात्संपूर्णा समासोपमा द्वितीया॥

उदाहरणम्—

शरदिन्दुसुन्दरमुखी कुवलयदलदीर्घलोचना सा मे।
दहति मनः कथमनिशं रम्भागर्भाभिरामोरूः॥ २०॥

शरदिति। अत्र शरदिन्दुशब्दसुन्दरशब्दयोः पूर्ववत्समासं कृत्वा ततो मुखेनोपमेयेन सह नायिकायामन्यपदार्थे समासः॥

भूयः प्रकारान्तरमाह—

उपमानपदेन समं यत्र समस्येत चोपमेयपदम्।
अन्यपदार्थे सोदितसामान्येवाभिधेयान्या॥ २१॥

उपमानेति। उपमानपदेन सह यत्रोपमेयपदमन्यपदार्थेन सह समस्यते सान्या समासोपमा। चः पुनरर्थे भिन्नक्रमः। सा पुनः समासेनोक्तौ सामान्यमिवार्थश्च यस्यां सा तथोक्ता॥

उदाहरणम्—

नवविकसितकमलकरे कुवलयदललोचने सितांशुमुखि ।
दहसि मनो यत्तत्किं रम्भागर्भोरु युक्तं ते ॥ २२ ॥

नवेति । अत्र नवविकसितकमलमिव रम्यौ करौ यस्या इति बहुव्रीहिः ॥

अथ प्रत्ययोपमामाह—

उपमानात्सामान्ये प्रत्ययमुत्पाद्य या प्रयुज्येत ।
सा प्रत्ययोपमा स्यादन्तर्भूतेवशब्दार्था ॥ २३ ॥

उपमानादिति । उपमानादुपमानपदादन्यतो वा धात्वादिकात्प्रत्ययं सामान्येन साधारणधर्मविषय उत्पाद्य या प्रयुज्यते सा प्रत्ययोपमा । सा च प्रत्ययान्तशब्देऽन्तर्भूतेवशब्दा ॥

उदाहरणम्—

पद्मायते मुखं ते नयनयुगं कुवलयायते यदिदम् ।
कुमुदायते तथास्मितमेवं शरदेव सुतनु त्वम् ॥ २४ ॥

पद्मायत इति । पद्ममिवाचरतीत्यादि वाक्यम् । एवं धातोः प्रत्यये उष्ट्रक्रोशीत्यादि द्रष्टव्यमिति ॥

एवमुपमात्रयमभिधायेदानीमेतद्भेदान्सामान्येनाह—

मालोपमेति सेयं यत्रैकं वस्त्वनेकसामान्यम् ।
उपमीयेतानेकैरुपमानैरेकसामान्यैः ॥ २५ ॥

मालोपमेति । यत्रैकमुपमेयं वस्त्वनेकसामान्यमनेकधर्मैकमेकसामान्यैरेकैकधर्मयुक्तैरनेकैरुपमानैरुपमीयते सेयमित्यमुना प्रकारेण मालोपमा । अथायं कोऽलंकारः—'गायन्ति किंनरगणाः सह किंनरीभिरुत्तुङ्गशृङ्गकुहरेषु हिमाचलस्य । क्षीरेन्दुकुन्ददलशङ्खमृणालनालनीहारहारहरहाससितं यशस्ते ॥' मालोपमैवेत्याहुः । यत एकत्वेऽपि शौक्ल्यस्यानेकसामान्यं विद्यत एव । तस्यानेकरूपत्वादन्यादृशमेव हि तच्छङ्खेऽन्यादृशं चन्द्रादौ तच्च सर्वं यशसि विद्यत इति । केचित्तु मालोपमाभास इत्याहुः ॥

उदाहरणम्—

श्यामालतेव तन्वी चन्द्रकलेवातिनिर्मला सा मे ।
हंसीव कलालापा चैतन्यं हरति निद्रेव ॥ २६ ॥

श्यामालतेति । अत्रोपमेया कान्ता तनुत्वाद्यनेकधर्मयुक्ता । श्यामालतादीन्येकैकधर्मयुक्तान्युपमानानि । एषा वाक्योपमा । अन्ये त्विमे—'नवश्यामालतातन्वी शरच्चन्द्रांशुसप्रभा । मत्तहंसीकलालापा कस्य सा न हरेन्मनः ॥' समासोपमेयम् । 'शरच्च-

न्द्रायसे मूर्तौ त्वं कृतान्तायसे युधि । दाने कर्णायसे राजन्सुनीतौ भास्करायसे ॥' प्रत्ययोपमेयम् ॥

भेदान्तरमाह—

अर्थानामौपम्ये यत्र बहूनां भवेद्यथापूर्वम् ।
उपमानमुत्तरेषां सेयं रशनोपमेत्यन्या ॥ २७ ॥

अर्थानामिति । यत्रार्थानामुपमानोपमेयानां बहूनां सादृश्ये सति तेषामेव मध्याद्यथापूर्वं यो यः पूर्वः स स उत्तरेषामुपमानं भवेत्सेयं रशनासादृश्याद्रशनोपमेत्यन्या । यथा रशनायां परस्परमाभरणानां शृङ्खलाकटकवत्संबन्ध एवमिहार्थानामिति पूर्ववत् ॥

उदाहरणम्—

नभ इव विमलं सलिलं सलिलमिवानन्दकारि शशिबिम्बम् ।
शशिबिम्बमिव लसद्द्युति तरुणीवदनं शरत्कुरुते ॥ २८ ॥

नभ इति । अत्र गगनादिरर्थः पूर्वं उत्तरेषां सलिलादीनामुपमानम् । एषा वाक्यरशनोपमा । अन्ये त्विमे—'शरत्प्रसन्नेन्दुसुकान्ति ते मुखं मुखश्रि लीलाम्बुजमम्बुजारुणौ । करौ करश्रीरवतंसपल्लवो वरानने पल्लवलोहितोऽधरः ॥' समासरशनोपमेयम् । 'चन्द्रायते शुक्लरुचाद्य हंसो हंसायते चारुगतेन कान्ता । कान्तायते तस्य मुखेन वारि वारीयते स्वच्छतया विहायः ॥' प्रत्ययरशनोपमेयम् ॥

भूयोऽपि भेदान्तरमाह—

क्रियतेऽर्थयोस्तथा या तदवयवानां तथैकदेशानाम् ।
परमन्या ते भवतः समस्तविषयैकदेशिन्यौ ॥ २९ ॥

क्रियत इति । अर्थयोरुपमानोपमेययोरवयविनोस्तदवयवानां च सहजाहार्योभयरूपाणां या क्रियते, न त्ववयविनोः, एषान्या एकदेशविषया । इति द्वितीयः प्रकारः ॥

उदाहरणम्—

अलिवलयैरलकैरिव कुसुमस्तबकैः स्तनैरिव वसन्ते ।
भान्ति लता ललना इव पाणिभिरिव किसलयैः सपदि ॥ ३० ॥

अलिवलयैरिति । अत्र लता ललना अवयविन्योऽलिवलयादयश्चावयवाः सर्वं एवोपमिताः । इत्येषा समस्तविषया ॥

कमलदलैरधरैरिव दशनैरिव केसरैर्विराजन्ते ।
अलिवलयैरलकैरिव कमलैर्वदनैरिव नलिन्यः ॥ ३१ ॥

कमलदलैरिति । अत्रावयवानामेव कमलदलादीनामौपम्यं न त्ववयविन्या नलिन्याः प्रतीयते । [वास्या] इत्येषैकदेशविषया । द्विविधापि वाक्योपमेयम् । अन्ये त्विमे—'मृ-

णालिकाकोमलबाहुयुग्मा सरोजपत्रारुणपाणिपादा । सरोजिनीचारुतनुर्बिभाति प्रियालिनीलोज्ज्वलकुन्तलासौ ॥' तथा—'पद्मचारुमुखी भाति पद्मपत्रायतेक्षणा । दशनैः केसराकारैरलिनीलशिरोरुहा ॥' समासोपमेयं द्विधा । 'लतायसेऽतितन्वी त्वमोष्ठस्ते पल्लवायते । सितपुष्पायते हासो भृङ्गायन्ते शिरोरुहाः ॥' 'मुखेन पद्मकल्पेन भाति सा हंसगामिनी । दोर्भ्यां मृणालकल्पाभ्यामलिनीलैः शिरोरुहैः ॥' प्रत्ययोपमेयं द्विधा ॥

अथोत्प्रेक्षा—

अतिसारूप्यादैक्यं विधाय सिद्धोपमानसद्भावम् ।
आरोप्यते च तस्मिन्नतद्गुणादीति सोत्प्रेक्षा ॥ ३२ ॥

अतिसारूप्यादिति । उपमानोपमेययोरतिसादृश्याद्धेतोरैक्यमभेदं विधाय । कीदृशं तत् । सिद्ध उपमानस्यैव, न तूपमेयस्य, सद्भावः सत्त्वं यत्र तत्तथाविधम् । अनन्तरं च तस्मिन्नुपमाने तस्योपमानस्य ये गुणक्रिये न संभवतस्ते समारोप्येते यत्र सा । इत्यमुना प्रकारेणोत्प्रेक्षा भण्यते । चशब्दोऽतद्गुणाद्यनध्यारोपितस्यापि समुच्चयार्थः । येन सिद्धोपमानसद्भावे तयोरभेदमात्रेऽप्युत्प्रेक्षा दृश्यते । यथा—'तं वदन्तमिति विष्टरश्रवाः श्रावयन्नथ समस्तभूभृतः । व्याजहार दशनांशुमण्डलव्याजहारशबलं दधद्वपुः ॥' इत्यादि ॥

उदाहरणम्—

चम्पकतरुशिखरमिदं कुसुमसमूहच्छलेन मदनशिखी ।
अयमुच्चैरारूढः पश्यति पथिकान्दिधक्षुरिव ॥ ३३ ॥

चम्पकेति । अत्रोपमेयश्चम्पकराशिरुपमानं मदनाग्निस्तयोर्लौहित्येन सारूप्यादैक्यं सिद्धोपमानसद्भावं विधाय ततोऽग्नेर्यद्दर्शनमचेतनत्वादसंभवि तदारोपितमिति ॥

प्रकारान्तरमाह—

सान्येत्युपमेयगतं यस्यां संभाव्यतेऽन्यदुपमेयम् ।
उपमानप्रतिबद्धापरोपमानस्य तत्त्वेन ॥ ३४ ॥

सेति । इतीत्थं सान्योत्प्रेक्षा यत्रोपमेयस्थमुपमेयान्तरमुपमानप्रतिबद्धस्योपमानान्तरस्य तत्त्वेन तादूप्येण संभाव्यते ॥

उदाहरणम्—

आपाण्डुगण्डपालीविरचितमृगनाभिपत्ररूपेण ।
शशिशङ्कयेव पतितं लाञ्छनमस्या मुखे सुतनोः ॥ ३५ ॥

आपाण्डुगण्डेति । अत्र शश्युपमानं तत्प्रसिद्धमपरं लाञ्छनमुपमानान्तरम् । तत्सादृश्येनोपमेयं नायिकामुखगतमन्यदुपमेयं मृगनाभिपत्रलक्षणं संभावितमिति ॥

भूयोऽपि भेदान्तरमाह—

यत्र विशिष्टे वस्तुनि सत्यसदारोप्यते समं तस्य ।
वस्त्वन्तरमुपपत्त्या संभाव्यं सापरोत्प्रेक्षा ॥ ३६ ॥

यत्रोत्प्रेक्षायां शोभनत्वेनाशोभनत्वेन वा विशेषणेन विशिष्टे वस्तुन्युपमेयरूपे सत्यविद्यमानमेव वस्त्वन्तरमुपमानलक्षणं समं समानमारोप्यते सापरान्योत्प्रेक्षा । ननु यद्यविद्यमानं कथं सममित्यारोपस्तस्येत्याह—उपपत्त्या युक्त्या संभाव्यं सावसरत्वात्संभावनायोग्यं यत इत्यर्थः ॥

उदाहरणम्—

अतिघनकुङ्कुमरागा पुरः पताकेव दृश्यते संध्या ।
उदयतटान्तरितस्य प्रथयत्यासन्नतां भानोः ॥ ३७ ॥

अतिघनेति । अत्र विशिष्टे संध्याख्ये वस्तुन्यसदेव वस्त्वन्तरं पताकाख्यं साम्यादारोपितम् । तच्च युक्त्या संभाव्यम् । यतो रविरथे पताकया भाव्यम्, साप्युदयाचलव्यवहितस्य रवेर्दृश्यमाना सती नैकट्यं प्रकटयति । अथ यत्र साम्यमात्रे सति विनैवोपपत्त्या संभावना भवति न चोपमाव्यवहारस्तत्र कोऽलंकारः । यथा—'यश्चाप्सरोविभ्रममण्डनानां संपादयित्रीं शिखरैर्बिभर्ति । बलाहकच्छेदविभक्तरागामकालसंध्यामिव धातुमत्ताम् ॥' तथा—'आवर्जिता किंचिदिव स्तनाभ्याम्' इत्यादिषु । अत्र ह्यकालसंध्यादीनां संभावने न काचिदुपपत्तिर्निर्दिष्टा । न चाप्युपमाव्यवहारः । यतः सिद्धमुपमानं भवति । न वा काले सिद्धत्वम् । तथा यद्यर्थाश्रवणान्नाप्युत्पाद्योपमाव्यवहारः । न चाप्यतिशयोत्प्रेक्षा संभवोऽस्ति । अत्रोच्यते—उपमायामसंभव उत्प्रेक्षायां त्वनुपपत्तिरत उभयत्रापि लक्षणस्य न्यूनतायामुपमाभासो वा स्यादुत्प्रेक्षाभासो वा । एवम् 'पृथिव्या इव मानदण्डः' इत्यादावपि द्रष्टव्यम् । सूत्रकारेणानुक्तं भेदान्तरमपि चास्यां विद्यते—'कर्तुरुपमानयोगः सत्यौपम्येऽनिवादिरपि यत्र । संभाव्यतेऽनुरोधाद्विज्ञेया सा परोत्प्रेक्षा ॥' यथा—'यः करोति वधोदर्कां निःश्रेयसकरीः क्रियाः । ग्लानिदोषच्छिदः स्वच्छाः स मूढः पङ्कयत्यपः ॥' तथा—'अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थले कमलरोपणं सुचिरमूषरे वर्षितम् । श्वपुच्छमवनामितं बधिरकर्णजापः कृतः कृतान्धमुखमण्डना यदबुधो जनः सेवितः' ॥

अथ रूपकम्—

यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिदा ।
अविवक्षितसामान्या कल्प्यत इति रूपकं प्रथमम् ॥ ३८ ॥

यत्रेति । यत्रोपमानोपमेययोर्गुणानां साम्ये तुल्यत्वे सति विद्यमाने प्रतीतिपथवारिण्याभिदा तयोरैक्यं कल्प्यते तदित्यमुना प्रकारेण रूपकं प्रथमम् । उत्तरत्र समासग्रहणादिह प्रथमशब्देन वाक्यरूपकं विवक्षितम् । उत्प्रेक्षायामप्यभेदो विद्यते, ततस्तन्निरासार्थमाह—अविवक्षितसामान्येति । सदप्यत्र सामान्यं न विवक्ष्यते । सिंहो देवदत्त इति । उत्प्रेक्षायां

तु छद्मलक्ष्मव्याजव्यपदेशादिभिः शब्दैरुपमानोपमेययोरभेदो भेदश्च विवक्षित इति । परमार्थतस्तूभयत्राभेद एवेति ॥

उदाहरणम्—

साक्षादेव भवान्विष्णुर्भार्या लक्ष्मीरियं च ते ।
नान्यद्दूतसृजा सृष्टं लोके मिथुनमीदृशम् ॥ ३९ ॥

साक्षादिति । सुगममेव ॥

अथ भेदान्तरमाह—

उपसर्जनोपमेयं कृत्वा तु समासमेतयोरुभयोः ।
यत्तु प्रयुज्यते तद्रूपकमन्यत्समासोक्तम् ॥ ४० ॥

उपसर्जनेति । एतयोरुपमानोपमेययोः समासं कृत्वा यत्पुनः प्रयुज्यते तदपरं समासोक्तं रूपकम् । समासोपमाया रूपकत्वनिवृत्त्यर्थमाह—उपसर्जनमप्रधानमुपमेयं यत्र । यथा—दुर्जन एव पन्नगो दुर्जनपन्नगः । समासोपमायां तूपमानमुपसर्जनम् । यथा—शशीव मुखं यस्याः सा शशिमुखी । तुःशब्दः समुच्चये । उभयग्रहणं नियमार्थम् । उभयोरेव समासे, न तृतीयस्यापि सामान्यपदस्येत्यर्थः ॥

सामान्यं रूपकभेदद्वयमेतदभिधायेदानीमेतद्विशेषानाह—

सावयवं निरवयवं संकीर्णं चेति भिद्यते भूयः ।
द्वयमपि पुनर्द्विधैतत्समस्तविषयैकदेशितया ॥ ४१ ॥

सावयवमिति । एतद्वाक्यसमासलक्षणं रूपकद्वयं भूयः सावयवं निरवयवं संकीर्णं चेत्यमुना प्रकारेण त्रिधा भिद्यते । पुनश्च द्वयमपि वाक्यसमासलक्षणमेतद्रूपकं समस्तविषयतयैकदेशितया च द्विधा भिद्यते । न तु सावयवादिभेदभिन्नं सत् । निरवयवादिषु सर्वत्रासंभवात् । तेनात्र भेदद्वये सावयवादिप्रभेदानुप्रवेशो यथासंभवमेव भवतीति ॥

इदानीमेषामेव लक्षणमाह—तत्र सावयवम्—

उभयस्यावयवानामन्योन्यं तद्वदेव यत्क्रियते ।
तत्सावयवं त्रेधा सहजाहार्योभयैस्तैः स्यात् ॥ ४२ ॥

उभयस्येति । उभयस्योपमानोपमेयलक्षणस्य येऽवयवास्तेषां परस्परं यद्रूपणं तद्वदेवेति समस्तोपमावत्क्रियते तत्सावयवं रूपकम् । यथा समस्तोपमायामुपमानोपमेययोस्तदवयवानां चौपम्यम्, एवमिहापि रूपणमित्यर्थः । तच्च सहजैराहार्यैरुभयैश्च तैरवयवैस्त्रेधा स्यात्त्रिविधं भवेत् ॥

उदाहरणम्—

ललनाः सरोरुहिण्यः कमलानि मुखानि केसरैर्देशनैः ।
अधरैर्दलैश्च तासां नवबिसनालानि बाहुलताः ॥ ४३ ॥

ललना इति। एतद्वाक्यरूपकं सावयवं समस्तविषयं सहजावयवं च। आहार्यावयवं तु यथा—'गजो नगः कुथा मेघाः शृङ्खलाः पन्नगा अपि। यन्ता सिंहोऽभिशोभन्ते भ्रमरा हरिणास्तथा॥' उभयावयवं यथा—'यस्या बीजमहंकृतिर्गुरुतरं मूलं ममेति ग्रहो नित्यं तु स्मृतिरङ्कुरः सुतसुहृज्ज्ञात्यादयः पल्लवाः। स्कन्धो दारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः सा मे त्वत्स्तुतिसेवया परशुना तृष्णालता लूयताम्॥' इदानीं समासरूपकं सावयवं समस्तविषयं सहजावयवमुदाहर्तुमुचितम्, ग्रन्थकृता तु नोदाहृतम्। तच्चेत्थं यथा—'वचनमधु नयनमधुकरमधरदलं दशनकेसरं तस्याः। मुखकमलमनुस्मरतः स्मरहतमनसः कुतो निद्रा'॥

समासरूपकाहार्योदाहरणमाह—

विकसिततताराकुमुदे गगनसरस्यमलचन्द्रिकासलिले।
विलसति शशिकलहंसः प्रावृड्विपदपगमे सद्यः॥ ४४॥

विकसितेति। अत्र गगनमुपमेयं सर उपमानम्। तयोश्च समासः। ताराज्योत्स्नाशशिनो गगनस्याहार्यावयवाः। उपमानस्य तु ते यादृशास्तादृशा भवन्तु। नात्र तद्विवक्षा। प्रावृड्विपदिति रूपकमपि नोदाहरणत्वेन योज्यम्। अवयवत्वाभावात्॥

अथ समासरूपकोभयोदाहरणमाह—

अलिकुलकुन्तलभाराः सरसिजवदनाश्च चक्रवाककुचाः।
राजन्ति हंसवसनाः संप्रति वाप्यां विलासिन्यः॥ ४५॥

अलीति। अत्र वाप्य उपमेया विलासिन्य उपमानभूताः। तयोः समासोऽत्र। वाप्या अलिकुलचक्रवाकहंसाः। कृत्रिमा अवयवाः। सरसिजानि तु सहजा विवक्षिताः। विलासिन्यश्च यथातथा भवन्तु। न तद्विवक्षा॥

अथ निरवयवमाह—

मुक्त्वावयवविवक्षां विधीयते यत्तु तत्तु निरवयवम्।
भवति चतुर्धा शुद्धं माला रशना परम्परितम्॥ ४६॥

मुक्त्वेति। यत्त्ववयवविवक्षां त्यक्त्वा विधीयते तन्निरवयवं रूपकम्। तच्चतुर्धा। कथमित्याह—शुद्धमित्यादि॥

अथ तल्लक्षणम्—

शुद्धमिदं सा माला रशनाया वैपरीत्यमन्यदिदम्।
यस्मिन्नुपमानाभ्यां समस्यमुपमेयमन्यार्थं॥ ४७॥

शुद्धमिति। इदमिति 'मुक्त्वावयवविवक्षाम्' इति पूर्वलक्षणकं सा मालेति। यत्रैकं वस्त्वनेकसामान्यम्। 'उपमीयेतानेकैरुपमानैरेकसामान्यैः' इत्येतदुपमालक्षणं यत्र रूपके तदित्यर्थः। रशनाया वैपरीत्यमिति। यो यः पूर्वोऽर्थः स स उत्तरेषामुपमानमित्युपमाल-

क्षणवैपरीत्यम् । रूपकरशनायां हि यो यः पूर्वोऽर्थः स स उत्तरेषामुपमेय इति । अन्यत्परम्परितमिदं वक्ष्यमाणलक्षणकम् । तदेव लक्षणमाह—यस्मिन्नित्यादि । यत्र द्वाभ्यामुपमानाभ्यां सहैकमुपमेयमन्यस्य द्वितीयस्योपमेयस्यार्थे वर्तमानं समस्यते । यत्र हि द्वे उपमाने तत्रावश्यमुपमेयद्वयेनैव भाव्यमित्युपमेयार्थे उपमेयं समस्यते । यथा—रजनिपुरंध्रिरोध्रतिलकश्चन्द्र इति ॥

एतेषामुदाहरणानि चत्वारि यथाक्रममाह—

कः पूरयेदशेषान्कामानुपशमितसकलसंतापः ।
अखिलार्थिनां यदि त्वं न स्याः कल्पद्रुमो राजन् ॥ ४८ ॥

क इति । अत्र राजा शाखादिभिरवयवैर्विना कल्पद्रुमेण रूपितः । एतच्छुद्धं वाक्यरूपकम् । समासरूपकं तु यथा—'नीचोऽपि मन्दमतिरप्यकुलोद्भवोऽपि भीरुः शठोऽपि चपलोऽपि निरुद्यमोऽपि । त्वत्पादपद्मयुगले भुवि सुप्रसन्ने संदृश्यते ननु सुरैरपि गौरवेण' ॥

मालामाह—

कुसुमायुधपरमास्त्रं लावण्यमहोदधिर्गुणनिधानम् ।
आनन्दमन्दिरमहो हृदि दयिता स्खलति मे शल्यम् ॥ ४९ ॥

कुसुमेति । अत्रैका दयिता विरहिहृदयदारणाद्यनेकधर्मयोगात्कुसुमायुधपरमास्त्रादिभिरनेकैरुपमानैरेकैकधर्मयुक्तै रूपिता । अत्र वाक्यमेव । रशनापरम्परितयोः समास एव संभव इति ॥

रशनारूपकमाह—

किसलयकरैर्लतानां करकमलैः कामिनां जगज्जयति ।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥ ५० ॥

किसलयकरैरिति । अत्र यो यः पूर्वोऽर्थः किसलयादिकः स स उत्तरेषां करादीनामुपमेय इति ॥

परम्परितमाह—

स्मरशबरचापयष्टिर्जयति जनानन्दजलधिशशिलेखा ।
लावण्यसलिलसिन्धुः सकलकलाकमलसरसीयम् ॥ ५१ ॥

स्मरेति । अत्रैकः स्मर उपमेयो द्वाभ्यामुपमानाभ्यां शबरचापयष्टिभ्यामन्यस्य नायिकालक्षणस्य पदार्थस्यार्थे समस्यते । स्मरस्य शबर उपमानम्, नायिकायाश्चापयष्टिः । स्मर एव शबरस्तस्य नायिका चापयष्टिः । यथा शबरश्चापयष्ट्या हरिणादीन्विध्यति, एवं स्मरस्तया कामिन इत्यर्थः । एवमन्यत्रापि योज्यम् ॥

संकीर्णमाह—

उपमेयस्य क्रियते तदवयवानां च साकमुपमानैः ।
उभयेषां निरवयवैर्विज्ञेयं तदिति संकीर्णम् ॥ ९२ ॥

उपमेयस्येति । उपमेयस्योपमेयावयवानां च सहजाहार्योभयरूपाणामुपमानैरुभयेषामपि निरवयवैः सह यद्रूपणं क्रियते तत्संकीर्णं नाम ज्ञेयम् । एवं च सहजाद्यवयवभेदजत्वात्त्रिधा भवति । उभयेषामित्यनेनोपमेयस्तदवयवाश्च निर्दिश्यन्ते ॥

उदाहरणानि—

लक्ष्मीस्त्वं मुखमिन्दुर्नयने नीलोत्पले करौ कमले ।
केशाः केकिकलापो दशना अवि कुन्दकलिकास्ते ॥ ९३ ॥

लक्ष्मीरिति । नायिकात्रोपमेया । तदवयवाश्च सहजा मुखादयः । लक्ष्मीचन्द्रप्रभृतीनि चोभयेषामुपमानानि निरवयवानि । नहि लक्ष्म्याश्चन्द्रादयोऽवयवाः । उपमेयं साक्षवमुपमानेषु विपर्यय इति संकीर्णत्वमिति ॥

अथाहार्यावयवोदाहरणमाह—

सुतनु सरो गगनमिदं हंसरवो मदनचापनिर्घोषः ।
कुमुदवनं हरहसितं कुवलयजालं दृशः सुदृशाम् ॥ ९४ ॥

सुतन्विति । हे सुतनु, इदं सरः शरदि निर्मलत्वाद्विस्तीर्णत्वाच्च गगनसदृशमित्यर्थः । अत्र च गगनकामधनुर्ध्वनिहरहसिततरुणीदृशो निरवयवोपमानानि । उपमेयं सरः । तदवयवा हंसरवकुमुदवनकुवलयजालान्याहार्याणि विवक्षितानीति ॥

अथोभयावयवमाह—

इन्द्रस्त्वं तव बाहू जयलक्ष्मीद्वारतोरणस्तम्भौ ।
खड्गः कृतान्तरसना जिह्वा च सरस्वती राजन् ॥ ९५ ॥

इन्द्र इति । अत्र राजोपमेयः । तदवयवाश्च बाहुखड्गजिह्वाः सहजाहार्याः । इन्द्रजयलक्ष्मीद्वारतोरणस्तम्भादीनि निरवयवोपमानानि । एतेषु वाक्यभेद एवेति ॥

समस्तविषयरूपकं निरूप्येदानीमेकदेशिरूपकमाह—

उक्तं समस्तविषकं लक्षणमनयोस्तथैकदेशीदम् ।
कमलाननैर्नलिन्यः केसरदशनैः स्मितं चक्रुः ॥ ९६ ॥

उक्तमिति । अनयोर्वाक्यसमासरूपकयोर्यत्समस्तविषयं लक्षणं तत्सावयवं रूपयद्भिरुक्तम् । तथैकदेशीदमार्योत्तरार्धेनोद्दाह्रियते । यथा—कमलेत्यादि । अत्रावयवानामेव कमलकेसराणां मुखदशनै रूपणं कृतम्, न तु पद्मिन्या अङ्गनयेत्येकदेशित्वमिति । अन्यदपि रूपकं संगतं नाम विद्यते । यत्र संगतार्थतया रूप्यरूपकभावः । यथा कालिदासस्य—'रावणावग्रहक्रान्तमिति वागमृतेन सः । अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरो-

दधे ॥' अत्र न सावयवादिव्यपदेशः । तत्केदमन्तर्भवतीत्युच्यते—सामान्ये रूपकलक्षणमभिधाय तस्य वाक्यसमासभेदौ व्यापकावुक्तौ । तयोश्च सावयवादिभेदा यथासंभवं योज्याः । ततस्तस्मिन्मूलभेदद्वये संगतायनुक्तभेदानामन्तर्भावः ॥

अथापह्नुतिः—

अतिसाम्यादुपमेयं यस्यामसदेव कथ्यते सदपि ।
उपमानमेव सदिति च विज्ञेयापह्नुतिः सेयम् ॥ ९७ ॥

अतिसाम्यादिति । यस्यामुपमानोपमेययोरत्यन्तसाम्यादुपमेयं प्रस्तुतं वस्त्वविद्यमानं कथ्यते, उपमानमेव सत्तया, सेयमपह्नुतिर्नाम । उत्प्रेक्षायां व्याजादिशब्दैरुपमेयस्य सत्त्वमप्युच्यते, इह तु सर्वथैवापह्नव इति विशेषः ॥

उदाहरणम्—

नवबिसकिसलयकोमलसकलावयवा विलासिनी सैषा ।
आनन्दयति जनानां नयनानि सितांशुलेखेव ॥ ९८ ॥

नवेति । अत्रातिसादृश्याद्विलासिनीमुपमेयमपह्नुत्य शशिकलाया उपमानस्यैव सद्भावः कथितः ॥

अथ संशयः—

वस्तुनि यत्रैकस्मिन्ननेकविषयस्तु भवति संदेहः ।
प्रतिपत्तुः सादृश्यादनिश्चयः संशयः स इति ॥ ९९ ॥

वस्तुनीति । यत्रैकस्मिन्वस्तुन्युपमेये प्रतिपत्तुरनेकविषयः सादृश्यात्संदेहो भवति, अनिश्चयान्तः स इत्येवंप्रकारः संशयनामालंकारः । तुर्विशेषे ॥

उदाहरणम्—

किमिदं लीनालिकुलं कमलं किं वा मुखं सुनीलकचम् ।
इति संशेते लोकस्त्वयि सुतनु सरोवतीर्णायाम् ॥ १०० ॥

किमिति । अत्रैकस्मिन्मुखे कमलमुखविषयः सादृश्यादनिश्चयसंशयः ॥

प्रकारान्तरमाह—

उपमेये सदसंभवि विपरीतं वा तथोपमानेऽपि ।
यत्र स निश्चयगर्भस्ततोऽपरो निश्चयान्तोऽन्यः ॥ १०१ ॥

उपमेय इति । यत्रोपमेये यद्वस्तु नैव संभवति तत्सत्कथ्यते, विपरीतं वा यत्सत्तदसंभवि कथ्यते, अथोपमाने यदसंभवि तत्सत्, यच्च सत्तदसंभवि कथ्यते सनिश्चयगर्भाख्यः संशयो भवति । ततोऽन्यथा तु यत्र पर्यन्ते निश्चयो भण्यते सोऽन्यो निश्चयान्ताख्यः संशयो द्वितीयः । पूर्वोक्तं सामान्यं संशयलक्षणमुभयत्र योज्यम् ॥

निश्चयगर्भोदाहरणमाह—

एतत्किं शशिबिम्बं न तदस्ति कथं कलङ्कमङ्केऽस्य ।
किं वा वदनमिदं तत्कथमियमियती प्रभास्य स्यात् ॥ ६२ ॥
किं पुनरिदं भवेदिति सौधतलालक्ष्यसकलदेहायाः ।
वदनमिदं ते वरतनु विलोक्य संशेरते पथिकाः ॥ ६३ ॥(युग्मम्)

एतदिति । किं पुनरिति । अत्रोपमाने शशिनि संभविनः कलङ्कस्याभावः, उपमेये त्वसंभविनः प्रभाबाहुल्यस्य सद्भाव उक्तः । वैपरीत्यं तु नोक्तम् । तदन्यत्र द्रष्टव्यम् ॥

निश्चयान्तमाह—

किमयं हरिः कथं तद्गौरः किं वा हरः क्व सोऽस्य वृषः ।
इति संशय्य भवन्तं नाम्ना निश्चिन्वते लोकाः ॥ ६४ ॥

किमिति । अत्रोपमाने कृष्णे गौरत्वमसंभवि विद्यते । हरे च संभविनो वृषस्याभावः । नामग्रहणाच्च निश्चयः । अस्मिन्निश्चयान्ते संशयगर्भलक्षणापेक्षा न कार्येति । तेन 'उपमेये सदसंभवि' (८।६१) इत्यादिलक्षणाभावेऽपि भवति । यथा माघस्य—'किं तावत्सरसि सरोजमेतदारादाहोस्विन्मुखमवभासते तरुण्याः । संशय्य क्षणमिति निश्चिकाय कश्चिद्विब्बोकैर्बकसहवासिनां परोक्षैः ॥' इति । अन्येऽपि संशयभेदा विद्यन्त एव । यथा—'यत्रोक्तेऽपि निवर्तेत संदेहो नैव साम्यतः । संशयोऽन्यः स विज्ञेयः शेषगर्भः स्फुटो यथा ॥' 'प्रत्यग्राहितचित्रवर्णकृतकच्छायो मयावेक्षितः सौधे तत्र स कोऽपि कः पुनरसावेतन्न निश्चीयते । वाक्यं वक्ति न वक्त्रमस्ति न शृणोत्यंसावलम्बिश्रुतिश्चक्षुष्मांश्च निरीक्षते न विदितं तत्स ध्रुवं पार्थिवः ॥' तथा—'उपमेयमपह्नुत्य संदेग्धुर्यत्र कथ्यते । उपमानमसावन्यः संशयो दृश्यते यथा ॥' 'यो गोपीजनवल्लभः स्तनतटव्यासङ्गलब्धास्पदश्छायावान्नवरक्तको बहुगुणश्चित्रश्चतुर्हस्तकः । कृष्णः सोऽपि हताशया व्यपहृतः कान्तः कयाप्यद्य मे किं राधे मधुसूदनो नहि नहि प्राणाधिकश्चोलकः ॥' तथा 'अतिशयकारिविशेषणयुक्तं यत्रोपमेयमुच्येत । साम्यादुपमानगते संदेहे संशयः सोऽन्यः ॥' यथा—'भुजतुलिततुङ्गभूभृत्स्वविक्रमाक्रान्तभूतलो जयति । किमयं जनार्दनो नहि सकलजनानन्दनो देवः ॥' एवमन्येऽपि संशयप्रकारा लक्ष्यानुसारेण बोद्धव्या इति ॥

भूयोऽपि भेदान्तरमाह—

यत्रानेकत्रार्थे संदेहस्त्वेककारकत्वगतः ।
स्यादेकत्वगतो वा सादृश्यात्संशयः सोऽन्यः ॥ ६५ ॥

यत्रेति । सोऽयमन्यः संशयो यत्रानेकत्रोपमानोपमेयलक्षणेऽर्थे कर्त्रादिकारकत्वविषयः संशयो भवति । अस्याः क्रियायाः किमुपमानं कारकं स्यादुतोपमेयमिति, इत्थं यत्र

भ्रान्तिरित्यर्थः । तथैकत्वगतो वेति । यत्रोपमानोपमेययोरैक्ये संभाव्यमान एकस्य तात्त्विकमन्यस्यातात्त्विकमिति संदेह इत्यर्थः ॥

उदाहरणद्वयमप्यार्ययैकयाह—

गमनमधीतं हंसैस्त्वत्तः सुभगे त्वया नु हंसेभ्यः ।
किं शशिनः प्रतिबिम्बं वदनं ते किं मुखस्य शशी ॥ ६६ ॥

गमनमिति । अत्राद्यार्धेऽध्ययनक्रियां प्रति कर्तृत्वसंदेह उक्तः । द्वितीये तु मुखशशिनोस्तात्त्विकातात्त्विकत्वमेकत्र संदिग्धमिति । अथायं कोऽलंकारः । यथा भारवेः 'रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु । पूरिता नु विषमेषु धरित्री संहता नु ककुभस्तिमिरेण ॥' औपम्याभास इति केचित् । उत्प्रेक्षैवेयमित्यन्ये ॥

अथ समासोक्तिः—

सकलसमानविशेषणमेकं यत्राभिधीयमानं सत् ।
उपमानमेव गमयेदुपमेयं सा समासोक्तिः ॥ ६७ ॥

सकलेति । यत्रैकमुपमानमेवोपमेयेन सह सकलसाधारणविशेषणमभिधीयमानं सदुपमेयं गमयेत्सा समासोक्तिः । सकलग्रहणं मिश्रत्वनिवृत्त्यर्थम् । एकग्रहणं तूपमेयवाचिपदप्रयोगनिवृत्त्यर्थम् । सद्ग्रहणं प्रतिपादनसमर्थत्वख्यापनार्थम् ॥

उदाहरणमाह—

फलमविकलमलघीयो लघुपरिणति जायतेऽस्य सुस्वादु ।
प्रीणितसकलप्रणयिप्रणतस्य सदुन्नतेः सुतरोः ॥ ६८ ॥

फलमिति । फलमाम्रादिकम् । दृष्टार्थश्चेत्यत्र तरुरुपमानं गुणसाधर्म्यात्सत्पुरुषमेव गमयति ॥

अथ मतम्—

तन्मतमिति यत्रोक्त्वा वक्तान्यमतेन सिद्धमुपमेयम् ।
ब्रूयादथोपमानं तथा विशिष्टं स्वमतसिद्धम् ॥ ६९ ॥

तदिति । तन्मतनामालंकारः । इत्यमुना वक्ष्यमाणप्रकारेण । यत्र वक्तान्यमतेन पराभिप्रायेण सिद्धं लोकप्रतीतमुपमेयमुक्त्वा प्रतिपाद्योपमानं ब्रूयात् । किंभूतम् । तथाविशिष्टमुपमेयधर्मसदृशम् । पुनश्च कीदृशम् । स्वमतेन स्वाभिप्रायेण तथोपमानत्वेन सिद्धम् । उपमेयमेव तत्त्वतस्तदित्यर्थः ॥

उदाहरणमाह—

मदिरामदभरपाटलमलिकुलनीलालकालिधम्मिल्लम् ।
तरुणीमुखमिति यदिदं कथयति लोकः समस्तोऽयम् ॥ ७० ॥

मन्येऽहमिन्दुरेषः स्फुटमुदयेऽरुणरुचिः स्थितैः पश्चात् ।
उदयगिरौ छद्मपरैर्निशातमोभिर्गृहीत इव ॥ ७१ ॥ (युग्मम्)

मदिरेति । मन्य इति । अत्र मुखमुपमेयं लोकमतेनोक्त्वा स्वमतेनेन्दुमाह । विशेषणानि तुल्यानि । तथा हि मुखं मदिरामदभरेण लोहितमिन्दुरुदयारुणकान्तिः । मुखं कृष्णकेशकलापेन युक्तं शशी निशातमोभिः ॥

अथोत्तरम्—

यत्र ज्ञातादन्यत्पृष्टस्तत्त्वेन वक्ति तत्तुल्यम् ।
कार्येणानन्यसमख्यातेन तदुत्तरं ज्ञेयम् ॥ ७२ ॥

यत्रेति । यत्र वक्ता ज्ञानात्प्रसिद्धादुपमानलक्षणादन्यदुपमेयभूतं वस्तु पृष्टः संस्तत्त्वेन तद्भावेन तत्तुल्यमुपमानसदृशं वक्ति । तत्तुल्यतापि कुत इत्याह—कार्येण । कीदृशेन । अनन्यसमेन ख्यातेन च । तदुपमानं वर्जयित्वान्यत्राविद्यमानेन । तत्र च प्रसिद्धेनेत्यर्थः । अथ परिसंख्याया वास्तवोत्तरस्यास्य चोत्तरस्य को विशेषः । उच्यते—परिसंख्यायामज्ञातमेव पृच्छति नियमप्रतीतिश्चौपम्याभावश्च । 'किं सुखमपारतन्त्र्यम्' (७ । ८०) इत्यत्र ह्यपारतन्त्र्यमेव सुखं नान्यदित्यर्थः । इह तु ज्ञातादन्यत्पृच्छ्यते, न च नियमप्रतीतिरस्ति, औपम्यं च विद्यते । यथा 'किं मरणम्' (८ । ७३) इत्यादि । वास्तवोत्तरे तु न नियमप्रतीतिर्नौपम्यसद्भावः । केवलं प्रश्नादुत्तरमात्रकथनमेव । यथा लक्ष्मीसौराज्यादि तत्र कथितम् ॥

अथोदाहरणमाह—

किं मरणं दारिद्र्यं को व्याधिर्जीवितं दरिद्रस्य ।
कः स्वर्गः सन्मित्रं सुकलत्रं सुप्रभुः सुसुतः ॥ ७३ ॥

किमिति । अत्र मरणात्प्राणत्यागसकाशात्प्रतीतादन्यत्पृष्टो वक्ता कार्येणाकिंचित्करत्वदुःखकारित्वादिना तत्तुल्यं दारिद्र्यं मरणमिव कथितवान् ॥

अथान्योक्तिः—

असमानविशेषणमपि यत्र समानेतिवृत्तमुपमेयम् ।
उक्तेन गम्यते परमुपमानेनेति सान्योक्तिः ॥ ७४ ॥

असमानेति । यत्रासाधारणविशेषणमप्युपमेयमुपमानेनोक्तेन परं केवलं गम्यते प्रतीयते सेत्युक्तेन प्रकारेणान्योक्तिर्भवति । ननु यद्यसमानविशेषणं तत्कथं तेन गम्यत इत्याह—समानवृत्तमिति । समानं सदृशमितिवृत्तमर्थशरीरं यस्य तत्तथोक्तम् । यत उपमानतुल्यव्यवहारमुपमेयमतस्तेन गम्यत इत्यर्थः । अपिशब्दात्किंचित्समानविशेषणत्वेऽपि क्वापि भवतीति सूच्यत इति ॥

उदाहरणमाह—

मुक्त्वा सलीलहंसं विकसितकमलोज्ज्वलं सरः सरसम् ।
बकलुलितजलं पल्वलमभिलषसि सखे न हंसोऽसि ॥ ७५ ॥

मुक्त्वेति । अत्र हंसेनोपमानेनोक्तेन सज्जनः प्रतीयते । विशेषणानि चात्र सलीलहंसादीन्यसमानानि । नहि पुरुषः सरो मुक्त्वा पल्वलमभिलषति । इतिवृत्तं तु समानम् । यतस्तस्य शिष्टजनाधिष्ठितं स्थानं त्यजतः खलमन्यं चाश्रयतस्तत्तुल्य उपालम्भ इति ॥

अथ प्रतीपमाह—

यत्रानुकम्प्यते सममुपमाने निन्द्यते वापि ।
उपमेयमतिस्तोतुं दुरवस्थमिति प्रतीपं स्यात् ॥ ७६ ॥

यत्रेति । यत्रोपमेयमनुकम्प्यते निन्द्यते वा तत्प्रतीपं नामालंकारः । कस्मात्तस्य निन्दानुकम्पे क्रियेते इत्याह—सममुपमाने इति कृत्वा । यत उपमानेन तुल्यमतो निन्दानुकम्पे तस्येत्यर्थः । तादृशं तर्हि किमर्थमुपमानं क्रियत इत्याह—अतिस्तोतुं सातिशयमुपमेयं ख्यापयितुम् । ननु यदि सातिशयं तर्ह्युपमानेन सह साम्यं नास्तीत्याह—दुरवस्थमिति । इतिर्हेतौ । यतो दुष्टामवस्थां प्राप्तम् । उपमेयमुपमानेन समम्, अत एव निन्द्यतेऽनुकम्प्यते वेत्यर्थः । अपिर्विस्मये । एतदेव चालंकारस्य प्रतीपत्वं यदन्येनान्यद्गम्यते ॥

उदाहरणम्—

वदनमिदं सममिन्दोः सुन्दरमपि ते कथं चिरं न भवेत् ।
मलिनयति यत्कपोलौ लोचनसलिलं हि कज्जलवत् ॥ ७७ ॥

वदनमिति । अत्राञ्जनवारिमलिनत्वान्मुखस्य दौरवस्थ्यम्, अत एवेन्दुनोपमीयते । अनुकम्प्यते । तत्त्वतः स्तुतिर्मुखस्य कृता ॥

निन्दोदाहरणमाह—

गर्वमसंवाह्यमिमं लोचनयुगलेन वहसि किं भद्रे ।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि ॥ ७८ ॥

गर्वमिति । अत्र बाहुल्योपलभ्यमाननलिननिभनयनवत्तया गर्ववहनान्निन्दा स्तुतिप्रातीतिकी । दुरवस्थं कस्मादपि कारणाद्बोद्धव्यम् ॥

अर्थान्तरन्यासमाह—

धर्मिणमर्थविशेषं सामान्यं वाभिधाय तत्सिद्ध्यै ।
यत्र सधर्मिकमितरं न्यस्येत्सोऽर्थान्तरन्यासः ॥ ७९ ॥

धर्मिणमिति । यत्रोपमेयं धर्मिणमर्थविशेषरूपं सामान्यरूपं वा केनचिद्धर्मेण परोपकारादिना युक्तमभिधाय तस्य धर्मस्य दृढीकरणार्थमितरं यथाक्रममेव सामान्यं विशेषरूपं च समानधर्मिकमुपमानभूतमर्थं कविर्न्यस्येत्सोऽर्थान्तरन्यासोऽलंकारः ॥

उदाहरणमाह—

तुङ्गानामपि मेघाः शैलानामुपरि विदधते छायाम् ।
उपकर्तुं हि समर्था भवन्ति महतां महीयांसः ॥ ८० ॥

तुङ्गानामिति । अत्रोपमेयविशेषं मेघपर्वताख्यं तुङ्गत्वादि युक्तमभिधाय सामान्यमुपमानं महल्लक्षणमुपन्यस्तम् ॥

द्वितीयमाह—

सकलमिदं सुखदुःखं भवति यथावासनं तथाहीह ।
रमयन्नितरां तरुणीर्निखक्षतादीनि रतिकलहे ॥ ८१ ॥

सकलमिति । अत्र सामान्यरूपेणैव सुखदुःखादियुक्तं सकलमुपमेयमुक्त्वा ततो विशिष्टं नखक्षतायुपमानमुक्तम् ॥

अयं चार्थान्तरन्यासः साधर्म्यप्रयुक्तसामान्यविशेषद्वारेण चतुर्विधो भवति । तत्र साधर्म्येण भेदद्वयमुक्तम् । वैधर्म्येणाह—

पूर्ववदभिधायैकं विशेषसामान्ययोर्द्वितीयं तु ।
तत्सिद्ध्येऽभिदध्याद्विपरीतं यत्र सोऽन्योऽयम् ॥ ८२ ॥

पूर्ववदिति । यत्र विशेषसामान्ययोर्मध्यादेकं पूर्ववत्केनचिद्धर्मेणोपेतमुक्त्वा ततस्तद्धर्मसिद्ध्ये द्वितीयं सामान्यं विशेषं वा विपरीतं विधर्मकं कविर्ब्रूयात्सोऽन्योऽयमर्थान्तरन्यासः ॥

उदाहरणमाह—

अभिसारिकाभिरभिहतनिबिडतमा निन्द्यते सितांशुरपि ।
अनुकूलतया हि नृणां सकलं स्फुटमभिमतीभवति ॥ ८३ ॥

अभिसारिकाभिरिति । अत्र शशी अभिसारिकाश्च विशेषावुपमेयौ पूर्वमुक्तौ, ततो नृणां सकलमिति सामान्यं वैधर्म्येणोक्तम् । निन्द्यत इत्यस्य ह्यभिमतीभवतीति विरुद्धम् ॥

द्वितीयमाह—

हृदयेन निर्वृतानां भवति नृणां सर्वमेव निर्वृतये ।
इन्दुरपि तथाहि मनः खेदयतितरां प्रियाविरहे ॥ ८४ ॥

हृदयेनेति । अत्र सामान्यमुक्त्वा विशेषो वैधर्म्येणोक्तः । अथायं कोऽलंकारः । यथा—'प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने । स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥' नह्यत्रौपम्यसद्भावोऽस्तीत्यर्थान्तरन्यासाभास इति ब्रूमः । भामहादिमतेन त्वर्थान्तरन्यास एव । 'अर्थद्वयस्य न्यासः सोऽर्थान्तरन्यासः' इति तदीयलक्षणात् ॥

अथोभयन्यासमाह—

सामान्यावप्यर्थौ स्फुटमुपमायाः स्वरूपतोऽपेतौ ।
निर्दिश्येते यस्मिन्नुभयन्यासः स विज्ञेयः ॥ ८९ ॥

सामान्याविति । यत्र प्रकटं विद्यमानसामान्यावपि द्वावर्थौ तुल्यकक्षतया कृत्वा तथाप्युपमाया यत्स्वरूपं ततो व्यपेतौ निर्दिश्येते । उपमायां हि सामान्यस्येवादेश्च प्रयोगः, इह तु नैवेत्यर्थः । स उभयन्यासो ज्ञेयः ॥

उदाहरणमाह—

सकलजगत्साधारणविभवा भुवि साधवोऽधुना विरलाः ।
सन्ति कियन्तस्तरवः सुस्वादुसुगन्धिचारुफलाः ॥ ८६ ॥

सकलेति । अत्र साधव उपमेयास्तरव उपमानानि । तेषां तुल्यकक्षतया निर्देशः । न तु सताप्युपमानोपमेयभावेनेति ॥

अथ भ्रान्तिमान्—

अर्थविशेषं पश्यन्नवगच्छेदन्यमेव तत्सदृशम् ।
निःसंदेहं यस्मिन्प्रतिपत्ता भ्रान्तिमान्स इति ॥ ८७ ॥

अर्थेति । यत्र प्रतिपत्तार्थविशेषमुपमेयलक्षणं पश्यंस्तत्सादृश्यादन्यमेवार्थमुपमानलक्षणं निःसंशयमवबुध्येत स इत्यमुना प्रकारेण भ्रान्तिमान्नामालंकारः ॥

उदाहरणम्—

पालयति त्वयि वसुधां विविधाध्वरधूममालिनीः ककुभः ।
पश्यन्तो दूयन्ते घनसमयाशङ्कया हंसाः ॥ ८८ ॥

पालयतीति । अत्र यज्ञधूमधारिण्यो दिश उपमेया वर्षाकालउपमानम् । तत्रैवावगतिः ॥

अथाक्षेपः—

वस्तु प्रसिद्धमिति यद्विरुद्धमिति वास्य वचनमाक्षिप्य ।
अन्यत्तथात्वसिद्ध्यै यत्र ब्रूयात्स आक्षेपः ॥ ८९ ॥

वस्त्विति । यत्र वक्ता यत्किमपि लोके प्रसिद्धमिति विरुद्धमिति वा कारणाद्वस्तु भूतं वर्तते, अस्य वचनमाक्षिप्य ततश्चान्यद्वस्त्वन्तरं तथात्वसिद्ध्यै तस्य स्वरूपस्य सिद्ध्यर्थं ब्रूयात्स आक्षेपो नामालंकारः ॥

तत्र प्रसिद्धस्योदाहरणमाह—

जनयति संतापमसौ चन्द्रकलाकोमलापि मे चित्रम् ।
अथवा किमत्र चित्रं दहति हिमानी हि भूमिरुहः ॥ ९० ॥

जनयतीति। अत्र चन्द्रकलाकोमलत्वेनापि संतापकत्वे सति विस्मयः। अथ च विरहे तथैव प्रतीयमानत्वाद्वस्तुत्वं प्रसिद्धम्। ततश्च किमत्र चित्रमित्येतेनाक्षिप्य तथात्वसिद्धौ हिमानीलक्षणमुपमानमुक्तम्॥

अथ विरुद्धोदाहरणमाह—

तव गणयामि गुणानहमलमथवासत्प्रलापिनीं धिङ्माम्।
कः खलु कुम्भैरम्भो मातुमलं जलनिधेरखिलम्॥ ९१॥

तवेति। अत्र समस्तगुणगणनशक्यत्वाद्विरुद्धमथवेत्यादिनाक्षिप्य तद्विरुद्धत्वसिद्ध्यर्थमन्यदुपमानमुक्तं क इत्यादिना॥

अथ प्रत्यनीकम्—

वक्तुमुपमेयमुत्तममुपमानं तज्जिगीषया यत्र।
तस्य विरोधीत्युक्त्या कल्प्येत प्रत्यनीकं तत्॥ ९२॥

वक्तुमिति। यत्रोपमेयमुत्तमं वक्तुं तज्जिगीषयोपमेयविजयेच्छया हेतुभूतया तस्योपमेयस्य विरोधीति विपक्षभूतमित्युपमानं कल्प्येत तत्प्रत्यनीकनामालंकारः। ननु विरुद्धयोः कथमौपम्यमित्याह—उक्त्या वचनमात्रेण विरोधो न तत्त्वतः। उपमेयस्तुतिस्त्वत्र तात्पर्यार्थः॥

उदाहरणम्—

यदि तव तया जिगीषोस्तद्वदनमहारि कान्तिसर्वस्वम्।
मम तत्र किमापतितं तपसि सितांशो यदेवं माम्॥ ९३॥

यदीति। अत्र मुखमुत्तमं वक्तुं तज्जिगीषया शशी उपमानं कल्पितः। एतच्च वचनमात्रेण, न तत्त्वतः॥

अथ दृष्टान्तः—

अर्थविशेषः पूर्वं यादृङ् न्यस्तो विवक्षितेतरयोः।
तादृशमन्यं न्यस्येद्यत्र पुनः सोऽत्र दृष्टान्तः॥ ९४॥

अर्थेति। विवक्षितेतरयोः प्रस्तुताप्रस्तुतयोरर्थविशेषयोर्मध्याद्यादृशो येन धर्मेण युक्तोऽर्थविशेषः पूर्वमादौ न्यस्तो भवेत्तादृशं तद्धर्मयुक्तमेव पुनस्तमर्थविशेषमन्यं यत्र वक्ता न्यस्येत्स दृष्टान्तो नामालंकारः। विशेषग्रहणमर्थान्तरन्यासादस्य भेदख्यापनार्थम्। तत्र हि सामान्यविशेषयोर्मध्यादेकमुपमानमन्यदुपमेयम्। इह तु द्वयमपि विशेषरूपमिति। उभयन्यासस्यास्मात्सत्सामान्यत्वादिविशेषः॥

विवक्षितोदाहरणमाह—

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम्।
आलोके हि सितांशोर्विकसति कुमुदं कुमुद्वत्याः॥ ९५॥

त्वयीति । अत्रार्थविशेषो नायिकामनोलक्षणः पूर्वं कान्तदर्शनान्निवृतिधर्मयुक्तो यादृशो निर्दिष्टः पुनस्तादृशमेव चन्द्रदर्शनात्कुमुदं विकासयुक्तमिति ॥

अविवक्षितोदाहरणम्—

लोकं लोलितकिसलयविषवनवातोऽपि मङ्क्षु मोहयति ।
तापयतितरां तस्या हृदयं त्वद्गमनवार्तापि ॥ ९६ ॥

लोकमिति । अत्राप्राकरणिकस्य विषवनवातस्य मोहकत्वधर्मयुक्तस्य पूर्वमुपन्यासः । पश्चात्प्रस्तुतस्य तापकारित्वयुक्तस्य [गमनवृत्तस्य] । अर्थवैधर्म्येण दृष्टान्तः कथं नोक्तः । असंभवादिति ब्रूमः । यत्र हि विशिष्टोऽर्थो विधर्मकश्च दृष्टान्तस्तादृशं लक्ष्यं न पश्यामः । दृश्यते चेत्तदा समुच्चय एव ज्ञेयः ॥

अथ पूर्वम्—

यत्रैकविधावर्थौ जायेते यौ तयोरपूर्वस्य ।
अभिधानं प्राग्भवतः सतोऽभिधीयेत तत्पूर्वम् ॥ ९७ ॥

यत्रेति । यत्र द्वावर्थावुपमानोपमेयलक्षणावेकविधौ तुल्यकर्मकौ यौ जायेते भवतस्तयोर्मध्यादपूर्वस्य सह पश्चाद्भाविनो वार्थस्योपमेयस्य प्राक्पूर्वं भवतः सतोऽभिधानं क्रियेत तत्पूर्वं नामालंकारः ॥

उदाहरणम्—

काले जलदकुलाकुलदशादिशि पूर्वं वियोगिनीवदनम् ।
गलदविरलसलिलभरं पश्चादुपजायते गगनम् ॥ ९८ ॥

काल इति । अत्रार्थौ गगनवदनलक्षणौ । तत्र वदनमुपमेयम् । तच्च गगनसमकालं पश्चाद्वा गलत्सलिलभरं भवति । अथ च विरहासहत्वप्रतिपादनार्थं प्रागुक्तम् ॥

अथ सहोक्तिः—

सा हि सहोक्तिर्यस्यां प्रसिद्धदूराधिकक्रियो योऽर्थः ।
तस्य समानक्रिय इति कथ्येतान्यः समं तेन ॥ ९९ ॥

सेति । इति वक्ष्यमाणप्रकारेण सा सहोक्तिर्नामालंकारः । यस्यां प्रसिद्धा दूरमतिशयेनाधिका क्रिया यस्य स तथाविध उपमानलक्षणो योऽर्थस्तेन सार्धमन्य उपमेयार्थस्तस्योपमानस्य समानक्रिय इत्यमुना प्रकारेण कथ्यत इति । अथ वास्तवसहोक्तेरस्याश्च को विशेषः । उच्यते—तत्र कार्यकारणभाव औपम्याभावश्च समस्ति । अस्यां तु तद्विपर्ययः ॥

उदाहरणमाह—

मधुपानोद्धतमधुकरमदकलकलकण्ठदीपितोत्कण्ठाः ।
सपदि मधौ निजसदनं मनसा सह यान्त्यमी पथिकाः ॥ १०० ॥

मधुपानेति । अत्रोपमानं मनः शीघ्रगमनक्रियया दूराधिकमपि पथिकैः सह समानक्रियमुक्तम् ॥

भेदान्तरमाह—

यत्रैककर्तृका स्यादनेककर्माश्रिता क्रिया तत्र ।
कथ्येतापरसहितं कर्मैकं सेयमन्या स्यात् ॥ १०१ ॥

यत्रेति । यत्रैककर्तृकानेककर्माश्रिता क्रिया भवति, तत्र चैकं प्रधानमुपमेयाख्यं कर्मापरेण कर्मणोपमानेन सहोच्यते सेयमन्या पुनः सहोक्तिः ॥

उदाहरणम्—

स त्वां बिभर्ति हृदये गुरुभिरसंख्यैर्मनोरथैः सार्धम् ।
ननु कोपनेऽवकाशः कथमपरस्या भवेत्तत्र ॥ १०२ ॥

स इति । अत्रैका क्रिया धारणलक्षणानेकं कर्म नायिकां मनोरथांश्चाश्रिता । तथैक एव नायकस्तस्यां कर्ता । प्रधानमेकं चात्र कर्म नायिकाख्यमुपमेयमपरैर्मनोरथैरुपमानैः सह कथितम् ॥

अथ समुच्चयः—

सोऽयं समुच्चयः स्याद्यत्रानेकोऽर्थ एकसामान्यः ।
अनिवादिर्द्रव्यादिः सत्युपमानोपमेयत्वे ॥ १०३ ॥

स इति । सोऽयं समुच्चयो नामालंकारो यत्रानेकस्त्र्यादिकोऽर्थ उपमानोपमेयलक्षणो द्रव्यादिर्द्रव्यगुणक्रियाजातिरूप एकसामान्य एकेन साधारणेन धर्मेण युक्तः स्यादिति । उपमायाः समुच्चयत्वनिवृत्त्यर्थमाह—अनिवादिः । उपमायामिवादिशब्दप्रयोग इत्यर्थः । एवमपि रूपकत्वं स्यादित्यत आह—सत्युपमानोपमेयत्व इति । रूपके ह्यभेद एव हेतुभेदः । तयोरनेकग्रहणमत्र त्र्याद्यर्थपरिग्रहार्थम् । त्रिचतुराः पञ्चषा वा यत्रार्था निर्दिश्यन्ते स समुच्चयः शोभामावहतीति भावः ॥

उदाहरणम्—

जालेन सरसि मीना हिंस्रैरेणा वने च वागुरया ।
संसारे भूतसृजा स्नेहेन नराश्च बध्यन्ते ॥ १०४ ॥

जालेनेति । अत्र जालादीनां करणानां सरःप्रमुखाणामधिकरणानां हिंस्रादीनां कर्तृणां बहूनामुपमानोपमेयभावे बन्धनमेकं सामान्यमिति ॥

अथ साम्यम्—

अर्थक्रियया यस्मिन्नुपमानस्येति साम्यमुपमेयम् ।
तत्सामान्यगुणादिककारणया तद्भवेत्साम्यम् ॥ १०५ ॥

अर्थक्रिययेति । तयोरुपमानोपमेययोर्यत्सामान्यं साधारणं गुणक्रियासंस्थानादि तत्कारणं यस्यास्तया तथाविधयार्थक्रियया यत्रोपमानस्योपमेयसाम्यमिति तत्साम्यं भवेत् ॥

उदाहरणम्—

अभिसर रमणं किमिमां दिशमैन्द्रीमाकुलं विलोकयसि ।
शशिनः करोति कार्यं सकलं मुखमेव ते मुग्धे ॥ १०६ ॥

अभिसरेति । अत्र शश्युपमानं मुखमुपमेयम्, प्रकाश्यमर्थक्रियासामान्यं कान्तिमत्त्वं गुणः ॥

भेदान्तरमाह—

सर्वाकारं यस्मिन्नुभयोरभिधातुमन्यथा साम्यम् ।
उपमेयोत्कर्षकरं कुर्वीत विशेषमन्यत्तत् ॥ १०७ ॥

सर्वाकारमिति । यस्मिन्नुपमेयोत्कर्षकराद्विशेषादन्यथा प्रकारान्तरेणोभयोरुपमानोपमेययोः सर्वाकारं सर्वात्मना साम्यमभिधातुमुपमेयोत्कर्षकरविशेषं कंचन कविः कुर्वीत तदन्यत्साम्यमलंकारः ॥

उदाहरणम्—

मृगं मृगाङ्कः सहजं कलङ्कं बिभर्ति तस्यास्तु मुखं कदाचित् ।
आहार्यमेवं मृगनाभिपत्त्रमियानशेषेण तयोर्विशेषः ॥ १०८ ॥

मृगमिति । अत्राहार्यकादाचित्कमृगनाभिपत्त्ररूपकालंकारभणनविशेषेणोपमेयस्य मुखस्योत्कर्षः प्रतिपादितः । अन्यथा तु नयनाह्लादनादिगुणैः सर्वथा साम्यमुक्तमिति ॥

अथ स्मरणम्—

वस्तुविशेषं दृष्ट्वा प्रतिपत्ता स्मरति यत्र तत्सदृशम् ।
कालान्तरानुभूतं वस्त्वन्तरमित्यदः स्मरणम् ॥ १०९ ॥

वस्त्विति । यत्र प्रतिपत्ता विशिष्टं वस्तु किंचनावलोक्य कालान्तरानुभूतं वस्त्वन्तरं स्मरति, अद एतत्स्मरणं नामालंकारः । अथ भ्रान्तिमतोऽस्य च को विशेषः । उच्यते—तत्रोपमानावगतिरेव नतूपमेयावगतिः । इह तूपमानस्मरणमात्रं न भ्रान्तिरिति ॥

उदाहरणम्—

तव भवने पश्यन्तः स्थूलस्थूलेन्द्रनीलमणिमालाः ।
भूभृन्नाथ मयूराः स्मरन्त्यमी कृष्णसर्पाणाम् ॥ ११० ॥

तवेति । अत्रेन्द्रनीलमणिमालादर्शनात्तत्सदृशं कृष्णसर्पाख्यं वस्त्वन्तरं मयूराः स्मरन्तीति लक्षणयोजना ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतोऽष्टमोऽध्यायः समाप्तः ।

नवमोऽध्यायः।

अथ क्रमप्राप्तमतिशयालंकारं वक्तुमाह—

यत्रार्थधर्मनियमः प्रसिद्धिबाधाद्विपर्ययं याति।
कश्चित्कचिदतिलोकं स स्यादित्यतिशयस्तस्य ॥ १ ॥

यत्रेति। यत्रालंकारेऽर्थधर्मयोर्नियमो नियतं स्वरूपं विपर्ययमन्यथात्वं गच्छति। नियमश्चेत्कथं विपर्ययं यातीत्याह—प्रसिद्धेरुष्णं दहतीत्यादिकायाः ख्यातेर्यो बाधो बाधनं तस्माद्धेतोः। स इत्यनेन प्रकारेणातिशयो नामालंकारः स्यात्। ननु यदि नियमस्यान्यथात्वमतिशयस्तर्हि स नास्त्येव। नियमस्यान्यथाभावादित्यत आह—कश्चित्कचिदिति। न सर्वः सर्वत्रेत्यर्थः। कथं विपर्ययं यातीत्याह—अतिलोकं लोकातिक्रान्तं यथा भवति। अत एवातिशयनामकत्वम्। तस्येत्युत्तरेण संबन्धः॥

अथ सामान्यस्यैव विशेषानाह—

पूर्वविशेषोत्प्रेक्षाविभावनातद्गुणाधिकविरोधाः।
विषमासंगतिपिहितव्याघातहेतवो भेदाः ॥ २ ॥

पूर्वेति। एते तस्य पूर्वादयो द्वादशभेदाः॥

तत्र पूर्वस्य तावल्लक्षणमाह—

यत्रातिप्रबलतया विवक्ष्यते पूर्वमेव जन्यस्य।
प्रादुर्भावः पश्चाज्जनकस्य तु तद्भवेत्पूर्वम् ॥ ३ ॥

यत्रेति। यत्र प्रागेव जन्यस्य कार्यस्य प्रादुर्भावो विवक्ष्यते जनकस्य तु कारणस्य पश्चात्तत्पूर्वं नामालंकारः। विवक्षापि कथं तथा भवतीत्याह—अतिप्रबलतया [हेतुभूतया। तत्र जनकव्यापारं विना जन्योत्पत्तिरिति जन्यस्यातिप्रबलता।] जन्यं जनयित्वा स्वयमुत्पद्यत इति जनकस्याप्रबलता। विवक्ष्यत इत्यनेन विवक्षामात्रमेतन्न परमार्थ इति सूचयति॥

उदाहरणम्—

जनमसुलभमभिलषतामादौ दन्दह्यते मनो यूनाम्।
गुरुरनिवारप्रसरः पश्चान्मदनानलो ज्वलति ॥ ४ ॥

जनमिति। अत्र दाहः कार्यं पूर्वं जातम्, मदनाग्निज्वलनं तु दाहकारणं पश्चादिति विशेषलक्षणम्। ज्वलितोऽग्निर्दहतीत्येवंविधश्च योऽर्थधर्मनियमः स क्वचिदेव कामिनि विपर्ययं यात इतीदं सामान्यलक्षणम्। अत्र चातिप्रबलत्वं हेतुः॥

अथ विशेषमाह—

किंचिदवश्याधेयं यस्मिन्नभिधीयते निराधारम्।
तादृगुपलभ्यमानं विज्ञेयोऽसौ विशेष इति ॥ ५ ॥

किंचिदिति । यस्मिन्नलंकारे किंचिद्वस्त्ववश्याधेयमिति विद्यमानाधारमेव सन्निराधारमित्यभिधीयते स इत्यनेन प्रकारेण विशेषनामालंकारो ज्ञेयः । ननु तथाभूतस्यान्यथा कथनं दोष एव स्यान्न त्वलंकार इत्याह—तादृगुपलभ्यमानमिति । तथा दर्शनान्न किंचिदनुपपन्नमित्यर्थः । वस्त्वन्तरेभ्यो विशिष्टधर्माभिधानाद्विशेषसंज्ञा ॥

उदाहरणम्—

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः ॥ ६ ॥

दिवमिति । अत्र गिर आधेयाः । प्राण्याश्रितत्वात् । अथ च विनापि कविभिराधारैरमयन्तीत्युपलब्ध्या कथितम् ॥

प्रकारान्तरमाह—

यत्रैकमनेकास्मिन्नाधारे वस्तु विद्यमानतया ।
युगपदभिधीयतेऽसावत्रान्यः स्याद्विशेष इति ॥ ७ ॥

यत्रेति । यत्रानेकस्मिन्नित्यादिक आधारे वस्तु सत्तया कथ्यते सोऽत्रान्यः प्रकारान्तरेण विशेष इति । कदाचिद्वस्त्वप्यनेकं स्यात्तत्रातिशयत्वमित्यत आह—एकमिति । एकमपि पर्यायेणानेकत्र तिष्ठत्येवेति न विशेष इत्याह—युगपदित्यादि ॥

उदाहरणम्—

हृदये चक्षुषि वाचि च तव सैवाभिनवयौवना वसति ।
वयमत्र निरवकाशा विरम कृतं पादपतनेन ॥ ८ ॥

हृदय इति । अत्रैका तरुणी युगपदनेकस्मिन्नाधारे हृदयादिके वसन्ती कथिता । अत एव परस्या निरवकाशत्वम् ॥

भूयोऽपि भेदान्तरमाह—

यत्रान्यत्कुर्वाणो युगपत्कार्यान्तरं च कुर्वीत ।
कर्तुमशक्यं कर्ता विज्ञेयोऽसौ विशेषोऽन्यः ॥ ९ ॥

यत्रेति । असावन्यो विशेषो ज्ञेयः, यत्र कर्तान्यत्कर्म कुर्वाणः सन्कर्मान्तरं कुर्वीत । पर्यायेणान्यदपि करिष्यति कोऽतिशय इत्यत आह—युगपत्समकालमिति । एवमपि ह्यसन्पठतीत्यादिवद्भविष्यति तत्किमत्रातिशयत्वमित्याह—कर्तुमशक्यमिति । अशक्यक्रियान्तरकरणादतिशय इत्यर्थः ॥

उदाहरणम्—

लिखितं बालमृगाक्ष्या मम मनसि तया शरीरमात्मीयम् ।
स्फुटमात्मनो लिखन्त्या तिलकं विमले कपोलतले ॥ १० ॥

लिखितमिति। अत्र नायिकया कर्त्र्या निजकपोले तिलकलेखनं कुर्वाणया तदैव कर्तुमशक्यं नायकचित्ते शरीरलेखनलक्षणं कर्मान्तरं कृतम् ॥

अथोत्प्रेक्षा—

यत्रातितथाभूते संभाव्येत क्रियाद्यसंभाव्यम्।
संभूतमतद्वति वा विज्ञेया सेयमुत्प्रेक्षा ॥ ११ ॥

यत्रेति। यत्रासंभाव्यं क्रियादिकं वस्तुनि क्वापि संभाव्यते सेयमुत्प्रेक्षा। यद्यत्र न संभवति कथं तस्य तत्र संभावनेत्याह—अतितथाभूत इति। अतिशयेन तथाभूते। तथात्वमसंभाव्यसंभावनायोग्यं प्रकारं प्राप्त इत्यर्थः। प्रकारान्तरमाह—संभूतमतद्वति वेति। यत्र वा वस्तुन्यतद्वत्यविद्यमानतक्रियादिकेऽप्यसंभाव्यं क्रियादि तथाभूतत्वात्संभूतमेवोच्येत सान्योत्प्रेक्षा ॥

प्रथमोदाहरणमाह—

घनसमयसलिलधौते नभसि शरच्चन्द्रिका विसर्पन्ती।
अतिसान्द्रतयेह नृणां गात्राण्यनुलिम्पतीवेयम् ॥ १२ ॥

घनेति। अत्र चन्द्रिकाया अनुलेपनमसंभाव्यमेव संभावितमनुलिम्पतीवेति। नैर्मल्यान्नभसः, घनत्वेन च तस्यास्तथाभूतत्वम् ॥

द्वितीयोदाहरणमाह—

पल्लवितं चन्द्रकरैरखिलं नीलाश्मकुट्टिमोर्वीषु।
ताराप्रतिमाभिरिदं पुष्पितमवनीपतेः सौधम् ॥ १३ ॥

पल्लवितमिति। अत्र सौधाख्ये वस्तुन्यपल्लवितेऽपुष्पिते च चन्द्रतारकाप्रतिबिम्बसंपर्कोत्तद्योग्ये सत्यसंभाव्यमपि पल्लवितत्वं पुष्पितत्वं च संभूतं कथितम्। इवार्थश्च सामर्थ्यादभ्यते ॥

प्रकारान्तरमाह—

अन्यनिमित्तवशाद्यद्यथा भवेद्वस्तु तस्य तु तथात्वे।
हेत्वन्तरमतदीयं यत्रारोप्येत सान्येयम् ॥ १४ ॥

अन्येति। सेयमन्योत्प्रेक्षा यस्यां तद्वस्त्वन्यनिमित्तवशात्कारणाद्यथा येन रूपेण भवति तस्य वस्तुनस्तथा भवने तत्स्वरूपतोत्पत्तौ कारणान्तरमतदीयं यत्तस्य सक्तं न भवति तदारोप्येतेति ॥

उदाहरणम्—

सरसि समुच्छसदम्भसि कादम्बवियोगदूयमानेव।
नलिनी जलप्रवेशं चकार वर्षागमे सद्यः ॥ १५ ॥

सरसीति । अत्र नलिन्या जलप्रवेशे निजं जलोल्लासाख्यं कारणं विमुच्य हंसवियोगाख्यं हेत्वन्तरमारोपितम् । या किलान्यापीष्टेन वियुज्यते सा प्रायो जलप्रवेशादि कुरुते ॥

अथ विभावना—

सेयं विभावनाख्या यस्यामुपलभ्यमानमभिधेयम् ।
अभिधीयते यतः स्यात्तत्कारणमन्तरेणैव ॥ १६ ॥

सेति । सेयमेषा विभावना, यस्यामभिधेयः पदार्थो यतः कारणान्निजाद्धेतोर्भवति स पदार्थस्तत्कारणमन्तरेणाप्यभिधीयत इति । ननु तत्कारणं चेत्कथं तद्विनोत्पत्तिरित्याह—उपलभ्यमानं दृश्यमानमिति । अत एवातिशयत्वमिति ॥

उदाहरणम्—

निहतातुलतिमिरभरः स्फाररस्फुरदुरुतरप्रभाप्रसरः ।
शं वो दिनकृद्दिश्यादतैलपूरो जगद्दीपः ॥ १७ ॥

अत्राभिधेयं दीपलक्षणं यतः कारणात्तैलाख्याद्भवति तद्विनापि कथितमतैलपूर इति । अत्र च दीप इव दीप इति सत्यपि रूपकत्वेऽतैलपूर इति विभावनाविभागः ॥

प्रकारान्तरमाह—

यस्यां तथा विकारस्तत्कारणमन्तरेण सुव्यक्तः ।
प्रभवति वस्तुविशेषे विभावना सेयमन्या तु ॥ १८ ॥

यस्यामिति । सेयमेषान्या विभावना, यस्यां तथेति यतः कारणाद्विकारः क्वचिद्वस्तुनि प्रभवति तत्कारणमन्तरेणापि सुव्यक्तः प्रकटः स विकारः कथ्यत इति ॥

उदाहरणम्—

जाता ते सखि सांप्रतमश्रमपरिमन्थरा गतिः किमियम् ।
कस्मादभवदकस्मादियममधुमदालसा दृष्टिः ॥ १९ ॥

जातेति । अत्र गतिदृष्टिलक्षणे वस्तुविशेषे मन्थरत्वालसत्वलक्षणो विकारो यतः कारणाच्छ्रममधुमदलक्षणाद्भवति तेन विनैवोक्तः । अथ पूर्वतोऽस्याः को विशेषः । उच्यते—पूर्वत्राभिधेयं कारणमन्तरेणोक्तमिह तु विकार इति ॥

भूयोऽपि भेदान्तरमाह—

यस्य यथात्वं लोके प्रसिद्धमर्थस्य विद्यते तस्मात् ।
अन्यस्यापि तथात्वं यस्यामुच्येत सान्येयम् ॥ २० ॥

यस्येति । यस्यार्थस्य यथात्वं यादृग्धर्मत्वं लोके प्रसिद्धं ततोऽर्थादन्यस्यापि तथात्वं तादृग्धर्मता कथ्यते सेयमन्या विभावना ॥

उदाहरणम्—

स्फुटमपरं निद्रायाः सरसमचैतन्यकारणं पुंसाम् ।
अपटलमान्ध्यनिमित्तं मदहेतुरनासवो लक्ष्मीः ॥ २१ ॥

स्फुटमिति । अत्राचैतन्यनिमित्तत्वं निद्रायाः प्रसिद्धम् । आन्ध्यहेतुत्वं पटलस्य । मदकारणत्वमासवस्य । अथ चान्यस्यार्थस्य लक्ष्मीलक्षणस्योक्तमिति ॥

अथ तद्गुणः—

यस्मिन्नेकगुणानामर्थानां योगलक्ष्यरूपाणाम् ।
संसर्गे नानात्वं न लक्ष्यते तद्गुणः स इति ॥ २२ ॥

यस्मिन्निति । यत्राभिन्नगुणानामर्थानां संबन्धे सति नानात्वं भेदो न लक्ष्यत इत्युच्यते स तद्गुणो नामालंकारः स्यात् । स एव गुणो यत्रेति कृत्वा । ननु दुग्धतक्रादीनां संसर्गे नानात्वं न लक्ष्यत एव तत्किमतिशयत्वमित्याह—योगलक्ष्यरूपाणामिति । यत्र योगे सति रूपं लक्षयितुं शक्यमथवा लक्ष्यमिति कथ्यत इत्यर्थः ॥

उदाहरणम्—

नवधौतधवलवसनाश्चन्द्रिकया सान्द्रया तिरोगमिताः ।
रमणभवनान्यशङ्कं सर्पन्त्यभिसारिकाः सपदि ॥ २३ ॥

नवेति । अत्र ज्योत्स्नाभिसारिकालक्षणावर्थावैकेन सहजाहार्येण शुक्लगुणेन युक्तौ संसर्गे लक्ष्यरूपावप्यलक्ष्यतयोक्तौ ॥

भेदान्तरमाह—

असमानगुणं यस्मिन्नतिबहलगुणेन वस्तुना वस्तु ।
संसृष्टं तद्गुणतां धत्तेऽन्यस्तद्गुणः स इति ॥ २४ ॥

असमानेति । यत्र वस्तुनान्येन संसृष्टं वस्तु तद्गुणतां धत्ते तदीयगुणं भवतीति कथ्यते स इत्यन्यस्तद्गुणः । कदाचिदेकगुणता तयोर्भविष्यति, अतो नातिशयत्वमित्याह—अतिबहलगुणेनेति । अतिबहुगुणता तद्गुणत्वहेतुः क्रियत इत्यर्थः ॥

उदाहरणमाह—

कुब्जकमालापि कृता कार्तस्वरभास्वरे त्वया कण्ठे ।
एतत्प्रभानुलिप्ता चम्पकदामभ्रमं कुरुते ॥ २५ ॥

कुब्जकमालेति । अत्र शुक्लगुणा कुब्जकमाला गौरवर्णकण्ठेन संपृक्ता गौरमेव वर्णं धत्ते ॥

अथाधिकम्—

यत्रान्योन्यविरुद्धं विरुद्धबलवत्क्रियाप्रसिद्धं वा ।
वस्तुद्वयमेकस्माज्जायत इति तद्भवेदधिकम् ॥ २६ ॥

यत्रेति । यत्रैकस्मात्कारणाद्वस्तुद्वयमुत्पद्यत इत्युच्यते तदधिकम् । किमेतावतातिशयत्वमित्याह—अन्योन्यविरुद्धम् । परस्परविरुद्धस्वभावमित्यर्थः । प्रकारान्तरमाह—विरुद्धाभ्यां बलवतीभ्यां क्रियाभ्यां प्रसिद्धं वा यत्रैकस्मात्कारणाद्वस्तुद्वयं जायते तदप्यधिकम् ॥

उदाहरणम्—

मुञ्चति वारि पयोदो ज्वलन्तमनलं च यत्तदाश्चर्यम् ।
उदपद्यत नीरनिधेर्विषममृतं चेति तच्चित्रम् ॥ २७ ॥

मुञ्चतीति । अत्र पूर्वार्धे एकस्मान्मेघाद्वस्तुद्वयं वारिज्वलनलक्षणं विरुद्धं जायमानमुक्तम् । उत्तरार्धे त्वेकस्मात्समुद्राद्वस्तुद्वयं विषामृतलक्षणमन्योन्यविरुद्धक्रियमुक्तम् । विषामृतयोर्हि न परस्परं विरोधः । किं तु मारणजीवनक्रिये विरुद्धे । इत्युदाहरणद्वयमेतत् ॥

भेदान्तरमाह—

यत्राधारे सुमहत्याधेयमवस्थितं तनीयोऽपि ।
अतिरिच्येत कथंचित्तदधिकमपरं परिज्ञेयम् ॥ २८ ॥

यत्रेति । यत्र सुमहत्यप्याधारेऽतिशयवत्यप्याधेयं वस्त्ववस्थितं कुतश्चित्कारणान्न माति तदपरमधिकं बोद्धव्यम् ॥

उदाहरणम्—

जगद्विशाले ह्रदि तस्य तन्वी प्रविश्य सास्ते स्म तथा यथा तत् ।
पर्याप्तमासीदखिलं न तस्यास्तत्रावकाशस्तु कुतोऽपरस्याः ॥ २९ ॥

जगदिति । अत्र जगद्विस्तीर्णेऽपि ह्रदये आधारे तन्वीलक्षणमाधेयं स्वल्पमपि न माति । तस्यास्तत्रामानमनुरागाद्बहिरपि सर्वत्र दर्शनात् । तन्वीति साभिप्रायमत्र नाम ॥

अथ विरोधः—

यस्मिन्द्रव्यादीनां परस्परं सर्वथा विरुद्धानाम् ।
एकत्रावस्थानं समकालं भवति स विरोधः ॥ ३० ॥

यस्मिन्निति । यत्र द्रव्यगुणक्रियाजातीनां विरुद्धानामेकत्राधारेऽवस्थानं भवति स विरोधः । परस्परमन्योन्यम् । न त्वाधारेण सह । तथा सर्वप्रकारं सजातीयैर्विजातीयैश्च सहेत्यर्थः । समकालमिति युगपत् । अत एवातिशयत्वं भवति ॥

एवं सर्वथा विरोधे सति कियन्तो भेदा इति तत्संख्यामाह—

अस्य सजातीयानां विधीयमानस्य सन्ति चत्वारः ।
भेदास्तन्नामानः पञ्च त्वन्ये तदन्येषाम् ॥ ३१ ॥

अस्येति । अस्य विरोधस्य सजातीयानां द्रव्यादीनां विधीयमानस्य चत्वारो भेदाः सन्ति । यथा द्रव्ययोर्विरोधो द्रव्यविरोधः । एवं गुणविरोधः क्रियाविरोधो जातिविरो-

घश्च । अत एव तन्नामानः । तथा तेभ्यः सजातीयेभ्योऽन्येषां विजातीयानां पुनर्विधीयमानस्य पञ्च भेदा भवन्ति । यथा द्रव्यगुणयोर्द्रव्यक्रिययोर्गुणक्रिययोर्गुणजात्योः क्रियाजात्योश्चेति ॥

ननु द्रव्यजात्योरपि षष्ठो भेदः समस्ति तत्कथं पञ्चेत्युक्तं तत्राह—

जातिद्रव्यविरोधो न संभवत्येव तेन न षडेते ।
अन्ये तु वक्ष्यमाणाः सन्ति विरोधास्तु चत्वारः ॥ ३२ ॥

जातीति । नित्यमेव द्रव्याश्रितत्वाज्जातेर्न जातिद्रव्ययोर्विरोध इत्यर्थः । एवं नव भेदाः । तथात्रान्ये वक्ष्यमाणाश्चत्वारो विरोधाः सन्ति ॥

तद्यथा—

यत्रावश्यं भावी ययोः सजातीययोर्भवेदेकः ।
एकत्र विरोधवतोस्तयोरभावोऽयमन्यस्तु ॥ ३३ ॥

यत्रेति । यत्राधारे विरुद्धयोः सजातीययोरर्थयोर्मध्यादेकोऽवश्यंभावी निश्चितो भवति, तयोर्द्वयोरप्यभावो यत्र कथ्यते सोऽपरो विरोधश्चतुर्थो द्रव्यगुणक्रियाजातिभेदेन । इत्येवं त्रयोदशसंख्योऽयं विरोधालंकारः ॥

अथैषामेव यथाक्रममुदाहरणान्याह—

अत्रेन्द्रनीलभित्तिषु गुहासु शैले सदा सुवेलाख्ये ।
अन्योन्यानभिभूते तेजस्तमसी प्रवर्तेते ॥ ३४ ॥

अत्रेति । अत्र तेजस्तमसोर्विरुद्धद्रव्ययोरेकत्र गुहाधारेऽवस्थितिरुक्ता ॥

सत्यं त्वमेव सरलो जगति जराजनितकुब्जभावोऽपि ।
ब्रह्मन्परमसि विमलो विततोद्धवधूममलिनोऽपि ॥ ३५ ॥

सत्यमिति । अत्र सरलत्वकुब्जत्वादिविरुद्धगुणावस्थितिः ॥

बालमृगलोचनायाश्चरितमिदं चित्रमत्र यदसौ माम् ।
जडयति संतापयति च दूरे हृदये च मे वसति ॥ ३६ ॥

बालेति । अत्र जडीकरणसंतापनादिक्रिये विरुद्धे ॥

एकस्यामेव तनौ बिभर्ति युगपन्नरत्वसिंहत्वे ।
मनुजत्ववराहत्वे तथैव यो विभुरसौ जयति ॥ ३७ ॥

एकस्यामिति । अत्र नरत्वादिजातिविरोधः ॥

अथ विजातीयोदाहरणान्याह—

तेजस्विना गृहीतं मार्दवमुपयाति पश्य लोहमपि ।
पात्रं तु महद्धितं तरति तदन्यच्च तारयति ॥ ३८ ॥

तेजस्विनेति। अत्र कठिनस्य लोहद्रव्यस्य मार्दवगुणस्य च विरोधेऽप्येकत्राबस्थितिः। अत्र लोहद्रव्यस्य तरणक्रियायाश्च विरोधेऽवस्थितिः॥

सा कोमलापि दलयति मम हृदयं पश्यतो दिशः सकलाः।
अभिनवकदम्बधूलीधूसरशुभ्रभ्रमद्भ्रमराः॥ ३९॥

सेति। अत्र कोमलगुणस्य दलनक्रियायाश्च विरोधेऽप्यवस्थितिः। अत्र भ्रमरजातेः शुक्लत्वगुणस्य च विरोधः॥

वरतनु विरुद्धमेतत्तव चरितमदृष्टपूर्वमिह लोके।
मथ्नासि येन नितरामबलापि बलान्मनो यूनाम्॥ ४०॥

वरतन्विति। अत्राबलत्वजातेर्मथनक्रियायाश्च विरोधः॥

अन्ये तु भेदाश्चत्वारः सन्तीत्युक्तम्। तेषामुदाहरणान्याह—

अविवेकितया स्थानं जातं न जलं न च स्थलं तस्याः।
अनुरज्य चलप्रकृतौ त्वय्यपि भर्ता यया मुक्तः॥ ४१॥

अविवेकितयेति। अत्र द्रव्ययोर्जलस्थलयोर्विरोधित्वादेकस्याभावेऽवश्यमेवेतरस्यावस्थानेन भाव्यम्। अत्र चोभयोरप्यभाव उक्तः॥

न मृदु न कठिनमिदं मे हतहृदयं पश्य मन्दपुण्यायाः।
यद्विरहानलतप्तं न विलयमुपयाति न च दार्ढ्यम्॥ ४२॥

नेति। यदि मद्धृदयं मृदु भवेत्ततो विरहाग्नितप्तं जतुवद्विलीयेत। कठिनं स्यात्ततो घनवद्वर्धिमानमाप्नुयादिति। अत्र मार्दवकाठिन्ययोर्गुणयोरेकस्याप्यभावः॥

नास्ते न याति हंसः पश्यन्गगनं घनश्यामम्।
चिरपरिचितां च बिसिनीं स्वयमुपभुक्तातिरिक्तरसाम्॥ ४३॥

नेति। यथा पूर्वत्र गुणयोरेवमत्र क्रिययोरासनगमनलक्षणयोर्विरुद्धयोर्मध्यादेकस्या अप्यभाव इति॥

न स्त्री न चायमस्त्री जातः कुलपांसनो जनो यत्र।
कथमिव तत्पातालं न यातु कुलमनवलम्बितया॥ ४४॥

नेति। कुलपांसनः। कुलनाशन इत्यर्थः। अत्रापि स्त्रीत्वपुरुषत्वजात्योर्विरुद्धयोर्मध्यादेकस्या अप्यभावः॥

अथ विषममाह—

कार्यस्य कारणस्य च यत्र विरोधः परस्परं गुणयोः।
तद्वत्क्रिययोरथवा संजायेतेति तद्विषमम्॥ ४५॥

कार्यस्येति। यत्र कार्यकारणसंबन्धिनोर्गुणयोः क्रिययोर्वा परस्परमन्योन्यं विरोधो

भवेत्तद्विषमनामालंकारः । ननु यदि वस्तुनोः कार्यकारणभावः, कथं तद्गुणयोः क्रिययोर्वा विरोधः । सत्यम् । अत एवातिशयत्वम् ॥

उदाहरणम्—

अरिकरिकुम्भविदारणरुधिरारुणदारुणादतः खड्गात् ।
वसुधाधिपते धवलं कान्तं च यशो बभूव तव ॥ ४६ ॥

अरीति । अत्र कारणस्य खड्गस्य गुणौ लौहित्यदारुणत्वे, कार्यस्य यशसो धवलत्वकान्तत्वे, तेषां चान्योन्यं विरोधः ॥

तथा—

आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥ ४७ ॥

आनन्देति । अत्र कारणस्य नायिकायाः क्रिया आनन्ददानम्, कार्यस्य तु विरहस्य तापनम्, तयोश्चान्योन्यं विरोधः ॥

अथासंगतिः—

विस्पष्टे समकालं कारणमन्यत्र कार्यमन्यत्र ।
यस्यामुपलभ्येते विज्ञेया संगतिः सेयम् ॥ ४८ ॥

विस्पष्ट इति । सेयमसंगतिर्बोद्धव्या, यस्यां विस्पष्टे प्रकटे समकालमेव च कार्यमन्यत्रोपलभ्यते कार्यं वान्यत्रेति । अत एवासंगतिर्नाम, अतिशयत्वं च ॥

उदाहरणम्—

नवयौवनेन सुतनोरिन्दुकलाकोमलानि पूर्यन्ते ।
अङ्गान्यसंगतानां यूनां हृदि वर्धते कामः ॥ ४९ ॥

नवेति । अत्राङ्गपूरणाख्यं कारणं तन्वीस्थम्, मदनवर्धनं कारणं युवस्थं विस्पष्टमेवोपलभ्यते ॥

अथ पिहितम्—

यत्रातिप्रबलतया गुणः समानाधिकरणमसमानम् ।
अर्थान्तरं पिदध्यादाविर्भूतमपि तत्पिहितम् ॥ ५० ॥

यत्रेति । यत्रैकाधारमर्थान्तरं कर्मभूतं गुणः कर्तातिप्रबलतया हेतुभूतया पिदध्यात्स्थगयेत्तत्पिहितं नामालंकारः । ननु तुल्यं गुणान्तरं स्थग्यत एव किमतिशयत्वमित्याह—असमानम् । असदृशमित्यर्थः । कदाचिदसमानमप्यलब्धपाटवं स्यादित्यत आह—आविर्भूतमपीत्यर्थः । असमानग्रहणेन प्रथमातद्गुणालंकाराद्विशेषः ख्याप्यते, तत्र ह्येकगुणानामर्थानां संसर्गे नानात्वं लक्ष्यत इत्युक्तम् । द्वितीयात्तर्हि कोऽस्य विशेषः । उच्यते—तत्रासमानगुणं वस्तु वस्त्वन्तरेण प्रबलगुणेन संसृष्टं तद्गुणतां प्राप्यते, न त-

द्विधीयत इति । मीलितात्तर्हि कोऽस्य भेदः । उच्यते—असमानचिह्नत्वमेव । तत्र हि समानचिह्नेन वस्तुना हर्षकोपादि तिरस्क्रियत इति सर्वं समञ्जसम् ॥

उदाहरणम्—

प्रियतमवियोगजनिता कृशता कथमिव तवेयमङ्गेषु ।
लसदिन्दुकलाकोमलकान्तिकलापेषु लक्ष्येत ॥ ९१ ॥

प्रियेति । अत्र कान्तिगुणेनार्थान्तरं कृशताख्यमेकाधारमसमानगुणमतिप्रबलत्वात्पिहितमिति ॥

अथ व्याघातः—

अन्यैरप्रतिहतमपि कारणमुत्पादनं न कार्यस्य ।
यस्मिन्नभिधीयेत व्याघातः स इति विज्ञेयः ॥ ९२ ॥

अन्यैरिति । यत्र कारणं कार्यस्याजनकमुच्येत स कार्यव्याघाताख्योऽलंकारः । कदाचित्कारणं केनचित्प्रतिहतं भविष्यतीत्यत आह—अन्यैः कारणैरप्रतिहतमपीति । अत एवातिशयितमिति ॥

उदाहरणमाह—

यत्र सुरतप्रदीपा निष्कज्जलवर्तयो महामणयः ।
माल्यस्यापि न गम्या हृतवसनवधूविसृष्टस्य ॥ ९३ ॥

यत्रेति । अत्र दीपः कारणं कार्यस्य कज्जलस्य नोत्पादकम् । तच्च कारणं कारणान्तरैर्माल्यादिभिरप्रतिहतमिति ॥

अथाहेतुः—

बलवति विकारहेतौ सत्यपि नैवोपगच्छति विकारम् ।
यस्मिन्नर्थः स्थैर्यान्मन्तव्योऽसावहेतुरिति ॥ ९४ ॥

बलवतीति । असावहेतुर्नामालंकारः, यत्रार्थो विकारमन्यथात्वं नायाति । कदाचिद्विक्रियाकारणं न स्यादित्याह—विकारहेतौ सत्यपि । कदाचिदसौ हेतुः प्रबलो न स्यादित्याह—बलवतीति । अत एवातिशयत्वमिति । कथं नायाति, स्थैर्यादिति ॥

उदाहरणम्—

रूक्षेऽपि पेशलेन प्रखलेऽप्यखलेन भूषिता भवता ।
वसुधेयं वसुधाधिप मधुरगिरा परुषवचनेऽपि ॥ ९५ ॥

रूक्ष इति । अत्र रूक्षादिके बलवति विकारकारणे सत्यपि विकारमपेशलत्वादिकं राजा महासत्त्वान्नायातीति ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतो
नवमोऽध्यायः समाप्तः ।

दशमोऽध्यायः ।

वास्तवौपम्यातिशयान्व्याख्यायाधुना क्रमप्राप्तं श्लेषं व्याचिख्यासुराह—

यत्रैकमनेकार्थैर्वाक्यं रचितं पदैरनेकस्मिन् ।
अर्थे कुरुते निश्चयमर्थश्लेषः स विज्ञेयः ॥ १ ॥

यत्रेति । यत्रैकमेव वाक्यं रचितं सदनेकस्मिन्नर्थे निश्चयं कुरुते सोऽर्थश्लेषो विज्ञेयः । नन्वेकं चेद्वाक्यं कथमनेकार्थनिश्चयं करोतीत्याह—अनेकार्थैः पदै रचितमिति कृत्वा । एकं वाक्यमित्येकग्रहणं शब्दश्लेषादस्य विशेषख्यापनार्थम् । तत्र हि 'युगपदनेकं वाक्यं यत्र विधीयेत स श्लेषः' (४।१) इत्युक्तम्। किं च तत्र शब्दानां श्लेषः, अत्र त्वर्थानामिति ॥

अथास्यैव भेदानाह—

अविशेषविरोधाधिकवक्रव्याजोक्त्यसंभवावयवाः ।
तत्त्वविरोधाभासाविति भेदास्तस्य शुद्धस्य ॥ २ ॥

अविशेषेति । तस्य श्लेषस्य शुद्धस्याविशेषादयो दश भेदाः । इतिशब्दः समाप्त्यर्थो निर्देशार्थो वा । शुद्धग्रहणं परमतनिरासार्थम् । यतः कैश्चित् 'तत्सहोक्त्युपमाहेतुनिर्देशात्त्रिविधम्' इति संकीर्णत्वेन त्रैविध्यमुक्तमिति शुद्धस्यैव सतोऽस्य दश भेदाः । अलंकारान्तरसंस्पर्शेऽनन्ता इत्यर्थः ॥

यथोद्देशस्तथा लक्षणमिति कृत्वा पूर्वमविशेषं लक्षयितुमाह—

अविशेषः श्लेषोऽसौ विज्ञेयो यत्र वाक्यमेकस्मात् ।
अर्थादन्यं गमयेदविशिष्टविशेषणोपेतम् ॥ ३ ॥

अविशेष इति । असावविशेषश्लेषो ज्ञेयः, यत्र वाक्यमेकस्मात्प्रक्रान्तादन्यमर्थं गमयेत् । कीदृशम्। अविशिष्टैः समानैर्विशेषणैरुपेतं युक्तम् । यादृशानि चैकस्य विशेषणानि तादृशान्येवापरस्यापीत्यर्थः । ननु प्रकृतानुपयोग्यर्थान्तरमुन्मत्तवाक्यवदसंबद्धमवगतमपि कोपयुज्यते । सत्यम् । एतदेवास्यालंकारत्वम् । एवं हि सहृदयावर्जकत्वमस्य । अत्र च महाकवय एव प्रमाणम् ॥

उदाहरणम्—

शरदिन्दुसुन्दररुचं सुकुमारां सुरभिपरिमलामनिशम् ।
निदधाति नाल्पपुण्यः कण्ठे नवमालिकां कान्ताम् ॥ ४ ॥

शरदिति । नवा प्रत्यग्रा माला यस्यास्तां नवमालिकां कान्तां प्रियतमामल्पपुण्यः कण्ठे न करोतीति । एतत्प्रकृतं वाक्यं कान्तानवमालिकाशब्दयोरनेकार्थत्वादिदमर्थान्तरं गमयति । यथा—नवमालिकाख्यां सुमनोजातिं कान्तां ह्यामल्पपुण्यः कण्ठे न कुरुत इति । शरदिन्दुसुन्दररुचमित्यादीन्यविशिष्टानि विशेषणानि ॥

अथ विरोधश्लेषः—

यत्र विरुद्धविशेषणमवगमयेदन्यदर्थसामान्यम्।
प्रक्रान्तमतोऽन्यादृग्वाक्यश्लेषो विरोधोऽसौ ॥ ९ ॥

यत्रेति। असौ विरोधाख्यश्लेषः, यत्र प्रक्रान्तवाक्यमन्यदर्थसामान्यं विरुद्धविशेषणमवगमयेत्। कीदृग्वाक्यम्। अतोऽर्थान्तरादन्यादृशम्। विशेषरूपमविरुद्धं चेत्यर्थः। तेन यत्र प्रक्रान्तोऽर्थविशेषोऽन्यदर्थसामान्यं विरुद्धविशेषणमवगमयति स विरोधश्लेष इति तात्पर्यार्थः ॥

उदाहरणम्—

संवर्धिताविविधाधिककमलोऽप्यवदलितनालिकः सोऽभूत्।
सकलारिदाररसिकोऽप्यनभिमतपराङ्गनासङ्गः ॥ ६ ॥

संवर्धितेति। अत्रायं प्रक्रान्तोऽर्थः—स कश्चिद्राजा एवंविधोऽभूत्। यथा संवर्धितनानाभ्यधिकलक्ष्मीकोऽवदलितमूर्खश्च। तथा सकलशत्रुविदारणरसिकोऽनिष्टपरस्त्रीसङ्गश्चेति। इदं तु विरुद्धमर्थसामान्यं गम्यते—यदि संवर्धितानि विविधान्यधिकं कमलानि पद्मानि येन, कथमवदलितानि नालिकानि पद्मानि तेनैवेति। तथा यदि सकलेष्वरिदारेषु शत्रुकलत्रेषु रसिकः कथमनभिमतपराङ्गनासङ्ग इति। सामान्यरूपता चास्य विशेष्याविशेषणादिति ॥

अथाधिकश्लेषः—

यत्राधिकमारब्धादसमानविशेषणं तथा वाक्यम्।
अर्थान्तरमवगमयेदधिकश्लेषः स विज्ञेयः ॥ ७ ॥

यत्रेति। यत्र वाक्यं कर्तृभूतमारब्धात्प्रकृतादन्यदर्थान्तरमधिकमुत्कृष्टं गमयेत्सोऽधिकश्लेषः। अविशेषश्लेषादस्य विशेषमाह—असमानविशेषणमिति। तत्र हि समानार्थानि विशेषणान्युक्तानि ॥

उदाहरणम्—

प्रेम्णा निधाय मूर्धनि वक्रमपि बिभर्ति यः कलावन्तम्।
भूतिं च वृषारूढः स एव परमेश्वरो जयति ॥ ८ ॥

प्रेम्णेति। यः कलावन्तं विदग्धं वक्रमनृजुहृदयमपि बिभर्ति, प्रेम्णा प्रीत्या शिरसि कृत्वा। तथा भूतिं समृद्धिं च बिभर्ति। कीदृशः सन्। वृषे धर्मे समारूढः। स एव परमेश्वरो नायको जयति। एतत्प्रकृतं वाक्यमिदं तूत्कृष्टमर्थान्तरं गमयति—यथा स एव परमेश्वरो महादेवो जयति, यः कलावन्तं चन्द्रं वक्रं कलाशेषमपि प्रेम्णा मूर्धि निधाय वहति। भूतिं च भस्म वहति। वृषे वृषभे समारूढ इति। उत्कृष्टत्वं चात्र देववर्णनात्। नृभ्यो हि देवा अधिकाः। विशेषणान्यपि भिन्नार्थान्यत्रेति ॥

अथ वक्रश्लेषः—

यत्रार्थादन्यरसस्तत्प्रतिबद्धश्च गम्यतेऽन्योऽर्थः।
वाक्येन सुप्रसिद्धो वक्रश्लेषः स विज्ञेयः ॥ ९ ॥

यत्रेति। यत्र वाक्येन स्वमर्थं ब्रुवतान्योऽर्थः प्रासङ्गिको गम्यते। कीदृशः। प्रकृतादन्यरसः। तथा तेन प्रकृतार्थेन प्रतिबद्धः। प्रतिबद्धता चैकविषयत्वेन। तथा सुप्रसिद्धस्तत्प्रतिबद्धत्वेन सुष्ठु प्रतीतः॥

उदाहरणम्—

आक्रम्य मध्यदेशं विदधत्संवाहनं तथाङ्गानाम्।
पतति करः काञ्च्यामपि तव निर्जितकामरूपस्य ॥ १० ॥

आक्रम्येति। तव निर्जितकामरूपाख्यजनपदस्य संबन्धी करो नृपदेयभागः काञ्चीनाम्नि यावद्देशे पतति। काञ्च्यपि त्वया जितेत्यर्थः। किं कृत्वा। मध्यदेशं कान्यकुब्जादिकमाक्रम्याभिभूय। अनन्तरमङ्गानां देशविशेषाणां संवाहनमुपमर्दनं कुर्वन्निति। अथ गम्यमर्थान्तरं भण्यते—यथा तव तिरस्कृतमदनरूपस्य करो हस्तः काञ्च्यां रशनाप्रदेशे पतति। मध्यदेशमुदरमात्रम्। अङ्गानामूरुस्तनादीनां संवाहनं परिमलनं कुर्वन्। अयं चार्थः शृङ्गाररसयुक्तः। एकविषयत्वेन च पूर्वार्थप्रतिबद्धः। पूर्वत्र तु रसो वीराभिधः॥

अथ व्याजश्लेषः—

यस्मिन्निन्दा स्तुतितो निन्दाया वा स्तुतिः प्रतीयेत।
अन्या विवक्षिताया व्याजश्लेषः स विज्ञेयः ॥ ११ ॥

यस्मिन्निति। यत्र स्तुतेर्विवक्षिताया अन्या प्रासङ्गिकी निद्रा प्रतीयते निन्दाया वा विवक्षितायाः प्रासङ्गिकी स्तुतिः स व्याजश्लेषः॥

उदाहरणमाह—

त्वया मदर्थं समुपेत्य दत्तामिदं यथा भोगवते शरीरम्।
तथास्य ते दूति कृतस्य शक्या प्रतिक्रियानेन न जन्मना मे ॥ १२ ॥

त्वयेति। अत्र कयापि नायिकया दूती दयितपार्श्वं प्रेषिता। सा तु तत्र स्वार्थं कृतवती। समागत्य चाधरक्षतादिकमुद्दिश्योत्तरं दत्तवती यथाहं तत्र त्वदर्थं गता सती सर्पेण दष्टा, परं वैद्यैश्चिकित्सितेति जीविता। ततस्तां कृतदोषां दूतीं नायिका स्तुतिद्वारेण निन्दति त्वयेत्यादिना। भोगवते इत्येकत्र सर्पाय, अन्यत्र विलासिने। प्रतिक्रिया त्वेकत्रोपकारः, अन्यत्रापकारः॥

निन्दास्तुतिमाह—

नो भीतं परलोकतो न गणितः सर्वः स्वकीयो जनो
मर्यादापि च लङ्घिता न च तथा मुक्ता न गोत्रस्थितिः।

भुक्ता साहसिकेन येन सहसा राज्ञां पुरः पश्यतां
सा मेदिन्यपरैः परं परिहृता सर्वैरगम्येति या ॥ १३ ॥

नो इति। अत्र निन्दा तावत्—या सर्वैरेव लोकैरगम्यत्वात्परिहृता सा मेदिनी शिल्पिविशेषनारी येन साहसिकेन राज्ञां पुरतः सहसैव भुक्ता। तेन किं कृतम्। न परलोकाद्भीतम्, न स्वजनो गणितः, मर्यादा च लङ्घिता, गोत्रस्थितिर्मुक्तेति। अतोऽपि निन्दायाः प्रासङ्गिकी स्तुतिरेव गम्यते। यथा—सा मेदिनी भूर्येन साहसिकेन राज्ञां पुरः पश्यतां सहसा भुक्तात्मवशीकृता। या सर्वैरेव राजभिर्दुर्गमत्वाद्दूरं परिहृता। तेन किं कृतम्। परलोकतः शत्रुलोकान्नो भीतम्। तथातिबलवत्त्वादात्मीयजनोऽपि साहाय्ये नापेक्षितः। तथा मर्यादा स्वदेशसीमा लङ्घिता। तथा गोत्राः पर्वतास्तेषु स्थितिश्च मुक्ता। दुर्गं मुक्तमित्यर्थः॥

अथोक्तिश्लेषः—

यत्र विवक्षितमर्थं पुष्यन्ती लौकिकी प्रसिद्धोक्तिः।
गम्येतान्या तस्मादुक्तिश्लेषः स विज्ञेयः॥ १४ ॥

यत्रेति। यत्र तस्माद्विवक्षितार्थादन्या लोकप्रसिद्धोक्तिर्वचनं गम्यते स उक्तिश्लेषः। का तर्ह्यस्यालंक्रियेत्याह—विवक्षितमर्थं पुष्यन्ती। एतदुक्तं भवति—प्रकृतोऽर्थो रम्यो भवतु, मा वा भूत्, लौकिकी चेदुक्तिर्गम्यते तयैव तस्य पोषः क्रियत इति॥

उदाहरणमाह—

कलावतः संभृतमण्डलस्य यया हसन्त्यैव हृताशु लक्ष्मीः।
नृणामपाङ्गेन कृतश्च कामस्तस्याः करस्था ननु नालिकश्रीः॥ १५ ॥

कलावत इति। कस्याश्चिद्रूपवर्णनं क्रियते—कलावतश्चन्द्रस्य पूर्णबिम्बस्य यया हसन्त्यैवाशु शीघ्रं लक्ष्मीः शोभा हृताभिभूता। नृणां चापाङ्गेन कटाक्षेण कामः कृतः। तस्या नालिकश्रीः पद्मशोभा करस्थैव। यया मुखेनाखण्डः शशी जितस्तया हस्तशोभया पद्ममपि नूनं जीयेतेत्यर्थ इति। एषोऽत्र विवक्षितोऽर्थः। एतस्यैव परिपोषं कुर्वाणान्या लौकिकी प्रसिद्धोक्तिर्गम्यते। यथा—यया नर्तक्या कलावतो विदग्धस्य संभृतमण्डलस्य ससहायवृन्दस्य हसन्त्यैवाक्लेशेनैवाशु लक्ष्मीर्हृता धनं भक्षितम्। नृणां चापाङ्गेन हेलयैव कामः कृतः। तस्या नालिकश्रीर्मुग्धजनसंपत्करस्थितैवेति। एष एव चात्र पूर्वार्थपोषो यल्लोकप्रसिद्ध्योक्त्यवगम इति॥

अथासंभवश्लेषः—

गम्येत प्रक्रान्तादसंभवत्तद्विशेषणोऽन्योऽर्थः।
वाक्येन सुप्रसिद्धः स ज्ञेयोऽसंभवश्लेषः॥ १६ ॥

गम्येतेति। सोऽसंभवश्लेषो ज्ञेयः, यत्र वाक्येन प्रक्रान्तादर्थादन्योऽप्रस्तुतोऽर्थो

गम्यते। कीदृशः। असंभवत्तद्विशेषण इति। असंभवन्ति तस्य प्रस्तुतार्थस्य संबन्धीनि विशेषणानि यस्य स तथोक्तः। तथा सुप्रसिद्धः ख्यात इति॥

उदाहरणमाह—

परिहृतभुजंगसङ्गः समनयनो न कुरुषे वृषं चाधः।
नन्वन्य एव दृष्टस्त्वमत्र परमेश्वरो जगति॥ १७॥

परिहृतेति। अत्र प्रकृतान्नृपलक्षणादर्थादन्योऽर्थो महादेवलक्षणोऽसंभवद्विशेषणः प्रसिद्धो गम्यते। महादेवो हि विद्यमानवासुकिसङ्गस्त्रिनयनो वृषवाहनश्च। राजा तु दूरीकृतविटः समदृष्टिः पूजितधर्मश्च। अस्य चालंकारस्यान्यैर्व्यतिरेक इति नाम कृतम्। अत्र तु न व्यतिरेकरूपेण साम्यं प्रतिपिपादयिषितम्। अन्यत्वमेव विशेषणान्तरयुक्तमिति। रूपकताशङ्काप्यत्र न कार्या। साम्यस्य स्वयमेवाप्रकृतत्वादिति॥

अथावयवश्लेषः—

यत्रावयवमुखस्थितसमुदायविशेषणं प्रधानार्थम्।
पुष्यन्गम्येतान्यः सोऽयं स्यादवयवश्लेषः॥ १८॥

यत्रेति। यत्र प्रधानार्थं पुष्यन्प्रकृतार्थपोषं कुर्वाणोऽन्योऽर्थो गम्यते सोऽवयवश्लेषः। कीदृशं प्रधानार्थम्। अवयवमुखेनावयवद्वारेण स्थितानि कृतानि समुदायस्य विशेषणानि यत्र तत्तथोक्तम्॥

उदाहरणम्—

भुजयुगले बलभद्रः सकलजगल्लङ्घने तथा बलिजित्।
अक्रूरो हृदयेऽसौ राजाभूदर्जुनो यशसि॥ १९॥

भुजयुगल इति। स राजा भुजयुगले बलेन हेतुना भद्रः श्रेष्ठः। तथा सकलस्य जगतो लङ्घने आक्रमणे कर्तव्ये बलिनः शक्तानपि जयत्यभिभवतीति बलिजित्। तथा हृदये मनस्यक्रूरो मृदुः। यशसि चार्जुनः शुक्लः। अत्रैतानि विशेषणान्यवयवद्वारेण समुदायस्य स्थितानि। यस्मान्नात्र बलभद्रत्वादिकं भुजाद्वीनाम्। अपि तु राजैव यदा भुजयुगले बलेन भद्रस्तदा स एव बलभद्र इत्युच्यते। तथा सकलजगल्लङ्घने बलिजयेनाद्बलिजित्। एवं हृदयस्याक्रूरत्वात्स एवाक्रूरः। यशसोऽर्जुनत्वात्स एवार्जुन इति। एवं प्रधानार्थं पोषयन्नयमन्योऽर्थोऽवगम्यते। यथा—बलभद्रो हलधरः। बलिजिद्वासुदेवः। अक्रूरो वृष्णिविशेषः। अर्जुनः पाण्डवः। एष एव चात्र प्रधानार्थपोषो यदन्येषां यानि नामानि तान्येवास्यान्वर्थेन प्रशंसाकारीणीति॥

अथ तत्त्वश्लेषः—

यस्मिन्वाक्येन तथा प्रक्रान्तस्य प्रसाधयत्तत्त्वम्।
गम्येतान्यद्वाच्यं तत्त्वश्लेषः स विज्ञेयः॥ २०॥

यस्मिन्निति । यत्र वाक्येन पूर्ववत्प्रक्रान्तस्यार्थस्य तत्त्वं परमार्थं प्रसाधयदलंकुर्वाणमन्यद्वाच्यमर्थान्तरं गम्यते स तत्त्वश्लेषो विज्ञेयः ॥

उदाहरणमिदम्—

नयने हि तरलतारे सुतनु कपोलौ च चन्द्रकान्तौ ते ।
अधरोऽपि पद्मरागस्त्रिभुवनरत्नं ततो वदनम् ॥ २१ ॥

नयन इति । हे सुतनु, तव नयने चञ्चलकनीनिके । कपोलौ च चन्द्रवत्कान्तौ । पद्मवल्लोहित ओष्ठः । ततो वदनं मुखं त्रिभुवने रत्नं सारम् । जातौ यद्यदुत्कृष्टं तत्तद्रत्नमुच्यते । एनमर्थं प्रसाधयन्नयमन्योऽर्थो गम्यते । तव नयने तरले च तारे च । तरलो हारमध्यमणिः । तथा चन्द्रकान्तो मणिभेदः, पद्मरागश्च । यतश्चैतेऽवयवा रत्नरूपास्ततो वदनं त्रिभुवनरत्नं चिन्तामणिरेव । अस्माच्च पूर्वत्र विशेषोऽवयवमुखस्थितसमुदायविशेषणत्वमिति ॥

अथ विरोधाभासः—

स इति विरोधाभासो यस्मिन्नर्थद्वयं पृथग्भूतम् ।
अन्यद्वाक्यं गमयेदविरुद्धं सद्विरुद्धमिव ॥ २२ ॥

स इति । स इत्यनेन प्रकारेण विरोधाभासोऽलंकारः, यस्मिन्नेकमेव वाक्यमन्यदर्थद्वयं पृथग्भूतं गमयति । कीदृशमर्थद्वयम् । स्वरूपेणाविरुद्धमपि विरुद्धमिव लक्ष्यमाणम् ॥

उदाहरणमाह—

तव दक्षिणोऽपि वामो बलभद्रोऽपि प्रलम्ब एष भुजः ।
दुर्योधनोऽपि राजन्युधिष्ठिरोऽस्तीत्यहो चित्रम् ॥ २३ ॥

तवेति । हे राजन्, तव बाहुर्भक्तान्प्रत्यनुकूलत्वाद्दक्षिणोऽपि शत्रून्प्रति प्रतिकूलतया वाम इत्यविरुद्धमर्थद्वयम् । तथा स एव बलेन भद्रोऽपि श्रेष्ठोऽपि प्रलम्बो दीर्घः । तथा दुःखेन योध्यत इति दुर्योधनोऽपि युधि समरे स्थिरोऽचञ्चल इत्यविरोधः । विरोधप्रतिभासश्च दक्षिणवामयोः सव्येतररूपयोरन्यत्वात्, तथा बलभद्रप्रलम्बयोर्हलधरासुरयोरन्यत्वात्, तथा दुर्योधनयुधिष्ठिरयोर्धार्तराष्ट्रपाण्डवयोर्भिन्नत्वाल्लक्ष्यते । अथ विरोधादस्य को विशेषः । उच्यते—तत्र यादृग्विशेषणमादौ निर्दिष्टं तत्प्रत्यनीकं पुनरुच्यते । यथा संवीधितकमलोऽप्यवदलितनालिक इति । अत्र तु वाक्यान्तरार्थपर्यालोचनया विरोधच्छायास्तीति । अत्रापि भवति, यदि दुर्योधनोऽपि सुयोधन इत्युच्यते । अत एव विरोधाभाससंज्ञा ॥

एवं शुद्धानलंकारान्सप्रभेदानाख्यायाधुना पूर्वकविलक्ष्यसिद्ध्यर्थं संकीर्णांस्तानाह—

एषां तु चतुर्णामपि संकीर्णानां स्युरगणिता भेदाः ।
तन्नामानस्तेषां लक्षणमंशेषु संयोज्यम् ॥ २४ ॥

एषामिति । एषां चतुर्णां वास्तवौपम्यातिशयश्लेषाणां संकीर्णानां मिश्राणां भेदाः स्युर्भवन्ति । कियन्त इत्याह—अगणिताः । बाहुल्यपरमेतद्वचनम् । संख्या तु विद्यते । एषां त्विति तुरवधारणे । एषामेव । नान्यदलंकारजातमस्तीत्यर्थः । किं तेषां भेदानां नामेत्याह—तन्नामान इति । येषामलंकाराणां मिश्रभावस्त एव मिलितास्तेषां नामेत्यर्थः । यदि सहोक्तेः समुच्चयस्य च संकरस्तदा सहोक्तिसमुच्चय इति नाम । उत सहोक्तेर्व्यतिरेकस्य च तदा सहोक्तिव्यतिरेक इति नाम । एवमन्यत्रापि दृश्यम् । किं तेषां तर्हि लक्षणमित्याह—तेषामित्यादि । तेषां संकरभेदानां लक्षणमंशेषु भागेषु संयोज्यम् । यस्यालंकारस्य योंऽशस्तदीयमेव तत्र लक्षणमित्यर्थः ॥

अथ संकरस्यैव भेदानाह—

योगवशादेतेषां तिलतण्डुलवच्च दुग्धजलवच्च ।
व्यक्ताव्यक्तांशत्वात्संकर उत्पद्यते द्वेधा ॥ २५ ॥

योगवशादिति । एतेषां वास्तवादीनां संकरो व्यक्ताव्यक्तांशत्वाद्धेतोर्द्वेधा द्विप्रकारो भवति । व्यक्ताव्यक्तांशत्वमपि कुत इत्याह—योगवशात् । तथाविधसंबन्धवशादित्यर्थः । केषां यथा स स्यादित्याह—तिलतण्डुलवदित्यादि । तिलतण्डुलानां यथा व्यक्तांशः संकरः, दुग्धजलयोश्चाव्यक्तांशस्तद्वदेतेषामपीत्यर्थः ॥

अत्र हि दिङ्मात्रप्रदर्शनार्थमाह—

अभियुज्य लोलनयना साध्वसजनितोरुवेपथुस्वेदा ।
अबलेव वैरिसेना नृप जन्ये भज्यते भवता ॥ २६ ॥

अभियुज्येति । त्वया सेनाभियुज्याक्रम्य भज्यते भङ्गं नीयते । कीदृशी । भयवशाल्लोलनयना चञ्चलाक्षी । तथा साध्वसेन भयेन जनित उरुर्महान्वेपथुः कम्पः स्वेदश्च यस्याः । अत्राबलेव सेनेति । यथा येन केनचिद्वनिता भज्यते सेव्यते तेनाभियुज्याभिसृत्यादौ ततो भज्यते । तथा सापि प्रथमसमागमवशाच्चञ्चलनेत्रा भवति । तस्या अपि साध्वसेनोर्वोर्वेपथुस्वेदौ भवत इति । इहाबलेवेत्येष उपमाविभागः । अभियुज्येत्यादिकस्तु श्लेषविभागः । तयोर्लक्षणं स्वधिया योज्यम् । एतौ तिलतण्डुलवत्प्रकटौ ॥

तथान्यदप्यत्रैवाह—

सन्नारीभरणो भवानपि न किं किं नाधिरूढो वृषं
किं वा नो भवता निकामविषमा दग्धाः पुरो विद्विषाम् ।
इत्थं द्वौ परमेश्वराविह शिवस्त्वं चैकरूपस्थिती
तत्किं लोकविभो न जातु कुरुषे सङ्गं भुजंगैः सह ॥ २७ ॥

सन्नारीति । हे लोकविभो राजन्, इत्थमुक्तप्रकारेण त्वं हरश्च परमेश्वरौ । यस्मादेकरूपस्थिती तुल्यस्वभावव्यवहारौ । तत्कदाचिदपि भुजंगैः सह सङ्गं न कुरुषे । तदेव

तुल्यत्वं वक्ति—स हि हरः सतीं नारीमुमाख्यां बिभर्ति धारयति । भवानपि शोभना नारी बिभर्ति पोषयत्येव । अथवा सन्ना अवसादं गता अरीभा रिपुकरिणो रणे यस्य स तथाविधः । हरो वृषं जरद्गवमधिरूढः । भवानपि वृषं धर्मम् । तथा हरेण विद्विषां त्रिपुरवासिनां विषमास्तिस्रः पुरो दग्धाः । भवतात्यन्तदुर्गाः शत्रूणां पुरो दग्धाः । सर्वत्र किंशब्दः प्रश्ने । तथा तस्य परमेश्वर इति संज्ञा । त्वमपि परम उत्कृष्ट ईश्वरोऽर्थवान् । एवं यादृशो हरस्तादृशो भवानपि । तद्यथा तेन भुजंगैः सह संपर्कः कृतस्तथा त्वयापि खिन्नैः कथं न कृत इति व्यतिरेकस्य श्लेषस्य चात्र संकरः । साधारणविशेषणयोगात् (श्लेषणयोगात्) श्लेषसद्भावः । हरे उपमाने भुजंगसङ्गस्य दोषस्य सत्त्वाद्राजनि चासत्त्वाद्गुणत्वे सति व्यतिरेकसद्भावः । एतौ चात्र तिलतण्डुलवत्प्रकटौ ॥

इदानीमव्यक्तसंकरोदाहरणमाह—

आलोकनं भवत्या जननयनानन्दनेन्दुकरजालम् ।
हृदयाकर्षणपाशः स्मरतापप्रशमहिमसलिलम् ॥ २८ ॥

आलोकनमिति । भवत्या आलोकनं जननयनानन्दनेन्दुकरजालमेवेति रूपकम् । गुणानां साम्ये सत्युपमानोपमेययोरभिदेति रूपकलक्षणात् । अथवा भवत्या आलोकनं जननयनानन्दने इन्दुकरजालमिवेत्युपमा । एतौ चालंकारावव्यक्तांशौ । अत्र प्रमाणाभावादेकत्रानिश्चयः । दोषाभावाच्चोभयमप्याश्रयितुं योग्यम् । एवं हृदयाकर्षणपाश एव, पाश इव वा । स्मरतापप्रशमने हिमसलिलमेव तदिव वेति । रूपकोपमासंकरोऽयमलंकारः ॥

तथा—

आदौ चुम्बति चन्द्रबिम्बविमलां लोलः कपोलस्थलीं
संप्राप्य प्रसरं क्रमेण कुरुते पीनस्तनास्फालनम् ।
युष्मद्वैरिवधूजनस्य सततं कण्ठे लगत्युच्छस-
न्किं वा यन्न करोत्यवारितरसः कामीव बाष्पः पतन् ॥ २९ ॥

आदाविति । हे नृप, युष्मद्वैरिवधूजनस्य संबन्धी बाष्पः पतन्प्रसरन्कामीव किं वा यन्न करोति । वा इवार्थे । किमिव यन्न करोतीत्यर्थः । बाष्पस्तावत्पतन्प्रथमं कपोलस्थलीं चुम्बति । कामुकोऽपि तथैव । ततो बाष्पः प्रसरं प्राप्य क्रमेण पीनस्तनास्फालनं कुरुते । काम्यपि तदेव । ततः कण्ठे च द्वावपि लगतः । ततश्चावारितरसो बाष्पः कामीव किमिव न कुरुते । जघनस्थलमपि स्पृशतीत्यर्थः । अत्र रूपकोपमाश्लेषपर्यायाणां संकरः । तत्र कपोलस्थलीमिति रूपकम् । कामीव चन्द्रबिम्बविमलामिति चोपमा । बाष्पकामिनोः साधारणविशेषणयोगाच्छ्लेषः । शत्रवश्च त्वया जिता इति तात्पर्यतः पर्यायसद्भाव इति । अत्र चालंकारसंकरे पूर्वकविलक्ष्याणि भूरिशो दृश्यन्त इत्यत्र महानादरः कार्यः । तथा च—'दिवाकरादक्षति यो गुहासु' इत्यादि । अत्रोत्प्रे-

क्षार्थान्तरन्यासोपमानां संकरः। यथा च—'रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि। कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः॥' एतौ श्लेषव्यतिरेकौ। एवमन्यदपि बोद्धव्यमिति॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतो
दशमोऽध्यायः समाप्तः।

एकादशोऽध्यायः।

अर्थस्यालंकारा अभिहिताः। संप्रति दोषाः कथ्यन्ते। नन्वर्थालंकारप्रतिपादनात्प्रागेवार्थदोषाः परिहृता एव तत्किमिति पुनस्ते कथ्यन्त इत्याह—

परिहृत एव प्रायो दोषोऽर्थस्यान्यथोक्तिपरिहारात्।
अयमुच्यते ततोऽन्यस्तत्कारणमन्यथोक्तौ च॥ १॥

परिहृत इति। 'सर्वः स्वं स्वं रूपम्' (७। ७) इत्यादिना ग्रन्थेनार्थस्य विपरीतकथनलक्षणो यो महान्दोषः सोऽस्माभिः 'तं च न खलु बध्नीयान्निष्कारणमन्यथातिरसात्' (७। ७) इत्यनेनान्यथोक्तिपरिहारात्परिहृत एव। यस्तु ततोऽन्यथोक्तेरन्यः स्वल्पदोषः सोऽयमधुनोच्यते। तथा तस्यार्थस्यान्यथोक्तौ यत्कारणं तदप्युच्यते। परिहृतमेव सर्वं दोषजातमन्यथोक्तिपरिहारद्वारेण। किंचिदेव दुर्लक्ष्यमपरिहृतमस्तीति प्रायोग्रहणेन सूच्यते। यत्तु विद्यते तदधुना परिह्रियते॥

अथ तानेव दोषानुद्दिशति—

अपहेतुरप्रतीतो निरागमो बाध्यन्नसंबद्धः।
ग्राम्यो विरसस्तद्वानतिमात्रश्चेति दुष्टोऽर्थः॥ २॥

अपहेतुरिति। अपहेत्वादयो नवार्थदोषाः। इतिशब्दो हेत्वर्थे प्रत्येकमभिसंबध्यते। यतोऽपहेतुरतो दुष्ट इत्यर्थः। एवमन्यत्रापि योज्यम्॥

यथोद्देशस्तथा लक्षणमिति कृत्वा पूर्वमपहेतुलक्षणमाह—

अपहेतुरसौ यस्मिन्केनचिदंशेन हेतुतामर्थः।
याति तथात्वे युक्त्या बलवत्या बाध्यते परया॥ ३॥

अपहेतुरिति। असावपहेतुर्दोषः, यत्र केनचित्प्रकारेणार्थस्तथात्वे तद्धर्मतायां हेतुत्वं याति। स च हेतुतां गतः सन्नपरया बलिष्ठया युक्त्या बाध्यते। यदा चार्थहेतुत्वसद्भावस्तदान्यथोक्तिपरिहारेण न परिहृतः॥

उदाहरणम्—

तव दिग्विजयारम्भे बलधूलीबहलतोयजनितेषु।
गगनस्थलेषु भानोश्चक्रमभूद्रथभराभिज्ञम्॥ ४॥

तवेति । गतार्थमेव । अत्र धूलेर्बहलत्वलक्षणोऽर्थः स्थलत्वे हेतुतां यात्येव । किं तु स्थलस्य गगने निराधारत्वादवस्थानं न संभवतीत्यनयोत्तरकालभाविन्या बलवत्या युक्त्या बाध्यते ।।

अथाप्रतीतः—

अर्थोऽयमप्रतीतो यः सन्नपि न प्रयुज्यते वृद्धैः ।
शरदिव विभाति तन्वी विकसत्पुलकोत्करेयमिति ॥ ९ ॥

अर्थ इति । अयमप्रतीतोऽर्थो भण्यते यो विद्यमानोऽपि वृद्धैः पूर्वकविभिर्न प्रयुज्यते । उदाहरणम्—[शरदिति ।] प्रसरद्रोमाञ्चनिवहा तन्वी भाति । शरच्च पुष्पत्पुलकाख्यवृक्षविशेषनिवहा । अत्र पुलकशब्दो वृक्षविशेषवाचकोऽपि तद्वाचकत्वेन पूर्वकविभिर्न प्रयुक्त इति न प्रयोज्यः ।।

अथ निरागमः—

आगमगम्यस्तमृते य उच्यतेऽर्थो निरागमः स इति ।
सततं स राजसूयैरीजे विप्रोऽश्वमेधैश्च ॥ ६ ॥

आगमेति । योऽर्थ आगमात्सिद्धान्ताद्गम्यते, अथ चागमनिरपेक्ष एवोच्यते, स इत्यनेन प्रकारेण निरागमः । उदाहरणम्—सततमिति । अत्र विप्रस्य राजसूयाश्वमेधौ यागौ कथितौ । तौ च वेदगम्यौ । वेदे च तयोर्नृपस्यैवाधिकारो न ब्राह्मणस्येत्युक्तम् ।।

अथ बाधयन्—

यः पूर्वमन्यथोक्तं तद्वक्तृकमेव बाधयेदर्थम् ।
अर्थः स बाधयन्निति मृगाक्षि नेत्रे तवानुपमे ॥ ७ ॥

य इति । योऽर्थ उत्तरकालं भण्यमानः समानवक्तृकं पूर्वमन्यथोक्तमर्थं बाधयेत्स बाधयन्निति भण्यते । यथा—मृगाक्षि नयने तवानुपमे, अत्र येनैव वक्त्रा प्रथमं मृगाक्षीत्युक्तं तेनैव पुनस्तव नयने अनुपमे इति पूर्वस्य बाधकमुक्तम् । इदं चात्र निदर्शनम् । यथा—'वपुरनुपमं नाभेरूर्ध्वं विधाय मृगीदृशो ललितललितैरङ्गन्यासैः पुरा रभसादिव । तदनु सहसा खिन्नेनेव प्रजापतिना भृशं पृथुलपृथुला स्थूलस्थूला कृता जघनस्थली ।।' अत्र नाभेरूर्ध्वमनुपमं वपुरित्याद्युक्त्वा मृगीदृश इत्युक्तम् ।।

अथासंबद्धः—

प्रक्रान्तानुपयोगी प्राप्तो यस्तत्क्रमादसंबद्धः ।
स इति गता ते कीर्तिर्बहुफेनं जलधिमुच्छङ्क्य ॥ ८ ॥

प्रक्रान्तेति । योऽर्थः प्रक्रान्तार्थक्रमायातोऽपि प्रक्रान्तेऽर्थेऽनुपयोगी सोऽसंबद्ध इत्युच्यते । उदाहरणम्—गता ते कीर्तिरित्यादि । अत्र जलधौ संबद्धत्वात्फेनानां बहुफेनत्वं क्रमप्राप्तम् । अथ च प्रस्तुतेऽर्थेऽनुपयोगि । यदि बहुफेनत्वं जलधेर्दुस्तरत्वे

हेतुर्भवेत्तदा भवेदपारजलधिलङ्घनं कीर्तेरतिशयाय । न चैवमस्ति । तस्माद्बहुफेनमित्येतदकिंचित्करम् ॥

अथ ग्राम्यः—

ग्राम्यत्वमनौचित्यं व्यवहाराकारवेषवचनानाम् ।
देशकुलजातिविद्यावित्तवयःस्थानपात्रेषु ॥ ९ ॥

ग्राम्यत्वमिति । यद्व्यवहाराकारवेषवचनानां चतुर्णामपि प्रत्येकं देशकुलजातिविद्यावित्तवयःस्थानपात्रेष्वष्टसु विषयेष्वनौचित्यं तद्ग्राम्यत्वं दोषः । तत्र व्यवहारश्चेष्टा । आकारः स्वाभाविकं रूपम् । कृत्रिमं तु वेषः । वचनं भाषा । तथा देशो मध्यदेशादिरार्यानार्यभिन्नः । कुलं गोत्रमिक्ष्वाकादिः । देवदैत्यादिकमित्यन्ये । जातिः स्त्रीपुंसादिका । ब्राह्मणत्वादिका वा । विद्या शास्त्रज्ञता । वित्तं धनम् । वयः शैशवादिकम् । स्थानं पदमधिकारः । पात्राणि भरतोक्तान्युत्तममध्यमादीनि । तत्रार्यदेशेष्वकरुणो व्यवहारः, भयंकर आकारः, उद्धतो वेषः, पुरुषवचनमनुचितम् । म्लेच्छेषु त्वेतदेवोचितम् । तथा ग्रामेषु यदुचितं तदेव नगरेषु ग्राम्यम् । एवं कुलजेषु परिभवसहत्वादिको व्यवहारः, असौम्य आकारः, विकृतो वेषः, वितथं वचनमनुचितानि । जातौ तु ब्राह्मणादीनां निजनिजजातिविहितव्यवहाराकारवेषवचनान्युचितानि तदन्यथा त्वनुचितानि । पुरुषेषु शूद्रवर्जमन्नपाकादिको व्यवहारः, स्थूलस्तनश्मश्रुरहितं च रूपमाकारः, कौसुम्भवस्त्रं काचाद्याभरणं च वेषः, समन्मथादिवचनमनुचितम् । स्त्रीषु तदेवोचितम् । एवमन्येषामपि । तथा विद्यायां पण्डितेषु शास्त्रग्रहणपूर्वको व्यवहारः, सव्याधिवपुराकारः, उद्भटो वेषः, असंस्कृतवचनमनुचितानि । मूर्खेषु तान्येवोचितानि । वित्ते धनिनां दानोपभोगरहितो व्यवहारः, दुःस्पर्शादिराकारः, मलिनवस्त्रादिको वेषः, दीनं वचनमनुचितानि । द्रमकेषु (?) तान्येवोचितानि । वयसि वृद्धेषु सेवादिव्यवहारः, इन्द्रियपाटवादिराकारः, कुण्डलादिधारणं वेषः, समन्मथं वचनमनुचितानि । तरुणेषु तान्येवोचितानि । स्थाने राज्ञां सक्रोधलोभादिको व्यवहारः, निर्लक्षण आकारः, कुण्डलादिरहितो वेषः, परुषं दीनं वचनमनुचितानि । एवं पात्रेषु यानि भीमसेने व्यवहारादीन्युचितानि तान्येव युधिष्ठिरे ग्राम्याणीत्यादि । एतत्तु ग्राम्यत्वमन्यथोक्तिपरिहारेण न परिहृतम् ॥

अथात्रैव दिक्प्रदर्शनार्थमाह—

प्रागल्भ्यं कन्यानामव्याजो मुग्धता च वेश्यानाम् ।
वैदग्ध्यं ग्राम्याणां कुलजानां धौर्त्यमित्यादि ॥ १० ॥

प्रागल्भ्यमिति । कन्याशब्देन नवोढा लक्ष्यते । कन्यानां नवोढाङ्गनानां प्रागल्भ्यं वैयात्यम् । तथा वेश्यानां पण्यस्त्रीणामव्याजमकृत्रिमं मौग्ध्यम् । तथा ग्राम्याणां वैदग्ध्यम् । तथा कुलीनानां धूर्तत्वमनुचितम् । ग्राम्यमित्यर्थः ॥

ततश्च किमित्याह—

एतद्विज्ञाय बुधैः परिहर्तव्यं महीयसो यत्नात् ।
नहि सम्यग्विज्ञातुं शक्यमुदाहरणमात्रेण ॥ ११ ॥

एतदिति । एतद्ग्राम्यत्वं विशेषेण ज्ञात्वा महीयसो यत्नादादरेण परिहर्तव्यम् । महाकवयो यत्र मुह्यन्तीत्यतो महीयसो यत्नादित्युक्तम् । तर्ह्युदाहरणानि किमेतेषु नोच्यन्त इत्याह—नहीत्यादि । यस्मादुदाहरणमात्रेण न यथावद्विज्ञातुं शक्यते । ततः स्वधिया विज्ञाय यथा ग्राम्यत्वं न भवति तथा प्रयोज्यम् । यथा—'व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका । सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः ॥' तथा—'उपचरिताप्यतिमात्रं प्रकटवधूः क्षीणसंपदः पुंसः । पातयति दृशं व्रजतः स्पृहया परिधानमात्रेऽपि ॥' एवमादि ॥

अथ विरसः—

अन्यस्य यः प्रसङ्गे रसस्य निपतेद्रसः क्रमापेतः ।
विरसोऽसौ स च शक्यः सम्यग्ज्ञातुं प्रबन्धेभ्यः ॥ १२ ॥

अन्यस्येति । रसान्तरप्राप्तौ सत्यां यो रसः शृङ्गारादि निपतति स विरसोऽर्थदोषः । ननु सर्वरसयुक्तत्वान्महाकाव्यस्य रसान्तरापातोऽभ्युपगत एव । तत्कथमत्र विरसोऽर्थदोष इत्याह—क्रमापेतः प्रसङ्गविरुद्धः । यस्य रसस्य तत्रानवसरः स दुष्ट इत्यर्थः । किमत्रोदाहरणमित्याह—स चेत्यादि । चो हेतौ । यस्मात्स विरसोऽर्थदोषः प्रबन्धेभ्यो महाकाव्यादिभ्यः सम्यग्विज्ञातुं शक्यते । अत इह नोदाहृत इत्यर्थः ॥

सूचीमात्रमाह—

तव वनवासोऽनुचितः पितृमरणशुचं विमुञ्च किं तपसा ।
सफलय यौवनमेतत्सममनुरक्तेन सुतनु मया ॥ १३ ॥

तवेति । हयग्रीवसुतो नरकासुरानयनाय तत्पुरीं गतः, तत्र च हरिहतं नरकासुरं जनेभ्यः श्रुत्वा तत्सुतां च पितृमरणदुःखेन वनगतां बुद्ध्वा समाश्वासनाय गतः, तत्र दृष्ट्वा च तां सक्रामः सन्नाह—तव वनवास इत्यादि । पातनिकयैव गतार्थम् ॥

प्रकारान्तरमाह—

यः सावसरोऽपि रसो निरन्तरं नीयते प्रबन्धेषु ।
अतिमहतीं वृद्धिमसौ तथैव वैरस्यमायाति ॥ १४ ॥

य इति । यः काव्यादौ क्वापि प्रस्तुतो रसो नैरन्तर्येण महतीं वृद्धिं नीयते स श्रोतॄणां वैरस्यमावहतीति विरसो भवति । अत्र वेणीसंहारषष्ठोऽङ्को निदर्शनम् ॥

अथ तद्वान्—

यो यस्याव्यभिचारी सगुणादिस्तद्विशेषणं क्रियते ।
परिपूरयितुं छन्दो यत्र स तद्वानिति ज्ञेयः ॥ १५ ॥

य इति। यो गुणादिर्यस्य पदार्थस्याव्यभिचारी नित्यस्थः स गुणादिस्तस्य विशेषणतया यत्र क्रियते स दोषस्तद्वानिति ज्ञेयः। यद्यव्यभिचारी तर्हि किमर्थं क्रियत इत्याह—परिपूरयितुं छन्दः। तस्य हि छन्दःपूरणमात्रमेवार्थ इति॥

उदाहरणम्—

क्व नु यास्यन्ति वराकास्तरुकुसुमरसैकलालसा मधुपाः।
भस्मीकृतं वनं तद्दवदहनेनातितीव्रेण॥ १६॥

क्वेति। अत्र दवदहनस्यातितीव्रेणेति विशेषणं छन्दःपूरणार्थमेव। तत्राव्यभिचारादिति॥

अथातिमात्रः—

अतिदूरमतिक्रान्तो मात्रां लोकेऽतिमात्र इत्यर्थः।
तव विरहे हरिणाक्ष्याः स्रावयति जगन्ति नयनाम्बु॥ १७॥

अतिदूरमिति। योऽर्थो लोकप्रसिद्धां मात्रां परिमाणमतिदूरमत्यर्थमतिक्रान्त उल्लङ्घितः सोऽतिमात्रोऽर्थदोषः। उदाहरणम्—तवेत्याद्युत्तरार्धम्। अत्राश्रुलक्षणोऽर्थो मात्रां त्यक्तवान्। परा ह्यश्रूणां भूयस्ता यद्वस्त्रार्द्रीकरणम्। न तु प्रलयजलदवज्जगत्प्लावनम्॥

अथ यत्पूर्वमुक्तम् 'तत्कारणमन्यथोक्तौ च' (११।१) इति तदाह—

अत्यन्तमसंबद्धं परमतमभिधातुमन्यदश्लिष्टम्।
संगतमिति यद्ब्रूयात्तत्रायुक्तिर्न दोषाय॥ १८॥

अत्यन्तमिति। असंबद्धार्थता महान्दोषः। तस्यापवादोऽयम्। यत्र परकीयं मतमतिशयेनासंबद्धं प्रतिपादयितुमन्यदात्मीयमश्लिष्टमसंबद्धमर्थं वक्ता वक्ति तत्रायुक्तिरसंगतता न दोषाय। अथ कथं तेनासंबद्धेन परमतस्यासंबद्धता प्रतिपाद्यत इत्याह—संगतमिति। इतिहेतौ। यतस्तस्यासंबद्धस्याश्लिष्टमेव संगतं सदृशतया दर्शयितुम्॥

उदाहरणम्—

किमिदमसंगतमस्मिन्नादावन्यत्तथान्यदन्ते च।
यत्नेनोप्ता माषाः स्फुटमेते कोद्रवा जाताः॥ १९॥

किमिदमिति। कश्चिदसंबद्धं परवचनं क्षिप्तवाह—अस्मिन्वस्तुनि किमिदमसंगतं भवतोच्यते। कुतः। आदौ प्रारम्भेऽन्यत्तथान्ते च निर्गमे चान्यदिति। किमिवासंभवमिति तत्सदृशमाह—यथा माषा उप्ताः कोद्रवाश्चोत्पन्ना इत्यसंबद्धम्, एवं तवापि वचनमित्यर्थः॥

भूयोऽप्याह—

अभिधेयस्यातथ्यं तदनुपपन्नं निकाममुपपन्नम्।
यत्र स्युर्वक्तृणामुन्मादो मौर्ख्यमुत्कण्ठा॥ २०॥

अभिधेयस्येति। यत्र वक्तुरुन्मादो मौर्ख्यमुत्कण्ठा च दोषः स्यात्तत्रातथ्यमयथार्थतानुपपन्नापि निकाममतिशयेनोपपन्ना युक्ता। स्वस्थस्य ह्यन्यथावचनं दोषाय। उन्मत्तादीनां तु तदेव भूषायै॥

एतदुदाहरणानि यथाक्रममाह—

भुक्ता हि मया गिरयः स्नातोऽहं वह्निना पिबामि वियत्।
हरिहरहिरण्यगर्भा मत्पुत्रास्तेन नृत्यामि॥ २१॥

भुक्ता इति। इत्युन्मादे॥

किं मां ब्रवीषि मूर्ख पश्येदं शिशिरमेव ननु तिमिरम्।
सुस्वादुरयं गन्धस्तमसा त्वेनं न पश्यामि॥ २२॥

किमिति। इति मौर्ख्ये॥

हे हंस देहि कान्तां सा मे भवता हृतेति किं मिथ्या।
ननु गतिरियं तदीया वाणी सैवेयमतिमधुरा॥ २३॥

हे इति। इत्युत्कण्ठायाम्। अत्र गिरिभोजनं वह्निस्नानमाकाशपानमजादिपुत्रत्वं च, तथा तिमिरस्य शीतलत्वम्, गन्धस्य सुस्वादुत्वम्, तस्य चान्धकारेण दर्शनम्, तथा हंसेन कान्ताहरणं च सर्वमेवासंबद्धमुन्मत्तमूर्खोक्तैश्चोक्तत्वाच्चार्वेव॥

एवं सर्वार्थालंकारसाधारणान्दोषानभिधायेदानीं केवलोपमादोषानाह—

सामान्यशब्दभेदो वैषम्यमसंभवोऽप्रसिद्धिश्च।
इत्येते चत्वारो दोषा नासम्यगुपमायाः॥ २४॥

सामान्येति। औपम्यभेदस्योपमाया इत्येते सामान्यशब्दभेदादयश्चत्वारो दोषाः। ते च नासम्यक्। अपि तु स्फुटा एव। अत्र च स्वरूपोपादाने सत्यपि चत्वार इति ग्रहणाद्यन्मेधाविप्रभृतिभिरुक्तं यथा—"लिङ्गवचनभेदौ हीनताधिक्यमसंभवो विपर्ययोऽसादृश्यमिति सप्तोपमादोषाः। तत्र लिङ्गवचनभेदावन्योन्यमुपमानोपमेययोः। यथा—'भक्षिताः सक्तवो राजञ्शुद्धाः कुलवधूरिव। परमातेव निःस्नेहाः शीतलाः परकार्यवत्॥' उपमेयादुपमानस्य यत्रोनानि विशेषणानि सा हीनता। यथा—'स मारुताकम्पितपीतवासा बिभ्रत्सलीलं शशिभासि शङ्खम्। यदुप्रवीरः प्रगृहीतशार्ङ्गः सेन्द्रायुधो मेघ इवावभासे॥' एवं यत्रोपमेयादुपमानस्याधिकानि विशेषणानि तदाधिक्यम्। यथा—'स पीतवासाः प्रगृहीतशार्ङ्गो मनोन्यभीमं (?) वपुराप कृष्णः। शतह्रदेन्द्रायुधवान्निशायां संसज्यमानः शशिनेव मेघः॥' अत्रोपमाने मेघे शशियोगोऽधिकः। यत्र विनैव यथार्थमसंभवद्विशेषणमुपमानं क्रियते सोऽसंभवः। यथा—'निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः। जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात्॥' नहि वारिधाराणामयथार्थं जाज्वल्यमानत्वं रविबिम्बाद्वा वारिधारापतनं

संभवति । यत्रोपमेयाद्धीनमुत्कृष्टं वोपमानं क्रियतेऽसौ विपर्ययः । तत्र हीनं यथा—'स्फुरन्ति निखिला नीले तारका गगने निशि । भास्कराभीशुसंस्पृष्टाः कुमुदः कर्दमे यथा ॥' उत्कृष्टं यथा—'अयं पद्मासनासीनश्चक्रवाको विराजते । युगादौ भगवान्ब्रह्मा विनिर्मित्सुरिव प्रजाः ॥' यत्रोपमानोपमेययोः साम्यं नास्ति तदसादृश्यम् । यथा—'वनेऽथ तस्मिन्वनिताविहारिणः प्रभिन्नदानार्द्रकटा मतङ्गजाः । विचित्रबर्हाभरणाश्च बर्हिणो बभुर्दिवीवामलविग्रहा ग्रहाः ॥' अत्र न किंचिद्दन्तिनां मयूराणां च ग्रहैः सारूप्यमस्तीति" । तदेतन्निरस्तम् । यतश्चत्वार एवामी संग्राहका भेदाः । न त्वन्ये । तथाहि सामान्यशब्दभेदं विना लिङ्गवचनभेदमात्रं न दुष्टम् । इह हि का दुष्टता । यथा—'अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः । पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥' किं च लिङ्गवचनभेदे दोषत्वेनाश्रीयमाणे कालकारकविभक्तिभेदा नाश्रिताः । सामान्यशब्दभेदे तु तेऽपि संगृहीताः । तथा हीनताधिक्ये चोपमानोपमेयसाम्याभावाद्दोषत्वेनाश्रिते परेण । तत्र च वैषम्यमेवोभयदोषसंग्राहकमेकमुक्तमस्माभिः । तथा योऽपि हीनताधिक्यविशिष्टो विपर्यय उक्तः सोऽपि न तावन्मात्रेण दोषहेतुः । अतिप्रसङ्गात् । अपि त्वप्रसिद्धित एव । अन्यथा हि निन्दास्तुती यत्र चिकीर्षिते भवतस्तत्रापि यथाक्रमं निकृष्टस्योत्कृष्टस्य चोपमानस्य दुष्टत्वं स्यात् । यथा—'चतुरसखीजनवचनैरतिवाहितवासरा विनोदेन । निशि चण्डाल इवायं मारयति वियोगिनीश्चन्द्रः ॥' स्तुतौ यथा—'जित्वा सपत्नानुक्षायं धेन्वा सह विराजते । यथा क्षपितदैत्येन्द्रः श्रिया साकं जनार्दनः ॥' न चात्र काचिददुष्टता । यस्त्वर्थो यत्रोपमानत्वेन न प्रसिद्धः स सादृश्ये सत्यपि न कर्तव्यः । तथाहि सिंहादधिकोऽपि शरभः शौर्येणोपमानं न केनचिन्निबद्धः । असादृश्यस्य तु दोषत्वेऽप्युपमानलक्षणेनैव निरस्तत्वादिहोपादानमनर्थकम् । को हि ज्ञातोपमालक्षणः सादृश्याभावे उपमां कुर्वीत । तस्मादेतन्निरासाचत्वार एवामी दोषाः, न तु सप्तेति स्थितम् । अत एव नासम्यगित्युक्तम् ॥

इदानीमेतेषामेव दोषाणां लक्षणमाह—

सामान्यशब्दभेदः सोऽयं यत्रापरत्र शक्येत ।
योजयितुं नाभग्नं तत्सामान्याभिधायिपदम् ॥ २५ ॥

सामान्येति । सोऽयं सामान्यशब्दभेदाख्यो दोषः, यत्र तयोरुपमानोपमेययोः सामान्यवाचिपदं यावन्न भग्नं तावदपरत्रोपमाने योजयितुं वाचकीकर्तुं न शक्यते ॥

अथ सामान्याभिधायिपदभेदे हेतुमाह—

तल्लिङ्गकालकारकविभक्तिवचनान्यभावसद्भावात् ।
उभयोः समानयोरिति तस्यां भिद्येत किंचित्तु ॥ २६ ॥

तदिति । तत्सामान्याभिधायिपदं लिङ्गादीनामन्यथात्वाद्भेत्तोस्तस्यामुपमायां भिद्येत । ननु तर्हि वैषम्यमेवेदं तत्किमस्य पृथक्पाठेनेत्याह—उभयोरुपमानोपमेययोः । समानयो-

रिति। वैषम्ये पुनरुभे अप्यसमाने ते । तर्हि लिङ्गादिभेद एव स्वरूपेण किं नोक्त इत्याह—भिद्येत किंचित्तु । तुरवधारणे । तत्सामान्याभिधायिपदं लिङ्गादिभेदेऽपि किंचिदेव भिद्यते, न सर्वम् । ततो यत्रैव तस्य भेदस्तत्रैव दोषः, न सर्वत्र ॥

एतदुदाहरणानि यथाक्रममाह—

चन्द्रकलेव सुगौरो वात इव जगाम यः समुत्सृज्य ।
दहतु शिखीव स कामं जीवयसि सुधेव मामालि ॥ २७ ॥

चन्द्रकलेति । काचिद्विरहिणी सखीं ब्रूते—आलि सखि, यथा चन्द्रकला सुगौरी तथायं सुगौरः । इति लिङ्गभेदे । यथा वातो गच्छति तथा मां समुत्सृज्य यो जगाम । इति कालभेदे । भूतकालो वर्तमानेन भग्नः सन्नुपमाने योज्यते । दहतु शिखीव स काममम् । इति कारकभेदे । विधिविशिष्टो हि कर्ता कर्तृमात्रेण शिखिनोपमितोऽत्र । जीवयसि सुधेव मामालि । इति विभक्तिभेदे । मध्यमपुरुषो हि प्रथमपुरुषेण विपरिणम्योपमाने योज्यते ॥

कुवलयदलमिव दीर्घे तव नयने इत्ययं तु सुव्यक्तः ।
युक्त्या तावद्दोषो विद्वद्भिरपि प्रयुक्तश्च ॥ २८ ॥

कुवलयेति । कुवलयदलमिव दीर्घे तव नयने । इति वचनभेदे । दीर्घे इति द्विवचनान्तं ह्येकवचनान्तं कृत्वा योज्यते । नन्वेवं लिङ्गादिभेदे दोषीकृते महाकविलक्ष्यम् 'तां हंसमालाः शरदीव गङ्गाम्' इत्यादिकं कालादिभेदस्य विद्यमानत्वात्प्रायशः सर्वमेव दूष्यत इत्याह—इत्ययं त्वित्यादि । तुरवधारणे । युक्त्या तावदयं सुव्यक्त एव दोषः । ततोऽस्माभिरुक्तः । उक्तं च पूर्वमेव 'काव्यालंकारोऽयं ग्रन्थः क्रियते यथायुक्ति' (१ । २) इति । विद्वद्भिरपि प्रयुक्तश्चेत्यनेन दोषस्याप्यपरिहार्यतामाह ॥

वैषम्यमाह—

अकृतविशेषणमेकं यत्स्यादुभयोस्तदन्यवैषम्यम् ।
संभवति कल्पितायामुत्पाद्यायां च नान्यत्र ॥ २९ ॥

अकृतेति । उभयोरुपमानोपमेययोर्मध्यादेकमुपमानमुपमेयं वा निर्विशेषणं भवेत्तदस्याकृतविशेषणस्य कृतविशेषणेन सह वैषम्यम् । तच्च कल्पितायामुत्पाद्यायां चोपमायां संभवति ॥

विपरीतरते सुतनोरायस्तायां विभाति मुखमस्याः ।
श्रमवारिबिन्दुजालकलाञ्छितमिव कमलमुत्फुल्लम् ॥ ३० ॥

विपरीतरत इति । इवशब्दो भिन्नक्रमे । कमलस्योपमानस्य न किंचिदवश्यायजलकणनिकुरम्बाञ्चितत्वादिकं कृतम् । कल्पितोपमेयम् ॥

उत्पाद्यामाह—

मुक्ताफलजालचितं यदीन्दुबिम्बं भवेत्ततस्तेन ।
विपरीतरते सुतनोरुपमीयेताननं तस्याः ॥ ३१ ॥

मुक्ताफलेति । अत्रोपमानस्येन्दुबिम्बस्य मुक्ताफलजालचितमिति विशेषणं कृतम् । न तु मुखस्योपमेयस्य श्रमवारिकणचितत्वादि ॥

अथासंभवः—

उपमानं यत्र स्यादसंभवत्तद्विशेषणं नियमात् ।
संभूतमयद्यर्थं विज्ञेयोऽसंभवः स इति ॥ ३२ ॥

उपमानमिति । स इत्यनेन प्रकारेणासंभवो नाम दोषः । यत्रोपमानमसंभवत्तद्विशेषणमसंभाव्यविवक्षितधर्मकमपि नियमान्निश्चयेन संभूतं तद्विशेषणयुक्तं स्यात् । ननु तर्हि 'पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम्' इत्याद्यपि दुष्टं स्यादित्याह—अयद्यर्थम् । यद्यर्थविकलं यदि क्रियते । सयद्यर्थं तु न दोषः ॥

उदाहरणमाह—

सुतनुरियं विमलाम्बरलक्ष्योरुमृणालमूललालित्या ।
अजलप्रकृतिरदूरस्थितमित्रा गगननलिनीव ॥ ३३ ॥

सुतनुरिति । अत्र विशेषणत्रयमपि तन्वीगगननलिन्योः समानम् । परं यदि गगने नलिनी संभवेत्तदा तन्वीसदृशी भवेत् । अतो यद्यर्थं विना दुष्टता ॥

अथाप्रसिद्धिः—

उपमानतया लोके वाच्यस्य न तादृशं प्रसिद्धं यत् ।
क्रियते यत्र तदुत्कटसामान्यतयाप्रसिद्धिः सा ॥ ३४ ॥

उपमानतयेति । यत्किमपि वस्तु लोके वाच्यस्योपमेयार्थस्योपमानतया न प्रसिद्धमथ च तथा क्रियते साप्रसिद्धिर्दोषः । कदाचिद्वाच्येन सह विसदृशं स्यादथवा तादृशं तुल्यमपि यदि न प्रसिद्धं कथं क्रियत इत्याह—उत्कटसामान्यतया । अतिसादृश्यादित्यर्थः ॥

उदाहरणमाह—

पद्मासनसंनिहितो भाति ब्रह्मेव चक्रवाकोऽयम् ।
श्वपचश्यामं वन्दे हरिमिन्दुसितो बकोऽयमिति ॥ ३५ ॥

पद्मेति । इह ब्रह्मकेशवचन्द्राणां क्रमेण पद्मासनत्वेन श्यामत्वेन सितत्वेन च चक्रवाकश्वपचबकाः समाना अपि न तदुपमानत्वेन प्रसिद्धाः । यत्र तु प्रसिद्धिस्तत्र भवत्येव । यथा—'नमामि शंकरं काशसंकाशं शशिशेखरम् । नमो नुताय गीर्वाणैरलिनीलाय विष्णवे ॥' इत्यादि । ननु कथम् 'भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि । कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥' इत्यादिष्वौपम्यम् ।

अत्र ह्येकत्र विधिरपरत्र निषेधः । यथा शमीतरुमग्निर्दहत्येवं त्वां मन्युः कथं न दहतीति । सत्यम् । प्रथममौपम्ये विहिते पश्चादुपमेयप्रतिषेधे न किंचिदनुपपन्नम् । केचित्तु व्यतिरेकोऽयमित्याहुः ॥

अथ सर्वमेव शास्त्रोक्तमुपसंहरन्नाह—

शब्दार्थयोरिति निरूप्य विभक्तरूपा-
न्दोषान्गुणांश्च निपुणो विसृजन्नसारम् ।
सारं समाहितमनाः परमाददानः
कुर्वीत काव्यमविनाशि यशोऽधिगन्तुम् ॥ ३६ ॥

शब्दार्थयोरिति । इति पूर्वोक्तेन युक्तिमता प्रकारेण शब्दार्थयोर्दोषान्गुणांश्च निपुणः प्रवीणः कविर्निरूप्य पर्यालोच्य । किंभूतान् । विभक्तरूपान्विभागेन स्थितरूपान् । शब्दस्य हि वक्रोक्त्यादयः पञ्च गुणाः । दोषास्त्वसमर्थादयः षट् । अर्थस्य पुनर्गुणा वास्तवादयश्चत्वारः । दोषास्त्वपहेतुत्वादयो नव । ततश्चासारं दोषान्विसृजन्, परमुत्कृष्टं सारमलंकारानाददानो गृह्णन् । किंभूतः सन् । समाहितं सावधानं मनो यस्य स तथाविधः । अनवधाने हि महाकवीनामपि स्खलितं भवति । किमर्थं पुनरेवं कुर्वीतेत्याह—अविनाश्यविनश्वरं यशः प्राप्तुमिति । अत्र च वास्तवादीनां चतुर्णामपि ये सहोक्त्यादयः प्रभेदा उक्तास्ते बाहुल्यतो न पुनरेतावन्त एव । उक्तं च 'न हुघटु इताणअवही नयने दीसन्ति कहवि पुणरुत्ता । जेवि सनापियआणं अत्था वा सुकईवाणीए ॥' ततो यावन्तो हृदयावर्जका अर्थप्रकारास्तावन्तोऽलंकाराः । तेनेत्यादयपि सिद्धं भवति । यथा—क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः सोढा दुःसहशीतवाततपनक्लेशा न तप्तं तपः । ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं तत्तत्कर्म कृतं परानतिपरैस्तैस्तैः फलैर्वञ्चितम्' ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेत
एकादशोऽध्यायः समाप्तः ।

द्वादशोऽध्यायः ।

ननु काव्यकरणे कवेः पूर्वमेव फलमुक्तम्, श्रोतॄणां तु किं फलमित्याह—

ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे ।
लघु मृदु च नीरसेभ्यस्ते हि त्रस्यन्ति शास्त्रेभ्यः ॥ १ ॥

नन्विति । ननुशब्दः पृष्टप्रतिवचने । काव्येन हेतुना चतुर्वर्गे धर्मार्थकाममोक्षलक्षणेऽवगमोऽवबोधः क्रियते । ननु तत्र धर्मादिशास्त्राण्येव हेतुरस्ति, किं काव्येनेत्याह—लघु मृदु चेति क्रियाविशेषणम् । शीघ्रं कोमलोपायं च यथा भवतीत्यर्थः । तथापि धर्मादिसारसंग्रहशास्त्रेभ्यो लघु मृदु च भविष्यतीत्याह—सरसानां शृङ्गारादिप्रियाणाम् । ननु

धर्मादिशास्त्रेभ्यस्तेषामपि किं न भवतीत्याह—नीरसेभ्यः शास्त्रेभ्यो हिर्यस्मात्ते सरसास्त्यन्ति बिभ्यति ॥

ततः किमित्याह—

तस्मात्तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम् ।
उद्वेजनमेतेषां शास्त्रवदेवान्यथा हि स्यात् ॥ २ ॥

तस्मादिति । गतार्थम् । नन्वेवं सति सरसार्थमेव काव्यं स्यान्न तु नीरसार्थमिति नास्य सर्वजनीनत्वं स्यात् । नैष दोषः । सरसानां प्रवृत्त्युपाय एषोऽस्माभिरुक्तः, न तु नीरसप्रवृत्तिनिषेधः कृत इति । तेऽपि प्रवर्तन्त एव । अथालंकारमध्य एव रसा अपि किं नोक्ताः । उच्यते—काव्यस्य हि शब्दार्थौ शरीरम् । तस्य च वक्रोक्तिवास्तवादयः कटककुण्डलादय इव कृत्रिमा अलंकाराः । रसास्तु सौन्दर्यादय इव सहजा गुणाः इति भिन्नस्तत्प्रकरणारम्भः ॥

अथ क एते रसास्तानेवोद्दिशति—

शृङ्गारवीरकरुणा बीभत्सभयानकाद्भुता हास्यः ।
रौद्रः शान्तः प्रेयानिति मन्तव्याः रसाः सर्वे ॥ ३ ॥

शृङ्गारेति । गतार्थं न वरम् । शृङ्गारस्य प्राधान्यख्यापनार्थः प्रागुपन्यासः । इतिशब्द एवंप्रकारार्थः । एवंप्रकारा अन्येऽपि भावा रतिनिर्वेदस्तम्भादयः सर्वेऽपि रसा बोद्धव्याः । तत्र रत्यादयः स्थायिनः । निर्वेदादयो व्यभिचारिणः । स्तम्भादयः सात्त्विकाः । तद्यथा—'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्साविस्मयशमाः स्थायिभावा रसाश्रयाः ॥ निर्वेदोऽथ तथा ग्लानिः शङ्कासूयामदश्रमाः । आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ व्रीडा चपलता हर्ष आवेगो जडता तथा । गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थस्तथोग्रता । मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः । त्रयस्त्रिंशदिमे भावाः समाख्यातास्तु नामतः ॥ स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥' तत्र शृङ्गारादिषु रत्यादयो यथासंख्यं भवन्ति । निर्वेदस्तम्भादयस्तु सर्वेष्विति ॥

ननु कथं तर्हि निर्वेदादयो रसतां यान्तीत्याह—

रसनाद्रसत्वमेषां मधुरादीनामिवोक्तमाचार्यैः ।
निर्वेदादिष्वपि तन्निकाममस्तीति तेऽपि रसाः ॥ ४ ॥

रसनादिति । आचार्यैर्भरतादिभिरेषां स्थायिभावानां रसनादास्वादनाद्धेतो रसत्वमुक्तम् । केषामिव । मधुराम्लादीनामिव । मधुरादयो ह्यास्वाद्यमानाः सन्तो रसतां यान्तीति । उक्तं च—'अनेकद्रव्यसंयुक्तैर्व्यञ्जनैर्बहुभिश्चितम् । आस्वादयन्ति भुञ्जाना भक्तं भक्तभुजो यथा ॥ भावाभिनयसंबद्धान्स्थायिभावांस्तथा रसान् । आस्वादयन्ति मनसा

तस्मान्नाट्ये रसाः स्मृताः ॥' स्यादेतत् । स्थायिभावानामेव रसनं भविष्यतीत्याह—निर्वेदादिष्वपि तद्रसनं निकाममस्तीति हेतोस्तेऽपि रसा ज्ञेयाः । यस्य तु परिपोषं न गतास्तस्य भावा एव ते । अयमाशयो ग्रन्थकारस्य—यदुत नास्ति सा कापि चित्तवृत्तिर्यो परिपोषं गता न रसीभवति । भरतेन सहृदयावर्जकत्वप्राचुर्यात्संज्ञां चाश्रित्याष्टौ नव वा रसा उक्ता इति ॥

अथ शृङ्गारलक्षणम्—

व्यवहारः पुंनार्योरन्योन्यं रक्तयो रतिप्रकृतिः ।
शृङ्गारः स द्वेधा संभोगो विप्रलम्भश्च ॥ ५ ॥
संभोगः संगतयोर्वियुक्तयोर्यश्च विप्रलम्भोऽसौ ।
पुनरप्येष द्वेधा प्रच्छन्नश्च प्रकाशश्च ॥ ६ ॥

व्यवहार इति । संभोग इति । गतार्थं न वरम् । मातृसुतयोः पितृदुहित्रोर्भ्रातृभगिन्योः शृङ्गारनिवृत्त्यर्थं रक्तयोरिति पदम् । रतिः कामानुविद्धा प्रकृतिः कारणं यस्य । अथ शृङ्गारभेदव्याख्या संभोग इत्यादिका । पुनरप्येष इत्यादिना प्रभेदकथनम् ॥

शृङ्गारश्च नायकाश्रय इति तस्य गुणानाह—

रत्युपचारे चतुरस्तुङ्गकुलो रूपवानरुज्ञानी ।
अग्राम्योज्ज्वलवेषोऽनुल्बणचेष्टः स्थिरप्रकृतिः ॥ ७ ॥
सुभगः कलासु कुशलस्तरुणस्त्यागी प्रियंवदो दक्षः ।
गम्यासु च विस्रम्भी तत्र स्यान्नायकः ख्यातः ॥ ८ ॥ (युग्मम्)

रत्युपचार इति । सुभग इति । सुगमम् । एतैः षोडशाभिर्गुणैर्युतो नायकः स्त्रीणामभिगम्यत्वाच्छृङ्गाराश्रय इति ॥

अथैवंगुणस्यास्य भेदान्सलक्षणानार्याचतुष्टयेनाह—

एवं स चतुर्धा स्यादनुकूलो दक्षिणः शठो धृष्टः ।
तत्र प्रेम्णः स्थैर्यादनुकूलोऽनन्यरमणीकः ॥ ९ ॥
खण्डयति न पूर्वस्यां सद्भावं गौरवं भयं प्रेम ।
अभिजातोऽन्यमना अपि नार्यां यो दक्षिणः सोऽयम् ॥ १० ॥
वक्ति प्रियमभ्यधिकं यः कुरुते विप्रियं तथा निभृतम् ।
आचरति निरपराधवदसरलचेष्टः शठः स इति ॥ ११ ॥
कृतविप्रियोऽप्यशङ्को यः स्यान्निर्भर्त्सितोऽपि न विलक्षः ।
प्रतिपादितेऽपि दोषे वक्ति च मिथ्येत्यसौ धृष्टः ॥ १२ ॥

एवमिति । खण्डयतीति । वक्तीति । कृतेति । गतार्थम् ॥

अथ तस्य नर्मसचिवः क्रीडासहायो भवति, तस्य चाष्टौ गुणाः । तानाह—

भक्तः संवृतमन्त्रो नर्मणि निपुणः शुचिः पटुर्वाग्मी ।
चित्तज्ञः प्रतिभावांस्तस्य भवेन्नर्मसचिवस्तु ॥ १३ ॥

भक्त इति । गतार्थार्या ॥

अथ तस्यैव भेदानाह—

त्रिविधः स पीठमर्दः प्रथमोऽथ विटो विदूषकस्तदनु ।
नायकगुणयुक्तोऽथ च तदनुचरः पीठमर्दोऽत्र ॥ १४ ॥
विट एकदेशविद्यो विदूषकः क्रीडनीयकप्रायः ।
निजगुणयुक्तो मूर्खो हासकराकारवेषवचाः ॥ १५ ॥

त्रिविध इति । विट इति । गतार्थमार्याद्वयम् ॥

अथ नायिकानां स्वरूपं भेदान्प्रभेदांश्च भेदप्रभेदस्वरूपं चाह—

आत्मान्यसर्वसक्तास्तिस्रो लज्जान्विता यथोक्तगुणाः ।
सचिवगुणान्वितसख्यस्तस्य स्युर्नायिकाश्चेमाः ॥ १६ ॥
शुचिपौराचाररता चरित्रशरणार्जवक्षमायुक्ता ।
आत्मीया तु त्रेधा मुग्धा मध्या प्रगल्भा च ॥ १७ ॥
मुग्धा तत्र नवोढा नवयौवनजनितमन्मथोत्साहा ।
रतिनैपुणानभिज्ञा साध्वसपिहितानुरागा च ॥ १८ ॥
तल्पे परिवृत्यास्ते सकम्पमालिङ्गनेऽङ्गमपहरति ।
वदनं च चुम्बने सा प्रष्टा बहुशोऽस्फुटं वक्ति ॥ १९ ॥
अन्यां निषेवमाणे सा कुप्यति नायके ततस्तस्य ।
रोदिति केवलमग्रे मृदुनोपायेन तुष्यति च ॥ २० ॥
आरूढयौवनभरा मध्याविर्भूतमन्मथोत्साहा ।
उद्भिन्नप्रागल्भ्या किंचिद्धृतसुरतचातुर्या ॥ २१ ॥
व्याप्रियते सायस्ता सुरते विशतीव नायिकाङ्गेषु ।
सुरतान्ते सानन्दा निमीलिताक्षी विमुह्यति च ॥ २२ ॥
कुप्यति तत्र सदोषे वक्रोक्त्या प्रतिभिनत्ति तं धीरा ।
परुषवचोभिरधीरा मध्या सास्रैरुपालम्भैः ॥ २३ ॥

लब्धायतिः प्रगल्भा रतिकर्मणि पण्डिता विभुर्दक्षा ।
आक्रान्तनायकमना निर्व्यूढविलासविस्तारा ॥ २४ ॥
सुरते निराकुलासौ द्रवतामिव याति नायकस्याङ्गे ।
न च तत्र विवेक्तुमलं कोऽयं काहं किमेतदिति ॥ २५ ॥
तत्र कुपितापराधिनि संवृत्याकारमधिकमाद्रियते ।
कोपमपह्नुत्यास्ते धीरा हि रहस्युदासीना ॥ २६ ॥
मध्या तु साधुवचनैस्तमीदृशं प्रतिभिनत्ति सोल्लुण्ठैः ।
ताडयति मङ्क्ष्वधीरा कोपात्संतर्ज्य संतर्ज्य ॥ २७ ॥
ज्येष्ठकनिष्ठत्वेन तु पुनरपि मध्या द्विधा प्रगल्भा च ।
मुग्धा त्वनन्यभेदा काव्येषु तथा प्रसिद्धत्वात् ॥ २८ ॥
दाक्षिण्यप्रेमभ्यां व्यवहारो नायकस्य काव्येषु ।
दृष्टस्तयोरवश्यं सन्नपि न पुनर्भवो भेदः ॥ २९ ॥
परकीया तु द्वेधा कन्योढा चेति ते हि जायेते ।
गुरुमदनार्ते नायकमालोक्याकर्ण्य वा सम्यक् ॥ ३० ॥
साक्षाच्चित्रे स्वप्ने स्यादर्शनमेवमिन्द्रजाले वा ।
देशे काले भङ्ग्या साधु तदाकर्णनं च स्यात् ॥ ३१ ॥
द्रष्टुं न संमुखीनं कन्या शक्नोति नायकं हृष्टा ।
वक्तुं न च ब्रुवाणं वक्ति सखी तं सखीं चासौ ॥ ३२ ॥
पश्यत्यवीक्षमाणं सुस्निग्धस्फारलोचना सततम् ।
दूरात्पश्यति तस्मिन्नालिङ्गति बालमङ्गगतम् ॥ ३३ ॥
अनिमित्तं च हसन्ती सादरमाभाषते सखीं किमपि ।
रम्यं वा निजमङ्गं सव्यपदेशं प्रकाशयति ॥ ३४ ॥
सख्या पर्यस्तं वा रचयत्यलकावतंसरशनादि ।
चेष्टां करोति विविधामनुल्वणैरङ्गभङ्गैर्वा ॥ ३५ ॥
अन्योढापि तथैतत्सर्वं कुरुतेऽनुरागमापन्ना ।
नायकमभियुङ्क्ते सा प्रगल्भभावेन पुरतश्च ॥ ३६ ॥

उद्भूतानन्दभरा प्रस्तुतजघनस्थलार्द्रवसना च ।
निःष्पन्दतारनयना भवति तदालोकनादेव ॥ ३७ ॥
कन्या पुनरभियुङ्क्ते न स्वयमेनं गतापि दुरवस्थाम् ।
सुस्निग्धा तदवस्थां सखी तु तस्मै निवेदयति ॥ ३८ ॥
सर्वाङ्गना तु वेश्या सम्यगसौ लिप्सते धनं कामात् ।
निर्गुणगुणिनोस्तस्या न द्वेष्यो न प्रियः कश्चित् ॥ ३९ ॥
गम्यं निरूप्य सा स्फुटमनुरक्तेवाभियुज्य रञ्जयति ।
आकृष्टसकलसारं क्रमेण निष्कासयत्येनम् ॥ ४० ॥

आत्मेत्याद्यार्यापञ्चविंशतिः सुगमा न वरम् । आत्मीया परकीया वेश्या चेति मूलभेदत्रयम् । आत्मीया च, मुग्धा मध्या प्रगल्भा चेति पुनस्त्रेधा । पुनश्च मध्याप्रगल्भयोर्धीराधीरा मध्या चेति प्रत्येकं भेदत्रयम् । पुनश्च ज्येष्ठाकनिष्ठात्वेन मध्याप्रगल्भयोर्भेदद्वयम् । मुग्धा त्वेकभेदैव । काव्येषु तथा प्रसिद्धेः । अक्षतयोनित्वात्पुनर्विवाहिता पुनर्भूः । परकीया, कन्या परिणीता चेति द्विभेदा । वेश्या त्वेकरूपैवेति । तल्लक्षणं च स्वयं योजनीयमिति ॥

[ता एवाधीनपतिर्वासकसज्जाभिसारिकोत्का च ।
अभिसंधिता प्रगल्भा प्रोषितपतिखण्डिते चाष्टौ ॥
यस्याः सुरतविलासैराकृष्टमनाः पतिः स्थितः पार्श्वे ।
विविधक्रीडासक्ता साधीनपतिर्भवेत्तत्र ॥
निश्चितदयितागमना सज्जितनिजगेहदेहशयनीया ।
ज्ञेया वासकसज्जा प्रियप्रतीक्षेक्षितद्वारा ॥
अभिसारिकेति सेयं लज्जाभयलाघवाननालोच्य ।
अभिसरति प्राणेशं मदनेन मदेन चाकृष्टा ॥
नोपगतः प्राणेशो गुरुणा कार्येण विघ्नितागमनः ।
यस्याः किं तु स्यादित्याकुलचित्तेत्यसावुत्का ॥
अनुनयकोपं कृत्वा प्रसाद्यमानापि न प्रसन्नेति ।
यस्या रुषेव दयितो गच्छत्यभिसंधिता सेयम् ॥
यस्या जीवितनाथः संकेतकमात्मनैव दत्त्वापि ।
नायात्युपागतायां तस्यामिति विप्रलब्धेयम् ॥

सेयं प्रोषितनाथा यस्या दयितः प्रयाति परदेशम्।
दत्त्वावधिमागमने कालं कार्यावसानं वा ॥
कार्यान्तरकृतविघ्नो नागच्छत्येव वासकस्थायाः।
तस्मिञ्जीवितनाथो यस्याः सा खण्डिता ज्ञेया ॥
पुनरन्यास्तास्तिस्रः सन्त्युत्तममध्यमाधमा भेदात्।
इति सर्वा एवैताः शतत्रयं चतुरशीतिश्च ॥
अपराधे प्रमितं या कुप्यति मुञ्चति च कारणात्कोपम्।
स्निह्यति नितरां रमणे गुणकार्यात्सोत्तमा ज्ञेया ॥
आलोच्य दोषमल्पं कुप्यत्यधिकं प्रसीदति चिरेण।
स्निग्धापि कारणेन च महीयसा मध्यमा सेयम् ॥
स्निह्यति विनापि हेतुं कुप्यत्यपराधमन्तरेणैव।
स्वल्पादप्यपकाराद्विरज्यते साधमा प्रोक्ता ॥
संबन्धिसखिश्रोत्रियराजोत्तमवर्णनिर्वसितदाराः।
भिन्नरहस्या व्यङ्गाः प्रव्रजिताश्चेत्यगम्याः स्युः ॥

एताश्चतुर्दशार्या मूले प्रक्षिप्ताः॥]

अथ सर्वासामपि संविधानकवशाद्भेदान्तरमाह—

द्वेधाभिसारिकाखण्डितात्वयोगाद्भवन्ति तास्तासु।
स्वीया स्वाधीनपतिः प्रोषितपतिका पुनर्द्वेधा ॥ ४१ ॥

[द्वेधेति]। ताः सर्वा अभिसारिकाः खण्डिताश्च भवन्ति। अथात्मीयाभेदान्तरमाह—तासु स्वीया, स्वाधीनपतित्वप्रोषितपतिकात्वभेदतो द्वेधा ॥

अभिसारिकाया लक्षणमभिसरणक्रमं चाभिधातुमाह—

अभिसारिका तु सा या दूत्या दूतेन वा सहैका वा।
अभिसरति प्राणेशं कृतसंकेता यथास्थानम् ॥ ४२ ॥
काश्यादिरणत्कारं व्यक्तं लोके प्रयाति सर्वस्त्री।
वृष्टितमोज्योत्स्नादिच्छन्नं स्वीया परस्त्री च ॥ ४३ ॥

इत्यार्याद्वयं सुगमम् ॥

खण्डितालक्षणमाह—

यस्याः प्रेम निरन्तरमन्यासङ्गेन खण्डयेत्कान्तः।
सा खण्डितेति तस्याः कथाशरीराणि भूयांसि ॥ ४४ ॥

सुगमं न वरम् । तस्याः कथाशरीराणि भूयांसि । तेन विप्रलब्धाकलहान्तरिते अत्रान्तर्भूते । तल्लक्षणं चेदम् । यथा—'यस्या दूतीं प्रियः प्रेक्ष्य दत्त्वा संकेतमेव वा । नागतः कारणेनेह विप्रलब्धा तु सा स्मृता ॥ ईर्ष्याकलहनिष्क्रान्तो यस्या नागच्छति प्रियः । सामर्षवशसंतप्ता कलहान्तरिता मता ॥' एवंविधानि संविधानकवशाद्भूयांसि कथाशरीराणि तस्या भवन्ति । ततश्च यदुक्तं भरतेन यथा—'तत्र वासकसज्जा च विरहोत्कण्ठितापि च । स्वाधीनभर्तृका चापि कलहान्तरिता तथा ॥ खण्डिता विप्रलब्धा च तथा प्रोषितभर्तृका । तथाभिसारिका चैव इत्यष्टौ नायिकाः स्मृताः ॥' तदत्रापि संगृहीतम् ॥

स्वाधीनपतिप्रोषितपतिकयोर्लक्षणमाह—

यस्याः पतिरायत्तः क्रीडासु तया समं रतौ मुदितः ।
सा स्यात्स्वाधीनपती रतिमण्डनलालसासक्ता ॥ ४९ ॥
सा स्यात्प्रोषितपतिका यस्या देशान्तरं पतिर्यातः ।
नियतानियतावधिको यास्यति यात्येत्युपैष्यति च ॥ ४६ ॥

सुगमम् ॥

अथाध्यायमुपसंहरन्नन्यथाकरणनिषेधमाह—

इति कथितमशेषं लक्षणं नायकाना-
मनुगतसचिवानां हीनमध्योत्तमानाम् ।
अतिरसिकतयेदं नान्यथा जातु कुर्या-
त्कविरविहतचेताः साधुकाव्यं विधित्सन् ॥ ४७ ॥

प्रकटार्थमेव ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतो
द्वादशोऽध्यायः समाप्तः ।

त्रयोदशोऽध्यायः ।

संभोगः संगतयोरिति वचनात्संपर्क एव नायकयोः शृङ्गारो न त्वालोकनादीत्याशङ्क्याह—

अन्योन्यस्य सचित्तावनुभवतो नायकौ यदिष्टमुदौ ।
आलोकनवचनादि स सर्वः संभोगशृङ्गारः ॥ १ ॥

अन्योन्यस्येति । नायकौ दंपती सचित्तौ तुल्यमानसौ यदालोकनवचनोद्यानविहारपुष्पोच्चयजलक्रीडामधुपानताम्बूलसुरतादिकं परस्परसंबन्ध्यनुभवतः स सर्वः, न तु

निधुवनमात्रं संभोगशृङ्गार इति। प्रवासविप्रलम्भस्य संभोगशृङ्गारत्वनिषेधार्थमाह—इद्धमुदाविति। प्रमुदितावित्यर्थः॥

अथास्य संभोगशृङ्गारस्यानुभवमाह—

तत्र भवन्ति स्त्रीणां दाक्षिण्यस्नेहसौकुमार्याणाम्।
अविरोधिन्यश्चेष्टा देशे काले च सर्वासाम्॥ २॥

तत्रेति। सुगमं न वरम्। दाक्षिण्यमनुवृत्तिः। स्नेहः प्रेम। सौकुमार्यं मार्दवम्। देशो वनोद्यानादिः। कालो वसन्तसुरतादिः॥

दयितचेष्टानुकारो नाम लीला स्त्रीणां भवतीति दर्शयितुमाह—

दयितस्य सखीमध्ये चेष्टां मधुरैर्वचोभिरुचितैस्ताः।
ललितैरङ्गविकारैः क्रीडन्त्यो वानुकुर्वन्ति॥ ३॥

दयितस्येति। सुगमम्॥

तत्रापि तदनुकार्यं यदनुकर्तुं शक्यते, न तूल्वणमपि। तदाह—

अनुकार्यं न तु नार्या यत्प्रेरणकर्म तत्परोक्षे सा।
अनुकुर्वती विजह्यान्माधुर्यं सौकुमार्यं च॥ ४॥

अनुकार्यमिति। सुगमं न वरम्। तुरवधारणे। नैवेत्यर्थः॥

चेष्टान्तराण्याह—

अपहारे वसनानां कुचकलशादिग्रहे रतान्ते च।
अन्तर्निहितानन्दाः पुरुषेषु रुषेव वर्तन्ते॥ ५॥

अपहार इति। सुगमम्॥

समकालं निन्दन्ति त्रस्यन्ति हसन्त्यहेतु लज्जन्ति।
अस्यन्त्यालिङ्गन्ति च दयितान्भूतैरिवाविष्टाः॥ ६॥

समकालमिति। सुगमम्॥

पूर्वमुक्तम् 'ग्राम्यत्वमनौचित्यं व्यवहाराकारवेषवचनानाम्' (११।९) इति, तत्कचित्साध्वेवेति दर्शयितुमाह—

समये त्वरावतीनामपदेषु विभूषणादिविन्यासः।
भवति गुणाय विभावितातात्पर्यस्मेरितालिरपि॥ ७॥

समय इति। सुगमम्॥

अननुकूलाचरणं सर्वत्र दोषत्वेन प्रसिद्धम्, तस्य विशेषगुणत्वमाह—

कुर्वन्ति प्रतिकूलं रहसि च यद्यात्प्रियं प्रति प्रमदाः।
तत्तद्गुणाय तासां भवति मनोभूप्रसादेन॥ ८॥

कुर्वन्तीति। सुगमम्॥

नवोढानां स्वरूपमाह—

दृष्ट्वा प्रियमायान्तं तन्मनसस्तेन संवदन्त्यो वा।
मन्मथजनितस्तम्भाः प्रतिहतचेष्टाश्च जायन्ते॥ ९॥
किमपि प्रियेण पृष्टास्तस्याथ ददत्यसंस्तुतस्येव।
साध्वससादितकण्ठ्यः स्खलितपदैरुत्तरं वाक्यैः॥ १०॥
यत्किमपि रहस्यतमं कर्णे कथयेत्प्रियः सखीमध्ये।
शृण्वन्ति स्फारदृशस्तदुदितघनकण्टकस्वेदाः॥ ११॥
मदनव्याकुलमनसः सकलं तस्यार्थमनवगत्यैव।
हुंकारं तदपि मुहुः कुर्वन्त्यवधारयन्त्य इव॥ १२॥

दृष्ट्वेति। किमिति। यदिति। मदनेनेति। सुगमम्॥

नवपरिणीता वध्वो यत्नादपनीय साध्वसं साम्ना।
नीता अपि विस्रम्भं रहः सुनिर्बन्धिभी रमणैः॥ १३॥
प्रेर्य प्रेर्य सखीभिर्नीयन्ते वासवेश्म दयितस्य।
तत्संगमाभिलाषे भूयसि लज्जाहतप्रसरे॥ १४॥ (युग्मम्)

[नवेति। प्रेर्येति। सुगमम्॥]

ननु किमिति सखीभिः प्रार्थनया नीयन्ते नायकः कथं हठादेव न प्रवर्तयतीत्याह—

सुकुमाराः पुरुषाणामाराध्या योषितः सदा तल्पे।
तदनिच्छया प्रवृत्तः शृङ्गारं नाशयेन्मूर्खः॥ १५॥

सुकुमारा इति॥

तस्मात्किं कर्तव्यमित्याह—

वाग्मी सामप्रवणश्चाटुभिराराधयेन्नारीम्।
तत्कामिनां महीयो यस्माच्छृङ्गारसर्वस्वम्॥ १६॥

वाग्मीति। सुगमम्॥

अध्यायमुपसंहरन्कवेरुपदेशमाह—

सुकविभिरभियुक्तैः सम्यगालोच्य तत्त्वं
त्रिजगति जनताया यत्स्वरूपं निबद्धम्।

तदिदमिति समस्तं वीक्ष्य काव्येषु कुर्या-
त्कविरविरलकीर्तिप्राप्तये तद्वदेव ॥ १७ ॥

सुकविभिरिति। सुगमम् ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेत-
स्त्रयोदशोऽध्यायः समाप्तः।

चतुर्दशोऽध्यायः।

अथ संभोगं व्याख्याय विप्रलम्भशृङ्गारं व्याचिख्यासुराह—

अथ विप्रलम्भनामा शृङ्गारोऽयं चतुर्विधो भवति।
प्रथमानुरागमानप्रवासकरुणात्मकत्वेन ॥ १ ॥

अथेति। अथशब्द आनन्तर्ये। संभोगानन्तरम्। विप्रलम्भोऽयं शृङ्गारश्चतुर्विधो भवति। कथं चतुर्विध इत्याह—प्रथमानुरागादय आत्मा स्वरूपं यस्य तद्भावस्तत्त्वं तेन हेतुना। प्रकारनिर्देशादेव चातुर्विध्ये लब्धे चतुर्विधग्रहणं चतुर्विधस्याप्यस्य शृङ्गारत्वनियमार्थम्। चतुर्विधोऽपि शृङ्गार एवायम्। केचिद्धि करुणरस एव विप्रलम्भभेदं करुणमन्तर्भावयन्ति। तदसत्। वैलक्षण्यात्। शुद्धे हि करुणे शृङ्गारस्पर्श एव न विद्यते। करुणविप्रलम्भस्तु शृङ्गार एव। यथा कालिदासस्य—'प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः। रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम् ॥'

अथैषामेव यथाक्रमं लक्षणमाह—

आलोकनादिमात्रप्ररूढगुरुरागयोरसंप्राप्तौ।
नायकयोर्या चेष्टा स प्रथमो विप्रलम्भ इति ॥ २ ॥

आलोकनेति। सुगमम् ॥

ता एव काश्चिच्चेष्टा आह—

हिमसलिलचन्द्रचन्दनमृणालकदलीदलादि तत्रैतौ।
दुर्वारस्मरतापौ सेवेते निन्दतः क्षिपतः ॥ ३ ॥

हिमेति। सुगमम् ॥

अथास्य सूचकानवस्थाभेदानाह—

आदावभिलाषः स्याच्चिन्ता तदनन्तरं ततः स्मरणम्।
तदनु च गुणसंकीर्तनमुद्वेगोऽथ प्रलापश्च ॥ ४ ॥
उन्मादस्तदनु ततो व्याधिर्जडता ततस्ततो मरणम्।
इत्थमसंयुक्तानां रक्तानां दश दशा ज्ञेयाः ॥ ५ ॥ (युग्मम्)

आदाविति। उन्माद इति। सुगमम्। एताश्च दशाः कादम्बरीकथायां प्रकटाः।

मरणं तु केचिन्नेच्छन्ति दशाम् । मृतस्य हि कीदृशः शृङ्गारः । यैरुक्तं ते तु मन्यन्ते । नवमीं दशां प्राप्तस्य निरुद्यमस्य मरणमेव दशमी दशा स्यात् । ततस्तामप्राप्तेन नायकेन तन्निषेधार्थं यतितव्यमिति दर्शनार्थं दशमी दशोक्ता ॥

अथ कस्तत्र प्रयत्न इति प्रयत्नक्रममाह—

अथ नायकोऽनुरक्तस्तस्यामर्जयति परिजनं तस्याः ।
उद्दिश्य हेतुमन्यं साम्ना दानेन मानेन ॥ ६ ॥
तस्य पुरतोऽथ कुर्वन्गृहीतवाक्यस्य नायिकाविषयाम् ।
चिरमनुरागेण कथां स्वयमनुरागं प्रकाशयति ॥ ७ ॥
तदभावे प्रव्रजिता मालाकारादि योषितो वापि ।
उभयप्रत्ययितगिरः कर्मणि सम्यङ्नियुङ्क्ते च ॥ ८ ॥
तद्व्यापारेण निवेदितनिजभावो विदितनायिकाचित्तः ।
त्वरयति तामुपचारैः स्वावस्थासूचकैर्लेखैः ॥ ९ ॥
सिद्धां च तां विविक्ते दृष्ट्वाथ कलाभिरिन्द्रजालैर्वा ।
योगैरसकृत्क्रमशो विस्मापयति प्रसङ्गेषु ॥ १० ॥

गतार्थम् ॥

यदा तु सा कन्या नानेन क्रमेण प्राप्यते तदा किमित्याह—

मन्येत यदा नेयं कथमपि लभ्येत नायिका नाथात् ।
क्षीणसमस्तोपायः कन्यां स तदेति साधयति ॥ ११ ॥

मन्येतेति । सुगमं न वरम् । नाथाज्जनकादिकात् ॥

ननु कन्यायाः स्वीकारक्रमोपदेशो न दुष्टः परदाराणां तु विरुद्ध एव महापापत्वादित्यत आह—

नहि कविना परदारा एष्टव्या नापि चोपदेष्टव्याः ।
कर्तव्यतयान्येषां न च तदुपायोऽभिधातव्यः ॥ १२ ॥
किं तु तदीयं वृत्तं काव्याङ्गतया स केवलं वक्ति ।
आराधयितुं विदुषस्तेन न दोषः कवेरत्र ॥ १३ ॥ (युग्मम्)

नेति । किमिति । सुगमम् ॥

ननु पारदारिकवृत्ताख्यानमपि न युक्तमित्याह—

सर्वत एवात्मानं गोपायेदिति सुदारुणावस्थः ।
आत्मानं रक्षिष्यन्प्रवर्तते नायकोऽप्यत्र ॥ १४ ॥

सर्वत इति। यत्र शास्त्रे भणितं परदारा न गन्तव्यास्तत्रैवोक्तं सर्वत एवात्मानं गोपायेदित्यस्माद्वचनान्नायकोऽप्यात्मरक्षार्थमत्र परदारेषु प्रवर्तत इति॥

प्रथमानुराग उक्तः। अथ मानमाह—

मानः स नायके यं विकारमायाति नायिका सेर्ष्या।
उद्दिश्य नायिकान्तरसंबन्धसमुद्भवं दोषम्॥ १५॥

मान इति सुगमम्॥

दोषस्यैव सारेतरविभागानाह—

गमनं ज्यायान्दोषः प्रतियोषिति मध्यमस्तथालापः।
आलोकनं कनीयान्मध्यो ज्यायान्स्वयं दृष्टः॥ १६॥

गमनमिति। सुगमम्॥

दोषस्यैव लिङ्गान्याह—

वसनादि नायकस्थं तदीयमार्द्रक्षतं च तस्याङ्गम्।
दोषस्य तथा गमकं गोत्रस्खलनं सखीवचनम्॥ १७॥

वसनादीति। सुगमम्॥

अथासौ दोषो ज्ञातस्तस्याः किं कुरुत इत्याह—

देशं कालं पात्रं प्रसङ्गमवगमकमेत्य सविशिष्टम्।
जनयति कोपमसाध्यं सुखसाध्यं दुःखसाध्यं वा॥ १८॥

देशमिति। सुगमं न वरम्। यदि ज्यायांसो देशकालपात्रप्रसङ्गा भवन्त्यसाध्यस्तदा कोपः स्यात्। अथ मध्यास्तदा कृच्छ्रसाध्यः। अथ कनीयांसस्तदा सुखसाध्य इति॥

अथ क एते देशादयो ज्यायांस इत्याह—

ज्वलदुज्ज्वलप्रदीपं कुसुमोत्करधूपसुरभि वासगृहम्।
सौधतलं च सचन्द्रिकमुद्यानं सुरभिकुसुमभरम्॥ १९॥
इति देशा ज्यायांसो मधुरजनी स्मरमहोदयः कालः।
पात्रं तु नायकौ तौ ज्यायो मध्याधमावुक्तौ॥ २०॥ (युग्मम्)

ज्वलदिति। इतीति। सुगमं न वरम्। ताविति पूर्वोक्तनायकौ। तत्रानुकूलदक्षिणादिश्चतुर्धा नायकः। आत्मान्यसर्वसक्ताश्च नायिकाः। तत्रानुकूलेन दक्षिणेन च नायकेन ज्यायस्या नायिकाया दोषः कृतोऽसाध्यः। शठेन धृष्टेन च ज्यायस्याः कृच्छ्रसाध्यः। शठेन च ज्यायस्याः सुखसाध्य इत्यादि चिन्त्यम्॥

प्रसङ्गं ज्यायांसमाह—

सकलसखीपरिवृतता रत्यभिमुखता च तत्प्रशंसा च।
जायेत नायिकायां यत्र ज्यायान्प्रसङ्गोऽसौ॥ २१॥

सकलेति । सुगमम् । मध्याधमौ तु प्रसङ्गौ स्वयमुन्नेयौ ॥

तत्र प्रत्यक्षदोषदर्शने परिहारो नास्ति लिङ्गगम्ये त्वस्तीत्याह—

परिहारो वसनादावन्यस्मादागमोऽन्यदिदमिति वा ।
परिहर्तुं कृतमस्मिन्न लक्ष्यते नायिकां रमयेत् ॥ २२ ॥
तदनु त्वत्कृतमिदमिति परिहारः पूर्वमेव वा सुरतम् ।
शब्दान्तरनिष्पत्तिर्गोत्रस्खलने तु केलिर्वा ॥ २३ ॥
अभियोज्यायां मयि वा कुपितेयमनेन हेतुना तेन ।
वक्ति सखी ते मिथ्या किलेति तद्वचसि परिहारः ॥ २४ ॥

परिहार इति । तदन्विति । अभियोज्यायामिति । सुगमम् ॥

अथ यतः कोपान्नायकाय कुरुते (?) तदाह—

ज्यायोभिः सह दोषो ज्यायाञ्जनयत्यसाध्यमतिकोपम् ।
तस्मान्म्रियते सद्यो मनस्विनी त्यजति वा पुरुषम् ॥ २५ ॥

ज्यायोभिरिति । सुगमम् ॥

अथास्याः कोपस्य साध्यासाध्यविभागः कथं ज्ञेय इत्याह—

दोषस्य सहायानामालोच्य बलाबलं समेतानाम् ।
बुध्येत कोपमस्याः सुखसाध्यं कृच्छ्रसाध्यं वा ॥ २६ ॥

दोषस्येति । सुगमम् ॥

अथ जाते कोपे उपायाः प्रयोक्तव्याः, क्व वा के प्रयोक्तव्याः, कथं वा प्रयोक्तव्या इत्येतदाह—

साम प्रदानभेदौ प्रणतिरुपेक्षा प्रसङ्गविभ्रंशः ।
अत्रैते षडुपाया दण्डस्त्विह हन्ति शृङ्गारम् ॥ २७ ॥
दासोऽस्मि पालनीयस्तवैव धीरा बहुक्षमा त्वं च ।
अहमेव दुर्जनोऽस्मिन्नित्यादि स्तुतिवचः साम ॥ २८ ॥
कालेऽलंकारादीन्दद्यादुद्दिश्य कारणं त्वन्यत् ।
बन्धुमहादिकमिति यत्तद्दानं साधु लुब्धासु ॥ २९ ॥
तस्या गृहीतवाक्यं परिजनमाराध्य दानसंमानैः ।
तेन सदोषः कोपे तां बोधयतीत्ययं भेदः ॥ ३० ॥
दैन्येन पादपतनं प्रणतिरुपेक्षावधीरणं तस्याः ।
सहसात्युत्सवयोगो भ्रंशः कोपप्रसङ्गस्य ॥ ३१ ॥

मृदुरत्र यथा पूर्वं सर्वेषु यथोत्तरं तथा बलवत् ।
साध्येत यो न मृदुना बलवांस्तत्र प्रयोक्तव्यः ॥ ३२ ॥

सुगमम् ॥

अथ प्रवासमाह—

यास्यति याति गतो यत्परदेशं नायकः प्रवासोऽसौ ।
एष्यत्येत्यायातो यथर्त्ववस्थोऽन्यथा च गृहान् ॥ ३३ ॥

यास्यतीति । सुगमं न वरम् । यथर्त्ववस्थ इति ऋत्वनतिक्रमेणावस्था दशा प्रत्यावृत्तिव्यवस्था वा यस्य स तथाभूतः । अन्यथा चेति ऋतुविवक्षामन्तरेणेत्यर्थः ॥

अथ करुणमाह—

करुणः स विप्रलम्भो यत्रान्यतरो म्रियेत नायकयोः ।
यदि वा मृतकल्पः स्यात्तत्रान्यस्तद्गतं प्रलपेत् ॥ ३४ ॥

करुण इति । सुगमं न वरम् । नायको म्रियते नायिका वा, तथा नायको मृतकल्पो नायिका वा भवतीति चत्वारः प्रकाराः ॥

अथ यस्तत्रैको जीवति तस्य सदृशचेष्टो जनो भवतीत्याह—

सर्वेष्वेषु जनः स्यात्स्वस्तावयवो विचेतनो ग्लानः ।
अच्छिन्ननयनसलिलः सततं दीर्घोष्णनिःश्वासः ॥ ३५ ॥

सर्वेष्विति । सुगमं न वरम् । सर्वेष्विति चतुर्ष्वपि करुणप्रकारेष्विति रसोत्पत्तिश्च विभागभावानुभावसंयोगाद्भवति । तत्र शृङ्गारे विभागः संभोगविप्रलम्भादिकः । भावस्तु स्थायी रतिः । इतरस्तु निर्वेदादिः । अनुभावस्तु 'तत्र भवन्ति स्त्रीणाम्' (१३।२) इत्यादिनोक्तः । एवं वीरादिष्वपि योज्यम् ॥

अन्योन्यानुरक्तपुंनार्योः शृङ्गारोऽन्यथात्वे तु शृङ्गाराभास इत्याह—

शृङ्गाराभासः स तु यत्र विरक्तेऽपि जायते रक्तः ।
एकस्मिन्नपरोऽसौ नाभाष्येषु प्रयोक्तव्यः ॥ ३६ ॥

शृङ्गाराभास इति । सुगमं न वरम् । आभाष्येषूत्तमेष्वसौ न प्रयोक्तव्यः ॥

अथात्र रीतीनामनुप्रासवृत्तीनां चावसरे विषयविभागमाह—

इह वैदर्भी रीतिः पाञ्चाली वा विचार्य रचनीया ।
मधुराललिते कविना कार्ये वृत्ती तु शृङ्गारे ॥ ३७ ॥

इहेति । सुगमम् ॥

अथाध्यायमुपसंहरन्सर्वरसेभ्यः शृङ्गारस्य प्राधान्यं प्रचिकटयिषुराह—

अनुसरति रसानां रस्यतामस्य नान्यः
सकलमिदमनेन व्याप्तमाबालवृद्धम् ।

तदिति विरचनीयः सम्यगेष प्रयत्ना-
द्भवति विरसमेवानेन हीनं हि काव्यम् ॥ ३८ ॥

अनुसरतीति। सुगमम् ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेत-
श्चतुर्दशोऽध्यायः समाप्तः।

पञ्चदशोऽध्यायः।

शृङ्गारं व्याख्यायाधुना वीरादीनां विभागभावानुभावलक्षणं कारणत्रयं तथा नायका-नायकगुणांश्च प्रत्येकं क्रमेणाह—

उत्साहात्मा वीरः स त्रेधा युद्धधर्मदानेषु।
विषयेषु भवति तस्मिन्नक्षोभो नायकः ख्यातः ॥ १ ॥
नयविनयबलपराक्रमगाम्भीर्यौदार्यशौर्यशौटीर्यैः।
युक्तोऽनुरक्तलोको निर्व्यूढभरो महारम्भः ॥ २ ॥

उत्साहात्मेति। नयेति। गतार्थे न वरम्। उत्साहः स्थायी भावः। धर्मदानयुद्धलक्षणं च विषयत्रयं विभागः। नायकगुणा एवानुभावः। तेजो रणे च सामर्थ्यं बलम्। रिपूणां बलादाक्रमणं पराक्रमः। गाम्भीर्यमलब्धमध्यता। 'दानमभ्युपपत्तिश्च तथा च प्रियभाषणम्। स्वजनेऽथ परे वापि तदौदार्यं प्रचक्षते ॥' समरैकत्वं शौर्यम्। सत्यपि त्यागकारणे योग्यकार्यस्यात्यागः शौटीर्यम्। धैर्यमित्यर्थः ॥

अथ करुणः—

करुणः शोकप्रकृतिः शोकश्च भवेद्विपत्तितः प्राप्तेः।
इष्टस्यानिष्टस्य च विधिविहतो नायकस्तत्र ॥ ३ ॥
अच्छिन्ननयनसलिलप्रलापवैवर्ण्यमोहनिर्वेदाः।
क्षितिचेष्टनपरिदेवनविधिनिन्दाश्चेति करुणे स्युः ॥ ४ ॥

करुण इति। अच्छिन्नेति। सुगमं न वरम्। शोकः स्थायिभावः। इष्टानिष्टविपत्तिप्राप्ती विभागः। अच्छिन्ननयनाश्रुप्रभृतिरनुभावः ॥

अथ बीभत्सः—

भवति जुगुप्साप्रकृतिर्बीभत्सः सा तु दर्शनाच्छ्रवणात्।
संकीर्तनात्तथेन्द्रियविषयाणामत्यहृद्यानाम् ॥ ५ ॥
ह्रल्लेखननिष्ठीवनमुखकूणनसर्वगात्रसंहाराः।
उद्वेगः सन्त्यस्मिन्गाम्भीर्यान्नोत्तमानां तु ॥ ६ ॥

भवतीति। हृदिति। सुगमं न वरम्। जुगुप्सा स्थायिभावः। विभागस्त्वहृद्यदर्शनादिः। अनुभावो हृल्लेखनादिः। हृल्लेखनं हृदयकम्पः॥

अथ भयानकः—

संभवति भयप्रकृतिर्भयानको भयमतीव घोरेभ्यः।
शब्दादिभ्यस्तस्य च नीचस्त्रीबालनायकता॥ ७॥
दिक्प्रेक्षणमुखशोषणवैवर्ण्यस्वेदगद्गदत्रासाः।
करचरणकम्पसंभ्रममोहाश्च भयानके सन्ति॥ ८॥

संभवतीति। दिगिति। सुगमं न वरम्। भयं स्थायिभावः। घोरशब्दादिर्विभागः। दिक्प्रेक्षणादिरनुभावः॥

अथाद्भुतः—

स्यादेष विस्मयात्मा रसोऽद्भुतो विस्मयोऽप्यसंभाव्यात्।
स्वयमनुभूतादर्थादनुभूयान्येन वा कथितात्॥ ९॥
नयनविकासो बाष्पः पुलकः स्वेदोऽनिमेषनयनत्वम्।
संभ्रमगद्गदवाणीसाधुवचांस्युत्तमे सन्ति॥ १०॥

स्यादिति। नयनेति। सुगमं न वरम्। विस्मयः स्थायिभावः। विभागश्चासंभवि। अनुभावो नयनविकासादिः॥

अथ हास्यः—

हास्यो हासप्रकृतिर्हासो विकृताङ्गवेषचेष्टाभ्यः।
भवति परस्थाभ्यः स च भूम्ना स्त्रीनीचबालगतः॥ ११॥
नयनकपोलविकासी किंचिल्लक्ष्यद्विजोऽप्यसौ महताम्।
मध्यानां विकृतास्यः सशब्दबाष्पश्च नीचानाम्॥ १२॥

हास्य इति। नयनेति। सुगमं न वरम्। हास्यः स्थायिभावः। विभावस्तु विकृताङ्गवेषादिः। अनुभावो नयनकपोलविकासादिः॥

अथ रौद्रः—

रौद्रः क्रोधप्रकृतिः क्रोधोऽरिकृतात्पराभवाद्भवति।
तत्र सुदारुणचेष्टः सामर्षो नायकोऽत्युग्रः॥ १३॥
तत्र निजांसस्फालनविषमभ्रुकुटीक्षणायुधोत्क्षेपाः।
सन्ति स्वशक्तिशंसाप्रतिपक्षाक्षेपदलनानि॥ १४॥

रौद्र इति। तत्रेति। सुगमं न वरम्। क्रोधः स्थायिभावः। विभावो रिपुकृतपराभवादिः। अनुभावो निजांसास्फालनादिः॥

अथ शान्तः—

सम्यग्ज्ञानप्रकृतिः शान्तो विगतेच्छनायको भवति ।
सम्यग्ज्ञानं विषये तमसो रागस्य चापगमात् ॥ १५ ॥
जन्मजरामरणादित्रासो वैरस्यवासना विषये ।
सुखदुःखयोरनिच्छाद्वेषाविति तत्र जायन्ते ॥ १६ ॥

सम्यगिति । जन्मेति । सुगमं न वरम् । सम्यग्ज्ञानं स्थायिभावः । विभावस्तु शब्दादिविषयस्वरूपम् । अनुभावो जन्मादित्रासादयः । कैश्चिच्छान्तस्य रसत्वं नेष्टम् । तदयुक्तम् । भावादिकारणानामत्रापि विद्यमानत्वात् । एवं प्रेयोरसेऽपि द्रष्टव्यमिति ॥

अथ प्रेयान्—

स्नेहप्रकृतिः प्रेयान्संगतशीलार्यनायको भवति ।
स्नेहस्तु साहचर्यात्प्रकृतेरुपचारसंबन्धात् ॥ १७ ॥
निर्व्याजमनोवृत्तिः सनर्मसद्भावपेशलालापाः ।
अन्योन्यं प्रति सुहृदोर्व्यवहारोऽयं मतस्तत्र ॥ १८ ॥
प्रस्यन्दिप्रमदाश्रुः सुस्निग्धस्फारलोचनालोकः ।
आर्द्रान्तःकरणतया स्नेहपदे भवति सर्वत्र ॥ १९ ॥

सुगमं न वरम् । स्नेहः स्थायिभावः । विभावः साहचर्यादिः । अनुभावः प्रस्यन्दिप्रमदाश्रुप्रभृतिः ॥

अथ वीरादिषु रीतिनियममाह—

वैदर्भीपाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः ।
लाटीयागौडीये रौद्रे कुर्याद्यथौचित्यम् ॥ २० ॥

वैदर्भीति । प्रेयःकरुणभयानकाद्भुतेषु चतुर्षु रसेषु वैदर्भी पाञ्चाली चेति रीतिद्वयं कुर्यात् । तथा रौद्रे रसे लाटीया गौडीया च कर्तव्या । शेषरसेषु न रीतिनियमः । सर्वा अपि कथं कार्या इत्याह—यथौचित्यमिति । औचित्यं रसस्वरूपपरिपोषः । तदनतिक्रमेणेत्यर्थः । रसानामलंकाराणां च लक्षणस्य मात्रयापि न्यूनत्वे तदाभासता बोद्धव्या ॥

अध्यायमुपसंहरंस्तद्रचनाक्रममाह—

एते रसा रसवतो रमयन्ति पुंसः
सम्यग्विभज्य रचिताश्चतुरेण चारु ।
यस्मादिमाननधिगम्य न सर्वरम्यं
काव्यं विधातुमलमत्र तदाद्रियेत ॥ २१ ॥

एत इति। एते रसाः सम्यग्विभज्य चतुरेण कविना चारु यथा भवति तथा रचिताः सन्तो रसिकान्पुंसो रमयन्ति यस्मात्। तथेमाननधिगम्याविज्ञाय सर्वथा रम्यं काव्यं विधातुं कविर्नालं न समर्थः। तत्तस्मादत्रैतेष्वाद्रियेतादरं कुर्यात्॥

इतिश्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः
पञ्चदशोऽध्यायः समाप्तः।

षोडशोऽध्यायः।

'ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे' (१२।१) इत्युक्तम्, तत्र कश्चतुर्वर्गः कथं च तं रसैः सह निबध्नीयादित्याह—

जगति चतुर्वर्ग इति ख्यातिर्धर्मार्थकाममोक्षाणाम्।
सम्यक्तानभिद्ध्याद्रससंमिश्रान्प्रबन्धेषु॥ १॥

जगतीति। सुगमम्॥

प्रबन्धेष्वित्युक्तम्, अथ के ते प्रबन्धाः कियन्तो वेत्येतन्मुखेन महाकाव्यादिलक्षणं वक्तुमाह—

सन्ति द्विधा प्रबन्धाः काव्यकथाख्यायिकादयः काव्ये।
उत्पाद्यानुत्पाद्या महल्लघुत्वेन भूयोऽपि॥ २॥

सन्तीति। द्विधा प्रबन्धाः सन्ति। प्रबध्यते नायकचरितमेतेष्विति कृत्वा। के च ते। काव्यकथाख्यायिकादय इति। आदिग्रहणं कुलकनाटकाद्यर्थं। क्व ते प्रबन्धाः। काव्ये कविकर्मणि। कथम्। द्विधा। उत्पाद्यानुत्पाद्यभेदात्। तथा महल्लघुत्वेन भूयोऽपि पुनरपि। उत्पाद्या महान्तो लघवश्चानुत्पाद्या महान्तो लघवश्चेत्यर्थः॥

अथोत्पाद्यलक्षणमाह—

तत्रोत्पाद्या येषां शरीरमुत्पादयेत्कविः सकलम्।
कल्पितयुक्तोत्पत्तिं नायकमपि कुत्रचित्कुर्यात्॥ ३॥

तत्रेति। तत्र काव्यादिषु मध्ये उत्पाद्यास्ते येषां शरीरमितिवृत्तं सकलं कविरुत्पादयेत्। नायकं प्रसिद्धं गृहीत्वा तद्व्यवहारः सर्वं एवापूर्वो यत्र निबध्यत इत्यर्थः। यथा माघकाव्ये। प्रकारान्तरमाह—कल्पिता युक्ता घटमानोत्पत्तिर्यस्य तमित्थंभूतं नायकमपि कुत्रचित्कुर्यात्, आस्तामिति वृत्तम्। अत्र च तिलकमञ्जरी बाणकथा वा निदर्शनम्॥

अथानुत्पाद्यलक्षणमाह—

पञ्जरमितिहासादिप्रसिद्धमखिलं तदेकदेशं वा।
परिपूरयेत्स्ववाचा यत्र कविस्ते त्वनुत्पाद्याः॥ ४॥

---

१. तिलकमञ्जरीकथा धनपालकविप्रणीता, बाणकथा तु कादम्बरी सुप्रसिद्धैव.

पञ्जरमिति । तेषु काव्यादिमध्ये तेऽनुत्पाद्याः, येषां पञ्जरं कथाशरीरमखिलं सर्वमितिहासादिप्रसिद्धं रामायणादिकथाप्रसिद्धं कविः स्ववाचा परिपूरयेत् । वदेदित्यर्थः । यथार्जुनचरिते । अथवा तदेकदेशं वा, इतिहासावेकदेशं वा स्ववाचा यत्र पूरयेत्तदप्यनुत्पाद्यम् । यथा किरातार्जुनीयं काव्यम् ॥

अथ महान्तः—

तत्र महान्तो येषु च विततेष्वभिधीयते चतुर्वर्गः ।
सर्वे रसाः क्रियन्ते काव्यस्थानानि सर्वाणि ॥ ५ ॥

तत्रेति । सुगमं न वरम् । काव्यस्थानानि पुष्पोच्चयजलक्रीडादीनि भण्यन्ते ॥

अथ लघवः—

ते लघवो विज्ञेया येष्वन्यतमो भवेच्चतुर्वर्गात् ।
असमग्रानेकरसा ये च समग्रैकरसयुक्ताः ॥ ६ ॥

त इति । सुगमं न वरम् । ते मेघदूतादयो लघवः । महान्तस्तु शिशुपालवधादयः ॥

अथानुत्पाद्येषु पुराणादिक्रमेणैवेतिवृत्तनिबन्धः, केवलं तत्र कविः स्ववाचा चतुर्वर्गरसकाव्यस्थानवर्णनं नमस्कारपूर्वकं करोतीति न तद्विषयनिबन्धोपदेशो जायते । ये पुनरुत्पाद्यास्तत्र कथं निबन्ध इत्यनुपदिष्टं न ज्ञायत इति तन्निबन्धक्रमोपदेशमाह—

तत्रोत्पाद्ये पूर्वं सन्नगरीवर्णनं महाकाव्ये ।
कुर्वीत तदनु तस्यां नायकवंशप्रशंसां च ॥ ७ ॥
तत्र त्रिवर्गसक्तं समिद्धशक्तित्रयं च सर्वगुणम् ।
रक्तसमस्तप्रकृतिं विजिगीषुं नायकं न्यस्येत् ॥ ८ ॥
विधिवत्परिपालयतः सकलं राज्यं च राजवृत्तं च ।
तस्य कदाचिदुपेतं शरदादिं वर्णयेत्समयम् ॥ ९ ॥
स्वार्थं मित्रार्थं वा धर्मादिं साधयिष्यतस्तस्य ।
कुल्यादिष्वन्यतमं प्रतिपक्षं वर्णयेद्गुणिनम् ॥ १० ॥
स्वचरात्तद्भूताद्वा कुतोऽपि वा शृण्वतोऽरिकार्याणि ।
कुर्वीत सदसि राज्ञां क्षोभं क्रोधेद्धचित्तगिराम् ॥ ११ ॥
संमन्त्र्य समं सचिवैर्निश्चित्य च दण्डसाध्यतां शत्रोः ।
तं दापयेत्प्रयाणं दूतं वा प्रेषयेन्मुखरम् ॥ १२ ॥

१. अर्जुनचरितमानन्दवर्धनाचार्यकृतं प्राकृतकाव्यम्.

अथ नायकप्रयाणे नागरिकाक्षोभजनपदाद्रिनदीः।
अटवीकाननसरसीमरुजलधिद्वीपभुवनानि ॥ १३ ॥
स्कन्धावारनिवेशं क्रीडां यूनां यथायथं तेषु।
रव्यस्तमयं संध्यां संतमसमथोदयं शशिनः ॥ १४ ॥
रजनीं च तत्र यूनां समाजसंगीतपानशृङ्गारान्।
इति वर्णयेत्प्रसङ्गात्कथां च भूयो निबध्नीयात् ॥ १५ ॥
प्रतिनायकमपि तद्वत्तदभिमुखममृष्यमाणमायान्तम्।
अभिदध्यात्कार्यवशान्नगरीरोधस्थितं वापि ॥ १६ ॥
योद्धव्यं प्रातरिति प्रबन्धमधुपीति निशि कलत्रेभ्यः।
स्ववधं विशङ्कमानान्संदेशान्दापयेत्सुभटान् ॥ १७ ॥
संनह्य कृतव्यूहं सविस्मयं युध्यमानयोरुभयोः।
कृच्छ्रेण साधु कुर्यादभ्युदयं नायकस्यान्ते ॥ १८ ॥

गतार्थं न वरम्। कुल्यादिष्विति कुल्यो गोत्रजः। आदिशब्दात्क्षत्रियादिः। तथा संमन्त्र्य निश्चित्य चेत्यत्रान्तर्भूतः कारितार्थो द्रष्टव्यः। अन्यथा भिन्नकर्तृकत्वात्क्त्वा न स्यात्। नायकमुखेन कविरेव मन्त्रयते निश्चिनोति चेति केचित्। तथा नद्यः सरितः। अटवी निर्जनो देशः। काननमुद्यानवनम्। सरस्यो महान्ति सरांसि। मरुर्निर्जलो देशः। द्वीपं जलमध्यस्थभूप्रदेशः। भुवनानि लोकान्तराणि। तथा यूनां दंपतीनां क्रीडा। सा च वनेषु क्रीडा, नदीषु जलकेलिः, अटव्यां विहार इत्यादिका। तथा यूनां समाजः संगमः। संगीतं गेयम्। पानकं सरकम्। शृङ्गारः सुरतादिः। तथा कलत्रेभ्यः सुभटान्संदेशान्प्रदापयेत्। कथं दापयेत्। प्रबन्धेन मधुपीतिर्मधुपानं यत्र कर्मणि। मधुपानमपि कुत इत्याह—योद्धव्यं प्रातरिति। तथा नायकस्येति नायकस्यैव विजयं कुर्यान्न विपक्षस्येति सूचनार्थम्॥

अथ किमयं प्रबन्धोऽनवच्छेद एव कर्तव्यो नेत्याह—

सर्गाभिधानि चास्मिन्नवान्तरप्रकरणानि कुर्वीत।
संधीनपि सुश्लिष्टांस्तेषामन्योन्यसंबन्धात् ॥ १९ ॥

सर्गेति। सुगमं न वरम्। सर्गाभिधानि सर्गनामकानि। यतः 'सर्गबन्धो महाकाव्यम्' इत्युक्तम्। तथा संधीन्मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्यान्भरतोक्तान्सुश्लिष्टान्सुरचनान्कुर्वीत। कथं तथा ते स्युरित्याह—अन्योन्यसंबन्धादिति॥

महाकाव्यलक्षणमाख्याय कथालक्षणमाह—

श्लोकैर्महाकथायामिष्टान्देवान्गुरून्नमस्कृत्य ।
संक्षेपेण निजं कुलमभिदध्यात्स्वं च कर्तृतया ॥ २० ॥

श्लोकैरिति । सुगमं न वरम् । संक्षेपेण निजं कुलमभिदध्यात् । न त्वाख्यायिकाया-मिव विस्तरेण । स्वं चेति चकारोऽनुक्तसमुच्चये । तेन सुजनखलस्तुतिनिन्दादिकं चा-भिदध्यादिति सूच्यते ॥

ततश्च—

सानुप्रासेन ततो भूयो लघ्वक्षरेण गद्येन ।
रचयेत्कथाशरीरं पुरेव पुरवर्णकप्रभृतीन् ॥ २१ ॥

सानुप्रासेनेति । सुगमं न वरम् । भूयो लघ्वक्षरेण ॥

प्रकारान्तरमाह—

आदौ कथान्तरं वा तस्यां न्यस्येत्प्रपञ्चितं सम्यक् ।
लघु तावत्संधानं प्रक्रान्तकथावताराय ॥ २२ ॥

आदाविति । गतार्थं न वरम् । लघु तावत्संधानं लाघवयुक्तं संधानं यत्र कथान्तरे । अथवादौ तावत्कथान्तरं न्यस्येत् । ततो लघु शीघ्रं प्रक्रान्तकथावताराय संधानमिति । यथा कादम्बर्याम् ॥

तथा—

कन्यालाभफलां वा सम्यग्विन्यस्तसकलशृङ्गाराम् ।
इति संस्कृतेन कुर्यात्कथामगद्येन चान्येन ॥ २३ ॥

कन्येति । वाशब्दः पक्षान्तरसूचकः । तेन राज्यलाभादि फलमपि क्वचित् । सम्य-ग्विन्यस्तसकलशृङ्गारामित्यनेन शृङ्गारस्तत्र प्राधान्येन निबन्धनीय इत्युक्तं भवति । इ-त्येवं संस्कृतेन कथां कुर्यात् । अन्येन प्राकृतादिभाषान्तरेण त्वगद्येन गाथाभिः प्रभूतं कुर्यात् । चकारान्द्वयमपि किंचिदित्यर्थः ॥

आख्यायिकालक्षणमाह—

पूर्ववदेव नमस्कृतदेवगुरुर्नोत्सहेत्स्थितेष्वेषु ।
काव्यं कर्तुमिति कवीञ्शंसेदाख्यायिकायां तु ॥ २४ ॥
तदनु नृपे वा भक्तिं परगुणसंकीर्तनेऽथवा व्यसनम् ।
अन्यद्वा तत्करणे कारणमभिलक्षितमभिदध्यात् ॥ २५ ॥

पूर्ववदिति । तदन्विति । सुगमम् ॥

आख्यायिकाया एव लक्षणशेषमाह—

अथ तेन कथैव यथा रचनीयाख्यायिकापि गद्येन।
निजवंशं स्वं चास्यामभिदध्यान्न त्वगद्येन ॥ २६ ॥

अथेति। एवोऽभिन्नक्रमे। ततश्चायमर्थः—अथ तेन कविना यथैव कथाख्यायिकापि तथैव गद्येन रचनीया। तुरवधारणे। ततो निजवंशमात्मानं च गद्येनैवास्यामभिदध्यात्। यथा हर्षचरिते॥

अपि च—

कुर्यादत्रोच्छ्वासान्सर्गवदेषां मुखेष्वनाद्यूनाम् (?)।
द्वे द्वे चार्ये श्लिष्टे सामान्यार्थे तदर्थाय ॥ २७ ॥

कुर्यादिति। सुगमं न वरम्। तदर्थाय प्रस्तुतार्थसूचनाय॥

संशयशंसावसरे भवतो भूतस्य वा परोक्षस्य।
अर्थस्य भाविनस्तु प्रत्यक्षस्यापि निश्चितत्वे ॥ २८ ॥
संशयितुः प्रत्यक्षं स्वावसरेणैव पाठयेत्कंचित्।
अन्योक्तिसमासोक्तिश्लेषाणामेकमुभयं वा ॥ २९ ॥
तत्र च्छन्दः कुर्यादार्यापरवक्त्रपुष्पिताग्राणाम्।
अन्यतमं वस्तुवशादथवान्यन्मालिनीप्रायम् ॥ ३० ॥

संशयेति। संशयितुरिति। तत्रेति। वर्तमानस्यातीतस्य च परोक्षस्य भाविनस्तु प्रत्यक्षस्यापि संदेहकथनावसरे सति निश्चयाय कंचित्प्राणिनमवसरेणैवान्योक्तिसमासोक्तिश्लेषाणां मध्यादेकमुभयं वालंकारं पाठयेत्। तत्र चार्यादिच्छन्दः कुर्यात्॥

एवं काव्यादित्रयस्य लक्षणानाख्याय तच्छेषमाह—

साभिप्रायं किंचिद्विरुद्धमिव वस्तुसत्प्रसङ्गेन।
अन्तः कथाश्च कुर्यात्त्रिष्वप्येषु प्रबन्धेषु ॥ ३१ ॥

साभिप्रायमिति। सुगमं न वरम्। विरुद्धमिव न तु विरुद्धम्। त्रिष्वपीति काव्यकथाख्यायिकासु॥

कुर्यादभ्युदयान्तं राज्यभ्रंशादि नायकस्यापि।
अभिदध्यादेषु तथा मोक्षं च मुनिप्रसङ्गेन ॥ ३२ ॥

सुगमम्॥

अथ लघूनां काव्यादीनां लक्षणमाह—

कुर्यात्क्षुद्रे काव्ये खण्डकथायां च नायिकं सुखिनम् ।
आपद्गतं च भूयो द्विजसेवकसार्थवाह्यादिम् ॥ ३३ ॥
अत्र रसं करुणं वा कुर्यादथवा प्रवासशृङ्गारम् ।
प्रथमानुरागमथवा पुनरन्ते नायकाभ्युदयम् ॥ ३४ ॥

सुगमम् ॥

अथ किमेतल्लक्षणं सर्वेषामपि काव्यादीनां सामान्यं स्यान्नेत्याह—

नैतदनुत्पाद्येषु तु तत्र ह्यभिधीयते यथावृत्तम् ।
अल्पेषु महत्सु च वा तद्विषयो नायमुपदेशः ॥ ३५ ॥

सुगमम् ॥

अथ काव्यकथाख्यायिकादय इत्यत्रादिग्रहणसंगृहीतं दर्शयितुमाह—

अन्यद्वर्णकमात्रं प्रशस्तिकुलकादिनाटकाद्यन्यत् ।
काव्यं तद्बहुभाषं विचित्रमन्यत्र चाभिहितम् ॥ ३६ ॥

अन्यदिति । सुगमं न वरम् । तत्र यस्यामीश्वरकुलवर्णनं यशोर्थं क्रियते सा प्रशस्तिः । यत्र च पद्यादीनां चतुर्दशान्तानां श्लोकानां वाक्यार्थः परिसमाप्यते तत्कुलकम् । आदिग्रहणादेकस्मिञ्छन्दसि वाक्यसमाप्तौ मुक्तकम्, द्वयोः संदानितकम्, त्रिषु विशेषकम्, चतुर्षु कलापकम् । तथा मुक्तकानामेव प्रघट्टकोपनिबन्धः पर्याययोगः कोषः । तथा बहूनां छन्दसामेकवाक्यत्वे तद्वाक्यानां च समूहावस्थाने परिकथा । भूयोऽप्याह—नाटकाद्यन्यदिति । अत्र भरताद्यभिहितम् । नाटकादीत्यत्रादिशब्दान्नाटकप्रकरणेहामृगसमवकारभाणव्यायोगडिमवीथीप्रहसनादिसंग्रहः । तद्बहुभाषं च बह्वीभिर्भाषाभिर्निबध्यते । विचित्रं च । नानासंधिसंध्यङ्गाभिनयादियुक्तत्वादिति ॥

महाकाव्यादिलक्षणमभिधायेदानीं काव्यगुणातिशयविवक्षायां मा कश्चिदसंभवि वोचदिति तन्निषेधार्थमाह—

कुलशैलाम्बुनिधीनां न ब्रूयाल्लङ्घनं मनुष्येण ।
आत्मीययैव शक्त्या सप्तद्वीपावनिक्रमणम् ॥ ३७ ॥

कुलेति । सुगमम् ॥

ननु भरतहनूमत्प्रभृतीनां सर्वमेतच्छ्रूयते, ततश्च यथा तेषां तथान्यस्यापि भविष्यतीति को दोष इत्याह—

येऽपि तु लङ्घितवन्तो भरतत्रायीं कुलाचलाम्बुनिधीन् ।
तेषां सुरादिमुख्यैः सङ्गादासन्विमानानि ॥ ३८ ॥

य इति । सुगमं न वरम् । सुरादिमुख्यैः सुरादिप्रधानैः । आदिशब्दात्सिद्ध विद्याधर-किंनरगन्धर्वादिसंग्रहः ॥

ननु च सत्त्वचित्तादिहीनत्वान्मनुष्याणां कथं सुरादिभिः सह सङ्गोऽपीत्याह —

शक्तिश्च न जात्वेषाममुरादिवधेऽधिका सुरादिभ्यः ।
आसीत्ते हि सहाया नीयन्ते स्मामरैः समिति ॥ ३९ ॥

शक्तिरिति । सुगमं न वरम् । चशब्दो हेतौ ॥

भूयोऽप्याह —

दारिद्र्यव्याधिजराशीतोष्णाद्युद्भवानि दुःखानि ।
बीभत्सं च विदध्यादन्यत्र न भारताद्वर्षात् ॥ ४० ॥

दारिद्र्येति । सुगमं न वरम् । भारतं भरतक्षेत्रम् ॥

अन्यत्र त्विलावृतादौ कुतो न विदध्यादित्याह —

वर्षेष्वन्येषु यतो मणिकनकमयी मही हितं सुलभम् ।
विगताधिव्याधिजराद्वन्द्वा लक्षायुषो लोकाः ॥ ४१ ॥

वर्षेष्विति । सुगमं न वरम् । द्वन्द्वानि शीतोष्णादीनि ॥

अथ शास्त्रपरिसमाप्तिमङ्गलार्थं देवताः संकीर्तयन्नाह—

जयति जनमनिष्टादुद्धरन्ती भवानी
जयति निजविभूतिव्याप्तविश्वो मुरारिः ।
जयति च गजवक्त्रः सोऽत्र यस्य प्रसादा-
दुपशमति समस्तो विघ्नवर्गोपसर्गः ॥ ४२ ॥

जयतीति । सुगमम् ॥


एवं रुद्रटकाव्यालंकृतिटिप्पणकविरचनात्पुण्यम् ।
यदवापि मया तस्मान्मनः परोपकृतिरति भूयान् ॥
थारापद्रपुरीयगच्छतिलकः पाण्डित्यसीमाभव-
त्सूरिर्भूरिगुणैकमन्दिरमिह श्रीशालिभद्राभिधः ।
तत्पादाम्बुजषट्पदेन नमिना संक्षेपसंप्रेक्षिणः commentator
पुंसो मुग्धधियोऽधिकृत्य रचितं सट्टिप्पणं लघ्वदः ॥
अज्ञानाद्यद्वितथं विवृतं किमपीह तन्महामतिभिः ।
संशोधनीयमखिलं रचिताञ्जलिरेष याचेऽहम् ॥

सहस्रत्रयमन्यूनं ग्रन्थोऽयं पिण्डितोऽखिलः।
द्वात्रिंशदक्षरश्लोकप्रमाणेन सुनिश्चितम् ॥
पञ्चविंशतिसंयुक्तैरेकादशसमाशतैः (११२५)।
विक्रमात्समतिक्रान्तैः प्रावृषीदं समर्थितम् ॥


इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः
षोडशोऽध्यायः समाप्तः।

समाप्तोऽयं ग्रन्थः।


१ खड्गबन्धः (श्लोकौ ६।७)




२ मुसलबन्धः (श्लोकः ८)




३ धनुर्बन्धः (श्लोकः ९)




४ शर बन्धः (श्लोकः १०)




५ शूलबन्धः (श्लोकः ११)




६ शक्तिबन्धः (श्लोकः १२)



७ हलबन्धः (श्लोकः १३)



८-चक्रबन्धः(श्लोकाः ६,७,८,९,१०,११,१२,१३,)



१३ रथपदपाठः (श्लोकः १४)

इ	नी	क्षि	ता	स्क	रैः	श्व	के
या	य	मा	म	म	मा	य	या
म	हि	षं	पा	तु	वो	गौ	री
सा	य	ता	सि	सि	ता	य	सा

१४ तुरगपदपाठः (श्लोकः १५)

क	श	क्ष	न	ग	भ	ट	य
से	ना	ली	ली	ली	ना	ना	ली
त	थ	ख	व	ज्ञ	र	घ	ब
ली	ना	ना	ना	ना	ली	ली	ली
ष	ज	थ	ढ	प	च	म	ठ
ना	ली	ना	ली	ले	ना	ली	ना
द	ण	स	छ	ल	ड	फ	ङ
ली	ली	ली	ना	ना	ना	ना	ली


१५ गजपदपाठः (श्लोकः १६)

ये	ना	ना	धी	ना	वा	धी	रा
ना	धी	वा	रा	धी	रा	रा	जन्
किं	ना	ना	शं	ना	कं	शं	ते
ना	शं	कं	ते	शं	ते	ते	जः

१६ अर्धभ्रमः (श्लोकः १८)

स	र	सा	या	रि	वी	रा	ली
र	स	न	व्या	ध्य	दे	श्व	रा
सा	नः	पा	या	द	रं	दे	वी
या	व्या	या	ग	म	द	ध्य	रि


१३ मुरजबन्धः (श्लोकः १९)



१४ सर्वतोभद्रम् (श्लोकः २०)

र	सा	सा	र	र	सा	सा	र
सा	य	ता	क्ष	क्ष	ता	य	सा
सा	ता	वा	त	त	वा	ता	सा
र	क्ष	त	स्व	स्व	त	क्ष	र
र	क्ष	त	स्व	स्व	त	क्ष	र
सा	ता	वा	त	त	वा	ता	सा
सा	य	ता	क्ष	क्ष	ता	य	सा
र	सा	सा	र	र	सा	सा	र

१५ पद्मबन्धः (श्लोकः २१)



काव्यमाला।

[1]श्रीगोवर्धनाचार्यविरचिता

आर्यासप्तशती।

[2]अनन्तपण्डितकृतया व्यङ्ग्यार्थदीपनाख्यया व्याख्ययानुगता।

ग्रन्थारम्भवज्या।

सर्वे साधुजनाः सदायतहृदा सत्संप्रदायादलं
यज्ज्ञानाय कणादगौतममतान्यालोच्य तत्त्वार्थदान्।
वेदान्तान्परिशीलयन्ति रहसि स्वानन्दकन्दाकरं
वन्दे तं जगदीश्वरं दयितया सानन्दमालिङ्गितम्॥
यत्पादाम्बुजमब्जभूप्रभृतयो देवाः सदैवान्तरे
ध्यायन्ति ग्लपयन्ति दुःखनिवहं लीलामनुष्याकृतिम्।
फुल्लेन्दीवरमित्रनेत्रमतसीपुष्पावभासं लस-
च्छ्रीरामं कलयामि चेतसि चिरं चैतन्यमात्रात्मकम्॥
पञ्चाशद्वर्णभेदैरपरिमिततरैरर्थजातिश्च युक्ता
नानालंकाररम्या गणितगुणगणा साधुवृत्तैरुपेता।
वाक्सृष्टिर्यत्प्रसादात्प्रसरति रसनोपान्तदेशे निमेषा-
न्नित्यं चित्तेऽनुरक्ते वसतु मम सुखं भारती सा रसाढ्या॥
गोवर्धनोक्तिसुखदाननिदानमेतद्व्यङ्ग्यार्थदीपनमनल्पचमत्कृतीनाम्।
भूयादनन्तविबुधेन विधीयमानं प्रीत्यै सदा सकलपण्डितमण्डलीनाम्॥

---

१. गोवर्धनाचार्यसमयस्त्वद्यापि सम्यङ्न ज्ञायते. परंत्वयं गीतगोविन्दकर्तुर्जयदेवात्प्राचीनस्तत्समकालीनो वेति वक्तुं शक्यते, यतो जयदेवेन गीतगोविन्दप्रारम्भे 'शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धनस्पर्धी कोऽपि न विश्रुतः' इत्युक्तमस्ति. जयदेवकविश्च वङ्गदेशाधिपस्य बल्लालसेनसूनोर्लक्ष्मणसेनस्य सभायामासीदिति श्रीसनातनगोस्वामिनां मतम्. 'गोवर्धनश्च शरणो जयदेव उमापतिः। कविराजश्च रत्नानि समितौ लक्ष्मणस्य च॥' इत्ययं श्लोको लक्ष्मणसेनसभागृहद्वारोपरि शिलायामुत्कीर्ण आसीत्, तस्माद्गोवर्धनजयदेवादयः सर्वेऽपि लक्ष्मणसेनसभायामासन्निति केचित्. लक्ष्मणसेनश्च खिस्तसंवत्सरस्यैकादशशतकसमाप्तिपर्यन्तं वङ्गदेशं पालयामासेति केचिदितिहासविदः २. सप्तशतीटीकाकारोऽनन्तपण्डितस्तु टीकासमाप्तौ स्वसमयं लिखितवानेव.

आर्यार्थग्रहणे तावदार्या एवाधिकारिणः ।
अतोऽत्र दृष्टिस्तैरेव कार्या नान्यैः कदाचन ॥
गभीरार्थप्राप्तौ नियतवचसामाशयजुषां
गुणालंकाराणां भवति घटना सत्वरतरम् ।
अतो हेतोश्चेतो विपुलमतिना तत्र विषये
नियोज्यं येनान्तः सततसुखसंबाधवसतिः ॥
संत्यज्य दोषं गुण एव दृष्टिर्विधीयतामित्यफलं वचो मे ।
विहाय नीरं सकलोऽपि हंसः पयः प्रगृह्णात्युपदेशतः किम् ॥

विशिष्टशिष्टेष्टकर्तव्यतापत्तिप्राप्तमङ्गलमनुषङ्गतो व्याख्यातश्रोतृमङ्गलायोपनिबध्नाति—

पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ।
अङ्कुरित इव मनोभूर्यस्मिन्भस्मावशेषोऽपि ॥ १ ॥

पाणिग्रह इति । भूतिभूषितं भस्मनालंकृतम् । भस्मनो भूषणत्वं मनोभवीयत्वेन । यत्तु 'भूत्यैश्वर्येण' इति व्याख्यानं तदैशमित्यनेन गतार्थत्वात्प्रकृतानुपयुक्तत्वाच्चोपेक्ष्यम् । पाणिग्रहे । अर्यादत्यन्तानुरक्तकामिन्याः । पुलकितं जातरोमाञ्चम् । सात्त्विकभावोदयादिति भावः । ऐशमीशसंबन्धि । चैत्रादिवदीशपदस्य कर्पूरगौरत्वादिमच्छरीरोपहितात्मनि शक्तौ गौरवात्, लाघवात्तादृशशरीर एव शक्तत्वात्, नित्यज्ञानादिमदात्मनि लक्षणा । यद्वा 'ईश ऐश्वर्ये' इति धातोरचि निष्पन्नेनेशपदेन शक्त्या जगत्कर्तृत्वाद्यैश्वर्यत्रत्वं बोध्यते । तत्संबन्धस्य शरीरान्तरे सत्त्वेऽपि भूतिभूषितविशेषणमहिम्ना शंकरीयत्वमायाति वपुषि । एवं च मनोभूभस्मसंबन्धि सर्वोत्कर्षशालित्वयोग्यत्वं व्यज्यते । वपुर्जयति । यद्वा भूतिभूषितमित्यनेन भूषणसामान्याभावप्रतिपादनेऽपि सर्वोत्कर्षशालित्वे देवीपाणिग्रहणजन्यपुलकवत्ता हेतुः । जयतीत्यनेनेशे सर्वोत्कर्षशालित्वप्रतिपादनेन सर्वान्तर्गते स्वस्मिन्नपकर्षप्रतिपादनान्नतिरावेद्यते । भस्मावशेषोऽपि । एवं चाङ्कुरीभावानर्हत्वेऽपि तद्भवनेन देवीपाणौ सुधारूपत्वमावेद्यते । मनोभूः । एवं च मनसो बीजरूपताप्रतिपादनेन तस्यान्तर्गतत्वाद्वपुष्यङ्कुरवत्तायोग्यत्वं व्यज्यते । विशिष्यानाकलनीयरूपस्यापि भवनयोग्यत्वेन वपुषि विशेषभवनयोग्यत्वं वा । यस्मिन्वपुष्यङ्कुरित इव संजाताङ्कुर इवेति भस्मसंसर्गिरोमाञ्चेऽङ्कुरोत्प्रेक्षा । एवं च यथाङ्कुरसंजातमहत्तरतरुकिसलयकुसुमफलादिनान्यजनोपकारस्तथैतदङ्कुरभाविकुमारफलादिना तारकवधेन सकलजनोपकारो भवितेति ध्वन्यते । अत्राङ्कुरितत्वेन पाणिस्पर्शस्यामृतरूपत्वं वस्तुना वस्तु व्यज्यते ॥

मा वम संवृणु विषमिदमिति सातङ्कं पितामहेनोक्तः ।
प्रातर्जयति सलज्जः कज्जलमलिनाधरः शंभुः ॥ २ ॥

मा वमेति । इदमित्यपलापानर्हत्वम् । अथवा जगद्विनाशविदितविभवत्वमिति व्य-

ज्यते । विषं मा वम, किं तु संवृण्विति सातङ्कम् । सातङ्कत्वं च सकलजगद्विनाशे पुनस्तद्विधानदुष्करत्वविनिर्णयेन । पितामहेन । एवं च भ्रमयोग्यत्वं हरस्य च लज्जायोग्यत्वं ध्वन्यते । प्रातरुक्तः । प्रातरित्यनेन कज्जले स्फुटयोग्यत्वं ध्वन्यते । अतः सलज्जः । न त्वपत्रपावान् । पितामहेन कज्जलत्वेनाज्ञानात् । कज्जलमलिनाधरः । नेत्रचुम्बनादिति भावः । शंभुः । एवं च कामिनीप्रीत्यतिशयशालित्वं द्योत्यते । जयति । पितामहसंत्रासजनकगरलगिलनेन, ब्रह्मणः प्रार्थनया, सुभगकामिनीरतचिह्नत्वेन वा ॥

जयति प्रियापदान्ते गरलग्रैवेयकः स्मरारातिः ।
विषमविशिखे विशन्निव शरणं गलबद्धकरवालः ॥ ३ ॥

जयतीति । गरलं ग्रैवेयकं कण्ठभूषा यस्य स स्मरारातिः प्रियापदान्ते जयति । एवं च कुपितकामिनीप्रसादनकर्तव्यतायाः परमपुरुषार्थत्वं व्यज्यते । गरलग्रैवेयक इत्यनेन जीवनायोग्यत्वम् । स्मरारातिरित्यनेन स्मरबाधावत्त्वेन क्वचिदपि सुखावस्थानायोग्यत्वं ध्वन्यते । एवं चैतादृशस्यापि सर्वोत्कर्षशालित्वे प्रियापदान्तेऽवस्थितिरेव हेतुः । अतः प्रियापदान्तावस्थितेर्नान्यदधिकतरं वस्त्विति द्योत्यते । यद्वा गरलग्रैवेयक इत्यनेन जीवननिःस्पृहत्वम् । एवं चैतादृशस्यापि कुपितकामिनीप्रसादनलम्पटत्वम्, किमुतान्येषामिति ध्वन्यते । गलबद्धखड्गः । विषमविशिखे । एवं च शरणार्हत्वं व्यज्यते । शरणं विशन्निव गच्छन्निव । विषमविशिखे विशन्निवेत्युत्प्रेक्षया विषमविशिखस्यापि प्रियापदसंनिधेयाधिकत्वम्, किं पुनरन्यस्येति द्योत्यते । अत एव स्त्रीणां चरणे मदन इति कामतन्त्रे । अन्योऽपि शस्त्रं गले बद्ध्वा शरणं गच्छतीति लौकिकम् ॥

जयति ललाटकटाक्षः शशिमौलेः पक्ष्मलः प्रियाप्रणतौ ।
धनुषि स्मरेण निहितः सकण्टकः केतकेषुरिव ॥ ४ ॥

जयतीति । शशिमौलेः । एवं च सकलङ्कस्याप्येतादृशादरसंपादनेन संतापातिभीरुत्वं ध्वन्यते । तेन च कुपितकामिनीप्रसादनेऽवश्यकर्तव्यत्वम् । पक्ष्मलः प्रशस्तपक्ष्मवान् । पक्ष्मलपदं केतकोत्प्रेक्षादार्ढ्याय । ललाटकटाक्षः । एवं च भ्रूमध्यसंबन्धित्वं द्योत्यते । तेन च धनुर्निहितबाणोत्प्रेक्षादार्ढ्यम् । प्रियाप्रणतौ । प्रियाविषयकहरप्रणतौ सत्यां जयति । चाटुवचनाद्यसाध्यमानापनोदकार्यकारित्वेनेति भावः । स्मरेण सकण्टकः । एवं च निःसरणानर्हत्वं ध्वन्यते । धनुषि निहितः । न तु शीघ्रं परित्यक्तः । एवं च मुष्टिबन्धनदार्ढ्येन भेदविशेषकारित्वम् । तेन च मानलक्ष्यभङ्गेऽतिशीघ्रविधेयत्वं ध्वन्यते । केतकेषुरिव । स्मरस्य पुष्पसायकत्वादिति भावः । एवं च मानापनोदनत्वं व्यज्यते । केचित्तु प्रियाकर्तृकसेवाप्रणतौ समान्मथविकाराल्ललाटकटाक्षो जयतीत्यपि वदन्ति ॥

जयति जटार्किंजल्कं गङ्गामधु मुण्डवलयबीजमयम् ।
गलगरलपङ्कसंभवमम्भोरुहमाननं शंभोः ॥ ५ ॥

जयतीति । जटाः किंजल्कानि यत्रेति रूपकम् । एवमग्रेऽपि ॥

संध्यासलिलाञ्जलिमपि कङ्कणफणिपीयमानमविजानन् ।
गौरीमुखार्पितमना विजयाहसितः शिवो जयति ॥ ६ ॥

संध्येति । कङ्कणरूपफणिपीयमानमपि । कङ्कणपदेन प्रात्यक्षिकत्वं ध्वन्यते । फणिपदेन भूषणयोग्यत्वं ध्वन्यते । पीयमानमित्यनेन ज्ञानयोग्यत्वं ध्वन्यते । संध्यासलिलाञ्जलिम् । राजदन्तादिवदञ्जलेः सलिलमिति समासः । संध्यापदेन तदेकचित्तावश्यकत्वं व्यज्यते । अञ्जलिपदेन भूयस्त्वं द्योत्यते । तेन च तत्पानस्य विलम्बसाध्यत्वेनावश्यज्ञेयत्वम् । अविजानन् । अत्र हेतुमाह—गौरीमुखार्पितमनाः । गौरीत्यनेन मनःसंलग्नतायोग्यत्वं मुखे ध्वन्यते । अर्पितपदेन ग्रहणायोग्यत्वं ध्वन्यते । एवं चैतादृशविषयज्ञानाभावेनात्यन्तासक्तिर्गौर्यां गिरिशस्य व्यज्यते । अत एव । विजया गौरीसखी तया हसितः शिवो जयति । एतादृशपरिहासस्याप्युत्कर्षाधायकत्वादिति भावः ॥

प्रतिबिम्बितगौरीमुखविलोकनोत्कम्पशिथिलकरगलितः ।
स्वेदभरपूर्यमाणः शंभोः सलिलाञ्जलिर्जयति ॥ ७ ॥

प्रतीति । सलिलाञ्जलिर्जयति । एवं चाञ्जलिजलप्रतिबिम्बितगौरीवदनविलोकनसंजातकम्परूपसात्त्विकभावविश्लथकरगलितत्वेऽपि स्वेदरूपसात्त्विकभावभराकस्मिकपूरणात्सर्वोत्कर्षशालित्वमिति भावः ॥

प्रणयकुपितप्रियापदलाक्षासंध्यानुबन्धमधुरेन्दुः ।
तद्वलयकनकनिकषग्रावग्रीवः शिवो जयति ॥ ८ ॥

प्रणयेति । प्रणयेन न वास्तवं कुपिता या प्रिया । एवं च चरणप्रणामयोग्यत्वं ध्वन्यते । तस्याश्चरणलाक्षारूपसंध्यासंबन्धसुन्दरश्चन्द्रो यस्य । तस्याः पार्वत्याः कङ्कणकनकस्य निकषोपलरूपा ग्रीवा यस्य । एवं च मानापनोदनात्कण्ठपुरःसरमालिङ्गनादि ध्वन्यते । एतादृशः शिवो जयति । प्रियाप्रसादादिति भावः । स्वकार्यैकदेशविहितप्रियाप्रणामेन संध्याचन्द्रमसोरपि सङ्गसंपादनादनायासेन परोपकारित्वलाभादिति भावः ॥

पूर्णनखेन्दुर्द्विगुणितमञ्जीरा प्रेमशृङ्खला जयति ।
हरशिरलेखा गौरीचरणाङ्गुलिमध्यगुल्फेषु ॥ ९ ॥

पूर्णेति । गौर्याश्चरणाङ्गुलिमध्यगुल्फेषु । अत्र मध्यस्याङ्गत्वाभावान्नैकवद्भावः । मध्यमपदलोपी समासो वा । पूर्णो नखेन्दुर्यया । पूर्वं नखस्यार्धचन्द्रत्वादिति भावः । द्विगुणीकृतं मञ्जीरं यया । पूर्वं मञ्जीरस्यैकगुणत्वादिति भावः । प्रेम्णः शृङ्खला यया । पूर्वं सुवर्णाभरणान्तरवत्त्वेऽपि प्रेमस्थितिसंपादकाभिनवभूषणत्वादिति भावः । एवं च यथा यथा मानापनोदनं तथा तथा शिरश्चरणसंयोगोऽधिकतरः संवृत्त इति भावः । एवं च

सहसा मानिनीचरणे मस्तकस्थापनेऽपि भीतिरावेद्यते । एतादृशी हरचन्द्रलेखा जयति । युगपदनेककार्यसंपादनादिति भावः ॥

श्रीकरपिहितं चक्षुः सुखयतु वः पुण्डरीकनयनस्य ।
जघनमिवेक्षितुमागतमब्जनिभं नाभिसुषिरेण ॥ १० ॥

श्रीकरेति । पुण्डरीकनयनस्य विष्णोः । श्रीकरपिहितम् । रतरीतिवसनविहीनतया लज्जावशादिति भावः । श्रियः करेण । न तु श्रिया । आनन्दाविर्भावादिति भावः । अत एव करोतीति कर इति करपदमन्वर्थम् । ततो नाभिरन्ध्रेण । सुषिरपदमन्यानवलोकनीयत्वं व्यनक्ति । जघनमीक्षितुमागतमिवेत्युत्प्रेक्षा । एवं च लक्ष्मीजघनदर्शनलालसत्वं व्यज्यते । पिधानानर्थक्यं च । अब्जसदृशम् । एवं च नाभिकमलभ्रान्त्या पिधानायोग्यत्वमावेद्यते । चक्षुर्वो युष्मान्सुखयतु । पिहितेऽपि हि गोलकेऽन्यमार्गेणागत्य जघनविलोकनकारितया सुखलम्पटत्वेन सुखदानस्य सुखप्राप्तिनिदानतयान्यस्य सुखजनकत्वं तस्येति भावः । नन्वत्र पुण्डरीकनयनस्येत्यनेन कमलसादृश्यसिद्धावब्जनिभमित्यस्य न तथा प्रयोजनमिति चेन्न । पुण्डरीकनयन इत्यत्र रूढिरेव । यद्वाब्जपदस्य वक्रतात्पर्यान्यथानुपपत्त्या रक्ताब्जे लक्षणा । एवं च लक्ष्म्याः सिताम्भोजत्वेन नेत्रज्ञानेऽपि रक्ताम्भोजत्वेनाज्ञानात् । तद्रूपाङ्गीकारेण निभृतमार्गेणागमनेन जघनदर्शनकारित्वेऽपि न श्रीकरपिहितत्वमिति व्यज्यते । अन्योऽप्यत्यन्तलम्पटो रूपान्तरेण निभृतमार्गेण च गत्वा स्वकार्यं साधयतीति लौकिकम् । केचित्तु रत्नमित्युक्ते रक्तरत्नमेवाब्जमित्युक्ते रक्ताब्जमेवोपलक्ष्यते कविसंप्रदायादिति वदन्ति ॥

श्यामं श्रीकुचकुङ्कुमपिञ्जरितमुरो मुरद्विषो जयति ।
दिनमुखनभ इव कौस्तुभविभाकरो यद्विभूषयति ॥ ११ ॥

श्यामामिति । श्यामम् । विष्णोः श्यामत्वादिति भावः । श्रीकुचकुङ्कुमपिञ्जरितम् । एवं च दृढालिङ्गनमभिव्यज्यते । तन्मुरद्विष उरः । एवं च कठिनत्वमुरसि व्यज्यते । तेन च श्रीकठिनकुचकुम्भसंघट्टनसहिष्णुत्वम् । जयति । सर्वोत्कर्षे लक्ष्मीदृढालिङ्गनं हेतुः । दिनमुखनभ इव । प्रातःकालीननभसः स्वतो नीलिमवत्त्वात्संध्यासंवलितत्वाच्च तथाविधोरसः सादृश्यम् । कौस्तुभ एव विभाकरः । पक्षे कौस्तुभवद्विभाकरः सूर्यः । यदुरो विभूषयति । एवं च त्रिभुवनाधिपतेर्निरीहस्यापि कौस्तुभाभरणधारणमुदरवर्त्यनेकलोकयुगपत्प्रकाशविश्रान्तिविधाननिदानतां ध्वनयति । एवं च विभाकरादतिशयो व्यज्यते कौस्तुभे ॥

प्रतिबिम्बितप्रियातनु सकौस्तुभं जयति मधुभिदो वक्षः ।
पुरुषायितमभ्यस्यति लक्ष्मीर्यद्वीक्ष्य मुकुरमिव ॥ १२ ॥

प्रतीति । सकौस्तुभम् । अत एव प्रतिबिम्बिता प्रियायास्तनुर्यत्र । यन्मुकुरमिव वीक्ष्य लक्ष्मीः पुरुषायितं विपरीतरतमभ्यस्यति । तन्मधुभिदो वक्षः । एवं च दार्ढ्यमावे-

द्यते स्वच्छताविशेषो वा । जयति । लक्ष्म्याः पुरुषायिताभ्यासनिदानतैव सर्वोत्कर्षे हेतुः । अन्योऽप्यादर्शे प्रतिबिम्बमवलोक्यैवान्यानवलोकनीयचेष्टाविशेषाभ्यासं करोतीति लौकिकम ॥

केलिचलाङ्गुलिलम्भितलक्ष्मीनाभिर्मुरद्विषश्चरणः ।
स जयति येन कृता श्रीरनुरूपा पद्मनाभस्य ॥ १३ ॥

केलीति । क्रीडाचपलाङ्गुल्या लम्भितः स्पृष्टो लक्ष्म्याः । चरणसेवाकारिण्या इति भावः । नाभिर्येन । अत एव येन श्रीः पद्मनाभस्यानुरूपा । चरणरूपपद्मनाभित्वेनेति भावः । कृता । स मुरद्विषश्चरणो जयति । ब्रह्मणोऽप्यसाध्यकार्यकरणादिति भावः ॥

रोमावली मुरारेः श्रीवत्सनिषेविताग्रभागा वः ।
उन्नालनाभिनलिनच्छायेवोत्तापमपहरतु ॥ १४ ॥

रोमावलीति । मुरारेः । एवं च सामर्थ्यमभिव्यज्यते । तेन च तद्वत्त्वेऽपि भृगुचरणहननसहिष्णुत्वेन क्षमातिशयत्वम् । श्रीवत्सेन भृगुचरणचिह्नेन निषेवितः । तत्संबन्धवानित्यर्थः । अग्रभागो यस्याः सा । एतादृशी रोमावली । उद्ध्वं नालं यस्यैवंभूतं यन्नाभिनलिनं तच्छायेव । एवं च रोमावल्यां नालच्छायोत्प्रेक्षा श्रीवत्से च नलिनच्छायोत्प्रेक्षेति भावः । उत्तापं महासंतापमपहरतु । कमलच्छायायाः संतापापनोदकत्वादिति भावः ॥

आदाय सप्ततन्त्रीचितां विपञ्चीमिव त्रयीं गायन् ।
मधुरं तुरंगवदनोचितं हरिर्जयति हयमूर्धा ॥ १५ ॥

आदायेति । सप्तसंख्याकानां तन्त्राणामग्निष्टोमादीनां समाहारः सप्ततन्त्री । तद्व्याप्ताम् । तत्प्रतिपादनपरामिति यावत् । 'तन्त्रं प्रधाने यागे च' इति विश्वः । पक्षे तन्त्री लोहतन्तुविशेषः । त्रयीं विपञ्चीमिवादाय मधुरं तुरंगवदनानां गन्धर्वाणामुचितं योग्यम् । एवं चैतादृशगानकर्तृत्वाभावस्तेषामिति व्यज्यते । गायन् । हयमूर्धा हयग्रीवः । एवं च तुरंगवदनोचितगानकर्तृत्वम् । हरिर्जयति । एतादृशविलक्षणगानगुणरूपवत्त्वादिति भावः॥

स जयति महावराहो जलनिधिजठरे चिरं निमग्नापि ।
येनान्त्रैरिव सह फणिगणैर्बलादुद्धृता धरणी ॥ १६ ॥

सेति । येन जलनिधिजठरे । डलयोरैक्याज्जडनिधित्वेन धरणीस्थानदानयोग्यत्वम् । चिरमित्यनेन झटिति निःसारणायोग्यत्वं व्यज्यते । निमग्नापि । अन्त्रैरिवाहिसमूहैः सह बलात्कारेण धरण्युद्धृता । स महावराहः । एवं चैतद्दंष्ट्राया अन्ते दृढत्ववक्रत्वाभ्यां जठरान्तर्गतत्वेनान्त्ररूपफणिसमूहसहितधरोद्धारसामर्थ्यमुचितमिति व्यज्यते । जयति । अनन्यसाध्यकार्यकरणादिति भावः ॥

ब्रह्माण्डकुम्भकारं भुजगाकारं जनार्दनं नौमि ।
स्फारे यत्फणचक्रे धरा शरावश्रियं वहति ॥ १७ ॥

ब्रह्माण्डमिति । ब्रह्माण्डं कुम्भस्तं करोतीति तम् । एवं च यथा कुम्भकारस्य कुम्भकरणे न क्लेशस्तथास्य ब्रह्माण्डकरण इति व्यज्यते । भुजगस्याकार इवाकारो यस्य तम् । एवं च वास्तवैतद्रूपं याथातथ्येन निर्णेतुमशक्यमिति व्यज्यते । जनार्दनम् । एवं चैतद्भीतिरवश्यं विधेयेति ध्वन्यते । तेन चैतदाज्ञा नोल्लङ्घनीयेति । स्फारे । एवं च धराशरावश्रीसंपादनयोग्यत्वं द्योत्यते । यस्य फणासमूहे धरा । एवं च महत्तरत्वं व्यज्यते । शरावस्य स्वल्पमृद्भाजनविशेषस्य श्रियं वहति । तत्तुल्या दृश्यत इति भावः । एवं च परमेश्वरभुजगरूपस्यातिविशालत्वं ध्वन्यते । अन्यस्यापि कुलालस्य चक्रे शरावो भवतीति लौकिकम् । अत्र धरा शरावश्रियं वहतीत्येतावतैव फणचक्रे स्फारत्वसिद्धावुत्तमकाव्यत्वे स्फारपदोपादानमनुचितमित्याभाति ॥

चण्डीजङ्घाकाण्डः शिरसा चरणस्पृशि प्रिये जयति ।
शंकरपर्यन्ताजितो विजयस्तम्भः स्मरस्येव ॥ १८ ॥

चण्डीति । प्रिये शंकरे शिरसा चरणस्पृशि कोपापनोदनाय प्रणतिकारिणि सति शंकरमभिव्याप्य जयवतः स्मरस्य जयस्तम्भ इव चण्डीजङ्घारूपः काण्डो वंशो जयति । स्वतः सुखविशेषजनकतया तुच्छविषयपराङ्मुखस्याप्येतादृश्यवस्थासंपादनादिति भावः । एवं चैहिकामुष्मिकसुखापेक्षया सीमन्तिनीसङ्गसुखेऽधिकतरत्वमावेद्यते ॥

उन्नालनाभिपङ्केरुह इव येनावभाति शंभुरपि ।
जयति पुरुषायितायास्तदाननं शैलकन्यायाः ॥ १९ ॥

उन्नालेति । येन शंभुरपि । अपिना विष्णोरनवतारत्वेन नाभिपङ्केरुहवत्त्वायोग्यत्वं व्यज्यते । ऊर्ध्वनालं यन्नाभिपङ्केरुहं तद्वानिव । यद्वा विष्णुरिवेत्यर्थः । एवं च शरीरस्य नालसाम्यदर्शनात्कृशाङ्गीत्वमभिव्यज्यते । अवभाति । पुरुषायिताया: शैलकन्यायाः । एवं च दार्ढ्यम् । तेन पुरुषायितसंपादनयोग्यत्वं ध्वन्यते । तदाननं जयति । अघटितघटनापटुत्वादिति भावः ॥

अङ्कनिलीनगजाननशङ्काकुलबाहुलेयहृतवसनौ ।
सस्मितहरकरकलितौ हिमगिरितनयास्तनौ जयतः ॥ २० ॥

अङ्केति । अङ्के निलीनो यो गजाननस्तच्छङ्कया । स्तनयोः कुम्भिकुम्भसाम्यादिति भावः । आकुलः । कथं मां विहायैनमेव संगोप्य बहुकालं स्तन्यं प्रयच्छतीति धियेति भावः । यद्वा नयनपिधानक्रीडायां गजाननोऽङ्क एव निलीनो न त्वन्यत्र गत इति मत्वेति भावः । आकुलपदेन शीघ्रमविचारितकार्यकारित्वं व्यज्यते । यो बाहुलेयस्तारकजित्तेन हृतवसनौ । गजाननन्निर्णयार्थमिति भावः । सस्मितः । कथमतिगुप्तयोरप्या-

कस्मिकप्राकट्यमिति धियेति भावः । यो हरः । एवं च स्वत एव वसमहरणादिना तत्कार्यकारित्वं ध्वन्यते । तेन करकलितौ । करोतीति कर इति स्वतस्तत्कार्यकारित्वेऽपि हरप्रहितत्वेनाकलने दार्ढ्यं द्योत्यते । हिमगिरितनयायाः । एवं च शैत्यसहितकठिनत्वं द्योत्यते । तेन चावश्यकरकलनयोग्यत्वम् । अत एव हरोऽतिस्मेर इत्यपि युक्तम् । स्तनौ जयतः । भ्रमवतान्येनाविष्कृतत्वेऽप्यन्यस्य सुखसंपादनादिति भावः । यद्वा गजाननशिखिवाहनयोः सकलविघ्ननिवारकत्वकार्यमात्रपुरस्करणीयत्वात्तारकवधद्वारकविश्वसंतोषपोषकत्वनिदानस्तन्यवत्त्वादिति भावः । यद्वा स्मरविरोधिनोऽप्यानन्दजनकत्वादिति भावः ॥

कण्ठोचितोऽपि हुंकृतिमात्रनिरस्तः पदान्तिके पतितः ।
यस्याश्चन्द्रशिखः स्मरभल्लनिभो जयति सा चण्डी ॥ २१ ॥

कण्ठोचित इति । आलिङ्गनार्होऽपि । पक्षेऽर्धचन्द्राकारतया कण्ठलक्ष्ययोग्योऽपि । हुंकृतिमात्रेण, न तु करतर्जनादिना । पक्षे बाणादिना । निरस्तः । अत एव यस्याः पदान्तिके । प्रणामार्थमिति भावः । पक्षे वेगवशादिति भावः । स्मरशरसदृशः । अर्धचन्द्रशेखरत्वादिति भावः । स्मरभल्लनिभ इत्यनेन मानापनोदनसमर्थत्वं द्योत्यते । यद्वा स्मरभल्लस्य निभं छद्म । 'निभं छद्मसदृक्षयोः' इत्यभिधानात् । एवं च रूपान्तरसंपादनाद्भीत्यतिशयो द्योत्यते । चन्द्रशिखः शंभुः पतितः । चन्द्रशिख इत्यनेनोद्दीपकचन्द्रस्यापि मानापनोदकत्वान्माने बाहुल्यमभिव्यज्यते । सा चण्डी जयति । मदनार्धनाराचादीनामप्यगणनादिति भावः ॥

देवेऽर्पितवरणस्रजि बहुमाये वहति कैटभीरूपम् ।
जयति सुरासुरहसिता लज्जाजिह्मेक्षणा लक्ष्मीः ॥ २२ ॥

देव इति । अर्पितवरणस्रजि । एवं च सङ्गाद्यभावेन तात्त्विकरूपापरिचयो द्योत्यते । बहुमाये । एवं च रूपान्तरग्रहणसामर्थ्यमभिव्यज्यते । देवे विष्णौ । देवपदेन क्रीडारसिकतयानेकविधदेहधारणनिपुणत्वमावेद्यते । कैटभीरूपम् । दैत्यवञ्चनायेति भावः । वहति सति । एवं च प्रात्यक्षिकत्वेनापलापानर्हत्वं व्यज्यते । सुरासुरहसिता । कथं सर्वोन्सुरान्विहायायमीदृशो वृत इति । अत एव लज्जाकुटिलेक्षणा । किमियं कामिन्येव पुरुषभ्रमान्मया वृतेति धियेति भावः । लक्ष्मीर्जयति । सर्वोपहासवत्त्वेऽप्यधैर्याकरणादिति भावः ॥

तानसुरानपि हरिमपि तं वन्दे कपटकैटभीरूपम् ।
यैर्यद्बिम्बाधरमधुलुब्धैः पीयूषमपि मुमुचे ॥ २३ ॥

तानिति । तान्सकपटत्वेन प्रसिद्धानसुरानपि । सुष्ठु रान्ति ते सुरास्तद्भिन्नान्सर्वदासमीचीनग्राहकानपि वन्दे । पीयूषादप्यधिकमेतस्या अधरामृतमिति तात्त्विकज्ञानेन

समीचीनवस्तुग्राहकत्वादिति भावः। तं कपटशून्यत्वेन प्रसिद्धं कपटकैटभीरूपं हरिमपि वन्दे। कपटाज्ञानेऽपि कपटाकरदैत्यवञ्चनानिपुणकपटरूपधारणादिति भावः। यैरसुरैर्यस्याः कैटभ्या लक्ष्म्या अधरमधुनि लुब्धैः। मधुपदमुन्मादजनकतां व्यनक्ति। पीयूषमपि। एवं च परित्यागानर्हत्वेऽपि तत्करणेन कैटभीरूपे विशेषशालित्वं ध्वन्यते॥

तल्पीकृताहिरगणितगरुडो हाराभिहतविधिर्जयति।
फणशतपीतश्वासो रागान्धायाः श्रियः केलिः॥ २४॥

तल्पीति। तल्पीकृताहिः। एवं च सर्पबाधाया अप्यगणनेन रागातिशयो व्यज्यते। अगणितगरुडः। एवं च सर्वत्र गमनयोग्यत्वेन पक्षित्वेन विवेकशून्यतया वान्यत्रैतत्कथनयोग्यत्वेऽप्येतदगणनयापि स एव द्योत्यते। हाराभिहतविधिः। हारस्य नाभिसंबन्धादिति भावः। आलिङ्गनान्तरभूतस्य त्यागार्हत्वेऽपि तदुपर्येव प्रक्षेपेण केलिज्ञानसंपादनेन लज्जाशून्यत्वेन स एव द्योत्यते। यद्वा कथमद्यापि नापसरतीति क्रोधान्निकटवर्तिहाराभिहननेन हारापायभीतिशून्यत्वेन, अयं च हननक्रोधात्कुत्र कुत्र न वदिष्यतीति ज्ञानहीनतया स एवावेद्यते। शतसंख्याहिफणपीतश्वासः। एवं च संख्यायाः पानान्वयो न संभवतीति दूषणमपास्तम्। एवं च मरणभीतिशून्यत्वेन स एव ध्वन्यते। एवंविधो रागान्धायाः केलिः। एवं चान्याभिरङ्गनाभिर्यद्रागप्रकटनं क्रियते तन्मिथ्येति भावः। जयति। एतादृशप्रतिबन्धकसमूहेऽपि जायमानत्वादिति भावः। अत्र तल्पीकृताहिरित्यादिना व्यञ्जनया रागातिशयप्रतिपादनाद्रागान्धाया इत्यस्य न तथा प्रयोजनमित्याभाति॥

स्मेराननेन हरिणा सस्पृहमाकारवेदिनाकलितम्।
जयति पुरुषायितायाः कमलायाः कैटभीध्यानम्॥ २५॥

स्मेरेति। स्मेरं किंचिद्धास्यवत्। सुखविशेषाविर्भावादिति भावः। यदाननम्। अर्थाल्लक्ष्म्याः। तेन कृत्वाकारवेदिना स्मेराननरूपज्ञापकज्ञानवता हरिणाकलितमनुमितम्। स्मेराननेनेति हरिणेत्यस्यापि विशेषणम्। विपरीतरतकारिण्याः श्रियः सस्पृहम्। एवं च स्वस्यापि सुन्दरत्वेऽपि तद्विषयस्पृहावत्त्वेनानिर्वचनीयरूपशालित्वं कैटभ्यां व्यज्यते। कैटभीध्यानम्। एवं च स्त्रियोऽपि स्त्रीध्यानेनाद्भुतत्वं कैटभीरूपे द्योत्यते। जयति। त्रिभुवनाभिरामया रमयापि क्रियमाणत्वादिति भावः॥

कृतकान्तकेलिकुतुकश्रीशीतश्वाससेकनिद्राणः।
घोरितविततालिरुतो नाभिसरोजे विधिर्जयति॥ २६॥

कृतेति। कृतं कान्तं मनोज्ञं यत्केलिकुतुकम्। एवं चोत्साहविशेषेण सुरतसंपादनाच्छ्वासबाहुल्यं व्यज्यते। यत्तु कान्तेन विष्णुना सह यत्केलिकुतुकमिति तन्न। अन्येन सहाप्रसक्तेः। कान्तकेलिरित्यनेन सुरतक्रीडैवायातीत्यपि न। अक्षक्रीडादेः संभवात्। नाभिसरोज इत्यादिनैव तत्प्रतीतेश्च। यया। एतादृशी या श्रीस्तस्याः शीताः। मदनानल-

संतापनिवृत्तेरिति भावः । ये श्वासास्तेषां सेकेन निद्राणः । सेकस्य द्रवद्रव्यीयत्वेन श्वासद्वारा वारिसंबन्धो लक्ष्यते । तेन च सुखनिद्रायोग्यत्वं व्यज्यते । विततालिरुतमेव घोरितं यस्य । नाभिसरोजे विधिर्जगन्निर्माणकर्ता । एवं च श्रमवत्त्वान्निद्रायोग्यत्वं ध्वन्यते । जयति । सरोजशयनशीतमन्दसुगन्धसमीरणसुखस्वापवत्त्वादिति भावः ॥

एकरद द्वैमातुर निस्त्रिगुण चतुर्भुजापि पञ्चकर ।
जय षण्मुखनुत सप्तच्छदगन्धिमदाष्टतनुतनय ॥ २७ ॥

एकेति । एकदन्त । द्वैमातुर । पार्वतीगङ्गारूपमातृद्वयवत्त्वात् । निस्त्रिगुण । एवं ब्रह्मरूपत्वं द्योत्यते । चतुर्भुजापि पञ्चकर । अपिर्विरोधाभासार्थकः । शुण्डामादाय पञ्चकरत्वम् । अन्यथा तु तस्यास्ति चतुर्भुजत्वम् । षण्मुखनुत । ज्येष्ठत्वादिति भावः । सप्तच्छदगन्धिर्मदो यस्य । अष्टतनुर्महादेवस्तत्तनय । एतादृशस्त्वं जय । संख्याक्रममात्रमत्र ॥

मङ्गलकलशद्वयमयकुम्भमदम्भेन भजत गजवदनम् ।
यद्दानतोयतरलैस्तिलतुलनालम्बि रोलम्बैः ॥ २८ ॥

मङ्गलेति । मङ्गलकलशद्वयरूपौ कुम्भौ यस्य तम् । एवं च विघ्नविनाशनक्षमत्वं ध्वन्यते । गजवदनम् । अदम्भेन । एवं च दम्भेन भजनमनर्थकमित्यावेद्यते । यदीयदानोदकार्थं चञ्चलैः । सौरभ्यशालित्वाद्दानोदकस्येति भावः। तरलपदेन सकलकुसुमगन्धाधिकत्वं दानगन्धे व्यज्यते । रोलम्बैर्भ्रमरैः । तिलसाम्यम् । श्यामत्वादिति भावः । एवं च कुम्भयोर्महत्तरत्वं ध्वन्यते । आलम्बि । गणपतिविषयकोऽत्र भावध्वनिः ॥

याभिरनङ्गः साङ्गीकृतः स्त्रियोऽस्त्रीकृताश्च ता येन ।
वामाचरणप्रवणौ प्रणमत तौ कामिनीकामौ ॥ २९ ॥

याभिरिति । याभिः स्त्रीभिरनङ्गो मदनः साङ्गीकृतः । स्वयं तत्साहाय्यसंपादनादिति भावः । येन मदनेन ताः स्त्रियोऽस्त्रीकृताः । स्वविजयसाधनत्वेनेति भावः । इति वामस्य सुन्दरस्य । समीचीनस्येति यावत् । यदाचरणम् । समीचीनाचरणमित्यर्थः । तत्र प्रवणौ तत्परौ । एवं चाङ्गहीनस्य साङ्गतासंपादनात्, एवमेव स्त्रीत्वेन नायकाधीनानां स्त्रीणां स्वास्त्ररूपतासंपादनेन नायकस्य तदधीनत्वसंपादनात्, उपकारप्रवणत्वमुभयोर्व्यज्यते । अत एवैतादृक्कामिनीकामौ प्रणमत । एवं चैतत्सेवया समीचीनमेव भविष्यतीति ध्वन्यते । यत्त्वङ्गरहितस्याङ्गवत्तासंपादनात्, स्त्रीणां च स्त्रीभिन्नत्वसंपादनात्, विरुद्धाचरणस्वाभाव्यात्, कामिनीकामौ प्रणमत, एवं चैतयोः संगतिः सतां नोचितेति व्यज्यत इति व्याख्यानं तन्मङ्गलप्रकरणविरोधादसमञ्जसमिवाभाति । यद्वा परस्परमप्येतयोरीदृशविपरीताचरणप्रवणत्वे प्रियान्यस्य तत्करणस्यातिसुगमत्वात्तत्सेवैव समुचितेति ध्वन्यते ॥

अथ कवीन्स्तौति--

विहितघनालंकारं विचित्रवर्णावलीमयस्फुरणम् ।
शक्रायुधमिव वक्रं वल्मीकभुवं कविं नौमि ॥ ३० ॥

विहितेति । शक्रायुधमिव । विहिता घना बहवोऽलंकारा उपमादयो येन तम् । पक्षे विहितमेघालंकरणम् । विचित्राणां वर्णानामक्षराणां यावली तत्प्रचुरं स्फुरणं स्फूर्तिर्यस्य तम् । पक्षे वर्णा नीलपीतादयस्तत्पङ्क्तिर्विकारः स्फुरणमुत्पत्तिर्यस्य तम् । वक्रं वक्रोक्तिकुशलम् । पक्षे यथाश्रुतम् । वल्मीकभुवं वाल्मीकिम् । शक्रधनुषोऽपि तत एवोत्पत्तिरिति लौकिकम् । कविं काव्यकर्तारं नौमि । रूपकमत्रालंकारः ।।

व्यासगिरां निर्यासं सारं विश्वस्य भारतं वन्दे ।
भूषणतयैव संज्ञां यदङ्कितां भारती वहति ॥ ३१ ॥

व्यासेति । व्यासवचसां निर्यासम् । एवं च तत्त्वार्थवत्त्वं सरसत्वं च व्यज्यते । विश्वस्य जगतः सारम् । एवं चेत उत्पन्नपुरुषार्थसाधनत्वं ध्वन्यते । एतादृशं भारतं वन्दे । यदङ्कितां भारतचिह्नितां संज्ञां भूषणतयैव भारती सरस्वती वहति । एवं च भारत्या भूषणरूपतन्नामप्रसिद्धनामवत्त्वप्रतिपादनेन सर्वग्रन्थाधिकत्वमावेद्यते भारते । एवकारेण स्वाभाविकत्वव्युदासः । अन्योऽप्यप्रसिद्धः प्रसिद्धस्य कस्यचिन्नाम्ना प्रसिद्धो भवतीति लौकिकम् । भारतकर्तृत्वेन व्यासस्तुतिरित्यवधेयम् ॥

सति काकुत्स्थकुलोन्नतिकारिणि रामायणे किमन्येन ।
रोहति कुल्या गङ्गापूरे किं बहुरसे वहति ॥ ३२ ॥

सतीति । काकुत्स्थानां कुलम् । तदुन्नतिकारिणि । कुलपदेन सर्वेषामप्युन्नतिसंपादनेन शतकोटिप्रविस्तरत्वं तेन च बहुतरप्रमेयवत्त्वं च व्यज्यते । बहुरसे प्रभूतशृङ्गारादिरसशालिनि । पक्षे बहुजलवति । एवं च तापापनोदकत्वं व्यज्यते । अत एवैतादृशरामायणे सत्यन्यकाव्येन किम् । तेन गतार्थत्वादिति भावः । अत्र दृष्टान्तमाह—गङ्गापूरे वहति सति कुल्याल्पा कृत्रिमा सरित्किं रोहति । काङ्क्षा नेत्यर्थः । न चित्तपथमवतरतीति भावः ॥

अतिदीर्घजीविदोषाद्व्यासेन यशोऽपहारितं हन्त ।
कैर्नोच्येत गुणाढ्यः स एव जन्मान्तरापन्नः ॥ ३३ ॥

अतीति । अत्यन्तदीर्घजीवित्वदोषात् । चिरकालजीवित्वरूपदोषादित्यर्थः । अतिचिरजीवित्वस्यान्यत्र गुणत्वेऽप्यत्र दोषत्वमिति भावः । दोषपदं परिहरणीयत्वं व्यञ्जयति । व्यासेन यशः । हन्त इति खेदे । अपहारितम् । यशःपदमत्यन्तसंरक्षणीयत्वं व्यञ्जयति । अत एव खेदौचित्यम् । एतदेवाह—स एव व्यास एव जन्मान्तरमापन्नो गुणाढ्यो बृहत्कथाकर्ता कैर्नोच्येत । अपि तु सर्वैरित्यर्थः । एवं गुणाढ्यव्यवहारे व्यासस्य

चिरजीवित्वमेव प्रतिबन्धकं संवृत्तमिति भावः। एवं चैतादृग्यशसि स्पृहा न कृता, किं तु चिरजीवित्व इति महन्मूर्खत्वमावेद्यते व्यासे। तेन च व्यासाधिक्यत्वं गुणाढ्ये ॥

श्रीरामायणभारतबृहत्कथानां कवीन्नमस्कुर्मः।
त्रिस्रोता इव सरसा सरस्वती स्फुरति यैर्भिन्ना ॥ ३४ ॥

श्रीति। वाल्मीकिव्यासगुणाढ्यान्नमस्कुर्मः। यैर्वाल्मीक्यादिगुणैर्भिन्ना। विलक्षणरीत्यनुसरणादिति भावः। सरसा शृङ्गारादिमती। पक्षे सजला। वाणी सती नदीव त्रिस्रोता गङ्गेव। स्वर्गमृत्युपातालेषु प्रवाहवत्त्वाद्गङ्गायाः। एवं च वाल्मीक्यादिवाचां सकलकल्मषविनाशकत्वं द्योत्यते। स्फुरति। एवं च त्रितयवाचां वास्तवैकरूपत्वमेवेति व्यज्यते। तेन च वाल्मीक्यादित्रितयस्य समानत्वमावेद्यते। यद्वा वाल्मीक्यपेक्षया किंचिन्न्यूनत्वं व्यासे, ततो गुणाढ्य इति ध्वन्यते। पूर्वत्र श्रीपदं त्रिष्वप्यन्वेति, अत्र रामायणमात्रे ॥

साकूतमधुरकोमलविलासिनीकण्ठकूजितप्राये।
शिक्षासमयेऽपि मुदे रतलीलाकालिदासोक्तौ ॥ ३५ ॥

साकूतेति। साकूतं साभिप्रायम्, मधुरं रसोत्कर्षाधायकरसनिष्ठगुणवत्, कोमलं शब्दगुणशालि, एतादृशं यद्विलासशालिन्याः कण्ठकूजितं तत्प्राये। प्रायःशब्दः क्रमेण बाहुल्यसादृश्योपस्थापकः। रतलीलाकालिदासोक्तौ शिक्षासमयेऽपि मुदे। एवं चोभयोः समत्वमिति भावः। एवं च सर्वजनस्याप्युपदेशसमये बहुधा दुःखदत्वेन रतलीलाकालिदासोक्त्योः सुखप्रदत्वेन वाग्विलासाधिक्यं ध्वन्यते ॥

भवभूतेः संबन्धाद्भूधरभूरेव भारती भाति।
एतत्कृतकारुण्ये किमन्यथा रोदिति श्रावा ॥ ३६ ॥

भवेति। भवभूतेः शिवैश्वर्यस्य संबन्धाद्भारत्येव सरस्वत्येव भूधरभूर्नगेन्द्रकन्या भाति। एवं चाणिमादैश्वर्यान्तर्गतेच्छानभिघातरूपप्राकाम्याद्भारत्या नगेन्द्रकन्यारूपत्वम्। तथा भवभूतेः कवेः। एवं चेशैश्वर्याभेदबोधनेन स्वेच्छानुरूपकार्यकारित्वं व्यज्यते। संबन्धाद्भारत्येव भूधरभूः पर्वतभूमिः। एवं च नान्यथा शङ्कनीयत्वमिति भावः। भाति। अन्यथैतत्कृतकरुणरसप्रधाने 'अपि श्रावा रोदित्यपि दलति वज्रस्य हृदयम्' इत्युत्तरचरित्रीयपद्ये श्रावा शैलः। 'श्रावाणौ शैलपर्वतौ' इत्यमरः। किमिति रोदिति। यद्वा भवभूतेः संबन्धादित्यस्य भवैश्वर्याविनाभावादित्यर्थः। भूधरभूः शैलतनया भारती भाति। सरस्वतीरूपेण दृश्यत इत्यर्थः। एवं च यत्रेशैश्वर्यं तत्र शैलसुतयावश्यं स्थेयमिति नियमादीशैश्वर्यवति कवौ शैलसुता सरस्वतीरूपेणावस्थितेति भावः। एवं चैतत्कवेर्दक्षिणामूर्त्युपासकत्वं व्यज्यते। अत एव भवस्य शंभोर्भूतिरैश्वर्यं यस्मिन्निति नास्ति व्युत्पत्तिरपि संगच्छते। अथवा कवौ भवभूत्यभेदबोधनेन पार्वतीसत्त्वमावश्यकम्। विपक्षे तर्कमाह—अन्यथा। एतत्कृतकारुण्ये। एवं चान्यैर्बहुभिः करुणरसप्रधानानि

काव्यानि विहितानि, परं तु न तत्र शैलरोदनमिति भावः । ग्रावा किमिति रोदिति । एवं चैतत्कृतकारुण्ये जामातृसंबन्धेन शैलस्यापि रोदनमिति भावः । अथवा । भवभूतेः शिवैश्वर्यस्य संबन्धात् । तत्कृपात इत्यर्थः । भारती भूधरभूरेव । भूधर इति कविनाम । भवभूतिरिति 'गिरिजायाः कुचौ वन्दे भवभूतिसिताननौ' इति पद्यकरणोत्तरं पदवीनाम । तस्माद्भवत्वे दृश्येव जाता । एवं च सरस्वतीप्रचारस्तत एवेत्यन्यकविव्यतिरेको ध्वन्यते । नन्वेतत्कवेर्भूधरत्वे किं प्रमाणमत आह—अन्यथा । एतत्कवेर्भूधरत्वाभावे । एतत्कृतकारुण्ये ग्रावा पाषाणः कथं रोदिति । एवं चैतत्कृतकारुण्योत्तरकालीनपाषाणरोदनस्यैतत्संबन्धाभावेऽन्यथानुपपत्त्या कवौ भूधरत्वसिद्धिः । एवं च जन्यजनकभावसंबन्धाद्रोदने युक्तैव । एवकार इवार्थ इति केचित् ॥

जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि ।
प्रागल्भ्यमधिकमातुं वाणी **बाणो** बभूवेति ॥ ३७ ॥

जातेति । प्राक्पूर्वं यथा शिखण्डिनी द्रुपदपुत्री शिखण्डी द्रुपदपुत्ररूपा बभूव, तथा वाणी सरस्वत्यधिकप्रागल्भ्यप्राप्त्यर्थं बाणः कादम्बरीकर्तृरूपा बभूव । पवर्गतृतीयान्तस्थवकारयोरभेदादिति भावः । एवं च सरस्वतीतोऽधिकत्वं बाणे द्योत्यते । वस्तुतस्तु बवयोरैक्ये दोषाद्भेद एव ॥

यं गणयन्ति गुरोरनु यस्यास्ते धर्मकर्म संकुचितम् ।
कविमहमुशनसमिव तं तातं **नीलाम्बरं** वन्दे ॥ ३८ ॥

यमिति । यं गुरोः प्रभाकरात् । एवं च तत्र प्रभाकरतन्त्रनिपुणत्वं तातस्यावेद्यते । पक्षे बृहस्पतेः । अनु पश्चाद्गणयन्ति । यस्यास्ते नाशे । पक्षे सूर्यमण्डलसांनिध्येनादर्शने । धर्मकर्म संकुचितम् । तातसदृशस्यान्यस्य धर्मकर्मप्रवर्तकस्याभावादिति भावः । पक्षे मलमास इव शुक्रास्तेऽपि केषांचित्कर्मणां निषेधादिति भावः । यद्वा यस्य तातस्य धर्मकर्म । एवं चाधर्मकर्मणोऽभावो व्यज्यते । संकुचितं सम्यक् कौ पृथिव्यां चितं व्याप्तम् । आस्ते । एवं च कर्मठत्वेन सर्वत्र तातप्रसिद्धिरिति भावः । यद्वा यस्याधर्मकर्मविषये संकुचितं संकोचः । भीतिरिति यावत् । आस्ते । कविं काव्यकर्तारम् । पक्षे तन्नामानम् । उशनसमिव शुक्रमिव । तं प्रसिद्धं तातं नीलाम्बराभिधं वन्दे ॥

सकलकलाः कल्पयितुं प्रभुः प्रबन्धस्य कुमुदबन्धोश्च ।
सेनकुलतिलकभूपतिरेको राकाप्रदोषश्च ॥ ३९ ॥

सकलेति । प्रबन्धस्य चतुःषष्टिकलाः । कुमुदबन्धोश्चन्द्रस्य च षोडशकलाः । क-

१. सेनकुलं कायस्थकुलं वङ्गदेशप्रसिद्धम्. तत्तिलकायमानो भूपतिर्लक्ष्मणसेनः. यत्सभायां गोवर्धनाचार्य आसीत्. न तु सेतुबन्धकाव्यकर्ता कश्मीरमहाराजः प्रवरसेनः. स तु क्षत्रियकुलावतंस आसीदिति राजतरङ्गिण्यां स्फुटमेव.

ख्यापयितुं वक्तुं कर्तुं वा । पक्षे दर्शयितुम् । सेनकुलतिलकभूपतिः सेतुकर्ता प्रवरसेननामा राजा । पौर्णमासीप्रदोष एकः प्रभुः समर्थः । नान्य इत्यर्थः ॥

काव्यस्याक्षरमैत्रीभाजो न च कर्कशा न च ग्राम्याः ।
शब्दा अपि पुरुषा अपि साधव एवार्थबोधाय ॥ ४० ॥

काव्यस्येति । अक्षराणां वर्णानां मैत्रीमेकवर्गपठितत्वादिरूपाम् । एकस्थानकत्वे सत्येकप्रयत्नकत्वरूपां वा । भजति तस्य । एवं च बन्धविशेषशालित्वं व्यज्यते । पुरुषविशेषणमप्यक्षरमैत्रीभाज इति । काव्यस्य योजनाविशेषवच्छब्दार्थोभयस्य । अर्थबोधाय । कर्कशाः श्रुतिकटवः । तेषां रसापकर्षकत्वादिति भावः । पक्षे क्रूरमतयः । एवं च परोक्तिखण्डनमात्रनिपुणत्वं च व्यज्यते । न च ग्राम्या अविदग्धप्रयुक्ताः । एवं च चारुत्वाभावो व्यज्यते । पक्षे ग्राममात्रवासिनः । एवं च काव्यवासनावासितान्तःकरणत्वाभावो ध्वन्यते । शब्दा अपि पुरुषा अपि । किं तु साधव एव । व्याकरणसिद्धा एव । असाधुत्वज्ञानस्यार्थबोधप्रतिबन्धकत्वात् । पक्षे निर्मलमतय एव । एवं चार्थप्रतिबिम्बभवनयोग्यत्वं द्योत्यते । यद्वा काव्यार्थवासनाशालिन इत्यर्थः । एवं चान्येषां काव्यबोधानर्हत्वमिति भावः ॥

वंशे घुण इव न विशति दोषो रसभावितें सतां मनसि ।
रसमपि तु न प्रतीच्छति बहुदोषः संनिपातीव ॥ ४१ ॥

वंश इति । वंशे वेणौ घुण इव कीट इव रसभाविते शृङ्गारादिभावनावति । पक्षे जलातिशयसंबन्धवति । औषधीद्रवलेपवतीति कश्चित् । सतां मत्सररहितानां सहृदयानां वा मनसि । मनसीत्येकवचनेन समीचीनमनसामेकव्यसनशालित्वं ध्वन्यते । दोषो न विशति । एवं च सुतरामवस्थित्यभावो द्योत्यते । बहुदोषो दोषैकदक् । पक्षे 'क्षणे दाहः क्षणे शीतमस्थिसंधिशिरोरुजः' इत्यादिबहूपद्रववान् । संनिपातीव युगपत्प्रकुपितवातपित्तादिमान् । रसमपि शृङ्गारादिकमपि । एवं चावश्येच्छायोग्यत्वं व्यज्यते । पक्षे मृगाङ्कादिकमपि । एवं च का वार्ता क्वाथादेरिति भावः । न प्रतीच्छति न गृह्णातीति किं वक्तव्यमिति भावः ॥

विगुणोऽपि काव्यबन्धः साधूनामाननं गतः स्वदते ।
फूत्कारोऽपि सुवंशैरनूद्यमानः श्रुतिं हरति ॥ ४२ ॥

विगुण इति । विगुणोऽपि ये ये काव्ये गुणास्तदन्यतमशून्योऽपि । काव्यबन्धः । अत्र बन्धपदमधिकमाभाति । यद्वा बन्धो रचनामात्रम् । साधूनाम् । एवं च गुणवत्तासंपादनकर्तृत्वं ध्वन्यते । स्वदते सुखसंपादको भवति । सुवंशैः सरलवेणुभिरनूद्यमानः । एवं चानुवादसंपादनेऽपि सुजनदुर्जनयोरन्तरं भवतीति भावः । फूत्कारोऽपि । एवं च सुखाजनकत्वं ध्वन्यते । श्रुतिं हरति श्रवणसुखसंपादको भवति ॥

स्वयमपि भूरिच्छिद्रश्चापलमपि सर्वतोमुखं तन्वन् ।
तितउस्तुषस्य पिशुनो दोषस्य विवेचनेऽधिकृतः ॥ ४३ ॥

स्वयमिति । स्वयं भूरिच्छिद्रोऽपि बहुवाच्योऽपि । एवं च स्वदोषेषु दर्शनयोग्यत्वेऽपि तद्दर्शनाभावेन भ्रान्तत्वमावेद्यते । पक्षे बहुरन्ध्रोऽपि । सर्वतोमुखं सकलजनसमक्षम् । पक्षे सर्वदिग्विषयम् । चापलं मौखर्यम् । एवं च जनभीतिशून्यत्वं ध्वन्यते । पक्षे चाञ्चल्यम् । तन्वन्विस्तारयन् । एवं च विरत्यभावो ध्वन्यते । तितउः । 'तितउर्नौ चालनी स्त्रियाम्' इत्यभिधानम् । पिशुनः परोत्कर्षासहिष्णुः । विवेचने निर्णये । पक्षे स्वीकारे । अधिकृतो दत्ताधिकारः । एवं च गुणादिकं विहाय दोषमात्राङ्गीकर्तृत्वं दुष्टानामिति भावः ॥

अन्तर्गूढानर्थानव्यञ्जयतः प्रसादरहितस्य ।
संदर्भस्य नदस्य च न रसः प्रीत्यै रसज्ञानाम् ॥ ४४ ॥

अन्तरिति । अभ्यन्तरं गूढं स्थितान् । पक्षे निलीनान् । अर्थान्प्रतिपाद्यविषयान् । पक्षे पदार्थान् । अव्यञ्जयतो व्यञ्जनाविषयानकुर्वतः । पक्षेऽप्रकाशयतः । अत एव प्रसादेन काव्यगुणेन । पक्षे निर्मलतया । रहितस्य । संदर्भस्य काव्यस्य । नदस्य च । पुंस्त्वनिर्देशेन निर्मलत्वस्यावश्यापेक्षणीयत्वमित्यावेद्यते । यद्वा नदत्वेन विरलतया तत्तुल्यप्रतिपादनात्काव्येऽतिविरलत्वमावेद्यते । उक्तं हि [आनन्दवर्धनेन]—'द्वित्रा एव कवयो द्वित्राण्येव काव्यानि' इति । रसः शृङ्गारादिः । पक्षे जलम् । रसज्ञानाम् । एवं चान्येषां प्रीत्यजनकत्वेऽपि न काचित्क्षतिरिति भावः । प्रीत्यै न ॥

यदसेवनीयमसतामसृतप्रायं सुवर्णविन्यासम् ।
सुरसार्थमयं काव्यं त्रिविष्टपं वा समं विद्मः ॥ ४५ ॥

यदिति । यदसतां सहृदयभिन्नानाम् । पक्षे पापवताम् । असेवनीयम् । अमृततुल्यम् । पक्षेऽमृतबहुलम् । सुवर्णानां शोभनाक्षराणां विन्यासो ग्रथनं यत्र । 'वर्णे तु चाक्षरे' इत्यमरः । पक्षे सुवर्णस्य हेम्नो विन्यासो रचनादि यत्र । शोभनरसार्थोभयप्रचुरम् । पक्षे । देवसमूहबहुलम् । काव्यं त्रिविष्टपं स्वर्गं वा समं विद्मः । एवं चात्र नान्यथाभाव आशङ्कनीय इति भावः । एवं च स्वर्गार्थं यथा सद्भिर्यत्नः क्रियते तथा काव्यार्थं विधेय इति व्यज्यते ॥

सत्कविरसनाशूर्पीनिस्तुषतरशब्दशालिपाकेन ।
तृप्तो दयिताधरमपि नाद्रियते का सुधा दासी ॥ ४६ ॥

सदिति । सत्कवेः । एवं चासत्कवेर्निरासः । रसनैव शूर्प्यल्पं शूर्पम् । 'प्रस्फोटनं शूर्पमस्त्री' इत्यमरः । यथा स्वल्पशूर्पेण निस्तुषता जायते न तथा महाशूर्पेणेति स्त्रीसंप्रदायः । तया निस्तुषतरो निर्दोषः शब्दरूपो यः शालिस्तत्पाकेन । परिणतनिर्दोषकाव्या-

स्वादेनेत्यर्थः । तृप्तो दयितायाः । एवं चातिस्पृहणीयत्वमधरे ध्वन्यते । अधरमप्यत्युत्कृष्टतां व्यञ्जयति । नाद्रियते का सुधा दासी । एवं च माध्वीकादेः कुत्र गणनेति भावः । एवं च सुधातोऽधरे, ततोऽपि सत्काव्येऽधिकत्वं ध्वन्यते । एवं च स्वर्गार्थं यत्नं विहाय काव्यार्थमेव स विधेय इति ध्वन्यते । अत्र च 'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली' इति दण्डिमतेनार्थविशेषविशिष्टशब्दस्यैव काव्यत्वमिति । प्रदीपकृन्मतेन च शब्दमात्रोपादानम् ॥

अकलितशब्दालंकृतिरनुकूला स्खलितपदनिवेशापि ।
अभिसारिकेव रमयति सूक्तिः सोत्कर्षशृङ्गारा ॥ ४७ ॥

अकलितेति । न कलिता शब्दस्यालंकृतिर्यया । अनुप्रासादिशब्दालंकृतिशून्येत्यर्थः । एवं चार्थालंकारादिमत्त्वं व्यज्यते । पक्षेऽकलितः शब्दो ययेतादृश्यलंकृतिर्भूषणं यस्याः । सशब्दभूषणवत्त्वेऽन्यस्य ज्ञानं भविष्यतीति धियेति भावः । अनुकूला द्रुतं रसप्रत्यायिका । पक्षे नायकचित्तानुकूल्यवती । स्खलितः पददाढर्यशून्यः । कोमल इति यावत् । पदानां सुप्तिङ्न्तानां निवेशो ग्रथनं यस्याः सा । एवं च गौडीरीतियुक्तेति ध्वन्यते । पक्षे स्खलितं स्थानादन्यत्र पतनम् । एवं च संकेतगमनं सत्वरमाधेयते । पदनिवेशश्चरणविन्यासः । यद्वानुकूलानि स्फुटमर्थप्रतीतिजनकान्यस्खलितानि व्याकरणनिष्पन्नानि । एवं च नेयार्थासाधुत्वशून्यत्वं द्योत्यते । यानि पदानि तत्संनिवेशवती । पक्षेऽनुकूलानि द्रुतं संकेतप्रापकानि स्खलनहीनानि यानि पदानि तद्विन्यासवती । अपिरनास्थायाम् । एवं च गुणदोषाभावयोः संपादनेनात्यन्तमाग्रह इति भावः । सोत्कर्षशृङ्गारोत्कर्षशालिशृङ्गाररसवती । पक्षेऽहमस्यायं ममेति रतिपरिपोषवती । अभिसारिकेवाभिसरणाभिसारणान्यतरवतीव । उक्तं च—'या चार्तामभिसरेत्कान्तं सारयेद्वाभिसारिका' इति । एवं च प्रेमातिशयो व्यज्यते । सूक्तिः काव्यम् । पक्षे शोभनोक्तिमती । रमयति । एवं च काव्ये शब्दालंकृतिदोषाभावसत्त्वसंपादनमप्रयोजकम् । अपि तूत्कृष्टशृङ्गारसंपादनमेवोचितमिति व्यज्यते । यद्वा शब्दालंकृतिशून्या सदोषपदविन्यासापि सोत्कर्षशृङ्गारा सूक्ती रमयति । शब्दस्य प्राधान्यात्तदलंकारस्यावश्यकत्वेऽपि तदभावे दोषराहित्यस्यावश्यकत्वेऽपि केवलोत्कृष्टशृङ्गारवत्त्वेनैव चमत्कारातिशयजनकत्वं काव्यस्येति भावः । एवं च शृङ्गारादिरसवत्त्वं काव्येऽवश्यमपेक्षितमिति व्यज्यते । अत एव 'नीरसो हि निबन्धो यः सोऽपशब्दो महाकवेः । स तेनाकविरेव स्यादन्येनास्मृतलक्षणः॥' इति ध्वनिकृता रसस्य प्राधान्यमभ्यधायि । एवं च सर्वरसप्रधानीभूतशृङ्गारवत्त्वमत्यन्तोत्कृष्टमिति तात्पर्यार्थः ॥

अध्वनि पदग्रहपरं मदयति हृदयं न वा न वा श्रवणम् ।
काव्यमभिज्ञसभायां मञ्जीरं केलिवेलायाम् ॥ ४८ ॥

अध्वनीति । अध्वनि व्यङ्ग्यार्थशून्यम् । यत्तु ध्वनिरुत्तमं काव्यं तद्धिन्नमित्यर्थ इति

दर्शी आचार्य

तन्न । गुणीभूतव्यङ्ग्यादेरपि हृदयाह्लादजनकत्वात् । पक्षे शिञ्जितशून्यम् । पदग्रहः पदग्रहणम् । अनुप्रासमात्रार्थं पदग्रहः परमुत्कृष्टो यत्र । पक्षेऽत्यन्तचरणसंलग्नम् । काव्यमभिज्ञसभायाम् । एवं चानभिज्ञसभायां हृदयाह्लादानन्दजनकत्वेऽपि न किंचित्फलमिति ध्वनितं भवति । हृदयं वा न मदयति, श्रवणं वा न मदयति । एवं च श्रोतुरुभयान्यतरदप्यानन्दं विषयान्तरस्फूर्तिशून्यं न करोतीति भावः । अत्र हृदयं श्रवणं वा न मदयतीत्येतावतैव सिद्धे द्वितीयः 'न वा' इत्यस्य न तथा प्रयोजनमाभाति । श्रवणं श्रोतुर्हृदयं वक्तुर्न मदयति । 'आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्' इत्याद्युक्तेरिति व्याख्याने वाकारद्वयनञ्द्वययोरानर्थक्यमाभाति । मञ्जीरं क्रीडाकाले न मदनाविर्भाववन्तं करोतीत्यर्थः । काव्यं हृदयं न मदयति मञ्जीरं श्रवणं न मदयतीति व्याख्यायां वाकारद्वयमनर्थकमाभाति । अत्रेदमवधेयम्—व्यङ्ग्यार्थशून्यं काव्यमेव नास्ति । न च 'अव्यङ्ग्यं त्ववरं स्मृतम्' इत्युक्त्या व्यङ्ग्यात्यन्ताभाववत्यपि काव्यत्वमस्तीति वाच्यम् । तदुदाहरणे 'स्वच्छन्द–' इत्यादि पद्ये मन्दाकिनीविषयकरत्याख्यभावादिव्यङ्ग्यस्य सत्त्वात् । किं बहुना । 'स कोऽपि विषयो नास्ति यत्र व्यङ्ग्यं न भासते । समयादेर्विशेषस्य ह्यभावे हेतुता मता ॥' अत एव 'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थितेः । उभे काव्ये तदन्यद्यत्तच्चित्रमभिधीयते ॥' इति ध्वनिकृता [श्रीमदानन्दवर्धनाचार्येण] अभ्यधायि । यद्वा काव्यं काव्यत्वाभिमतम् ॥

आस्वादितदयिताधरसुधारसस्यैव सूक्तयो मधुराः ।
अकलितरसालमुकुलो न कोकिलः कलमुद्गिरति ॥ ४९ ॥

आस्वादितेति । आस्वादितः । न तु पीतः । एवं चाधरपानेऽत्यन्ताधरपाने वा कीदृङ्माधुर्यमुत्पत्स्यत इति न विद्म इति भावः । दयिताधररूपसुधारसो येन तस्यैव । एवं च नान्यस्येति भावः । यद्वा मधुरा एवेति योज्यम् । एवं चामधुराणां व्यवच्छेदः । यद्वास्वादितो दयिताधरसुधारसो येन तस्यैव । एवं च नृदेहेन दयिताधरपानं विधाय पश्चाद्देवरूपेणामृतं निपीयैतदुभयाधिकतररसवत्काव्येच्छया कविर्भवतीति भावः । एवं च दयिताधरास्वादादेर्हेतुत्वप्रतिपादनादवाप्तकार्यस्य कारणेऽनादरवत्काव्यास्वादवतः सकलविषयास्वादमौलिभूतदयिताधररसास्वादादावप्यनादर इति द्योत्यते । एवं च काव्यास्वादे ब्रह्मरसरूपता द्योत्यते । सूक्तयः काव्यानि । मधुराः । एवं च दयिताधरसुधारसयोरधिकतरत्वस्य काव्यसामान्येऽभिधानेन तद्विशेषोत्तमकाव्येऽत्यन्तविशेषस्ततो ध्वन्यते । अत्र दृष्टान्तमाह— अनास्वादितचूतमुकुलः । मुकुलपदेन रससंभृतत्वं व्यज्यते । कोकिलः कलं मधुरं न वदति । यद्वा सूक्तय उत्तमकाव्यानि ॥

बालाकटाक्षसूत्रितमसतीनेत्रत्रिभागकृतभाष्यम् ।
कविमाणवका दूतीव्याख्यातमधीयते भावम् ॥ ५० ॥

बालेति । लोकव्यवहारज्ञानस्य काव्यहेतुत्वमित्याह—बालायाः कटाक्षेण सूत्रितम् ।

सूचितमित्यर्थः । एवं च लज्जावत्त्वेन प्राकृव्यसंपादनायोग्यत्वम् । अत्र बालापदेनाल्पवयस्काभिधीयते । न स्वीयाभेदरूपा । असतीत्याद्यर्थविरोधात् । सख्या असतीत्वेऽपि नायिकायाः स्वीयत्वाक्षतिरित्यपि केचित् । असत्या नेत्रत्रिभागेण बहुलनेत्रव्यापारेण कृतभाष्यम् । कृतकिंचित्प्राकृव्यम् । दूतीव्याख्यातम् । दूत्या वचनवृत्त्याभिहितम् । भावमभिप्रायम् । कविमाणवकाः कवयो माणवका इव । एवं चाज्ञत्वं द्योत्यते । अधीयते । एवं चातितीक्ष्णमतिभिः सूत्रेण ततोऽल्पमतिभिर्व्याख्यानेन यथावबुद्धयते ग्रन्थादि तथा तीक्ष्णमतिभिः कैश्चित्कविभिः स्वल्पव्यवहारज्ञानेन ततोऽल्पमतिभिरधिकतरज्ञानेन काव्यं क्रियत इति व्यवहारज्ञानं न कुत्रापि व्यभिचरतीति ध्वन्यते । यद्वान्यप्रमेयहरणशीलान्कवीन्निन्दति । दूतीव्याख्यातमित्यनेनैतस्मात्पदादयमर्थो बोध्य इति नियमसहायशक्तिविषयमिति व्यज्यते । शक्तेरतिस्थूलमतिविषयत्वात् । असतीनेत्रत्रिभागकृतभाष्यमित्यनेन जघन्यलक्षणावृत्तिविषयमिति द्योत्यते । लक्षणावृत्तेः किंचित्स्थूलमतिविषयत्वात् । बालाकटाक्षसूत्रितमित्यनेन व्यञ्जनावृत्तिविषयमिति व्यज्यते । व्यञ्जनावृत्तेरतिसूक्ष्ममतिविषयत्वात् । भावमर्थम् । अर्थादन्यकविनिबद्धम् । येऽधीयते स्वकाव्यविषयीकुर्वन्ति न ते कवयः । किं तु तेषु ते बालाः । मूर्खा इत्यर्थः । एवं च परकाव्यस्पृष्टवाच्यलक्ष्यव्यङ्ग्यार्थास्पर्शित्वं स्वकाव्यस्य ध्वन्यते । यद्वा बालाकटाक्षसूचनादिव्यापारप्रकटनार्थस्य कविमाणवककाव्यविषयत्वं कवीनां त्वत्यन्तनिगूढार्थोऽपि काव्यविषय इति स्वग्रन्थेऽपि निगूढार्थविषयत्वं ध्वन्यते । अथवा कवयः सर्वे बालका इव । एवं च बालाकटाक्षसूत्रितमित्यादिना नायिकया स्वेच्छया प्रकटीकृतभावस्याभिज्ञत्वं कवीनाम् । न तु तदन्तर्गताभिप्रायज्ञानवत्त्वमिति नायिकाधिक्यवर्णनेन तद्विषयशृङ्गारवर्णनं सर्वरसवर्णनापेक्षया कठिनतरमिति व्यज्यते । तद्वत्त्वेन स्वग्रन्थाधिक्यं च । अत एव 'शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धनस्पर्धी कोऽपि न विश्रुतः' इत्यभाणि जयदेवेन ॥

स्वकीर्त्यनुवृत्तये स्वनाम दर्शनेवेतरार्यावैलक्षण्यं स्वार्यास्वाह—

मसृणपदरीतिगतयः सज्जनहृदयाभिसारिकाः सुरसाः ।
मदनाद्र्योपनिषदो विशदा गोवर्धनस्यार्याः ॥ ९१ ॥

मसृणेति । मसृणानां स्निग्धानाम् । कोमलानामिति यावत् । पदानां विभक्त्यन्तानां रीतिर्वैदर्भ्यादिस्तस्या गतिः प्राप्तिर्यासु ताः । तद्वत्य इत्यर्थः । पक्षे कोमलचरणविन्यासशालिगतयः । मन्थरगतय इत्यर्थः । सज्जनहृदयमनुसरन्ति । एवं च सहृदयहृदयसमधिगम्यार्था इति भावः । एवं च दुर्हृदयानामत्र नाधिकार इति ध्वन्यते । पक्षे सज्जनस्य हृदयमभिसारयन्ति । स्वाधीनताभाजनं कुर्वन्ति ताः । सुष्ठु रसः शृङ्गारादिर्यासु ताः । पक्ष आसक्तिविशेषवत्यः । मदनाद्रेतोपनिषदः । उपनिषद इत्यनेन मदनोद्दीपकतातिशयशालित्वमावेद्यते । पक्षे संनिधिमदनसत्त्वोक्त्या तस्मिन्नाज्ञाकारित्वं

ध्वन्यते । विशदाः । प्रसादरूपगुणवत्यः । पक्षे उज्वलवेषाः । आर्याः । आर्या इति च्छन्दोनाम । पक्षे श्रेष्ठाः । गोवर्धनस्य । गोवर्धन इति कविनाम ॥

वाणी प्राकृतसमुचितरसा बलेनैव संस्कृतं नीता ।
निम्नानुरूपनीरा कलिन्दकन्येव गगनतलम् ॥ ९२ ॥

वाणीति । वाणी । प्राकृतकाव्ये सम्यगुचितो रसो यस्याः । एतादृश्येव बलेन बलात्कारेण । पक्षे बलरामेण । एवकारोऽत्रैवान्वेति । संस्कृतं नीता । निम्नानुगामिस्वभावजला कालिन्दी गगनतलमिव । एवं च प्राकृतकाव्ये सुरसतासंपादनं सुगमतरम्, संस्कृतकाव्ये तत्कठिनतरमिति द्योत्यते । तेन स्वयं तत्संपादनेन स्वस्मिन्नाधिक्यमावेद्यते । यद्वा वाण्याः स्वभाव एवायं यत्प्राकृतकाव्ये सरसतामाप्नोतीति प्राकृतकाव्यकरणादर एव समुचितः, तथापि संस्कृतकाव्य एवादरो मया विहितस्तत्र कदाचिद्यदि तथाविधसुरसताभावो भविष्यति स च तत्रभवद्भिः क्षन्तव्य इति ध्वन्यते । अथवा प्राकृतकाव्यसमुचितरसा वाणी प्राकृतसमुचितरसैव । प्राकृतानां साधारणजनानां समुचितः । सुखावह इत्यर्थः । रसो यस्याः । अतो बलेन प्राकृतसप्तशत्यादितिरस्कारेण संस्कृतं नीता । यद्वा प्राकृते साधारणजने सम्यगुचितः । अत्यन्त इत्यर्थः । रसः प्रीतिर्यस्याः । एतादृश्यपि बलात्कारेण संस्कृतं साधुरूपं प्रापिता । एवं च नीचाभिलाषिण्याः सद्वृत्ततासंपादनं पुरुषार्थं इति भावः । निम्नानुरूपनीरा कलिन्दकन्येव । एवं च विवेकशून्यत्वं ध्वन्यते । तेन नीचानुगामि रसशालितायोग्यत्वम् । गगनतलमत्युच्चदेशं नीता । एवं च प्राकृतसंस्कृतयोर्भूतलगगनतलतुल्यताप्रतिपादनेन प्राकृतात्संस्कृतेऽत्यन्ताधिक्यमावेद्यते ॥

आर्यासप्तशतीयं प्रगल्भमनसामनादृता येषाम् ।
दूतीरहिता इव ते न कामिनीमनसि निविशन्ते ॥ ९३ ॥

आर्येति । इयमार्याणां सप्तशती येषां प्रगल्भमनसाम् । यैः प्रगल्भमनोभिरित्यर्थः । एवं चाप्रगल्भमनोभिरादरेऽनादरे वा कृते न किंचित्फलमिति भावः । दूतीरहिता इव ते न कामिनीमनसि निविशन्ते । एवं चेतोऽन्यन्न किंचिच्चातुर्यजनकमिति व्यज्यते ॥

रतरीतिवीतवसना प्रियेव शुद्धापि वाङ्मुदे सरसा ।
अरसा सालंकृतिरपि न रोचते शालभञ्जीव ॥ ९४ ॥

रतरीतीति । रतरीतौ वीतं वसनं यस्याः सा । रसाविर्भावादिति भावः । एवं चालंकारभ्रंशादेः का वार्तेति भावः । प्रियेव शुद्धापि । अनुप्रासोपमाद्यलंकाररहितापि । वाणी संतोषाय । अत्र हेतुमाह—सरसा शृङ्गारादिमती । पक्षे शृङ्गाररसवती । रसशून्यालंकृतियुतापि । पक्षे कटककुण्डलयुतापि । शालभञ्जीव प्रतिमेव । न रोचते ।

१. हालापरनाम्ना सातवाहनकविना प्रणीतां प्राकृतगाथासप्तशतीमालोक्येयं सप्तशती श्रीगोवर्धनाचार्येण प्रणीतेति वाणीत्याद्यार्यया सूचितम.

एवं च रसस्य प्राणरूपत्वं ध्वन्यते । एवं च निरलंकारस्यापि काव्यत्वमिति मिश्ररुचिनाथमतेन । अत एव ताभ्यां 'मुनिर्जयति योगीन्द्रो महात्मा कुम्भसंभवः । येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥' इति निरलंकारोदाहरणमभ्यधायि । वस्तुतस्त्वेतदुभयोदाहृतपद्येऽपि सर्वालंकारमौलिमणिरूपातिशयोक्तिर्विद्यमानत्वात् । उक्तिवैचित्र्यरूपालंकारविरहे काव्यत्वस्यासंभवात् । 'काव्यं ग्राह्यमलंकारात्' इत्यलंकारस्य काव्यव्यवहारप्रयोजकत्वाभिधानाच्च । रसवति काव्ये स्फुटालंकाररहित्येऽपि न चमत्कारहानिरिति रसवत्त्वस्याधिक्यप्रतिपादनमात्रे तात्पर्यम् । 'अकलित–' इत्यादि पद्ये शृङ्गारोत्कर्षमात्रस्य प्राधान्यमित्यर्थः । अत्र तु रसमात्रस्य तदिति भावः ॥

इति श्रीमद्गोदावरीपरिसरालंकृतपुण्यस्तम्भस्थितिविराजमाननीलकण्ठपण्डिततनूजबालोपण्डितात्मजतिमाजीपण्डिताङ्गजानन्तपण्डितविरचितगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपने ग्रन्थारम्भोचितव्रज्याव्याख्या समाप्ता ।

अकारव्रज्या ।

कश्चिद्यौवनभराक्रान्तां प्रपापालिकामालोक्य तां प्रत्याह—

अवधिदिनावधिजीवाः प्रसीद जीवन्तु पथिकजनजायाः ।
दुर्लङ्घ्यवर्त्मशैलौ स्तनौ पिधेहि प्रपापालि ॥ १ ॥

अवधीति । प्रपा जलदानस्थानं तद्रक्षणकर्त्रि । एवं च धार्मिकत्वं व्यज्यते । तेन च पथिकजनजाया न हन्तव्येत्युपदेशदानयोग्यत्वम् । जीवनरक्षणकर्त्र्या जीवनविनाशकर्त्रीत्वमनुचितमिति वा व्यज्यते । प्रसीद । एवं च बलात्कारानर्हत्वं ध्वन्यते । किं प्रसन्नतायाः फलमित्यत आह—स्तनौ पिधेहि । मार्गान्तरेणानेनैव वा मार्गेण झटिति कुतो न गम्यत इत्यत्र हेतुगर्भं विशेषणमाह—दुर्लङ्घ्यौ च तौ वर्त्मशैलौ च । एवं च मार्गान्तराभावादुल्लङ्घयितुमशक्यत्वाच्चैतत्पिधानमावश्यकमिति द्योत्यते । किं पिधानफलमत आह—अवधिदिनावधि जीवो जीवनं यासां ताः पथिकजनजाया जीवन्तु । एवं च त्वत्कुचकनकमहीधरदर्शनलुब्धैः पथिकैरत्रैव कालातिवाहने कृतेऽवधिदिनातिक्रमे तत्कामिनीजनस्य मरणमेव भविष्यतीति भावः ॥

कृतपरिणयान्तरं नायकमसूयमानां नायिकां काचिदुपदिशति—

अतिवत्सला सुशीला सेवाचतुरा मनोऽनुकूला च ।
अजनि विनीता गृहिणी सपदि सपत्नीस्तनोद्भेदे ॥ २ ॥

अतीति । गृहिणी प्रथमस्त्री । सपत्नीस्तनप्रादुर्भावे सपदि । एवं च किंचिद्विलम्बे को वेद किं भविष्यतीति भीतिशालित्वं ध्वन्यते । अतिस्नेहवती । समीचीनस्वभावा । सेवानिपुणा । नायकमनोगतकारिणी नम्रा च । जाता । एवं च पूर्वं सपत्नीसंपादनदुःखवत्तया न्यूनस्नेहम्, सपत्नीतर्जनादिना दुःशीलताम्, इयमेव सेवां करिष्यतीति सेवा-

मौढ्यम्, अत एव मनःप्रातिकूल्यम्, किं करिष्यत्ययमतः परं ममेत्यविनीततामकरोत् । सपत्नीतारुण्योद्गमसमय एवायमस्यामत्यन्तासक्तः स्यादिति भियातिवात्सल्यादीति भावः । एवं च त्वयाप्येवं विधेयमतोऽधुनासूयादिकरणमनर्थकमिति द्योत्यते । यद्वा नायिकाक्लेशशालिनं कंचन कश्चिद्विवाहान्तरकरणमुपदिशति । एवं च सपत्न्यां जातायामियमवश्यमत्यन्तानुकूल्यमाचरिष्यतीति ध्वन्यते । काचित्कस्याश्चिद्वृत्तं वक्तीति ऋजवः ॥

कश्चिद्वृद्धोन्मादवतीं निजकुलद्वेषिणीमन्योक्त्या वक्ति—

अयि कूलनिचुलमूलोच्छेदनदुःशीलवीचिवाचाले ।
बकविघसपङ्कसारा न चिरात्कावेरि भवितासि ॥ ३ ॥

अयीति । अयि । कूलनिचुलस्तीरवृक्षः । यद्वा 'निचुलोऽम्बुजः' इत्यमराद्वृक्षविशेषः । एवं च तत्प्रतिपालनमुचितमित्यावेद्यते । तस्य यन्मूलोच्छेदनम् । एवं चासह्यत्वं ध्वन्यते । तत्र दुःशीलास्तत्कारिण्यो लक्ष्यन्तेऽभिः कुत्सितबहुभाषिणि । कावेरि । बकस्य । न तु हंसादेः । विघसो भोजनशेषो यः पङ्कः । क्षुद्रमत्स्यादेर्बकभुक्तत्वादिति भावः । स एव सारो यस्याः । न चिरात् । शीघ्रमेव । भवितासि । एवं च परोपकारकारकस्य स्वकुलप्रभवस्योन्मादवशान्मम दुःखं ददासि तत्ते दुष्टभोजनावशेषद्रव्यं शीघ्रमेव गमिष्यतीति ध्वन्यते ॥

काचिन्नायिका परपुरुषसंगमाय प्रलोभकारिणीं दूतीं प्रत्याह—

अयि विविधवचनरचने ददासि चन्द्रं करे समानीय ।
व्यसनदिवसेषु दूति क्व पुनस्त्वं दर्शनीयासि ॥ ४ ॥

अयीति । हे दूति । एवं च स्वकार्यमात्रसंपादकत्वम्, न त्वन्यदीयाग्रिमाकार्यविचारकारित्वमिति द्योत्यते । नानाप्रकारशालिवचनरचने । एवं च प्रलोभनकारित्वम्, वञ्चनानिपुणत्वम्, विश्वासानर्हत्वम्, उत्तरप्रत्युत्तरकरणानर्हत्वं च ध्वन्यते । चन्द्रं समानीय करे ददासि करगोचरं करोषि । असंभाविनमप्यर्थं जातप्रायं कृत्वा प्रदर्शयसीति भावः । व्यसनमपकीर्त्यादि । तत्काले त्वं कुत्र दर्शनीयासि । एवं च त्वया घटनामात्रं कर्तुं शक्यम्, न त्वपकीर्त्यादिनिवारणमिति भावः । यद्वा भाविवियोगभीता नायिका संघटनमात्रकारिणीं दूतीं प्रत्याह । विविधवचनरचने इत्यनेन दुष्प्रापोऽपि नायकस्त्वया समानेतुं शक्य इति द्योत्यते । चन्द्रमित्यनेनाह्लादजनकतयावश्यस्पृहणीयत्वमावेद्यते । व्यसनम् । वियोगदुःखदत्वादिति भावः । त्वं कुत्र दर्शनीयासि । एवं चाग्रे यथा वियोगो न भविष्यति तथा यदि त्वया कर्तुं शक्यं तर्हि त्वदुदीरितं संपादयामीति द्योत्यते ॥

अपकीर्त्यादिना स्वपरित्यागं संभावयन्तीं नायिकां दूती समाधत्ते—

अस्तु म्लानिर्लोको लाञ्छनमपदिशतु हीयतामोजः ।
तदपि न मुञ्चति स त्वां वसुधाच्छायामिव सुधांशुः ॥ ५ ॥

अस्त्विति । म्लानिर्निस्तेजस्कत्वमस्तु । जनो लाञ्छनमपवादम् । पक्षे कलङ्कम् । वदतु । ओजः । यद्वशात्सर्वेऽपि बिभ्यति । पक्षे प्रसादविशेषः । हीयताम् । तदपि स नायकः । सुधांशुर्भूछायामिव । एवं च त्यागानर्हत्वं ध्वन्यते । पक्षे सुधांशुतुल्यः । एवं च स्पृहणीयत्वमावेद्यते । त्वां न मुञ्चति त्यक्ष्यति । यद्वा पूर्वोत्तरमेतत् ॥

मामियं दुर्वचनैर्दुःखयतीति वादिनं नायकं प्रति नायिकासखी तवैवायमपराधो न त्वस्या इति वक्ति—

अतिचापलं वितन्वन्नन्तर्निविशन्निकामकाठिन्यः ।
मुखरयसि स्वयमेतां सद्वृत्तां शङ्कुरिव घण्टाम् ॥ ६ ॥

अतीति । अन्तर्निविशन्हृदयमध्ये प्रविशन् । तया स्वान्ते धृतोऽपीत्यर्थः । यद्वा प्रथमतः साधुत्वं प्रदर्श्य हृदयं प्रविश्यैतादृशाचरणं करोषीत्यत्यन्तानुचितकारित्वं तवेत्यर्थः । पक्षेऽन्तर्मध्ये । अतिचापलमन्यनायिकासंभोगादिरूपम् । पक्षे निरन्तरसंयोगविभागरूपं विस्तारयन् । एवं चाज्ञानक्षमानर्हत्वं द्योत्यते । निकाममत्यन्तं काठिन्यं कठिनत्वं यस्य सः । एवं च चापल्यसंपादनेऽपि नम्रत्वं न करोषीति दुःखदस्त्वमसीति द्योत्यते । पक्षे काठिन्यमवयवसंनिवेशविशेषः । यद्वान्तः सदनमध्ये । एवं बहिःस्थितौ चापल्यं करोषि, सदनमध्ये तु कार्कश्यमित्युभयतोऽपि दुःखदस्त्वमिति द्योत्यते । स्वयं त्वमेव । सद्वृत्तां सच्चरिताम् । एवं च तवासच्चरितं विलोक्यावश्यमेतस्या दुःखं भवतीति भावः । पक्षे समीचीनवर्तुलां लोहकीलो घण्टामिवैनां मुखरयसि । एवं च तवैवायमपराधो न तस्या इति भावः ॥

क्वचिद्यूनोः संकेतनिकेतनाभावादेव न संगम इति कश्चित्कंचिद्वक्ति—

अङ्गेषु जीर्यति परं खञ्जनयूनोर्मनोभवप्रसरः ।
न पुनरनन्तर्गर्भितनिधिनि धरामण्डले केलिः ॥ ७ ॥

अङ्गेष्विति । खञ्जनयूनोः परमुत्कृष्टं मनोभवस्य । एवं च सर्वत्र बाधाकारित्वं ध्वन्यते । प्रसर आधिक्यमङ्गेषु जीर्यति समाप्तं भवति । यद्वा परं केवलं जीर्यतीति योजना । परं तु नान्तर्गर्भितो निधिर्यत्रैतादृशे धरामण्डले केलिर्न । निधिमत्प्रदेश एव खञ्जनयोः संभोग इति प्रसिद्धिः । यद्वा सख्यत्यन्तगुप्तसंकेतं विना नैव कार्यं कार्यमिति नायिकामुपदिशति । खञ्जनयूनोरित्यादिना तिर्यग्जातिमत्तया विवेकशून्यत्वेऽपि प्रचुरतरमन्मथविकारवत्त्वेऽप्यत्यन्तगुप्तस्थलप्राप्तिं विना खञ्जनयोरपि न रतिस्तत्र किमु वाच्यं भवादृश्याः । समीचीनपरीक्षितसंकेतस्थलं विना रतिर्नोचितेति ध्वन्यते । यद्वा मन्मथविकलतया सद्यः संभोगमपेक्षमाणं नायकं नायिका वक्तीत्यपि प्रतिभाति ॥

१. 'तस्मिन्निधिर्भवति मैथुनमेति यस्मिन्' इति बृहत्संहिता (४५।१२). 'यत्रावनौ खञ्जनको विधत्ते रतं भवेत्तत्र महानिधानम्' इति वसन्तराजः (१०।२५).

कश्चित्कंचिदुपदिशति—

अन्धत्वमन्धसमये बधिरत्वं बधिरकाल आलम्ब्य।
श्रीकेशवयोः प्रणयी प्रजापतिर्नाभिवास्तव्यः॥ ८॥

अन्धत्वमिति। अन्धसमये क्रीडाकाले। अवलोकनानर्हत्वादिति भावः। अन्धभावम्। बधिरकाले क्रीडाकालीनव्रीडाकरवाक्यकाले। 'द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु' इत्यादिना रतारम्भकालेऽश्लीलपदाभिधानस्य कामशास्त्रेऽभिधानात्। बधिरभावमालम्ब्य। प्रजानां पतिः। एवं च महद्भिरप्येतादृशरीत्या स्थीयते तत्र का वार्तान्यस्येति भावः। श्रीकेशवयोः। एवं चैतादृशसंनिधिः स्नेहश्च दुष्प्राप इति ध्वन्यते। प्रणयी प्रीतिमान्। नाभिर्मध्यस्तत्र वसतिमान्। केशवनाभिवसतिमत्त्वाच्छ्रीकेशवयोः सुरतसमयेऽपि ब्रह्मणो मध्यवर्तित्वमिति भावः। यद्वा नाभौ सविधे वास्तव्यं यस्य। एवं चातिनैकट्यं ध्वन्यते। अथवा नाभिवसतिमान्। उभयोः प्रणयी जात इत्यर्थः। यद्वोभयोर्नित्यसांनिध्यात्प्रजापतावुभयसांनिध्यम्। एतेन नाभिरवयवविशेष इत्यर्थे केशवसंबन्धवत्त्वेऽपि श्रीसंबन्धाभाव इत्यपास्तम्। एवं च निकटवसतिमात्रं न पुरुषार्थः, किं तु प्रीतिविशिष्टनिकटवसतिरिति भावः। एवं च प्रभ्वादिसविधे प्रभ्वादिप्रीतिविशिष्टनिकटवसतिकामस्त्वमसि, तर्ह्यनयैव रीत्या तिष्ठेति ध्वन्यते॥

मूर्खसविधकृतपाण्डित्यमनवाप्ततत्फलतया खिन्नं कश्चिदन्योक्त्या समाधत्ते—

अयि कोषकार कुरुषे वनेचराणां पुरो गुणोद्गारम्।
यन्न विदार्य विचारितजठरस्त्वं स खलु ते लाभः॥ ९॥

अयीति। कोषकारः कीटविशेषः। वनेचराणाम्। एवं च कार्याकार्यविवेकविधुरत्वं ध्वन्यते। पुरः। गुणानां तन्तूनामुद्गिरणं कुरुषे। यद्विदार्य। एवं च पश्चात्प्रतीकारानर्हत्वं व्यज्यते। विचारितमुदरं यस्य सः। कुत एते गुणा निःसरन्तीति विचारणायेति भावः। त्वं नासि खलु स ते लाभः। एवं च मूर्खाणामग्रे गुणप्रकटनं न केवलमप्राप्तिकरम्, अपि त्वनर्थकरमिति ध्वन्यते॥

दूती नायिकाप्रेमातिशयं नायके वक्ति—

अगणितमहिमा लङ्घितगुरुरधनेहः स्तनंधयविरोधी।
इष्टाकीर्तिस्तस्यास्त्वयि रागः प्राणनिरपेक्षः॥ १०॥

अगणितेति। अगणितो महिमा कुलप्रतिष्ठा येन। महिमपदेनावश्यस्पृहणीयत्वं व्यज्यते। लङ्घितो गुरुः श्वशुरादिर्येन। तन्निषेधतिरस्कारादिति भावः। न विद्यते धनेच्छा यस्य। स्तनंधयोऽत्यन्तबालः। एवं चातिस्नेहार्द्रत्वं ध्वन्यते। तद्विरोधी। प्रसवोत्तरमचिरात्संभोगे स्तन्यहानिर्भवतीति लौकिकम्। इष्टेच्छाविषयीभूताकीर्तिर्यस्य। एवं चाकीर्तिभीतिशून्यत्वं ध्वन्यते। एतादृक्तस्यास्त्वयि रागः। प्राणनिरपेक्षः प्राणापेक्षाशून्यः। एवं चातिशयशालित्वं व्यज्यते॥

कृतापराधं समाधानायारब्धकपटं नायकं नायिका वक्ति—

अपराधादधिकं मां व्यथयति तव कपटवचनरचनेयम् ।
शस्त्राघातो न तथा सूचीव्यधवेदना यादृक् ॥ ११ ॥

अपराधादिति । अपराधादन्याङ्गनासंगमरूपात् । त्वद्द्वेषणार्थमेव तत्र गतमित्यादि-कपटवचनरचना मामधिकं व्यथयति । एवं च सत्यभाषित्वेऽपराधोऽपि क्षन्तुमर्हं इत्यावेद्यते । महतोऽपराधस्य नात्यन्तदुःखदत्वम्, अल्पायाः कपटवचनरचनायाः कथमत्यन्त दुःखदत्वमित्यत्र दृष्टान्तमाह—शस्त्राघातः । आघातपदेनासह्यत्वं व्यज्यते । न तथा व्यथयति यथा सूच्या व्यधः सीवनं तद्दुःखम् । एवं च सूचीकृतत्वेन नाल्पत्वमाशङ्क्यमिति भावः । यद्वा साधारण्येनोक्तिरियम् ॥

कयोश्चिद्गच्छतोरसतीकटाक्षितमेकं दृष्ट्वा परेण 'ज्ञातं सर्वमिदं मया' इत्युदीरिते 'न किंचित्त्वया ज्ञातुं शक्यम्' इत्यपरस्तं प्रत्याह—

असतीलोचनमुकुरे किमपि प्रतिफलति यन्मनोवार्ति ।
सारस्वतमपि चक्षुः सतिमिरमिव तन्न लक्षयति ॥ १२ ॥

असतीति । असत्या लोचयति तल्लोचनम् । एवं चेतस्ततः प्रसरणशीलत्वं ध्वन्यते । तद्रूपमुकुरे । मुकुरपदेन मङ्गलत्वेनावश्यदर्शनीयत्वं व्यज्यते । किमप्यनिर्वचनीयम् । मनोवार्ति । असत्या एवेति भावः । यद्वा किमपि न लक्षयतीति योजना । मनोवार्तीत्यनेनातिसूक्ष्मत्वम् । तेन च बहिः स्फुटीभावानर्हत्वं द्योत्यते । यत्प्रतिफलति तत्सारस्वतमपि चक्षुः । सरस्वतीयत्वेनातीतानागतवस्तुग्रहणयोग्यत्वं ध्वन्यते । सतिमिरमिव तिमिराख्यदोषदूषितमिव । न लक्षयति । सप्रकारं न वेत्तीति किं वाच्यमिति भावः । एवं च सारस्वतचक्षुषोऽप्येतादृशी गतिः, तत्र का वार्ता तवेति भावः । एवं चासतीलोचनव्यक्तीकृतमपि न ज्ञातुं शक्यम्, तत्र का वार्ता तच्चित्तगतमिति ध्वन्यते । यद्वा केवलं पण्डितं कटाक्षयन्तीमसतीमालोक्य तं प्रति काचिदन्या वक्ति । सारस्वतं ज्ञानरूपं चक्षुस्तं न लक्षयत्यपि । एवं च याथातथ्येन स्वरूपपरिचितिर्दूरापास्तेति भावः । एवं च कटाक्षितमपि न त्वया ज्ञायते । इत्यन्तर्जडत्वेन सर्वमपि त्वदीयाध्ययनमसत्कल्पमिति ध्वन्यते ॥

नायकदुर्वादकुपितां नायिकां सखी समाधत्ते—

अन्यमुखे दुर्वादो यः प्रियवदने स एव परिहासः ।
इतरेन्धनजन्मा यो धूमः सोऽगुरुभवो धूपः ॥ १३ ॥

अन्येति । अन्यस्याप्रियस्य मुखे यो दुर्वादो दुर्वचनम् । प्रियस्य दयितस्य मुखे स एव दुर्वाद एव । स एवेत्यनेनान्यूनानतिरिक्तत्वं ध्वन्यते । परिहासः सनिन्दरञ्जकं वाक्यम् । अत्र दृष्टान्तमाह—अगुरुभिन्नेन्धनजन्मा यो धूमः स रूपान्तरापन्नोऽगुरुसंभवो धूपः ।

एवं चायं न दौष्टयेन वदति, किं तु कुतुकेन । नातः कोपो विधेयस्त्वयेति ध्वन्यते । यद्वा साधारणोक्तिरियम् । अत्रैव विपरीतयोजनयाप्रियवदनविनिःसृतवचनं समीचीनमप्यसमीचीनमेवेति व्यज्यते । एवं च प्रेम्णो मुख्यत्वमावेद्यते । कथमेतदीयैतादृशवचनमाकर्ण्य तूष्णीं स्थीयते त्वयेति वादिनीं सखीं नायिका समाधत्त इति वार्थः ॥

दुष्टस्वभावं नायकं नायिकासखी वक्ति—

अयि सुभग कुतुकतरला विचरन्ती सौरभानुसारेण ।
त्वयि मोहाय वराकी पतिता मधुपीव विषकुसुमे ॥ १४ ॥

अयीति । सुष्ठु भाग्यं यस्य तत्संबुद्धिः । कथमन्यथैतादृशी नायिका त्वय्यासक्तेति भावः । कुतुकार्थम्, न तु लोभार्थमिति भावः । तरला । यद्वा सुभगस्य कुतुकेन तरला । सौरभं समधिकगुणवानिति कीर्तिः । तदनुसारेण विचरन्ती । एवं च त्वत्स्वभावस्य न तात्त्विकं ज्ञानं तस्या इति भावः । यद्वा सौरभानुसारेण स्वकीर्तिसंरक्षणपुरःसरं विचरन्ती । पक्षे सौगन्ध्यानुसारेण । विषकुसुमे । कुसुमपदेनावश्यफलजनकतायोग्यत्वं ध्वन्यते । मधुपीव । एवं च ज्ञानशून्यत्वं व्यज्यते । त्वयि वराकी । एवं च सरलत्वं ध्वन्यते । मोहाय दुःखाय । एवं चान्यफलाभावो द्योत्यते । पक्षे वैचित्र्याय । पतिता । एवं च दैववशादेतादृशं कार्यं तया कृतम्, त्वं चैतादृशाचरणशालीति दुःखातिशयो ध्वन्यते ॥

कस्याश्चित्सविधे कस्यचित्तरुणमहाजनस्य गमनसंभावनयान्यतरुणविरतावप्यतिजरद्वयोभिः सा भुज्यत इति कश्चित्कंचित्प्रत्याह—

अयि मुग्धगन्धसिन्धुरशङ्कामात्रेण दन्तिनो दलिताः ।
उपभुञ्जते करेणूः केवलमिह मत्कुणाः करिणः ॥ १५ ॥

अयीति । अयि । मुग्धः सुन्दरो यो गन्धगजः । यद्गन्धमात्रादेव गजाः पलायन्ते स गन्धगजः । तच्छङ्कामात्रेण । न तु दर्शनादिनेति भावः । दन्तयुक्ता गजा दलिता भग्नाः । पलायिता इत्यर्थः । मत्कुणा दन्तरहिताः करिणः केवलं करेणूर्हस्तिनीरुपभुञ्जते ॥

बहिः कृत्रिमातिशयलज्जावत्त्वेऽप्यत्यन्तदुष्टेयमिति काचित्कांचित्प्रति वक्ति—

अतिविनयवामनतनुर्विलङ्घते गेहदेहलीं न वधूः ।
अस्याः पुनरारभटीं कुसुम्भवाटी विजानाति ॥ १६ ॥

अतीति । अत्यन्तविनयेन वामनवत्तनुर्यस्याः । एवं च त्रिविक्रमावतारकर्मकरणसामर्थ्यमभिव्यज्यते । वधूर्गेहदेहलीं न लङ्घते । एवं च लज्जातिशयः सूच्यते । अस्याः पुनरारभटीं प्रौढिविशेषं कुसुम्भवाटी विजानाति । तत्रैतस्या निर्लज्जत्वं द्रष्टव्यमिति भावः । एवं च सदन एवं विनयं प्रदर्श्य गुर्वादिवञ्चनेन कुसुम्भवाट्यां कं कं न परपुरु-

षमुपभुङ्क्ष इति ध्वन्यते । यद्वा न केवलमेतस्या लज्जावत्त्वदर्शनमात्रेण* भवद्भिर्विश्वसितव्यमिति ध्वन्यते ॥

पररञ्जकगुणानामेव गुणत्वम्, न त्वरञ्जकानामित्याह—

अन्तर्गतैर्गुणैः किं द्वित्रा अपि यत्र साक्षिणो विरलाः ।
स गुणो गीतेर्यदसौ वनेचरं हरिणमपि हरति ॥ १७ ॥

अन्तरिति । येषु द्वित्रा अपि साक्षिणो विरलाः । एवं च बहुसाक्षित्वेऽत्यन्तप्राशस्त्यमिति भावः । तैरन्तर्गतै रञ्जनासमर्थैर्गुणैः किम् । न किंचित्फलमिति भावः । गीतेः स गुणः । एवं च गुणे गुणानङ्गीकारेऽपि पररञ्जकतया गीतेरपि गुणवत्ताव्यवहार इति भावः । यदसौ वनेचरम् । एवं च ग्रामसंबन्धाभावेन मधुरशब्दरसानभिज्ञत्वं ध्वन्यते । हरिणमपि । एवं च मनुष्याणां का वार्तेति भावः । हरति स्वाधीनताभाजनं करोति । यद्वा वनेचरमपि । एवं च नागरिकस्य का वार्तेति भावः । अथ च प्रकटीकृतगुणानामेव सार्थक्यम्, न त्वन्तर्गतानामिति भावः । यद्वा दूती नायकान्तरसंयोजनाय नायिकां वक्ति । अन्तर्गतानेककामकलाभिः । त्वदीयाभिरिति भावः । यत्र येषु गुणेषु द्वित्रा अपि । एवं च बहूनां का वार्तेति भावः । साक्षिणो विरलाः । गीतिरिव गीतिस्त्वत्प्रतिवेशिनी । तस्याः स गुणो यदसौ वनेचरं हरिणमपि हरति । एवं च तस्या एव कलाकलापः सार्थकः । याज्ञमपि रञ्जयति । एवं च त्वया स्वगुणाः परपुरुषसंगतिमन्तरानर्थका न विधेया इति ध्वन्यते ॥

नायिकासखी सपत्नीसखीं प्रति वक्ति—

अलुलितसकलविभूषां प्रातर्बालां विलोक्य मुदितं प्राक् ।
प्रियशिरसि वीक्ष्य यावकमथ निःश्वसितं सपत्नीभिः ॥ १८ ॥

अलुलितेति । यथास्थितसकलभूषणाम् । एवं च संभोगेऽवश्यं कस्यचिद्भूषणस्योपमर्दः संजात एव स्यात्, तस्मान्न सुरतं संजातमिति भावः । बालाम् । एवं च यौवनशालित्वेन द्वेषयोग्यत्वं प्रियस्य प्रीतियोग्यत्वं च ध्वन्यते । प्रातः । एवं च सुरताभावनिर्णययोग्यत्वं ध्वन्यते । विलोक्य । एवं च सम्यक्तया संभोगराहित्यनिर्णयवत्ता ध्वन्यते । सपत्नीभिः । एवं च द्वेषशालित्वं व्यज्यते । बहुवचनेन सर्वासामैकमत्ये नायिकायामुत्कर्षातिशयो ध्वन्यते । प्राङ् मुदितम् । संभोगविरहेण प्रियप्रेमराहित्यनिर्णयेनेति भावः । अथानन्तरं प्रियमस्तके यावकमलक्तकं वीक्ष्य निःश्वसितम् । प्रियप्रणामादिनापि नानया मानः परित्यक्त इति महत्सौभाग्यमस्या इत्यसूयया दुःखोद्रेकादिति भावः ॥

रात्रौ रतिसदने गमनेऽतिलज्जां नाटयन्तीं नायिकां सखी प्रातर्वक्ति—

अयि लज्जावति निर्भरनिशीथरतनिःसहाङ्गि सुखसुप्ते ।
लोचनकोकनदच्छदमुन्मीलय सुप्रभातं ते ॥ १९ ॥

अयीति । अयि लज्जावति । विपरीतलक्षणया लज्जाशून्ये । अत एव निर्भरमतिशयशालि निशीथे मध्यरात्रे । एवं च प्रातर्निद्राजननयोग्यत्वं द्योत्यते । यद्रतं तेन सालसाङ्गि सुखसुप्ते । एवं च क्लेशेन निद्रितं मयेति प्रतारणं कर्तुमशक्यमिति ध्वन्यते । लोचनकोकनदच्छदैम् । जागरशोणत्वात्कोकनदत्वेन निरूपणम् । अत्र च्छदपदमनुचितमित्याभाति, विकसनस्योत्पलधर्मत्वात् । वस्तुतस्तु गोलके कोकनदत्वारोपः । पक्ष्मयुक्तप्रदेशयोर्दलत्वारोपः । उन्मीलनं च विश्लेष इति न किंचिद्दूषणम् । 'रक्तोत्पलं कोकनदम्' इत्यमरः । उन्मीलय । ते सुप्रभातं भवतु । एवं च सुरात्रस्य जातत्वादेतावन्मात्रमाशास्यमिति भावः । एवं च यया रीत्या रात्रिरतिवाहिता तयैव रीत्या दिनमप्यतिवाहनीयमिति परिहासो व्यज्यते ॥

कश्चिदसमय एव रतमर्थयमानः कयाचिन्नायिकया रतचिह्नोत्पत्तिभिया तदीयप्रेमहठाभ्यां केवलमालिङ्गितस्तद्वृत्तान्तं स्ववयस्यं प्रत्याह—

अमिलितवदनमपीडितवक्षोरुहमतिविदूरजघनोरु ।
शपथशतेन भुजाभ्यां केवलमालिङ्गितोऽस्मि तया ॥ २० ॥

अमिलितेति । असंयुक्तवदनम् । ताम्बूलरागापगमभीत्येति भावः । अपीडितवक्षोरुहम् । चन्दनप्रच्यवभीत्येति भावः । अपीडितमित्यनेन किंचित्कुचसंबन्धो वृत्त इति व्यज्यते । तेन कुचयोरत्यन्तोन्नतत्वम् । अतिविदूरजघनोरु । काञ्च्यादिविन्यासान्यथाभावसंभावनयेति भावः । एतानि क्रियाविशेषणानि । तया केवलं शपथशतेन । एवं च केवलपदेनालिङ्गनेऽन्यप्रबलहेत्वभावो द्योत्यते । शपथपदेनापरिहार्यत्वम् । शतपदेन स्वाग्रहबाहुल्यम् । यत्तु केवलमालिङ्गितोऽस्मीति व्याख्यानं तदमिलितवदनमित्यादिनैव चुम्बनाद्यभावप्रतीतौ केवलपदानतिप्रयोजनत्वसंपादकतया केवलमकिंचित्करमाभाति । अत एव केवलं भुजाभ्यामित्यपास्तम् । भुजाभ्यामालिङ्गितोऽस्मि । यद्वा कश्चिंकिंचिद्भ्रममानवत्या वृत्तं वक्ति । यदि मयापराधः कृतः स्यात्तदायमयं शपथ इति शपथशतेन । अथवा विस्रब्धनवोढावृत्तं कश्चिद्वक्ति ॥

कश्चित्कांचिद्वक्ति—

अतिपूजिततारेयं दृष्टिः श्रुतिलङ्घनक्षमा सुतनु ।
जिनसिद्धान्तस्थितिरिव सवासना कं न मोहयति ॥ २१ ॥

अतीति । हे सुतनु । अतिपूजिता । श्रेष्ठेति यावत् । तारा नेत्रकनीनिका । पक्षेऽत्यन्तपूजिता ताराख्या देवता यत्र । श्रुतेः कर्णस्योल्लङ्घनसमर्था । अत्यन्तविशालत्वादिति भावः । पक्षे वेदोदीरितार्थाननुष्ठानकारिणीत्यर्थः । सवासनाभिप्रायविशेषशालिनी । कज्जलादिसंस्कारवतीति केचित् । पक्षे तन्मतसिद्धक्षणिकपदार्थैकरूपकुबुद्ध्युत्पादकहेतुमती । जिनसिद्धान्तस्थितिरिव कं न मोहयति । अपि तु सर्वमपीति भावः । यद्वा सखीवचनमेतत् ॥

कृतरतिलज्जासाध्वसां नवोढां नायिकां प्रलोभयितुं कस्याश्चिद्वार्ता सखी वक्ति—

अलमविषयभयलज्जावञ्चितमात्मानमियमियत्समयम् ।
नवपरिचितदयितगुणा शोचति नालपति शयनसखीः ॥ २२ ॥

अलमिति । नवपरिचितदयितगुणा । नूतनविज्ञातदयितरतिसुखेत्यर्थः । इयं त्वत्प्रतिवेशिन्येतावत्कालमस्यानलज्जाभयाभ्यां वञ्चितम् । एवं चात्र न लज्जा न वा भीतिरिति भावः । आत्मानमलमत्यर्थं शोचति । यद्वालमिति वञ्चितमित्यत्रान्वेति । एतावत्कालं वृथा स्थितमिति धियेति भावः । शयनसखीर्नालपति । अतिनिकटवर्तिनीभिरेताभिः कथं नाहमीदृशं सुखमस्यत्रेति बलादवबोधितेति क्रोधादिति भावः । यद्वाग्रेऽपि कदाचिदेताभिर्यानविधानं शिक्षणीयमिति धियेति भावः । एवं च तवाप्यग्र एवमेव भविष्यतीत्यतोऽधुनास्मद्वचनेन लज्जाभयादि परित्यज्य प्रियसंनिधौ गच्छेति ध्वन्यते ॥

नायकं प्रति नायिकाविरहं सखी वक्ति—

अनुरागवर्तिना तव विरहेणोग्रेण सा गृहीताङ्गी ।
त्रिपुररिपुणेव गौरी वरतनुरर्धावशिष्टैव ॥ २३ ॥

अनुरागेति । अनुरागाधीनेन । एवं चानुरागाधिक्ये विरहाधिक्यमिति ध्वन्यते । पक्षेऽनुरागेण प्रीत्या वर्तते । एवं च सर्वदा प्रीतिजनककार्यकारित्वं ध्वन्यते । उग्रेण । एवं चासह्यत्वं ध्वन्यते । पक्ष उग्रनाम्ना । तव विरहेण गृहीताङ्गी व्याप्ताङ्गी । पक्षे स्वस्वरूपकृताङ्गी । त्रिपुररिपुणा महादेवेन । पक्षे स्वर्गमृत्युपातालवैरिणा । एवं च तव विरहे क्वापि न तस्याः सुखमिति व्यज्यते । गौरी पार्वतीव । पक्षे विरहपाण्डुरवर्णवती । वरतनुर्नायिका । एवं चावश्यग्राह्यदर्शनयोग्यत्वं व्यज्यते । अर्धावशिष्टैव । विरहक्षीणत्वादिति भावः । पक्षेऽर्धनारीश्वरत्वादिति भावः । एवं च त्वत्संगमविलम्बे तस्याः प्राणविश्लेष एव भविष्यतीति द्योत्यते ॥

काचिन्नायिका स्वात्यन्तासक्तनायकेच्छावदन्यनायिका उपहसति—

अन्यप्रवणे प्रेयसि विपरीते स्रोतसीव विहितास्थाः ।
तद्गतिमिच्छन्त्यः सखि भवन्ति विफलश्रमा हास्याः ॥ २४ ॥

अन्येति । विपरीते निम्नानुगामिनि । स्रोतसीव प्रवाह इव । अन्यप्रवणेऽन्यासक्ते नायके विहितास्थाः कृतासक्तयः । तद्गतिं तदासक्तिम् । स्वस्मिन्निति भावः । पक्षे सा विपरीता या गतिर्गमनं तामिच्छन्त्यः । विफलश्रमाः । स्वनिष्ठतदासक्तेर्दूरीकर्तुमशक्यत्वादिति भावः । पक्षे प्रतिलोमजलागमनाभावादिति भावः । हास्या निन्दायोग्याः । पक्ष उपहासयोग्याः । न केवलं निरर्थकम् । अपि तु दुरर्थकत्वमिति भावः । एवं च निम्नानुरूपगतिस्वभावस्य प्रवाहस्य विपरीतगतिरिवान्यनायिकासक्तनायकस्यान्यत्रासक्तिरसंभाविनीति द्योत्यते । नायिका चेयं गर्विता । यद्वा स्वीया परकीयां निन्दति । एवं च स्वकान्तासक्तिः स्वाभाविकीति भावः । अथवान्यनायिकासक्तं स्वनायकं कथं न

स्वाधीनताभाजनं करोषीति वादिनीं सखीं काचिद्वक्ति । एवं च यथा नीचानुगामिनः प्रवाहस्य पराङ्मुखत्तिरशक्या तद्वत्पराङ्गनालम्पटनायकस्येति ध्वन्यते ॥

नायिकाविरहातिशयं सखी नायकं वक्ति—

अधिकः सर्वेभ्यो यः प्रियः प्रियेभ्यो हृदि स्थितः सततम् ।
स लुठति विरहे जीवः कण्ठेऽस्यास्त्वमिव संभोगे ॥ २६ ॥

अधिक इति । सर्वेभ्य एकादशेन्द्रियेभ्यः पञ्चप्राणेभ्यः पञ्चभूतेभ्यश्च योऽधिकः । संघातरूपत्वेनेति भावः । वस्तुतस्त्वेतदतिरिक्त इत्यर्थः । प्रियेभ्यो रूपादिविषयेभ्यः प्रियः । निरुपाधिकप्रेमास्पदत्वादिति भावः । पक्षे सर्वेभ्यः सुहृद्भ्योऽधिकः । यद्वा सर्वेभ्यः प्रियेभ्योऽधिकः प्रिय इति योजना । सततं हृदि स्थितः । हृदयस्थानत्वाज्जीवस्येति भावः । पक्षे सर्वदा चिन्तनीयत्वेनेति भावः । संभोगे त्वमिव त्वद्विरहे स जीवः । अस्या इति प्रत्यक्षवन्निर्देशः स्वसंनिधिवर्तित्वेन स्वाधीनत्वं व्यनक्ति । कण्ठे लुठति । एवं च त्वद्दर्शनविरहेऽस्याः प्राणप्रयाणमचिरादेव भविष्यतीति द्योत्यते । यद्वा पुनर्दर्शने मा विलम्बं कृथा इति नायिकासखी नायकं वक्ति । यथैतत्कालीनसंभोगे त्वमेतस्याः कण्ठे लुठसि तथा त्वद्विरहे जाते सति जीवो लुठति । लुठिष्यतीति भावः । एवं च यथा न त्वद्विरहोऽस्या भविता तथा विधेयमिति प्रार्थना ध्वन्यते ॥

सर्वदा पराङ्गनासक्तमप्येनं मावमानय, यत इतोऽयं गमिष्यतीति वादिनीं सखीं काचिन्नायिका वक्ति—

अनयनपथे प्रिये न व्यथा यथा दृश्य एव दुष्प्रापे ।
म्लानैव केवलं निशि तपनशिला वासरे ज्वलति ॥ २६ ॥

अनयनेति । प्रिये कान्तेऽनयनपथे । विदेशस्थ इत्यर्थः । तथा न व्यथा यथा दृश्य एव दुष्प्रापे । एवं चैतद्विदेशगमने न तथा दुःखं यथैतदत्रत्यान्यादृशाचरणेनेति भावः । यद्वा काचित्कथमियन्ति विरहदिनान्यतिवाहितानि, अधुनैवागतमेनमवलोक्य विकलैव जातासीति वादिनीं सखीं वक्ति । प्रिये, न तु पतिमात्रे । न तथा व्यथा । एवं चानयनपथेऽपि दुःखमस्तीति भावः । एवं च निकटवर्तिनायकाप्राप्तौ नायकीयविदेशगमनादपि दुःखातिशयो ध्वन्यते । अत्र दृष्टान्तमाह—निशि तपनशिला केवलं म्लानैव वासरे ज्वलति ॥

सखी नायिकां शिक्षयति—

अविभाव्यो मित्रेऽपि स्थितिमात्रेणैव नन्दयन्दयितः ।
रहसि व्यपदेशादयमर्थ इवाराजके भोग्यः ॥ २७ ॥

अविभाव्य इति । मित्रेऽपि । किमु वाच्यं शत्रावितिं भावः । यद्वा सूर्ये । विभावनार्होऽपि न । एवं च रात्रावेव द्रष्टव्य इति भावः । स्थितिमात्रेणैव नन्दयन् । एवं

चोपभोगाद्यभावो व्यज्यते । दयितो नायकः । पक्षे प्रीतिविषयः । रहसि । एवं च जनसंचारायोग्यत्वेनात्यन्तनिगूहनीयत्वं द्योत्यते । व्यपदेशाद्व्याजात् । अर्थं इव द्रव्यमिव । अराजके । एवं च नायकस्य धनाढ्यत्वं ध्वन्यते । पक्षे लुण्ठनभीतिरावेद्यते । भोग्यः । नायिका चेयं परकीया ॥

बह्वपराद्धं त्वयेति नायिका वक्तीति सखीवचनमाकर्ण्य स्वयमेव कश्चिन्नायिकां वक्ति—

अश्रौषीरपराधान्मम तथ्यं कथय मन्मुखं वीक्ष्य ।
अभिधीयते न किं यदि न मानचौराननः कितवः ॥ २८ ॥

अश्रौषीरिति । ममापराधानश्रौषीः । एवं चापराधेषु चाक्षुषविषयत्वाभावो व्यज्यते । तेन नियतमपराद्धमनेनेति निश्चयकरणमनुचितमिति । इदं तथ्यमिति सोल्लुण्ठवचनम् । मन्मुखं वीक्ष्य कथय । एवं च मुखदर्शनोत्तरमनया न किंचिद्वक्तुं शक्यमिति भावः । यद्वा सत्यं कथयेति योजना । एवं च बहवोऽपराधास्त्वया श्रुतास्तन्मध्ये यः सत्यत्वेन निर्णीतस्तमेव मत्समक्षं वदेत्यर्थः । मदीयापराधास्त्वया श्रुताः, इदं मत्समक्षं तथ्यं वदेति वार्थः । नायिका वक्ति । यदि कितवो धूर्तस्त्वम् । एवं च चौरसाहचर्यं नियतमिति द्योत्यते । मानस्य चौररूपमाननं यस्य स न स्यास्तदा किं नाभिधीयते । एवं च त्वद्दर्शने न मया किमपि वक्तुं शक्यमिति ध्वन्यते । यद्वाभिधीयते न किमित्यादि सखीवचनम् ॥

कयोश्चिदनुरागं कश्चिद्वक्ति—

अन्योन्यमनु स्रोतसमन्यदथान्यत्तटात्तटं भजतोः ।
उदितेऽर्केऽपि न माघस्नानं प्रसमाप्यते यूनोः ॥ २९ ॥

अन्योन्यमिति । प्रशस्तं स्रोतोऽम्बुसरणं यस्मिंस्तत्स्रोतसम् । अर्शआदित्वात्प्रशंसायामच् । एतादृशं तटादन्यतटम्, अथान्यतटमनुलक्ष्यीकृत्य परस्परं भजतोः । एवं चैतत्तटापेक्षयान्यतटं प्रशस्तप्रवाहवदिति व्याजेन परस्परनिभृतसंभाषणादीच्छावतोरिति भावः । एवं च जनदर्शनशङ्कया नैकत्रावस्थितिरिति ध्वन्यते । यूनोः । एवं चैतादृशावस्थायोग्यत्वं द्योत्यते । अर्के सूर्ये उदितेऽपि माघस्नानं न प्रसमाप्यते । एवं च माघस्नानस्य सूर्योदयकालीनत्वेन तदननुसंधानत्वेनात्यन्तासक्तिरावेद्यते ॥

कश्चिद्यौवनशालिनीं नायिकामन्योक्त्या दुर्जनसंगतिशालिनी त्वमस्माकमनुपयुक्तेति वक्ति—

अयि चूतवल्लि फलभरनताङ्गि विष्वग्विकासिसौरभ्ये ।
श्वपचघटकर्परार्द्धा त्वं किल फलितापि विफलैव ॥ ३० ॥

अयीति । अयि चूतवल्लि फलभरैर्नमिताङ्गि । पक्षे स्तनभरनताङ्गि । विष्वक्सर्वतो विसारि सौरभ्यं सौगन्ध्यं यस्याः । पक्षे सौरभ्यं कीर्तिः । एवं च नाहमीदृशीति न

वक्तव्यमिति भावः । श्वपचाश्चाण्डालास्तेषां घटसंबन्धिकर्पराणामङ्कश्चिह्नं यस्याः । सूक्ष्मस्यापि रसालस्यैतद्दोहदेनाचिरादेव फलोत्पत्तिर्भवतीति दोहदवित्प्रसिद्धिः । एवं च चाण्डालसंबन्धादनुपयुक्तत्वमावेद्यते । पक्षे दुर्जनसङ्गशालित्वम् । फलितापि निश्चितं विफलैव । समीचीनजनोपभोगानर्हत्वादिति भावः ॥

प्रतिष्ठापुरःसरं स्वल्पमपि जीवनं समीचीनमिति कश्चिद्वक्ति—

अञ्जलिरकारि लोकैर्म्लानिमनास्त्वैव रञ्जिता जगती ।
संध्याया इव वसतिः स्वल्पापि सखे सुखायैव ॥ ३१ ॥

अञ्जलिरिति । लोकैरञ्जलिरकारि । अर्घदानार्थमिति भावः । पक्षेऽञ्जलिकरणेन लोक आज्ञाकारित्वं ध्वन्यते । म्लानिर्निस्तेजस्कत्वम् । पक्षेऽसामर्थ्यम् । जगती रञ्जिता रक्ततां नीता । पक्षेऽनुरागवती कृता । एवं च लोकस्यानुद्वेगदायित्वं ध्वन्यते । संध्याया इव स्वल्पापि वसतिरवस्थितिः सुखायैव । न दुःखायेत्यर्थः । संध्यासमयस्थितेरचिरावस्थायित्वादिति भावः । एवं चैतद्विलक्षणजीवनान्मरणमेव वरमिति द्योत्यते ॥

नायिका नायकं वक्ति—

अगृहीतानुनयां मामुपेक्ष्य सख्यो गता बतैकाहम् ।
प्रसभं करोषि मयि चेत्त्वदुपरि वपुरद्य मोक्ष्यामि ॥ ३२ ॥

अगृहीतेति । अनङ्गीताकृनुनयां मामुपेक्ष्य । मानस्यासाध्यत्वबुद्ध्येति भावः । एवं च तासामेतादृक्करणमनुचितमिति व्यज्यते । सख्यः । सुखदुःखनिरूपणार्हा इति भावः । गताः । एवं च परावृत्त्यनर्हत्वं व्यज्यते । बत खेदे हर्षे च । अहमेकाकिनी । चेद्यदि मयि प्रसभं बलात्कारं करोषि तर्ह्यद्यैवाधुनैव । एवं चोत्कण्ठितत्वं ध्वन्यते । त्वदुपरि शरीरं पातयिष्ये । एवं च सखीकृतानुनयस्य मयोपेक्षितत्वात्त्वयावश्यं बलात्कारः प्रदर्शनीयः । ततश्च यथेच्छं मयापि विपरीतरतादिना क्रीडितव्यमिति व्यज्यते । अथ च मत्सख्योऽत्र न सन्तीति मत्वा यदि बलात्कारं करोषि तर्ह्यहं प्राणान्परित्यज इति व्यज्यते ॥

सखी कंचन नायकं स्वनायिकाधीनं कर्तुं तस्या गुणशालित्वं भङ्ग्यन्तरेण वक्ति—

अस्थिररागः कितवो मानी चपलो विदूषकस्त्वमसि ।
मम सख्याः पतसि करे पश्यामि यथा ऋजुर्भवसि ॥ ३३ ॥

अस्थिरेति । यद्वान्यनायिकासु स्वनायिकायाश्चातुरीं प्रकटयन्ती सखी वक्ति । चञ्चलानुरागः । धूर्तः । अभिमानी । चाञ्चल्यशाली । विदूषकः । 'विकृताङ्गवचोवेषैर्हास्यकारी विदूषकः' । त्वमसि । अस्थिरराग इत्यनेन मैत्र्यनर्हत्वम्, कितव इत्यनेन प्रतारणानिपुणत्वम्, मानीत्यनेन गर्वशालित्वेन प्रतिक्षणसमाधेयत्वम् विदूषक इत्यनेनानेकचेष्टाशालित्वं ध्वन्यते । मम सख्याः करे पतसि यथर्जुर्भवसि तथा पश्यामि । एवं च मत्सखीगुणासक्तेन त्वया सर्वमपीदं परित्याज्यमिति भावः । यद्वैतादृशी मत्सखी यदेतादृशं नायकं स्वाधीनताभाजनं कर्तुं विजानातीति भवतीभ्यो मत्सखी समधिकतरेति भावः ॥

नायिकासखी क्वचिद्गच्छन्तं नायकं प्रति नायिकासक्तिं वक्ति—

अकरुण कातरमनसो दर्शितनीरा निरन्तरालेयम् ।
त्वामनु धावति विमुखं गङ्गेव भगीरथं दृष्टिः ॥ ३४ ॥

अकरुणेति । यद्वा क्रुधा गच्छन्तं नायकं नायिकासखी वक्ति । अकरुण करुणाशून्य । यत ईदृशीमप्येनां परित्यज्य गच्छसीति भावः । कातरं मनो यस्याः । कातरपदेन कदाचमागमिष्यतीति चिन्तातिशयो द्योत्यते । दर्शितं नीरमश्रु यया । दर्शितमित्यनेन विघ्नसूचनमिति कश्चित् । प्रकटमित्यर्थो ज्यायान् । पक्षे प्रकटितजला । निरन्तराला निर्गतावकाशा । सर्वत्र विद्यमानेत्यर्थः । एवं च विशालत्वं द्योत्यते । तेन च शोभातिशयो द्योत्यते । यद्वा कश्चिद्दृश्यतीति भियेतस्ततोऽवलोकनशालित्वम् । यद्वा निर्गतावकाशा । अविच्छिन्नेत्यर्थः । एवं च लोकभीतिशून्यत्वेनात्यन्तासक्तिरावेद्यते । पक्षे निर्गताकाशा । आकाशाद्भुवि गङ्गागमनादिति भावः । इयं दृष्टिर्भगीरथं गङ्गेव विमुखं पश्चादनवलोकनकारिणम् । अज्ञानात्क्रोधाद्वेति भावः । पक्षेऽग्रगमनकारित्वादिति भावः । एवं च तापापनोदिकायास्तापकरणमनुचितं तवेति ध्वन्यते । यद्वा नायकविदेशागमनकालीननायिकासखीवाक्यमेतत् । नायिकेयं परकीया ॥

अप्रकटितमानां नायिकां नायको वक्ति—

अन्तःकलुषस्तम्भितरसया भृङ्गारनालयेव मम ।
अप्युन्मुखस्य विहिता वरवर्णिनि न त्वया तृप्तिः ॥ ३५ ॥

अन्तरिति । अन्तःकलुषेणान्तरक्रोधादिना स्तम्भितोऽप्रकटितो रसः शृङ्गारादिर्यया । एवं च बाह्यक्रोधापेक्षयान्तरक्रोधस्यातिदुष्टत्वं द्योत्यते । पक्ष आभ्यन्तरपङ्कादिना स्तम्भितो निर्गमनायोग्यो रसो जलं यस्याः । भृङ्गारनालयेव । 'भृङ्गारः कनकालुका' । त्वया वरवर्णिनि । एवं चैतादृक्कार्यकरणमनुचितं तवेति ध्वन्यते । पक्षे शोभनवर्णा । उन्मुखस्यापि । पक्ष ऊर्ध्वमुखस्यापि मम तृप्तिर्न विहिता । एवं च त्वं मम जीवनदाननिदानरूपेति ध्वन्यते ॥

कथमनेन नायकेन ममास्ति संगतिरिति लोके प्रसिद्धिरिति वादिनीं नायिकामन्योक्त्या सखी वक्ति—

अयि सरले सरलतरोर्मदमुदितद्विपकपोलपालेश्च ।
अन्योन्यमुग्धगन्धव्यतिहारः कथणमाचष्टे ॥ ३६ ॥

अयीति । अयि सरले । एवं चैतादृशसंदेहवत्ता तव युक्तैवेति ध्वन्यते । सरलतरोः । सरलपदेन कथणयोग्यत्वं धूर्तताशून्यत्वं च द्योत्यते । मदेन दानेन मन्मथेन च मुदितो यो द्वाभ्यां पिबतीति द्विपो गजस्तस्य कपोलपालेश्च । मदमुदित इत्यनेन जनभीतिशून्यत्वं ध्वन्यते । अन्योन्यं मुग्धस्य सुन्दरस्य गन्धस्य । पक्षे वासनायाः । अनुरागस्येत्यर्थः । व्यतिहारो विनिमयः । कथणम् । पक्षे योगम् । आचष्टे । एवं च परस्परानुराग एव परस्परसंबन्धं वक्तीति भावः ॥

कयाचन विलोकितः कश्चित्तस्या विलोकनसुखं स्वस्य सखायं वक्ति—

अस्याः कररुहखण्डितकाण्डपटप्रकटनिर्गता दृष्टिः ।
पटविगलितनिष्कलुषा स्वदते पीयूषधारेव ॥ ३७ ॥

अस्या इति। अस्या नखसच्छिद्रीकृतकाण्डपटस्पष्टनिर्गता दृष्टिः। वसनविगलितात एवं कालुष्यरहिता पीयूषधारेव। स्वदते। एवं च दृशि न केवलं संतापापनोदकत्वम्, अपि तु प्राणप्रदत्वमिति ध्वन्यते ॥

पतिगृहगमनार्हां कांचित्काचित्कस्याश्चिद्वार्तापुरःसरं वक्ति—

अस्याः पतिगृहगमने करोति माताश्रुपिच्छिलां पदवीम् ।
गुणगर्विता पुनरसौ हसति शनैः शुष्करुदितमुखी ॥ ३८ ॥

अस्या इति । अस्याः पतिगृहगमने । गमनं प्राथमिकम् । माता । एवं च वात्सल्यं व्यज्यते । अश्रुभिः पिच्छिलां पदवीं करोति । पिच्छिलामित्यनेनाश्रुबाहुल्यं द्योत्यते । गुणगर्विता पुनरसौ शुष्करुदितमुखी । अश्रूणामभावादिति भावः । शनैर्हसति । एवं च यथेयं गच्छति तथैव त्वया गन्तव्यमिति द्योत्यते। कस्याश्चिद्वार्तां काचिदुक्तीति वा ॥

अङ्के निवेश्य कूणितदृशः शनैरकरुणेति शंसन्त्याः ।
मोक्ष्यामि वेणिबन्धं कदा नखैर्गन्धतैलाक्तैः ॥ ३९ ॥

अङ्क इति। अङ्के निवेश्य कूणिता संकोचिता दृग्यया । चिरबद्धवेणीबन्धविस्रंसनजन्यदुःखवशात्कूणितत्वम् । अत एव अकरुण शनैरिति शंसन्त्याः । यद्वा चिरप्रवासित्वेन अकरुणेति संबुद्धिः । अकरुण इति शनैः शंसन्त्या इति वा । नायके प्रवासिनि न केशसंस्कार इति सतीसंप्रदायः । गन्धतैलाक्तैर्नखैः कदा वेणीबन्धं मोक्ष्यामि । पथिकाशंसनमेतत् ॥

कथमकृतभूषणाहमागमिष्यामीति वादिनीं दूती वक्ति—

अलमनलंकृतिसुभगे भूषणमुपहासविषयमितरासाम् ।
कुरुषे वनस्पतिलता प्रसूनमिव वन्ध्यवल्लीनाम् ॥ ४० ॥

अलमिति । यद्वा सर्वासामन्यासां भूषणम्, न मह्यमिति खिन्नां सखीं समाधत्ते। अलमत्यर्थमलंकाराभावेन सौभाग्यशालिनि। इतरासां भूषणम् । वन्ध्यवल्लीनां पुष्पवत्त्वेऽपि फलाजनकानां प्रसूनमिव वनस्पतिलता पुष्पं विना फलजनिका । 'वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः' । त्वं निन्दाविषयं कुरुषे । एवं च नालंकरणमात्रं सौभाग्यसंपादकम्, अपि तु दयितवश्यतासंपादनसामर्थ्यम् । तच्च तवैवास्तीति विभूषणकरणाय विलम्बो न विधेयः । खेदो वा न मह्यमस्ति विभूषणमिति ध्वन्यते ॥

---

१. तिरस्करिणी. 'कनात' इति भाषा.

कश्चित्कांश्चिन्निन्दति—

अबुधा अजङ्गमा अपि कयापि गत्या परं पदमवाप्ताः ।
मन्त्रिण इति कीर्त्यन्ते नयबलगुटिका इव जनेन ॥ ४१ ॥

अबुधा इति । अबुधा ज्ञानशून्याः पण्डितभिन्ना वा । अचेतनत्वादिति भावः । अजङ्गमा गतिशून्याः । पक्ष इतस्ततः प्रेषणानर्हाः । कयापि गत्या चालनविशेषेण । पक्षे दैववशादित्यर्थः । परं पदमाद्यपङ्क्तिगृहम् । पक्ष उत्कृष्टस्थानम् । अवाप्ताः । नयबलस्य बुद्धिबलस्य गुटिका इव जनेन । एवं च वास्तवज्ञानशून्यत्वं ध्वन्यते । मन्त्रिण इति कीर्त्यन्ते । एवं च यथा पदातिसंज्ञकगुटिका राजपङ्क्तिसदनमासाद्यामात्यव्यवहारभागिनी भवति, तद्वदेतेऽकिंचित्करा अपि पदविशेषावाप्यामात्यपदवीभागिन इति व्यज्यते ॥

अत्यन्ताभिमानशालिनीं मत्सखीति वादिनीं सपत्नीसखीं नायिकासखी वक्ति—

अतिशीलशीतलतया लोकेषु सखी मृदुप्रतापा नः ।
क्षणवाम्यदह्यमानः प्रतापमस्याः प्रियो वेद ॥ ४२ ॥

अतीति । लोकेऽत्यन्तशीलस्य स्वभावस्य शीतलतया । सौम्यतयेत्यर्थः । नः सखी मृदुप्रतापा । एवं च लोके प्रतापदर्शनमनर्थकमिति भावः । यद्वा मृदुप्रतापेति स्वरविशेषरूपकाका न मृदुप्रतापेत्यर्थः । एतदेवाह—अस्या मत्सख्याः क्षणवाम्येन क्षणिककौटिल्येन । एवं च चिरकालीनवाम्यमसंभवतीति ध्वन्यते । यद्वा क्षण उत्सवे यद्वाम्यम् । प्रणयकोप इति यावत् । तेन । एवं च वास्तवमहाकोपे को वेद किं भावीति व्यज्यते । दह्यमानः प्रियः प्रतापं तेजोविशेषम्, अथ च प्रकृष्टसंतापं जानाति । एवं च यत्र यद्विधानमुपयुक्तं तत्र तदेवेयं विदधातीति द्योत्यते । यद्वा त्वत्सखी मृदुप्रतापेति वादिनीं काचिद्वक्ति । एवं च नः सखी लोके मृदुप्रतापा नायकं प्रत्यभिमानशालिनी, त्वत्सखी तु नायकं प्रत्यकिंचित्करा लोके तु कोपनेति द्योत्यते । तेन स्वसख्यामाधिक्यम् । यद्वा पूर्वोत्तरार्धाभ्यामुभयोक्ती ॥

यदीयमुत्कृष्टगुणा तर्ह्येतदीयनायकः कथमन्यानुरक्त इति वादिनीं कांचिन्नायिकासखी वक्ति—

अन्यास्वपि गृहिणीति ध्यायन्नभिलषितमाप्नोति ।
पश्यन्पाषाणमयीः प्रतिमा इव देवतात्वेन ॥ ४३ ॥

अन्यास्विति । अन्यास्वप्यन्याङ्गनास्वपि स्वगृहिणीति ध्यायन्नेव । स्वनायिकाभावनां कुर्वन्नेवेत्यर्थः । एवं च स्वीयाङ्गनाभावनानर्हास्वप्यन्याङ्गनासु तद्भावनासंपादनप्रतिपादनान्नायिकायां रूपादिगुणशालित्वमावेद्यते । अभिलषितमानन्दम् । पक्ष इच्छाविषयीभूतमर्थम् । आप्नोति । पाषाणमयीः प्रस्तरविकाररूपाः प्रतिमा देवतात्वेन पश्यन्निव । एवं च यथा पाषाणप्रतिमासु देवताभावनया जनस्याभिलषितावाप्तिस्तथैवान्यासु नायिकासु

स्वनायिकाभावनयैवाभिलषितावाप्तिरिति भावः । एवं च पराङ्गनासु जडत्वं ध्वन्यते । यद्वा देवतायां देवताध्यानाकरणं जडप्रतिमासु च देवताध्यानकरणमिति यथा जनस्य स्वभावस्तथा नायकस्याप्यन्याङ्गनास्वासक्तिसंपादनमिति स्वभाव इति ध्वन्यते । तेन च नैतस्यां गुणराहित्यमाशङ्कनीयमिति । 'आप्नोमि' इति पाठेऽन्याङ्गनासक्तिस्तवानुचितेति वादिनीं नायिकासखीं नायको वक्ति ॥

गर्वशालिनं नायकं नायिकासख्युपदिशति—

अनुपेत्य नीचभावं बालक परितो गभीरमधुरस्य ।
अस्याः प्रेम्णः पात्रं न भवसि सरितो रसस्येव ॥ ४४ ॥

अन्विति । बालक अपरिपक्कबुद्धे । नीचभावं गर्वशून्यत्वमनुपेत्याकृत्वा समन्ताद्गभीरं बहुपरिमाणं मधुरं सुखदम् । पक्षेऽगाधं मधुररसवत् । परित इत्यनेन सर्वत्र गाम्भीर्यमाधुर्यशालित्वं तेन चैतादृशस्य प्रेम्णो दुर्लभत्वं द्योत्यते । अस्याः प्रेम्णः पात्रममत्रम् । पक्षे तीरयोरन्तरम् । सरितो रसस्येव जलस्येव न भवसि । एवं च गर्वं विहायैवास्याः प्रेम्णो भाजनं भवान्भवतिति व्यज्यते । रसस्येवेत्यनेन प्रेम्णि रससंभृतत्वमावेद्यते ॥

सखी नायिकामन्योक्त्या स्तौति—

अधिवासनमाधेयं गुणमार्गमपेक्षते न च ग्रथनाम् ।
कलयति युवजनमौलिं केतककलिका स्वरूपेण ॥ ४५ ॥

अधीति । अधिवासनं संस्कारम् । यथा पुष्पादिभिस्तैलादेः । आधेयमौपाधिकं गुणमार्गम् । यथा मुक्ताफलादेरन्ध्रादि । ग्रथनाम् । यथा मालादेः । न चापेक्षते । पक्षे स्वतः पद्मिनीत्वेन न सौगन्ध्यादिसंस्कारापेक्षा । स्वाभाविकगुणवत्त्वान्नौपाधिकगुणगवेषणापेक्षा । मार्गणं मार्ग इति व्युत्पत्तेः । स्वतो नायकवशीकरणसामर्थ्यान्न दूत्यादिघटनापेक्षा । केतककलिका स्वरूपमात्रेण युवजनमौलिं कलयति । मौलिभूषणरूपा भवतीति भावः । पक्षे सर्वयुवभिः प्रणतिपुरःसरं प्रार्थ्यत इति भावः । एवं चात्र स्वकीयपरकीयादिनायिकाधिक्यं नायिकायामावेद्यते ॥

नायिका स्वनायकसङ्गविद्वेषकारिणी वृत्तेति प्रतिपादनेन नायकात्यन्तासक्तिं तस्यामुत्पादयितुं नायिकासखी नायकं वक्ति—

अपनीतनिखिलतापां सुभग स्वकरेण विनिहितां भवता ।
पतिशयनवारपालिज्वरौषधं वहति सा मालाम् ॥ ४६ ॥

अपनीतेति । दूरीकृतसकलदुःखाम् । पक्षे तापो नानाविधज्वरः । सुभग भवता स्वकरेण, न तु दूत्यादिद्वारा । विनिहितां मालाम् । पतिः, न तु प्रियः । तच्छयनरूपो यो वारपालिज्वरश्चातुर्थिकादिस्तदौषधरूपां वहति । केवलं त्वदृत्तमालयैव तद्दिवसीयत्वद्विरहदुःखनिरासस्तस्या इति भावः । एवं चैतादृशनायिकानुरागः सुदुर्लभोऽपि ते सुलभ इति धन्यस्त्वमसीति द्योत्यते ॥

नायिकासक्तिं नायके नायिकासखी वक्ति—

अगणितगुणेन सुन्दर कृत्वा चारित्रमप्युदासीनम् ।
भवतानन्यगतिः सा विहितावर्तेन तरणिरिव ॥ ४७ ॥

अगणितेति । हे सुन्दर । एवं च कामिनीस्पृहणीयत्वं ध्वन्यते । असंख्यातचातुर्यादिगुणेन । एवं च युक्तमेव ते नायिकावशीकरणसामर्थ्यमिति द्योत्यते । पक्षेऽनादृतो गुणो बन्धनरज्जुर्येन । भवता चरित्रमेव चारित्रं पातिव्रत्यं तदप्युदासीनं कृत्वा तिरस्कृत्य । अपिना तिरस्कारानर्हत्वं ध्वन्यते । पक्षे चकारबहिर्भावेनारित्रं केनिपातनम् । आवर्तेन तरणिरिव सानन्यगतिः । नास्त्यन्या, त्वदतिरिक्तेत्यर्थः, गतिर्यस्याः । पक्षेऽन्यत्र गमनाभाववती । विहिता । एवं चानुग्राह्या सेति व्यज्यते ॥

परावृत्तनास्थापितोत्तरीयतया वसनान्तरहीनतया सलज्जं कंचन कश्चिद्वक्ति—

अनुरक्तरामया पुनरागतये स्थापितोत्तरीयस्य ।
अप्येकवाससस्तव सर्वयुवभ्योऽधिका शोभा ॥ ४८ ॥

अनुरक्तेति । अनुरक्तावृत्तनया पुनरागमनाय स्थापितोत्तरीयवसनस्यैकवाससोऽपि । दारिद्र्यादिति भावः । तव सकलभाग्यशालितरुणेभ्यः शोभाधिका । एवं चैतादृशदयितानुरागे दारिद्र्यदुःखमकिंचित्करम् । तदननुरागे च यौवनसंपत्ती अकिंचित्करे इति व्यज्यते ॥

कश्चित्स्वस्य सखायं वक्ति—

अर्धः प्राणित्येको मृत इतरो मे विधुंतुदस्येव ।
सुधयेव प्रियया पथि संगत्यालिङ्गितार्धस्य ॥ ४९ ॥

अर्ध इति । पथि मार्गे संगत्या प्राचीनसंबन्धेन । यद्वा मार्गविषयकसंबन्धेन । एवं च दैववशसंपन्नमेतदिति ध्वन्यते । प्रिययालिङ्गितार्धस्य । प्रियासंबन्धवदर्धस्येत्यर्थः । आलिङ्गनपदेनैकाङ्गसंपर्केऽपि सर्वाङ्गीणानन्दतुल्यानन्दः संवृत्त इति व्यज्यते । मे सुधया विधुंतुदस्यैवैकोऽर्धो विषमांशः । 'पुंस्यर्धोऽर्धं समेऽंशके' इत्यमरः । एवं च राहोरसमांशमुण्डरूपस्योपमानता संगच्छते । प्राणिति । इतरो मृत एव । एवं च नान्यथा शङ्कनीयमिति भावः । एवं च प्राप्तायां अपि सुधायां दुर्दैवान्न संभोगो राहोस्तथा प्रियाया ममेति ध्वन्यते । तेन च नायिकाङ्गसंबन्धानुभववत एवाङ्गस्य सार्थक्यम्, नापराणामङ्गानामिति । तेन च न यस्य नायिकाङ्गस्पर्शसुखानुभवस्तज्जीवनमत्यन्तानर्थकमिति ॥

कठिनहृदयापि कोमलहृदया मन्नायिकेति कश्चिद्वक्ति—

अवधीरितोऽपि निद्रामिषेण माहात्म्यमसृणया प्रियया ।
अवबोधितोऽस्मि चपलो बाष्पस्तिमितेन तल्पेन ॥ ५० ॥

अवधीरितोऽपीति । निद्राव्याजेनावज्ञातोऽपि । मानवशादिति भावः । एवं च

ममाप्यवबोधने भीतिरित्यावेद्यते । अत एव माहात्म्येन प्रशस्तान्तःकरणतया स्निग्धया प्रियया । चपलः । एवं च स्वस्मिन्सापराधत्वमावेद्यते । बाष्पैः स्तिमितेनार्द्रेण तल्पेनावबोधितोऽस्मि । मानं ज्ञापितोऽस्मि । एवं च भीत्या मम तूष्णींभावं विज्ञाय मानज्ञापनकरणेन कोमलहृदयत्वमावेद्यते ॥

कस्याश्चित्किंचित्संगतिशालिनं कंचन काचिदन्योक्त्या वक्ति—

अयि शब्दमात्रसाम्यादास्वादितशर्करस्य तव पथिक ।
स्वल्पो रसनाच्छेदः पुरतो जनहास्यता महती ॥ ९१ ॥

अयीति । अयि पथिक । एवं चात्र चिरानवस्थित्या यथार्थज्ञानशून्यत्वं ध्वन्यते । शब्दमात्रसाम्यात् । शर्करेति । पक्षे नायिकेति । शब्दमात्रेत्यनेनार्थदृष्टिविधुरत्वं व्यज्यते । आस्वादिता, न तूपभुक्ता शर्करा सिकता येन तस्य । एवं चाधुनापि विचार्य चरितव्यमिति ध्वन्यते । रसनाच्छेदः स्वल्पः पुरतोऽग्रे । 'इयं च तेऽन्या पुरतो विडम्बना' इतिवदत्र समाधिः । महती । एवं चासह्यत्वं व्यज्यते । जनस्य । एवं च निवारणानर्हत्वम् । हास्यता भवित्री । एवं च तस्याः कठिनतया न संगतिश्चिरावस्थायिनीति नैतावन्मात्रम्, अपि तु कथमत्यन्तानभिज्ञ इति लोकोपहासो भावीति व्यज्यते । यद्वा स्वनामैक्यादन्याङ्गनागृहीतदर्शनं काचिद्वक्ति । शब्दमात्रसाम्यम् । न मन्निष्ठगुणादेरिति भावः । रसनाच्छेद आस्वादविच्छेदः । नीरसेति यावत् । भाविगुणशून्यत्वज्ञानेनेति भावः । एतावन्मात्रं न, किंतु जनहास्यता । एवं च तस्याः पुंश्चलीत्वेन प्रसिद्धिः, न ममेति व्यज्यते ॥

सपत्नीदुःखसंतप्तां काचित्समाधत्ते—

अभिनवयौवनदुर्जयविपक्षजनहन्यमानमानापि ।
सूनोः पितृप्रियत्वाद्बिभर्ति सुभगामदं गृहिणी ॥ ९२ ॥

अभिनवेति । अभिनवयौवनेन । अभिनवत्वमप्रसूतत्वादिति भावः । दुःखेन जेतुमशक्यः । यौवनसंपादनस्य दुष्करत्वादिति भावः । यो विपक्षजनः । विपक्षपदेन दुःखजननस्वभाववत्त्वं जनपदेन समुदायवत्तया प्रतीकारानर्हत्वं ध्वन्यते । तेन हन्यमानः । एवं च प्रात्यहिकेनासह्यत्वं द्योत्यते । मानो यस्याः । सापि । एवं च यत्र प्रतिष्ठामात्रमपि गतं तत्र का वार्ता रतादीनामिति भावः । गृहिणी प्रथमस्त्री पुत्रस्य पितृप्रियत्वात्सौभाग्यशालिनीनां गर्वं बिभर्ति । एवं च सकलसदनाधिपतिप्रायपुत्रवत्तया त्वया न किंचिदपि सपत्न्यवमाननं गणनीयमिति व्यज्यते ॥

कश्चित्स्नानोद्यतकामिनीकुचकलशमवलोक्य व्यञ्जनया त्वत्संगमकामोऽहमिति वक्ति—

अपमानितमिव संप्रति गुरुणा ग्रीष्मेण दुर्बलं शैत्यम् ।
स्नानोत्सुकतरुणीस्तनकलशनिबद्धं पयो विशति ॥ ९३ ॥

अपमानितमिति । गुरुणा प्रबलेन ग्रीष्मेणापमानितं तिरस्कृतम् । एवं च जलप्रवेशकरणमुचितमिति व्यज्यते । दुर्बलम् । एवं च प्रतीकारासामर्थ्यं ध्वन्यते । स्नानो-

स्सुका या तरुणी तस्याः स्तनरूपकलशसंबन्धवत् । एवं च ग्रीष्मे तरुणीस्तनयोरतिशीतलत्वमावेद्यते । अत्र निषद्धमित्यनेन प्रबलग्रीष्मक्लेशितशैत्यस्य यथा दुःखनिवारणसाहाय्यकारकं स्तनमण्डलं तथा मदनानलकदर्थितस्य ममापीदं भवत्विति ध्वन्यते । एवं च त्वदालिङ्गनोत्तरं मरणमपि सुखदं ममेति ध्वन्यते । तेन च राजादिभीतिशून्यत्वम् । अन्योऽपि केनचित्तिरस्कृतः प्रतीकारासमर्थः कलशादि बद्ध्वा जले देहं त्यजतीति लौकिकम् । यद्वा ग्रीष्मनिर्जितस्य शैत्यस्य यथा त्वत्कुचकलश एव शरणं तथा मन्मथनिर्जितस्य ममापीति भावः ॥

कथमतिचिरकालेऽपि संवृत्ते शयनागारान्न निर्गच्छसीति वादिनीं सखीं नायिका वक्ति—

अलसयति गात्रमखिलं क्लेशं मोचयति लोचनं हरति ।
स्वाप इव प्रेयान्मम मोक्तुं न ददाति शयनीयम् ॥ ९४ ॥

अलसयतीति । गात्रं शरीरमलसयत्युत्थानादिव्यापारासमर्थं करोति । नानाविधसुरतेनेति भावः । पक्षे जृम्भादिजननेन विषयव्यापारासमर्थं करोति । अखिलं दुःखम् । पक्षे गृहव्यापारजन्यं श्रमम् । मोचयति । लोचनं हरति स्वाधीनतां नयति । स्वदर्शनमात्रप्रवणं करोतीति भावः । एवं च नायके सौन्दर्योत्कर्षशालित्वं ध्वन्यते । पक्षे पदार्थज्ञानशून्यत्वं करोति । स्वाप इव प्रेयान् । एवं च निवारणानर्हत्वं व्यज्यते । पक्षे दुःखाभावसंपादकत्वेन प्रीतिविषयत्वम् । मम शयनीयं परित्यक्तुं न ददाति । एवं चैतावत्कालं नायकनैकट्यादेव विलम्बो बहिरागमन इति न ममापराध इति भावः । प्रेयानिव स्वाप इति योजना वा । एवं च नायककार्यकारितया प्रेमविषयत्वं स्वापे द्योत्यते । तेन चालस्यादि स्वापकार्यमेवेति संगुप्तरतिकत्वम् ॥

कश्चित्कांचिद्वक्ति—

अंसावलम्बिकरधृतकचमभिषेकार्द्रधवलनखरेखम् ।
धौताधरनयनं वपुरस्त्रमनङ्गस्य तव निशितम् ॥ ९५ ॥

अंसेति । स्कन्धावलम्बितकरेण धृताः । जलविमोचनार्थमिति भावः । कचा यस्मिन् । स्नानेनार्द्राः । धवलाः । लौहित्यापगमादिति भावः । नखरेखा नखक्षतानि यस्मिन् । धौताधरनयनम् । ताम्बूलरागापगमादिति भावः । कामशास्त्रे नेत्रचुम्बनस्य विधानात् । पक्षे निराकृतमालिन्यावयवम् । तव वपुरनङ्गस्य तीक्ष्णं शस्त्रम् । एवं चैकोपभोगजन्यजाड्यनिरसनेनान्यसंभोगसामर्थ्यवत्ता जातेति ध्वन्यते । वपुषि निशितानङ्गास्त्रतुल्यताप्रतिपादनेन त्वत्सङ्गासंपादनेन मत्प्राणहरणजन्यपापभागित्वं भविष्यति तवेति ध्वन्यते ॥

वेश्यासक्तं कंचन काचिदुपदिशति—

अविनिहितं विनिहितमिव युवसु स्वच्छेषु वारवामदृशः ।
उपदर्शयन्ति हृदयं दर्पणबिम्बेषु वदनमिव ॥ ९६ ॥

अविनिहितमिति । वारवामदृशो वेश्याः । एवं च नैकत्र स्थिरप्रेमशालित्वमित्यावेद्यते । स्वच्छेषु निर्मलान्तःकरणेषु । एवं च प्रतिबिम्बभवनार्हत्वं ध्वन्यते । युवस्वविनिहितं हृदयम् । प्रेमेत्यर्थः । विनिहितमिवोपदर्शयन्ति । दर्पणस्वरूपेषु वदनमिव । एवं चैतासां प्रेमभ्रमेण ये समासक्ता भवन्ति तेऽत्यन्तमूढा इति द्योत्यते । अत्र बिम्बपदं न तथा सप्रयोजनमित्याभाति ॥

अहमस्मिन्नासक्तेति कथं लोकप्रसिद्धिरिति वादिनीं नायिकां सखी वक्ति—

अतिलज्जया त्वयैव प्रकटः प्रेयानकारि निभृतोऽपि ।
प्रासादमौलिरुपरि प्रसरन्त्या वैजयन्त्येव ॥ ९७ ॥

अतीति । अतिलज्जया द्रुततरगतेनेति भावः । यत्र यत्र तदीयकटाक्षस्ततोऽपसरणादिति भावः । त्वयैव । एवं च नान्यस्यापराध इति भावः । निभृतोऽपि केनचिदनधिगतोऽपि प्रेयान्प्रकटः ख्यातोऽयमस्यामासक्त इत्यकारि । यदियमेनं दृष्ट्वातिलज्जां नाटयति, तर्ह्ययमस्यामासक्त इति लोकैरधिगतम्, अतस्तवैवापराध इति भावः । उपरि प्रसरन्त्या । एवं च दर्शनयोग्यत्वं द्योत्यते । पताकयेव । प्रासादस्य देवताद्यायतनस्य मूर्धा । यद्वा तथाविधभोगाद्यभावेऽपि कथं लोकेऽस्मत्संगतिरभिव्यक्ता जातेति वादिनीं सखी वक्ति । त्वयातिलज्जयैव । न तथाविधात्यन्तसंघटनेनेति भावः । उपरि प्रसरन्त्येत्यनेनान्तः प्रविष्टत्वाभावप्रदर्शनेन रताद्यपरिचित्यानन्दराहित्यं नायिकायामावेद्यते । एवं च बहिस्तथा प्रदर्शनीयं यथा न केनापि नायकीयपरिचितिलेशोऽपि ज्ञातुं शक्य इति भावः ॥

मध्यस्थावलम्बनेन संघटितवाग्भिः खलजयोऽपि सुशक इति कश्चिद्वक्ति—

अन्योन्यग्रथनागुणयोगाद्गावः पदार्पणैर्बहुभिः ।
खलमपि तुदन्ति मेढीभूतं मध्यस्थमालम्ब्य ॥ ९८ ॥

अन्योन्येति । अन्योन्यग्रथनागुणः परस्पराविरोधिघटनारूपो गुणः । पक्षे परस्परबन्धनरज्जुः । तद्योगात् । गावो वाचः । पक्षे वृषभाः । पदार्पणैर्व्यवहारपददर्शनैः । पक्षे चरणविन्यासैः । मेढीभूतमाधाररूपत्वान्मध्यस्थम् । पक्षपातविरहेण विवादनिर्णायकम् । पक्षे मध्यभूमिस्थितं मेढीभूतम् । 'पुंसि मेढिः खले दारु न्यस्तं यत्पशुबन्धने' इत्यमरः । अर्थात्काष्ठमालम्ब्य दुर्जनमपि । अपिना दुर्जयत्वं व्यज्यते । पक्षे धान्यमर्दनस्थानम् । व्यथयन्ति ॥

दुर्जनवाक्यमतिदुःसहमिति कश्चिद्वक्ति—

अननुग्रहेण न तथा व्यथयति कटुकूजितैर्यथा पिशुनः ।
रुधिरादानादधिकं दुनोति कर्णे क्वणन्मशकः ॥ ९९ ॥

अनन्विति । अननुग्रहेण विरोधेन । एवं च द्रव्याद्यपहारादिद्वारा दुःखदत्वं ध्वन्यते । 'अर्थग्रहेण' इत्यपि पाठः । पिशुनः खलः । न तथा व्यथयति । तथाविधदुःखजनको नेत्यर्थः । यथा कटुकूजितैर्दुष्टवचनैः पीडयति । अत्र दृष्टान्तमाह—मशको रक्तग्रहणादधिकं

कर्णे शब्दं कुर्वन्दुनोति । 'मणितं रतिकूजितम्' इत्युक्त्या कूजितशब्दः शब्दसामान्याभिधायकः ॥

प्रथमं संजातलाघवस्योत्तरकालीनगौरववत्त्वेऽपि न तदपगच्छतीति कश्चिद्वक्ति—

अग्रे लघिमा पश्चान्महतापि पिधीयते नहि महिम्ना ।
वामन इति त्रिविक्रममभिदधति दशावतारविदः ॥ ६० ॥

अग्र इति । अग्रे प्रथमतो लघिमा लाघवम् । पक्षे ह्रस्वत्वम् । पश्चादनन्तरं महतापि महिम्ना गौरवेण । पक्षे दैर्घ्येण । नाच्छाद्यते । एवं च नवीनातिशयितप्रतिष्ठयापि न प्राक्तनाप्रतिष्ठा निराकर्तुं शक्येति भावः । अत्र दृष्टान्तमाह—दशावतारविदः । एवं चोत्तरोत्तरप्रतिष्ठाज्ञानवत्त्वमावेद्यते । त्रिविक्रमत्वादतिदीर्घत्वमावेद्यते । वामन इति ह्रस्व इत्यभिदधति । एवं च परमेश्वरस्याप्येतादृशी गतिस्तत्र का वार्ता मनुजस्येति भावः । एवं च तथा कर्म कर्तव्यं यथारम्भ एव प्रतिष्ठा भवतीति ध्वन्यते ॥

काचिन्नवीनसपत्नीशङ्कितां समाधत्ते—

अङ्के स्तनंधयस्तव चरणे परिचारिका प्रियः पृष्ठे ।
अस्ति किमु लभ्यमधिकं गृहिणि यदाशङ्कसे बालाम् ॥ ६१ ॥

अङ्क इति । अङ्के स्तनंधयो बालकः, चरणे परिचारिका दासी, पृष्ठे प्रियः । आज्ञाकारीत्यर्थः । पक्षपाती वा । अतोऽधिकं किमु लभ्यमस्ति । 'अलब्धम्' इत्यपि पाठः । यद्वाधिकं किमाशङ्कस इति योजना । गृहिणि । एवं च सर्वाधिकारवत्त्वं द्योत्यते । बालाम् । एवं च तथाविधज्ञानराहित्यं व्यज्यते । आशङ्कसे । एवं च सर्वसुखसत्त्वान्न बालाभीतिः कर्तव्येति ध्वन्यते ॥

कयोश्चिदासक्तिं कश्चिद्वक्ति—

अधर उदस्तः कूजितमामीलितमक्षि लोलितो मौलिः ।
आसादितमिव चुम्बनसुखमस्पर्शेऽपि तरुणाभ्याम् ॥ ६२ ॥

अधर इति । अधर उदस्त उच्चतां नीतः । चुम्बनार्थमिति भावः । कूजितम् । पीडाव्यञ्जकः स्वरः कृत इत्यर्थः । अक्ष्यामीलितम् । सुखाविर्भावादिति भावः । लोलितो मौलिः । परित्यजेति ज्ञापनार्थमिति भावः । नायकव्यापारपूर्वकमेते पर्यायेण व्यापाराः । इति तरुणाभ्याम् । एवं च परस्परानुरागातिशयो व्यज्यते । अस्पर्शेऽपि स्पर्शाभावेऽपि । रजोदर्शनेऽपीति वा । चुम्बनसुखमासादितमिव । एवं चैतादृशरीत्या संतोषसंपादनेनासक्तिविशेषो ध्वन्यते । नायिका परकीया ॥

कश्चित्कस्यचिदवस्थां कंचित्प्रति वक्ति—

अतिरभसेन भुजोऽयं धृतिविवरेण प्रवेशितः सदनम् ।
दयितास्पर्शोच्छसितो नागच्छति वर्त्मना तेन ॥ ६३ ॥

अतीति । अत्युत्कण्ठया । एवं च पुरोवर्तित्वेन दर्शनयोग्यत्वं ध्वन्यते । वृतिविवरेण भित्तिच्छिद्रेण । एवं च सूक्ष्मत्वं व्यज्यते । सदनम् । नायिकाधिष्ठितमिति भावः । प्रवेशितो भुजो दयितास्पर्शेनोल्लसितः पुष्टिमापन्नस्तेन मार्गेण नागच्छति । यद्वातिसरलतया गुप्तव्यवहारेण नायिकासदनं प्रापितः । एवं च स्वस्य श्रमबाहुल्यं व्यज्यते । तत्सुखोल्लसितः । एवं च तदासक्तिविशेषो ध्वन्यते । तेन मार्गेण नागच्छति । एवं च महता श्रमेण नायिकां प्रापितोऽयं तदासक्त्या मामगणयित्वैव नायाति । परंतु नैतदुचितमिति व्यज्यते । इति दूती वक्ति । यद्वात्युत्कण्ठया । एवं चाग्रे किं भविष्यतीति विचारशून्यत्वं ध्वन्यते । वृतिविवरेण चौरादिमार्गेणापि सदनं प्रवेशितः । एवं च स्वतस्तथाविधधूर्ततताविहीन इति व्यज्यते । दयितास्पर्शोल्लसित इत्यनेन तत्र चिरकालावस्थायित्वं द्योत्यते । अयं भुजो हस्तरूपः । एवं च परप्रेरणया कार्यकारित्वमावेद्यते । तेन मार्गेण नागमिष्यति । एवं चातिविलम्बकरणेन येन मार्गेणायमागतस्तेन मार्गेण गन्तुमधुना प्रतिबन्धकवशान्न पार्यते । अतस्त्वमेनं कयापि गत्या निःसारयेति नायिकासखीं नायकसखी वक्ति ॥

नायको नायिकां प्रति वक्ति—

अम्बरमध्यनिविष्टं तवेदमतिचपलमलघु जघनतटम् ।
चातक इव नवमभ्रं निरीक्षमाणो न तृप्यामि ॥ ६४ ॥

अम्बरेति । अम्बरमाकाशं वसनं वा । 'अंशुके व्योम्नि चाम्बरम्' इत्यमरः । तन्मध्यवर्ति । अतिचपलं रतव्यापारविशेषवत्त्वात् । पक्षे स्वभावात् । अलघु महत् । तवेदं जघनतटं नवमभ्रं मेघं चातक इव निरीक्षमाणो न तृप्यामि । एवं च चिरतरपिपासाव्याकुलस्य चातकस्य नूतनमेघदर्शनेन तृप्तिस्तथातिविरहखिन्नस्य मम तव जघनदर्शनेन तृप्तिरिति व्यज्यते । तेन चात्यन्तस्पृहावानहमस्मीति व्यज्यते ॥

अयमन्धकारसिन्धुरभाराक्रान्तावनीभराक्रान्तः ।
उन्नतपूर्वाद्रिमुखः कूर्मः संध्यास्रमुद्वमति ॥ ६५ ॥

अयमिति । अन्धकाररूपा ये सिन्धुरा गजास्तद्भारेणाक्रान्ता या मही तस्या भरेणाक्रान्तः । उन्नतं पूर्वाचलरूपं मुखं यस्य सः । पृष्ठे भारातिशयेन मुखौन्नत्यमिति भावः । कूर्मः संध्यारूपं रुधिरमुद्वमति । अन्यस्याप्यत्यन्तभारवत्तया मुखाल्लोहितं निःसरतीति लौकिकम् । एवं च प्रातःकालो वृत्तः, उपपतिर्निःसार्यतामिति सखी नायिकां वक्ति । यद्वा कूर्मोऽयं संध्यारूपं रुधिरं वमतीत्युक्त्या संध्योदयापलापो द्योत्यते । नायिका चेयं रतिप्रीतिमती तस्या एवोक्तिर्नायकं प्रति । प्रातःकालीनरतावसरे नायिका नायकचित्तं व्याक्षिपतीति ऋजवः ॥

मूर्खेष्वेव मूर्खसमावेशः, न पण्डितेष्विति कश्चिद्वक्ति—

अन्तर्भूतो निवसति जडे जडः शिशिरमहसि हरिण इव ।
अजडे शशीव तपने स तु प्रविष्टोऽपि निःसरति ॥ ६६ ॥

अन्तर्भूत इति । जडे । मूर्खत्वात् । पक्षे जलरूपत्वात् । जडो मूर्खः । पक्षे पशुत्वात् । अन्तर्भूतः । पौरैर्विशिष्याज्ञायमान इत्यर्थः । निवसति । शिशिरमहसि चन्द्रे हरिण इव । अजडे पण्डिते । स तु मुर्खस्तु । पक्षेऽजडे तेजोरूपत्वादिति भावः । तपने शशीव प्रविष्टोऽपि कुहूदिने चन्द्रमण्डलस्य सूर्यान्तर्हितत्वमिति ज्योतिर्वित्प्रसिद्धिः । निःसरति दूरीभवति । शीघ्रमेवेति भावः ॥

दूती 'नायिका स्वय्यासक्ता' इति वैद्यं वक्ति—

अगणितजनापवादा त्वत्पाणिस्पर्शहर्षतरलेयम् ।
आयास्यतो वराकी ज्वरस्य तल्पं प्रकल्पयति ॥ ६७ ॥

अगणितेति । न गणिता जननिन्दा यया । एवं च वैद्यस्य तथाविधत्वेन प्रसिद्धिरित्यावेद्यते । त्वत्पाणिना स्पर्शः । नाडीप्रदर्शनार्थमिति भावः । तेन यो हर्षस्तदर्थं चञ्चला । एवं च संभोगसुखार्थं किं करिष्यतीति न विद्म इति ध्वन्यते । आयास्यतो ज्वरस्यागामिज्वरस्य चातुर्थिकादेस्तल्पं वराकी । एवं च कृपार्हत्वं व्यज्यते । प्रकल्पयति । एवं चोत्साहविशेषवत्ता द्योत्यते । नाडीविलोकनार्थं त्वदागमननिर्णयेन ज्वरागमनदुःखमपि न तया गण्यत इत्यासक्तिविशेषो ध्वन्यते ॥

एकवंशजन्यत्वेऽपि धनवत्त्वयैव प्रभुतेति कश्चिद्वक्ति । यद्वैकवंशजन्यत्वेऽपि कस्यचित्समृद्धिः कस्यचिन्न कश्चित्प्रधानं कश्चिद्गुणीभूत इति विधातुः सृष्टिर्विचित्रेति नात्र क्लेशादि विधेयमिति कंचन कश्चित्समाधत्ते—

अप्येकवंशजनुषोः पश्यत पूर्णत्वतुच्छताभाजोः ।
ज्याकार्मुकयोः कश्चिद्गुणभूतः कश्चिदपि भर्ता ॥ ६८ ॥

अप्येकेति । एकवंशजयोरपि । वंशो वेणुः । पक्षे कुलम् । 'कुलत्वक्सारौ वंशौ' इत्यभिधानात् । एकपदेन कारणैक्याद्वैलक्षण्यानर्हत्वं ध्वन्यते । पूर्णत्वं स्थूलावयवत्त्वम् । पक्षे समृद्धत्वम् । तुच्छत्वं सूक्ष्मत्वम् । पक्षे निर्धनत्वम् । तद्वतोर्ज्याकार्मुकयोः । अत्र 'अल्पाच्तरम्' इत्यनेन ज्याशब्दस्य पूर्वनिपातः । कश्चिज्ज्यारूपो गुणभूतः । कश्चित्कार्मुकरूपो भर्ता । 'ज्याप्रधानौ गुणौ,' 'धातृपोष्टारौ भर्तारौ' इत्यभिधानात् । इदं पश्यत । एवं चैकवंशजत्वेऽपि यस्मिन्पूर्णत्वं स एव भर्ता, नान्य इति व्यज्यते । यद्वैकवंशजन्यत्वेऽपि दैवाधीनतया कस्यचित्समृद्धिप्रभुत्वे कस्यचिदसमृद्धत्वाप्रधानत्वे इति नात्र खेद उचित इति ध्वन्यते । अथवाचेतनेऽपि गुणप्राधान्येनैव लक्षाप्तिः । अतो भवद्भिरप्यनयैव रीत्या स्थेयम् । न तु सर्वप्राधान्येनेति परस्पराहंकारशालिनां समाधानमिदम् ॥

नायिकासहचरी नायकं वक्ति—

अभिनवकेलिक्लान्ता कलयति बाला क्रमेण घर्माम्भः ।
ज्यामर्पयितुं नमिता कुसुमास्त्रधनुर्लतेव मधु ॥ ६९ ॥

अभिनवेति । अद्भुतसुरतश्रान्ता बाला । एवं च कोमलाङ्गीत्वमावेद्यते । क्रमेण । कपोलाद्यङ्गक्रमेणेत्यर्थः । घर्माम्भः कलयति । ज्यां मौर्वीमर्पयितुम् । सज्यां कर्तुमित्यर्थः । नमिता कुसुमास्त्रस्य मदनस्य धनुर्लता मकरन्दमिव । एवं च यथा यथा सुरतविशेषारम्भस्तथैतस्याः श्रमातिशयः । अतो मध्ये मध्ये विश्रान्तिर्देयेति ध्वन्यते । तेन च किंचित्कालं तूष्णीमवस्थित्या पुनः पूर्ववद्दार्ढ्यं ते भावीति द्योत्यते । यद्वा ज्यामर्पयितुमित्यादिदृष्टान्तव्याजेन सुखादिदानप्रवृत्तेन त्वया नैतस्याः श्रमो गणनीय इति व्यज्यते । अथवा मदनधनुर्लताया यथा नमनकाले मधुबिन्दूद्गिरणं स्वाभाविकं तथैतस्याः सुरतकालीनस्वेदाम्भः स्वाभाविकम् । अतो न मनसि त्वयैतस्याः श्रमवत्ता संभावनीयेति द्योत्यते ॥

कश्चन विरही वक्ति—

असती कुलजा धीरा प्रौढा प्रतिवेशिनी यदासक्तिम् ।
कुरुते सरसा च तदा ब्रह्मानन्दं तृणं मन्ये ॥ ७० ॥

असतीति । असती । इत्यनेन स्वनिष्ठप्रेमशालित्वमावेद्यते । वंशजा कुलजा । इत्यनेन स्थिरप्रेमवत्त्वमावेद्यते । धैर्यवती धीरा । इत्यनेन स्थिरस्वभाववत्त्वम् । तेनापि तदेव । प्रौढा । इत्यनेन स्वतन्त्रत्वं तेन च संकेतकरणसमर्थत्वम् । प्रतिवेशिनी । इत्यनेन तदेव । रसशालिन्यासक्तिं यदा कुरुते तदा ब्रह्मानन्दं तृणं मन्ये । एवं चैतादृशनायिका ब्रह्मानन्दवदप्राप्येत्यर्थः ॥

चिरविरहखिन्नां नायिकां नायको वक्ति—

अविरलपतिताश्रु वपुः पाण्डु स्निग्धं तवोपनीतमिदम् ।
शतधौतमाज्यमिव मे स्मरशरदाहव्यथां हरति ॥ ७१ ॥

अविरलेति । अविरलपतिताश्रु । चिरकालीनदर्शनादिति भावः । पक्षे जलसंबन्धादिति भावः । पाण्डु । विरहादिति भावः । पक्ष उज्ज्वलरूपम् । स्निग्धं स्नेहशालि । पक्षे स्वाभाव्यादिति भावः । उपनीतं समीपदेशे प्रापितं वपुः शतधौताज्यमिव मे स्मरशरदाहव्यथां हरति । एवं च यथा जीर्णज्वरादेर्नाशकं शतवारक्षालितं घृतं तथा त्वद्वपुर्मम चिरकालीनसंतापापनोदकम् । अतः समालिङ्गय मामिति ध्वन्यते ॥

एतस्याः संभोगस्थानं केदार एवेति कश्चिद्वक्ति—

अन्तर्निपतितगुञ्जागुणरमणीयश्चकास्ति केदारः ।
निजगोपीविनयव्ययखेदेन विदीर्णहृदय इव ॥ ७२ ॥

अन्तरिति । अन्तर्निपतिता गुञ्जाश्च गुणश्च तै रमणीयः सुन्दरः । यद्वा गुञ्जारूपो यो गुणः । शोभोत्कर्षजनकत्वादिति भावः । संभोगादिना गुञ्जाहारत्रुटनादिति भावः । केदारश्चकास्ति । निजा या गोपनकर्त्री । एवं च खेदौचित्यं द्योत्यते । तस्या विनयविनाशेन यद्दुःखं तेन विदीर्णहृदय इव । निपतितगुञ्जानामारक्तत्वादिति भावः । यथा स्वपालकस्य मुख्यवस्तुविनाशे सेवकस्य दुःखं भवति, तथा विनयस्यातिमुख्यत्वेन

तन्नाशे केदारस्यातिदुःखमिति भावः । यद्वा नायिकान्यादृशचरणविज्ञानेऽप्यखिन्नां सखीमपरसखी वक्ति। अन्तरिति । गोपीपदेन नीचत्वं तेन च विनयव्ययेऽपि न तथा खेदार्हत्वमित्यावेद्यते । केदार इत्यनेनाचेतनस्यापि स्वामिनीविनयव्ययेन दुःखवत्ता । तव तु सचेतनाया नेति महदनुचितमित्यावेद्यते । अत एव गुणपदम् । सहृदयमित्यर्थः ॥

परपुरुषरतानामनिवार्यं दौष्ट्यमित्याह कश्चित्—

अमुना हतमिदमिदमिति रुदती प्रतिवेशिनेऽङ्गमङ्गियम् ।
रोषमिषदलितलज्जा गृहिणी दर्शयति पतिपुरतः ॥ ७३ ॥

अमुनेति । रुदती । अत एव कोपकपटेन । न वास्तवमित्यर्थः । दलिता विनाशिता लज्जा यया । अमुना नायकेनेदमिदमङ्गं हतमित्यङ्गमङ्गम् । वक्षःस्थलादिकमित्यर्थः । पतिसमक्षम् । पतिपदं रक्षणकर्तृत्वेनाप्रियत्वं ध्वनयति । प्रतिवेशिने जारभूताय । प्रतिवेशिपदं निकटवर्तितया स्वदुःखनिवेदनयोग्यत्वं ध्वनयति । गृहिणी । एवं च गृहकर्मव्यापृताया अप्येतादृशी गतिस्तत्रान्यवार्ता केति भावः । दर्शयति । पतिपुरतोऽप्येतादृशकर्तव्यतानिपुणाः स्त्रियो भवन्तीति सर्वथा न विश्वासस्तासां विधेय इति ध्वन्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेताकारव्रज्या ।

आकारव्रज्या ।

क्वचिदन्यत्र विहितकेलिं 'कथं न मय्यनुरागं दर्शयसि' इति वादिनं नायकं नायिका वक्ति—

आन्तरमपि बहिरिव हि व्यञ्जयितुं रसमशेषतः सततम् ।
असती सत्कविसूक्तिः काचघटीति त्रयं वेद ॥ ७४ ॥

आन्तरमिति । आन्तरमपि । इत्यपिना बहिर्व्यञ्जनेऽतिकाठिन्यमावेद्यते । रसं रागम्, शृङ्गारादिकम्, द्रवद्रव्यं च । 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यभिधानात् । हि इति निश्चयेन । अशेषतो बहिरिव । व्यञ्जयितुं प्रकटीकर्तुम् । असती पुंश्चलो, सत्कवेः सूक्तिः, काचघटी, इति त्रयं सततं वेद । एवं च नास्माकं बहिरङ्गरागप्रकटनज्ञानमित्यावेद्यते । तेन च यत्रैव बहिरङ्गानुरागज्ञापनसामर्थ्यं तत्रैव गच्छेति । प्रसादरूपगुणवत्त्वादेव सत्काव्यत्वमिति वक्तीति कश्चित् ॥

कश्चिन्नायिकां वक्ति—

आलोक एव विमुखी क्वचिदपि दिवसे न दक्षिणा भवसि ।
छायेव तदपि तापं त्वमेव मे हरसि मानवति ॥ ७५ ॥

आलोक एवेति । आलोक एव दर्शन एव । पक्षे प्रकाश एव विमुखी । एवं चालिङ्गनादौ किं करिष्यसीति न विद्म इति भावः । क्वचिदपि कस्मिंश्चिदपि दिवसे दक्षिणानुकूलगामिनी । मानवति मानिनि । पक्षे परिमाणवति । तदपि त्वमेव मे छायेव तापं

संतापम् । पक्ष आतपम् । हरसि । एवं च त्वदतिरिक्ता न मम गतिरित्यवगत्याहमनुग्राह्य इति व्यज्यते ॥

कश्चित्कंचित्प्रति वक्ति—

आज्ञा काकुर्याच्चाक्षेपो हसितं च शुष्करुदितं च ।
इति निधुवनपाण्डित्यं ध्यायंस्तस्या न तृप्यामि ॥ ७६ ॥

आज्ञेति । आज्ञैवं कुर्विति, काकुर्दीनवचनम् । येनोद्दीपनादि भवतीति भावः । याच्चामुकं मह्यं देहीति, आक्षेपः कथमिदं कृतमिति, हसितम् । आनन्दाविर्भावादिति भावः । शुष्करुदितम् । स्वस्मिन्नसामर्थ्यव्यञ्जनायेति भावः । इति तस्या निधुवनं सुरतं तत्संबन्धि पाण्डित्यं ध्यायन्न तृप्यामि । एवं चैतादृशकेलिकलाप्रावीण्यमन्यत्र नास्तीति व्यज्यते । तेन चैतादृशनायिकासुरतध्यानं समुचितमिति ॥

कांचिन्मानिनीं सखी समाधत्ते—

आज्ञापयिष्यसि पदं दास्यसि दयितस्य शिरसि किं त्वरसे ।
असमयमानिनि मुग्धे मा कुरु भग्नाङ्कुरं प्रेम ॥ ७७ ॥

आज्ञापयिष्यसीति । आज्ञां करिष्यसि । एवं च नायके स्वाधीनता भवित्रीति ध्वन्यते । न केवलमाज्ञाकारित्वम्, अपि तु प्रणिपातप्रवणता तस्य भविष्यतीत्याह—दयितशिरसि पदं दास्यसि किं त्वरसे । एवं चैतत्क्रमेण विधेयमिति भावः । मुग्धे अत एवासमयमानिनि, प्रेम भग्नाङ्कुरं मा कुरु । एवं च दृढे प्रेम्णि सर्वमेतादृग्विधानं युक्तमिति प्रीत्या स्वाधीनतां नीत्वा पश्चात्कोपकरणमुचितमिति व्यज्यते । अथादौ दासभावं विधाय पश्चाच्चरणताडनं विधेयमिति लौकिकोक्तिरपि ॥

नायकः स्वस्य सखायं वक्ति—

आसाद्य भङ्गमनया द्यूते विहिताभिरुचितकेलिपणे ।
निःसारयताक्षानिति कपटरुषोत्सारिताः सख्यः ॥ ७८ ॥

आसाद्येति । विहिता अभिरुचिता स्वेच्छाविषयीभूता या केलिस्तद्रूपः पणो यस्मिन् । यस्य पराजयस्तेन जयशालिरुचिविषयीभूतसुरतं देयमेवंरूपपणवतीति भावः । द्यूते भङ्गं पराजयं प्राप्यानया नायिकयाक्षान्पाशान्निःसारयतेति कपटरुषा मिथ्याकोपेन सख्य उत्सारिता दूरीकृताः । एवं चेदृशक्रीडनं न कदाप्यस्तु । अपसारयन्तु पाशानिति मिषेण सख्याद्युत्सार्य प्रतिज्ञातकेलिं कुरुष्वेति मां प्रत्यभिव्यञ्जितमिति व्यज्यते । तेन चैतादृशी नान्या चतुरेति भावः ॥

सखी नायिकामुपदिशति—

आदरणीयगुणा सखि महता निहितासि तेन शिरसि त्वम् ।
तव लाघवदोषोऽयं सौधपताकेव यच्चलसि ॥ ७९ ॥

आदरणीयेति । आदरणीया गुणाः सौन्दर्यादयो यस्याः । पक्षे गुणास्तन्तवः । महता मान्येन । पक्ष उन्नतेन । तेन नायकेन । पक्षे सौधेन । शिरसि । पक्षेऽग्रभागे । निहितासि । एवं च नायकस्तवाज्ञां सर्वदा करोतीति न तस्यापराध इति भावः । तवायं लाघवदोषः । दोषपदेन लाघवे परित्याज्यत्वं द्योत्यते । सौधपताकेव यच्चलस्यस्थिरचित्ता भवसि । पक्षे चलनं कम्पः । एवं चैतादृशनायकं प्रति क्रोधादिना चाञ्चल्यकरणमनुचितं तवेति ध्वन्यते ॥

'एतादृशत्वदीयदर्शनेन ममासक्तिस्त्वय्यत्यन्तं समुदेति' इति कश्चिकांचिद्वक्ति । यद्वा 'त्वया तिरस्कृतस्त्वदर्थमेवाहं तपः करोमि' इति कांचित्कश्चिदाह—

आर्द्रमपि स्तनजघनान्निरस्य सुतनु त्वयैतदुन्मुक्तम् ।
खस्थमवाप्तुमिव त्वां तपनांशूनंशुकं पिबति ॥ ८० ॥

आर्द्रमिति । आर्द्रमपि । सजलत्वादिति भावः । पक्षे प्रेमवत्त्वादिति भावः । एवं च त्यागानर्हत्वं ध्वन्यते । स्तनजघनान्निरस्य । पक्ष आलिङ्गनाद्यदत्त्वेत्यर्थः । सुतनु । एवं च स्पृहणीयत्वमावेद्यते । त्वयोन्मुक्तमेतदंशुकं वस्त्रम् । पक्षेऽशुकमिव । सूक्ष्मत्वादिति भावः । एवं च विरहातिशय आवेद्यते । खस्थमन्तरिक्षस्थम् । पक्षे निरवलम्बनम् । एवं च त्वमेव ममावलम्बनमिति व्यज्यते । त्वामवाप्तुमिव सूर्यकिरणान्पिबति । एवं चाचेतनस्याप्यंशुकस्यैतादृशीं त्वामवलोक्यैतादृशी स्पृहा । किमु वाच्यं मादृशस्येति भावः । अथवाचेतनांशुकमपि त्वत्समागमाय तपस्तपति । तत्र का वार्ता सचेतनस्य ममेति भावः । अन्योऽप्यन्तरालावस्थितस्तपनकरपानमात्रेणैव तपस्तपतीति लौकिकम् ॥

कश्चित्कस्याश्चिच्चेष्टां वक्ति—

आरोपिता शिलायामश्मेव त्वं स्थिरा भवेति मन्त्रेण ।
मग्नापि परिणयापदि जारमुखं वीक्ष्य हसितैव ॥ ८१ ॥

आरोपितेति । 'अश्मेव त्वं स्थिरा भव' इति मन्त्रेण शिलायामारोपिता स्थापितचरणा । परिणयो विवाहस्तद्रूपापत् । दुःखदत्वादिति भावः । आपत्पदं दुःसहत्वमावेदयति । तस्यां मग्नापि जारमुखं वीक्ष्य हसितैव । एवं चैते मूर्खाः, यत्प्रथमतो मद्विवाहः कृतस्तत्रापि स्थिरत्वप्रार्थना क्रियते, नैतावता त्वया भेतव्यमिति ध्वन्यते । यद्वा परमविपत्तौ पतितापि बहुभिः 'स्थिरा भव' इति प्रार्थितापि जारमुखमवलोक्य हसनेन स्वस्य चिन्ताविहीनत्वं प्रदर्शयति । सा त्वं त्वद्याप्यपरिणीता किमर्थं बिभेषीति काचित्कांचिद्वक्ति ॥

अन्याङ्गनागमनखिन्नां नायिकां नायकः समाधत्ते—

आयाति याति खेदं करोति मधु हरति मधुकरीवान्या ।
अधिदेवता त्वमेव श्रीरिव कमलस्य मम मनसः ॥ ८२ ॥

आयातीति । मधुकरीवान्यायात्यागच्छति, याति गच्छति, खेदं करोति । चाञ्च-

ल्यस्वभावादिति भावः । एवं च तदागमने न मम सुखमिति द्योत्यते । मधु मकरन्दं हरति । उन्मादकत्वसंबन्धेन मधुपदेन द्रव्यं लक्ष्यते । एवं च न वास्तवं प्रेम तस्यामिति ध्वन्यते । मम मनसोऽधिदेवता त्वमेव । कमलस्य श्रीरिव । एवं च मन्मनसि सर्वदा त्वमेव वससि । सा तु कादाचित्कागमनवतीति न त्वया मयि विधेयः खेद इति द्योत्यते ॥

सखी नायिकामुपदिशति—

आसाद्य दक्षिणां दिशमविलम्बं त्यजति चोत्तरां तरणिः ।
पुरुषं हरन्ति कान्ताः प्रायेण हि दक्षिणा एव ॥ ८३ ॥

आसाद्येति । दक्षिणां याम्यां दिशमासाद्याविलम्बं शीघ्रं तरणिरुत्तरां दिशं त्यजति । प्रकृतं वक्ति । दक्षिणा एव चतुरा एव कान्ताः प्रायेण बाहुल्येन । एवं चैका चतुरापि न हरति । तथा परक्षान्तिरिति भावः । पुरुषं हरन्ति । एवं च त्वया स्वचातुर्येणैव नायकः स्वाधीनताभाजनं विधेय इति व्यज्यते । पक्षे । कर्कटादिषड्राशिसंचरणरूपदक्षिणायने तरणेः क्रमेण सप्तपञ्चाशदष्टपञ्चाशदेकोनषष्टिषष्ट्येकषष्टिचतुर्विंशतिविकलासहितैकषष्टिकला इत्येवं द्रुतगतिः । मकरादिषड्राशिसंचरणरूपोत्तरायणे क्रमेण चतुर्विंशतिविकलासहितैकषष्टिषष्ट्येकोनषष्ट्यष्टपञ्चाशत्सप्तपञ्चाशत्कला इत्येवं मन्दगतिरिति ज्योतिर्विदां प्रक्रिया ॥

कश्चिदन्योक्त्या नायिकां स्तौति—

आदानपानलेपैः काश्चिद्गरलोपतापहारिण्यः ।
सदसि स्थितैव सिद्धौषधिवल्ली कापि जीवयति ॥ ८४ ॥

आदानेति । काश्चिदौषध्य आदानं मन्त्रपूर्वकं ग्रहणम्, पानं गलाधःकरणम्, लेपः सर्वाङ्गसंयोगः, एतैर्गरलस्योपतापहरणसामर्थ्याः । काप्यनिर्वचनीया सिद्धौषधिवल्ली जीवयति । एवं च दूरतोऽपि त्वया दर्शनमवश्यं देयमिति ध्वन्यते । यद्वान्याङ्गनाश्चैलाञ्चलाकर्षणाधरपानसर्वाङ्गीणालिङ्गनैः संतापापनोदनसमर्थाः । त्वं केवलमवलोकिता विरहविगतासोरसुप्रदा भवसीति ध्वन्यते । तेन चान्याङ्गनाभ्योऽधिका त्वमिति स्तुतिर्व्यज्यते । यद्वा तस्या दर्शनमात्रेणैवाहं जीवामीति नायिकासखीं प्रत्युक्तिर्नायकस्य ॥

नायिकासखी नायकं वक्ति—

आन्दोललोलकेशीं चलकाञ्चीकिङ्किणीगणक्वणिताम् ।
स्मरसि पुरुषायितां तां स्मरचामरचिह्नयष्टिमिव ॥ ८५ ॥

आन्दोलेति । आन्दोलनमान्दोलस्तेन चञ्चलालकाम्, चपलमेखलाक्षुद्रघण्टिकासमूहस्य क्वणितं शब्दो यस्यास्ताम्, एतादृशीं पुरुषायितां विपरीतरतकारिणीं तां प्रसिद्धगुणां स्मरसीति । काका न स्मरसीत्यर्थः । एवं चैतादृशगुणशालिन्यास्तस्या यदि तवानुसंधानं भवेत्तर्हि कथमन्यत्रासक्तिसंभवनेति भावः । स्मरस्य चामरचिह्नस्य यष्टिमिव ।

एवं च यथा चामरादिराजचिह्नैः सर्वैरयं राजेति ज्ञायते तथानया मदनोऽयमिति । मदनप्रसिद्धिसंपादकत्वेनातिसौन्दर्यादिगुणवत्ता नायिकायामावेद्यते ॥

नायको नायिकां वक्ति—

आक्षिपसि कर्णमक्ष्णा बलिरपि बद्धस्त्वया त्रिधा मध्ये ।
इति जितसकलवदान्ये तनुदाने लज्जसे सुतनु ॥ ८६ ॥

आक्षिपसीति । हे सुतनु, अक्ष्णा नेत्रेण कर्णं श्रवणम्, राधेयं च । आक्षिपसि स्पृशसि, तिरस्करोषि च । त्वया बलिरपि त्रिवली । बवयोरैक्यात् । दैत्यश्च । मध्ये त्रिधा बद्धः । त्रिधेत्यनेनात्यन्तं निर्जितत्वं द्योत्यते । त्रिवलीवाचकस्य वलिशब्दस्य पुंस्त्वं श्लेषानुरोधान्निरङ्कुशत्वाद्वा । इत्यमुना प्रकारेण जिताः सकला वदान्याः प्रदातारो यया तत्संबुद्धिः । तनुदाने शरीरदाने, स्वल्पदाने च । लज्जसे । एवं चात्यन्तौदार्यशालितया तव तनुदानमपि तनुदानमेवेति ध्वन्यते । तेन चैतद्दाने विलम्बो न विधेय इति भावः ॥

कस्यचिदत्यन्तनायिकासक्तिं कश्चिद्वक्ति—

आक्षेपचरणलङ्घनकेशग्रहकेलिकुतुकतरलेन ।
स्त्रीणां पतिरपि गुरुरिति धर्मं न श्रावितो सुतनुः ॥ ८७ ॥

आक्षेपेति । आक्षेपस्तिरस्कारः, चरणलङ्घनं चरणाहतिः, केशग्रहः, एतेषां यत्केलिकुतुकं तत्र तरलेन समासक्तेन स्त्रीणां पतिर्गुरुरिति धर्मं श्रावितापि न । एवं च साहजिकधर्मचर्यायामपि नैतदुदीरितं तत्र नोपदिष्टमिति किमु वाच्यमिति भावः । एवं चैतच्छ्रवण आक्षेपादि न विधेयं तयेति भीतिर्ध्वन्यते । तेन चात्यन्तकेलिलम्पटत्वम् । श्वशुरादिसमुच्चायको यथास्थित एवापिशब्द इति ऋजवः ॥

नायिका नायकाकस्मिकसङ्गं सखीं वक्ति—

आगच्छतानवेक्षितपृष्ठेनार्थी वराटकेनेव ।
मुषितास्मि तेन जघनांशुकमपि वोढुं नशक्तेन ॥ ८८ ॥

आगच्छतेति । हे सखि, अनवेक्षितं वीक्षणाभाववद्यत्पृष्ठं तेनागच्छतागमनवता । एवं च संमुखागमनाभावेन दर्शनाभावो व्यज्यते । पक्षेऽनवेक्षितं पृष्ठं यस्य । आगच्छतेति । हे सखि, अनवेक्षितं वीक्षणतामप्राप्तेन नायकेन जघनस्थं यदंशुकं वासस्तदपि वोढुं मुषितास्म्यसमर्था कृतास्मि । एवं चोत्तरीयवसनग्रहणं दूरापास्तमिति भावः । नन्वागमनसमय एव न कुतो गतं त्वयेत्यत आह—न विद्यते शक्तो यस्मात्तेन । समर्थेनेत्यर्थः । एवं च ततोऽपसरणमशक्यमिति भावः । यद्वा काका न मुषितास्मि । अपि तु मुषितास्मि । पक्षेऽशुरेवांशुकस्तं किरणमपि वोढुं नशक्तेनासमर्थेन । दृष्टान्तमाह—वराटकेन कपर्देनार्थीव याचक इव । एवं च पश्चाद्भागीयकिरणशून्येन सच्छिद्रेण कपर्देन यथा याचको मुषितो भवति तथाकस्मिकपश्चादागमनशालिना स्नानावसानसमये जघनांशुकग्रहणेऽपि

हृतचित्ता जातेति भावः । गौडदेशे पृष्ठभागच्छिद्रवता कपर्देन व्यवहरन्ति तदभिप्रायेणेदम् । यद्वानवेक्षितपृष्ठेन स्वपश्चाद्भागानवलोकनेन । एवं च भीतिशून्यत्वेन विह्वलत्वं व्यज्यते । जघनांशुकमपि वोढुं नशक्तेन । एवं च विरहक्षीणतया वाससि रूपत्वं ध्वन्यते । एतादृशेन मुषितास्मि । एवं च तथाविधतदीयासक्तिमालोच्याहमपि तन्निमग्नमनस्का जातास्मीति नायिका वक्तीत्यर्थः । अन्योऽपि चोरः पृष्ठतः समागत्य लुण्ठनं करोति यथा जघनांशुकमपि न भवतीति लौकिकम् । नशक्तेनेति वचनात्तथा मुषितास्मि यथा जघनांशुकमपि वोढुमसमर्थैवेत्यवधारणार्थक इवशब्दः ॥

प्रणयकोपमवलम्ब्य सुप्तां नायिकां प्रति सखी वक्ति—

आकुञ्चितैकजङ्घं दराद्वतोर्ध्वोरु गोपितार्धोरु ।
सुतनोः श्वसितक्रमनमदुदरस्फुटनाभि शयनमिदम् ॥ ८९ ॥

आकुञ्चितेति । आकुञ्चितैका जङ्घा यस्मिन्, दरमीषदाद्वत ऊर्ध्वमूरुर्यत्र, गोपितोऽत्यन्तमाच्छादितोऽर्धोरुर्यत्र, श्वसितक्रमेण नमदुदरं तेन स्फुटा नाभिर्यत्र । क्रियाविशेषणान्येतानि । सुतनोरिदं शयनम् । 'स्यान्निद्रा शयनम्' इत्यमरः । एवं च त्वमेवैनां प्रसादयेति व्यज्यते । यद्वा सुरतश्रान्तशयनजातिवर्णनमेतत् ॥

सखी नायकं प्रति नायिकासक्तिविशेषमाह—

आदाय धनमनल्पं ददानया सुभग तावकं वासः ।
मुग्धा रजकगृहिण्या कृता दिनैः कतिपयैर्निःस्वा ॥ ९० ॥

आदायेति । अनल्पं बहु द्रव्यमादाय गृहीत्वा तावकं वासो वस्त्रं ददानया रजकगृहिण्या । एवं च संसारनिर्वाहकत्वं तस्या इति भावः । मुग्धा सुन्दरी, मूढा च । कतिपयैर्दिनैर्निःस्वा विगतद्रव्या कृता । एवं च वसनदर्शनमात्रेण धनव्ययमपि न गणयति, तत्र का वार्ता त्वदङ्गसङ्ग इति व्यज्यते ॥

कस्यचिद्दुष्टस्याधिकारदापनाय प्रयत्नशालिनं प्रति कश्चिदन्योक्त्या वक्ति—

आस्तां वरमवकेशी मा दोहदमस्य रचय पूगतरोः ।
एतस्मात्फलितादपि केवलमुद्वेगमधिगच्छ ॥ ९१ ॥

आस्तामिति । अस्य पूगतरोर्दोहदम् । फलजननार्थमिति भावः । मा रचय । अवकेशी निष्फलः । 'वन्ध्योऽफलोऽवकेशी च' इत्यमरः । आस्तामिदं वरम् । अत्र हेतुमाह— एतस्मात्फलितात्केवलम् । एवं चान्यफलाभाव इति भावः । उद्वेगमधैर्यादि फलम् । ऋमुक इत्युपक्रम्य 'अस्य तु फलमुद्वेगम्' इत्यमरः । अधिगच्छ जानीहि । एवं चैतस्याधिकारे संपादिते तवोद्वेग एव भविष्यतीति ॥

दुष्टावलम्बनपुरःसरारब्धकार्यस्यावश्यमनर्थजनकत्वमिति कश्चिदन्योक्त्या वक्ति—

आरब्धमब्धिमथनं स्वहस्तयित्वा द्विजिह्वममरैर्यत् ।
उचितस्तत्परिणामो विषमं विषमेव यज्जातम् ॥ ९२ ॥

आरब्धमिति । अमरैर्देवैः । एवं चैतादृशोद्योगशालित्वं युक्तमित्यावेद्यते । यद्विजिह्वं सर्पम् । पक्षे तात्कालिकान्यथावादिनम् । स्वहस्तयित्वा स्वकरे विधाय । पक्षे स्वाधीनीकृत्य । अब्धिमथनमारब्धं तस्य परिणाम उचित एव यद्विषमम् । दाहकत्वादिति भावः । विषं जातमुत्पन्नम् । एवं च यथा द्विजिह्वावलम्बनेन समुद्रमथने विषमभवत्तथा दुष्टावलम्बनेनारब्धकार्यपरिणामेऽसम्यगेव फलं भावीति व्यज्यते । यथास्थितैवकारयोजनं त्वन्यफलोत्पत्तिश्रवणादसमञ्जसम् । यद्वामराणामप्येतादृशावलम्बनपुरःसरारब्धकार्य एतादृशमभवत्तत्र का वार्तान्यस्येति व्यज्यते ॥

आवर्जितालकालि श्वासोत्कम्पस्तनार्पितैकभुजम् ।
शयनं रतिविवशतनोः स्मरामि शिथिलांशुकं तस्याः ॥ ९३ ॥

आवर्जितेति । आवर्जिता संयमिता केशपङ्क्तिर्यत्र, श्वासैरुत्कम्पौ यौ स्तनौ तयोरर्पित एको भुजो यत्र, शिथिलमंशुकं यत्र, रत्या विवशा स्वानधीना तनुर्यस्यास्तस्याः । एवं च निःसहाङ्गत्वं ध्वन्यते । शयनं स्मरामि । सुरतश्रान्तनायिकास्वापवर्णनमेतत् ॥

नायको नायिकां वक्ति—

आम्राङ्कुरोऽयमरुणश्यामलरुचिरस्थिनिर्गतः सुतनु ।
नवकमठकर्परपुटान्मूर्धेवोर्ध्वं गतः स्फुरति ॥ ९४ ॥

आम्रेति । चूताङ्कुरोऽरुणश्यामला रुचिर्दीप्तिर्यस्य । अस्थि कर्कशोपरिभागः । ततो निःसृतः । हे सुतनु स्फुरति । नवो नूतनो यः कमठस्तस्य यत्कर्परपुटं पृष्ठास्थि तस्मादूर्ध्वं निःसृतो मूर्धेव । एवं चाम्राङ्कुरोत्पत्तिकथनेन, कमठार्भकस्मारणेन, प्रावृट्कालागमनोपन्यासेन, नेदानीं ते मानविधानमुचितमिति व्यज्यते । यद्वाम्राङ्कुरोऽयमित्यादिना प्रावृट्प्रादुर्भावशंसनेनावश्यं पतिस्ते समायास्यतीति सखी चिरविरहखिन्नां नायिकां समाधत्त इत्यर्थः । केचित्तु व्रीडाकरसंस्थानसादृश्यावधारणेन सामान्यवनितामुपहसति कश्चिदित्याहुः । यत्तु नायिकाचित्तव्याक्षेपपरमिदमिति तत्केनापि नायिकाचित्तव्याक्षेपासंपादनाद्वात्स्यायनादिभिरकथनाच्चानुचितमित्याभाति । एवं 'दरस्फुटिअ' इत्यादिप्राकृतगाथापि योज्या ॥

कश्चित्कंचित्प्रति वक्ति—

आभङ्गुराग्रबहुगुणदीर्घास्वादप्रदा प्रियादृष्टिः ।
कर्षति मनो मदीयं हृदमीनं बडिशरज्जुरिव ॥ ९५ ॥

आभङ्गुरेति । आभङ्गुराग्रा कुटिलकटाक्षा, बहुगुणा वशीकरणतादिशालिनी । यद्वार्जुनकृष्णरक्तरूपशालिनी । दीर्घा कर्णान्ते प्रसरणशीला, आस्वादप्रदा सुखदा, प्रियादृष्टिः । पक्षे कुटिलाग्रा, बहुतरसूत्रैर्महत्तरा । यद्वा बहुतन्तुमयी । लम्बायमाना, मधुरवस्तुदात्री । एवं च मोचनायोग्यत्वम्, दृढत्वम्, दूरतोऽपि कार्यसंपादकत्वम्, अवश्यं जनलोभनी-

यत्वं च क्रमेणोभयत्र ध्वन्यते। मदीयं मनः कर्षति। एवं च न ममापराध इति भावः। ह्रदमत्स्यम्। ह्रदपदेन स्वस्मिन्नाम्भीर्यमावेद्यते। बडिशरज्जुरिव। 'बडिशं मत्स्यवेधनम्' इत्यमरः। एवं च यथा बडिशरज्ज्वाकृष्टमत्स्यस्य ह्रदावस्थितिरसंभाविनी तथा प्रियादृष्ट्याकृष्टस्य मच्चेतसोऽप्यवस्थितिरिति व्यज्यते। तेन च ज्ञानशून्यत्वं तेनापि त्वदुपदेशापात्रमहमिति॥

नायिकासखी नायकं वक्ति—

आलप यथा यथेच्छसि युक्तं तव कितव किमपवारयसि।
स्त्रीजातिलाञ्छनमसौ जीवितरङ्का सखी सुभग॥ ९६॥

आलपेति। यथा यथेच्छसि तथालप त्वन्मनसि यदायाति तद्यथेष्टं वद। वाच्यावाच्यविचारं मा कृथा इति भावः। इदं युक्तं तव। न ममेति भावः। यद्वा नान्यस्य समीचीनस्य। कितव धूर्त। एवं चैतादृशवक्तृतायोग्यत्वं तवेति भावः। किमपवारयसि गोपयसि। दुष्टो नेति वदसीति भावः। यद्वा यथा समाधातुं शक्यं तथा वचनरचनां कुरु। एवं च तत्र नास्माकमास्थेति भावः। एवं च गोपनेन किं सर्वमेवास्माभिस्त्वद्वृत्तं ज्ञायत इति व्यज्यते। स्त्रीमात्रकलङ्कभूतेयं मत्सखी। एवं चान्याभिर्नैवंविधं सोढुं शक्यमिति भावः। जीवितार्थं रङ्का दीना। एवं च त्वदनालोकनेन तस्या मरणमेव भावीति भावः। सुभग। कथमन्यथेदृशप्रियाप्राप्तिरिति भावः। एवं चेयं जीवितमात्राभिलाषिणी त्वदीयमेतादृशदुश्चेष्टितं सहते, नान्ययैवं सह्यमिति स्वसख्यासक्तिर्नायके तस्य चेतरनायकाधिक्यं व्यज्यते। तेन तथाविधायां तस्यां तवैतादृशाचरणमनुचितमिति॥

काचिन्नायिका नायकं प्रत्यन्योक्त्या वक्ति—

आस्वादितोऽसि मोहाद्भृत विदिता वदनमाधुरी भवतः।
मधुलिप्तक्षुर रसनाछेदाय परं विजानासि॥ ९७॥

आस्वादितोऽसीति। मधुलिप्तपदेनोपरितना माधुर्यवत्ता व्यज्यते। क्षुरपदेन क्षतजननयोग्यत्वं ध्वन्यते। मोहाद्भ्रमादास्वादितोऽसि। भवतो वदनस्य माधुरी। बत खेदे। विदिता। एतदेवाह—रसनाछेदाय परं विजानासि। एवं च केवलं वदनमाधुर्यमात्रेण परकीयं वाक्प्रसरं खण्डयित्वान्तर्दौष्ट्यं करोषीति व्यज्यते। यद्वा प्रीत्यारम्भ एवैतादृशं त्वया कृतम्, अतोऽग्रे त्वत्संगतिरत्यन्तदुःखदैव भाविनीति नातस्त्वत्संगतिमहं विधास्य इति व्यज्यते॥

अनासादितनायकरसां सामान्यवनितां सखी वक्ति—

आकृष्टिभग्नकटकं केन तव प्रकृतिकोमलं सुभगे।
धन्येन भुजमृणालं ग्राह्यं मदनस्य राज्यमिव॥ ९८॥

आकृष्टिरिति। आकृष्टया। अवलम्बनेनेत्यर्थः। पक्षे विमर्देन। भग्नं कटकं वलयम्। पक्षे सैन्यम्। यस्याः। एवं चावलम्बनमात्रेण भञ्जनार्हत्वप्रतिपादनेन, वलयेऽतितनी-

यस्त्वद्योतनेन, कामिन्यामतिकोमलाङ्गीत्वं द्योत्यते । प्रकृत्या स्वभावेन । पक्षे प्रजाभिः । कोमलं मृदु । पक्षे सौम्यम् । सुभगे सौभाग्यशालिनि तव भुजमृणालम् । स्वभावकोमलत्वेऽपि मृणालरूपत्वप्रतिपादनेनातिकोमलत्वं ध्वन्यते । यद्वा संतापनोदकत्वमात्रमत्र । केन धन्येन ग्राह्यम् । मदनस्य राज्यमिव । एवं च यस्य तव पाणिस्पर्शो भविता स मदनमहीपतिरेवेति व्यज्यते । तेन च त्वं रतिरूपेति । यद्वा बलादाकृष्टकरां सामान्यवनितामवलोक्य तत्सखी वक्ति । भग्नकटकमित्यनेन वलयार्थमेतस्माद्वसु ग्राह्यमिति व्यज्यते । धन्येन धनवतेत्यर्थः । केन सुखेन ग्राह्यम् । एवं चान्येन न ग्रहीतुं शक्यमिति भाव इत्यर्थः । अविवाहितां कांचित्काचिद्वक्तीत्यपि ॥

कश्चित्कांचिद्वक्ति—

आरुह्य दूरमगणितरौद्रक्लेशा प्रकाशयन्ती स्वम् ।
वातप्रतीच्छनपटी वहित्रमिव हरसि मां सुतनु ॥ ९९ ॥

आरुह्येति । दूरमारुह्य । प्रासादशिखरमिति भावः । अगणितो रौद्रो दुःसहः । पक्षे धर्मसंबन्धी क्लेशो यया । स्वमात्मानं प्रकाशयन्ती मां सुतनु हरसि स्वाधीनतां नयसि । वातप्रतीच्छनपटी वातानुकूलगमनजनकं वस्त्रं वहित्रमिव नावमिव । वहित्रपदेन सहनशीलत्वमावेद्यते । एवं च त्वद्दर्शनेनाहमितः सत्वरमागत ऐवत्यवेहीति व्यज्यते ॥

केषांचिदाश्रयेण कंचिदपकर्तुमुद्यतं कश्चिदन्योक्त्या वक्ति—

आयासः परहिंसा वैतंसिकसारमेय तव सारः ।
त्वामपसार्य विभाज्यः कुरङ्ग एषोऽधुनैवान्यैः ॥ १०० ॥

आयास इति । हे वैतंसिकस्य मांसिकस्य । एवं चैतस्य मांसदानमशक्यमिति व्यज्यते । 'वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम्' [इत्यमरः] । सारमेय कुक्कुर । आयासः श्रमः, परस्य हिंसा प्राणनिर्गमफलको व्यापारः , तव सारः सारभूतम् । नान्यदिति भावः । एतदेवाह—त्वामपसार्य दूरीकृत्य । बलात्कारादिति भावः । एष कुरङ्गो हरिणः । एवं च कृपार्हत्वं ध्वन्यते । अधुनैव । एवं च पश्चात्प्रतीकाराभावो व्यज्यते । अन्यैर्मांसिकानुयायिभिर्विभाज्यः । विभज्य ग्राह्य इत्यर्थः । एवं चैतादृशानुचितकार्यकरणे तव न किंचित्फलम्, प्रत्युत दुःखादीतीदृशं न विधेयमिति व्यज्यते ॥

कश्चन कस्यचिदग्रे कस्यचिद्द्वौत्यमन्योक्त्या वक्ति—

आनयति पथिकतरुणं हरिण इह प्रापयन्निवात्मानम् ।
उपकलमगोपि कोमलकलमावलिकवलनोत्तरलः ॥ १०१ ॥

आनयतीति । कोमला ये कलमास्तेषामावलयस्तासां कवलन उत्तरल उत्कण्ठितो हरिण आत्मानं प्रापयन्निव । न वास्तवमित्यर्थः । एवं च धूर्तत्वं व्यज्यते । पथिकतरुणम् । पथिकपदेन विरहखिन्नत्वं द्योत्यते । तरुणपदेन कलमगोपिकास्पृहणीयत्वं व्यज्यते । कलमाः शालिविशेषास्तद्रक्षणकर्त्र्याः सविधे आनयति प्रापयति । एवं च क-

लमगोपिकायाः पथिकतरुणासक्तौ स्वयं कलमभक्षणं सुखेन करिष्यामीति धियेति भावः। एवं च स्वार्थप्रवणतयानेनैतस्या दौत्यं क्रियत इति व्यज्यते । यद्वा मृगोऽपि स्वार्थमेतादृशं कर्म कर्तुं जानाति, तत्र किं वाच्यं मनुष्यरूपायास्तवेति । नाहमिदं कर्म जानामीति वादिनीं कांचन प्रलोभनपुरःसरं काचिद्वक्ति । यद्वा यस्या एव स्वार्थेच्छा सैव मदीयं दौत्यं करिष्यतीति काचित्कांचिद्दूतीं वक्ति । अथवैतमेतस्या दर्शयित्वासक्तिमुत्पाद्यैतस्या धनमनेन भुज्यत इति कश्चित्कांचिद्वक्ति । यद्वा मृगेणापि गोपिकाकलमभक्षणेन तरुणसंगमरूपोपकारस्तस्याः क्रियते, त्वया तु न तथेति काचिद्दूतीमुपालभते । अथवा स्वार्थपुरःसरतयैतादृशं कर्तुं शक्यमिति कांचिदन्योक्त्या वदति ॥

किं त्वयैतादृशमकारि येनायमधुनान्यादृशं वक्तीति वादिनीं सखीं नायिका वक्ति—

आसीदेव यदार्द्रः किमपि तदा किमयमाहतोऽप्याह ।
निष्ठुरभावादधुना कटूनि सखि रटति पटह इव ॥ १०२ ॥

आसीदिति । अयं नायको यदार्द्र एव मद्विषयकरसवानेवासीत्तदाहतोऽपि किमपि किमाहावादीत् । नेत्यर्थः । अयमेवेति योजना वा । एवं च सर्वमेतत्तवैव प्रत्यक्षमिति व्यज्यते । 'एषः' इत्यपि पाठः । सखि, अधुना निष्ठुरभावात्प्रेमाभावात् । पक्षे शुष्कत्वात् । कटूनि रटति पटह इव । 'आनकः पटहोऽस्त्री' इत्यमरः । एवं च न ममापराधः, किं त्वयमेव निष्ठुरत्वादेतादृशं वक्तीति ध्वन्यते । पटहोऽप्यार्द्रस्ताडितो न शब्दं जनयति, शुष्कस्तु जनयति तद्वदिति भावः ॥

त्वच्चेष्टितमिदमाकर्ण्य नायिका त्वां किं किं न करिष्यतीति वादिनीं नायिकासखीं नायको वक्ति—

आज्ञाकरश्च ताडनपरिभवसहनश्च सत्यमहमस्याः ।
न तु शीलशीतलेयं प्रियेतरद्वक्तुमपि वेद ॥ १०३ ॥

आज्ञाकर इति । यद्वा यदि त्वमेतस्याः सर्वदाज्ञाकार्यसि तर्हीयं कथं मुखरा भविष्यतीति वादिनीं नायको वक्ति । आज्ञां करोत्येतादृशः । ताडनम्, परिभवस्तिरस्कारः । ताडनापेक्षया तिरस्कारे दुःसहत्वं ध्वन्यते । यद्वा ताडनजन्यपराभवः । एवं च वचनजन्यपराभवस्याकिंचित्करत्वं व्यज्यते । एतत्सहनः । अस्या नायिकायाः । दूरस्थत्वेऽपि प्रत्यक्षवन्निर्देशेन सर्वदा तद्गतमनस्कत्वं तेनान्यादृशाचरणाभावो व्यज्यते । अहमस्मि । शीलेन स्वभावेन शीतला सौम्या । एवं च स्वभावस्य दूरीकर्तुमशक्यत्वेन मदपराधनिवेदकस्य वृथा श्रमवत्तेति व्यज्यते । तेन त्वया तत्र न किमपि वाच्यमिति । इयं प्रियेतरदप्रियं वक्तुमपि । एवं च कर्तुं नेति किमु वाच्यमिति भावः । न वेद ॥

एतस्मादिदं भविष्यति न वेत्यविचार्य कार्यकारिणमन्योक्त्या कश्चिद्वक्ति—

आधाय दुग्धकलशे मन्थानं श्रान्तदोर्लता गोपी ।
अप्राप्तपारिजाता दैवे दोषं निवेशयति ॥ १०४ ॥

आधायेति। दुग्धस्य कलशे पात्रे मन्थानमाधाय श्रान्ता दोर्लता यस्याः सा गोपी गोपस्य स्त्री। एवं च विवेकविधुरत्वं ध्वन्यते। एवमपि न प्राप्तः पारिजातवृक्षो यया सा दैवे दोषं निवेशयति स्थापयति। एवं च यथा देवैः क्षीरसमुद्रमथनेन पारिजातो लब्धः स च कृष्णेन सत्यभामाया दत्तस्तर्हि मयापि क्षीरं निर्मथ्य तं संप्राप्य सत्यभामाधिकया भवितव्यमिति कृते भाण्डक्षीरमथने तदप्राप्त्या दैवं निन्दति, न स्वमौर्ख्यमिति भावः। एवं च यतो यद्भविष्यतीति निर्णयस्तत्रैव तदर्थं प्रवृत्तिरुचितेति ध्वन्यते। यद्वैतस्मान्मम सुखं भविष्यति न वेत्यनवधार्य कस्मिंश्चिदासक्तिं विधाय तदप्राप्त्या दैवविनिन्दिकां काचिदन्योक्त्या वक्ति। यत्तु पारिजातं नवनीतमित्याह तत्तथा कोषाद्यश्रवणादसम्यक्॥

कश्चिन्नायिकासाधुत्वं स्वस्य सखायं वक्ति—

आस्तां मानः कथनं सखीषु वा मयि निवेद्यदुर्विनये।
शिथिलितरतिगुणगर्वा ममापि सा लज्जिता सुतनुः॥ १०५॥

आस्तामिति। निवेदितुं योग्यो दुर्विनयो यस्यैतादृशेऽपि मयि सति। एवं चावश्यकथनीयत्वमपराधे ध्वन्यते। मान आस्ताम्। न कृत इत्यर्थः। न केवलं मानासंपादनम्। अपि तु सखीषु। सखीपदं कथनार्हतां द्योतयति। कथनं वा। मदपराधस्येति भावः। न कृतमित्यर्थः। शिथिलितो रतिसंबन्धिगुणानां गर्वो यया सा सुतनुर्मम लज्जिता। एवं च यदि मयि गुणाः स्युस्तदानेनान्यत्रासक्तिः कथं कर्तुं शक्येति धिया संजातलज्जा मां प्रत्यभूत्, अतो न मानमकरोत्, न वा सखीष्वकथयदिति भावः। अथवा सापराधत्वेन मम लज्जायोग्यत्वेऽपि सैव स्वस्मिन्गुणाभावशङ्कया सलज्जा न मानादिकमकरोदिति भावः। अथवा ममापीति यथास्थित एवापिः। एवं चान्यं प्रति लज्जाकरणादीति किमपूर्वमिति भावः। यद्वा निवेदयितुं योग्यो मय्येव मदीयो दुर्विनयः। सोऽपि लज्जया मां प्रत्यपि नोक्तस्तत्र का वार्तान्यकथनादेरिति भावः॥

काचित्प्रियागमनोत्सवनैमित्तिकं तण्डुलाद्युज्ज्वलपिष्टद्रवलिप्तकरतलादिना चित्रकरणमङ्गलगानरूपमातर्पणविधानमन्यजनभीत्या स्नानावसर एवावर्तादिच्छद्मना करोतीति काचित्कांचिद्वक्ति—

आवर्तैरातर्पणशोभां डिण्डीरपाण्डुरैर्दधती।
गायति मुखरितसलिला प्रियसंगममङ्गलं सुरसा॥ १०६॥

आवर्तैरिति। डिण्डीरपाण्डुरैः फेनश्वेतैः। 'डिण्डीरोऽब्धिकफः फेनः' इत्यमरः। एवं च तण्डुलादि द्रवसाजात्यं ध्वन्यते। आवर्तैः। 'स्यादावर्तोऽम्भसां भ्रमः' इत्यमरः। एवं च करतलकृतचित्रसाजात्यं व्यज्यते। आतर्पणस्य शोभां दधती कुर्वती। मुखरितं सशब्दं कृतं सलिलं जलं यया। एवं चैतद्ध्वनिना स्वगानकरणतिरोधानमावेद्यते। यद्वा सलिलध्वनिमेव गानत्वेन संपादयतीत्यत्यन्तजनभीतिमत्त्वमावेद्यते। तच्चात्यन्तचातुरीम्।

सुरसा । एवं च रसातिशयवत्त्वादेवैतादृशाचरणप्रवणत्वमिति द्योत्यते । प्रियसंगमहेतुकं मङ्गलं गायति । नायिका चेयं परकीया ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपन या समेताकारत्रज्या ।

इकारत्रज्या ।

रात्रिसुरतश्रमसुप्तां नायिकां सखी शिक्षयितुं वक्ति—

इयमुद्गतिं हरन्ती नेत्रनिकोचं च विदधती पुरतः ।
न विजानीमः किं तव वदति सपत्नीव दिननिद्रा ॥ १०७ ॥

इयमिति । इयं तव दिननिद्रा सपत्नीवोद्गतिं गमनम् । पक्षे उत्कृष्टताम् । हरन्ती । नेत्रनिकोचं नयनसंकोचम् । आलस्यादिति भावः । पक्षे नेत्रविकारम् । द्वेषादिति भावः । विदधती पुरतः । तवेति भावः । एवं च त्वद्भीतिशून्यत्वं द्योत्यते । किं वदतीति न विजानीमः । एवं च यथा सपत्नी दुश्चरितवत्तामारोपयितुं समर्था तथेयं तव दिननिद्रा, इत्यतो मुञ्चैनामिति ध्वन्यते । यद्वा नेत्रसंकोचम्, अर्थात्तव, कुर्वती । सपत्न्याः प्रौढिवशाद्भयेनेति भावः । तव दिननिद्रा पुरतोऽग्रे किं वदति वदिष्यति । तन्न विद्म इत्यर्थः । एवं चेदानीं यथातथा समाधातुं शक्यमग्रे त्वनिष्टमेवानया भावीति ध्वन्यते । नायिका चेयं परकीया ॥

इदमुभयभित्तिसंततहारगुणान्तर्गतैककुचमुकुलम् ।
गुटिकाधनुरिव बालावपुः स्मरः श्रयति कुतुकेन ॥ १०८ ॥

इदमिति । इदमुभयभित्तावुभयपार्श्वे संततहारगुणस्तदन्तर्गत एककुचमुकुलो यस्मिंस्तद्बालाया मुग्धाया वपुर्गुटिकाधनुरिव गुटिकाशस्त्रमिव स्मरः श्रयति कुतुकेन । वैकक्षिकमालान्तर्गतकुचमुकुलत्वादिति भावः ॥

व्यवायस्थैर्याय कान्तचित्तं व्याक्षेप्तुं नायिका वक्ति—

इह शिखरिशिखरावलम्बिनि विनोददरतरलवपुषि तरुहरिणे ।
पश्याभिलषति पतितुं विहगी निजनीडमोहेन ॥ १०९ ॥

इहेति । इह शिखरी वृक्षः । 'तरुशैलौ शिखरिणौ' इत्यमरः । तच्छिखरावलम्बिनि । क्वचित् 'शिखा' इति पाठः । विनोदेन दरमीषत्तरलं चञ्चलं वपुर्यस्य तस्मिंस्तरुहरिणे शाखामृगे । अत्रोभयपदयोः परिवृत्तिसहत्वम् । विहगी निजं यन्नीडं स्थानम् । 'कुलायो नीडमस्त्रियाम्' इत्यमरः । तद्भ्रमेण पतितुमभिलषति । इदं पश्य । एवं च व्यवायस्थैर्यायैतादृग्ध्यानं विधेयमिति व्यज्यते । उक्तं च—'वानरं चपलं ध्यायेद्वृक्षशाखावलम्बिनम्' इति । अन्यत्रापि—'शाखामृगमतिचपलं क्षितिरुहनिहितं विचिन्तयेत्प्राज्ञः । अपि मणिमुखपर्यन्तप्राप्तं बीजं हि नो गलति' इति ॥

अन्याङ्गनाविलोकनजन्यमानवतीं नायिकां नायको यथासिद्धकुतूहलेन प्रसादयति—

इक्षुर्नदीप्रवाहो द्यूतं मानग्रहश्च हे सुतनु।
भ्रूलतिका च तवेयं भङ्गे रसमधिकमावहति ॥ ११० ॥

इक्षुरिति। हे सुतनु, इक्षुः, नदीप्रवाहः, द्यूतम्, मानग्रहश्च, तवेयं भ्रूलतिका च, भङ्गेऽधिकं रसमावहति। अत्र भङ्गरसशब्दौ क्रमेण दन्तचर्वणीयत्वातिशयसेत्वादिबन्धनपराजयपरित्यागवक्रतामृष्टतातिशयजलाधिक्यक्रीडनाधिकोत्साहकषायितवस्त्रानुरागातिशयतुल्यप्रीत्यतिशयचमत्कारविशेषार्थकौ। एवं च त्वदीयकुटिलभ्रुकुटिदर्शनेन ममाधिकं सुखमुत्पद्यत इति व्यज्यते। यद्वा तव मानग्रहः, भ्रूलतिका च। एवं च मानभङ्गे मिथ्या भ्रूकुटिलता सुखावहा, न वास्तवकोपेन विहितेति ध्वन्यते। 'हे' इति पदस्थाने 'ते' इति पाठे सुतनु, इक्षुः, नदीप्रवाहः, द्यूतं च, भङ्गेऽधिकं रसमावहति। अत्रामुकस्येति विशेषानुपादानात्सर्वस्येत्यर्थो लभ्यते। भङ्गरसशब्दावत्र प्रागुक्तार्थौ। ते मानग्रहो भ्रूलतिका च भङ्गे। तरङ्गवाचिना भङ्गपदेनाधिक्यं लक्ष्यते। तेन चौद्धत्यं व्यज्यते। एवं चाधिक्ये कौटिल्य इत्युभयत्रार्थः। अधिकं रसं शोभोत्कर्षं तवावहति। एवं चैतादृशातिशयितमानकुटिलभ्रुकुटिकरणं च तवोचितं नान्यासामिति व्यज्यत इति सनिन्दं नायकसखी मानिनीं वक्तीत्यर्थः। ग्रहपदेन चावश्यप्रतीकारकरणयोग्यत्वं ध्वन्यते॥

काचिन्नायिकां वक्ति—

इन्दोरिवास्य पुरतो यद्विमुखी सापवारणा भ्रमसि।
तत्कथय किं नु दुरितं सखि त्वया छाययेव कृतम् ॥ १११ ॥

इन्दोरिति। इन्दोरिव। एवं च संतापापनोदकत्वम्, तेन चालिङ्गनार्हत्वं ध्वन्यते। अस्य नायकस्य पुरतोऽग्रे यद्येन विमुखी परिवर्तितवदना। पक्षे पराङ्मुखी। सापवारणा कृतावरणा। पक्षेऽन्तर्धिसहिता। चन्द्रान्तर्गतत्वादिति भावः। भ्रमसीतस्ततो गच्छसि। पक्षे चन्द्रचलनादिति भावः। त्वया छाययेव किं नु दुरितं कृतं तत्कथय। एवं च सर्वाङ्गीणसंतापापनोदकसंमुखनायकपुरतो वैमुख्यचलनव्यवधानसंपादनादि प्राक्तनपापजनितमिति भावः। एवं चैतत्सर्वं परित्यज्य विगतभीर्नायकमालिङ्गयेति व्यज्यते॥

कांचित्कांचिन्निग्रहीतुमुद्यतामालोक्य तं प्रति कश्चिदन्योक्त्या वदति—

इह कपटकुतुकतरलितदृशि विश्वासं कुरङ्ग किं कुरुषे।
तव रभसतरलितेयं व्याधवधूर्वालधौ वलते ॥ ११२ ॥

इहेति। कपटजन्यकुतुकेन तरलिता चञ्चलतां प्रापिता। अन्यत्र स्थापितेत्यर्थः। एवं च न कथितपदत्वम्। दृग्यथैतादृश्याम्। इहैतस्याम्। एवं च विश्वासानर्हत्वं ध्वन्यते। हे कुरङ्ग हरिण। एवं च ज्ञानानर्हत्वं ध्वन्यते। विश्वासम्। इयं कुतुकासक्तदृगिति धियेति भावः। किं कुरुषे। तव रभसेन सरलतया तरलतां चञ्चलतां प्राप्ता। एवं च त्वत्सरलतैव तव बाधिकेति भावः। इयं व्याधवधूः। एवं च हिंसकत्वातिशयो द्यो-

त्यते । वालधौ पुच्छे वलते संनिहिता भवति । एवं चेयमधुनैव त्वां निग्रहीष्यतीति नैतस्यां विश्वासो विधेय इति व्यज्यते ॥

काचिन्महत्तरनायकसङ्गगर्वभाषिणीं कांचिदुद्दिश्यान्योक्त्या कांचित्प्रति वक्ति—

इह वहति बहुमहोदधिविभूषणा मानगर्वमियमुर्वी ।
देवस्य कमठमूर्तेर्न पृष्ठमपि निखिलमाप्नोति ॥ ११३ ॥

इह वहतीति । बह्वत्यन्तं महोदधिरूपं विभूषणं यस्याः सा । पक्षे बहुर्महत्तरो यो मह उत्सवस्तदुदधिर्विभूषणं यस्याः सा । यद्वा बह्वी महोदधेर्विभूषणरूपा । लक्ष्मीरिति यावत् । इयमुर्वी पृथ्वी । पक्षे श्रेष्ठा । मानस्य परिमाणस्य । पक्षे सर्वोत्कृष्टताभिमानस्य । गर्वम् । इह भवत्समक्षम् । न मत्समक्षमिति भावः । पक्ष इह लोके । वहति । कमठमूर्तेर्देवस्य कच्छपरूपभगवतो निखिलं समग्रं पृष्ठमपि नाप्नोति । एवं च सर्वशरीरव्यापनं केति भावः । एवं चैतस्यास्तत्पृष्ठावलोकनमपि दुर्लभम्, तत्र किमु वाच्यं तत्संगमादिरिति व्यज्यते । तेन चेयं भवत्सविधे मिथ्यागर्वमुद्वहतीति ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेतैकारव्रज्या ।

ईकारव्रज्या ।

कश्चित्सत्खायं वक्ति—

ईर्ष्यारोषज्वलितो निजपतिसङ्गं विचिन्तयंस्तस्याः ।
च्युतवसनजघनभावनसान्द्रानन्देन निर्वामि ॥ ११४ ॥

ईर्ष्येति । तस्या निजपतिसङ्गं विचिन्तयन्नीर्ष्ययाक्षान्त्या यो रोषस्तेन ज्वलितः संतप्तश्च्युतवसनं जघनं तच्चिन्तनेन यः सान्द्रानन्दस्तेन निर्वामि संतोषं प्राप्नोमि । एवं च तदीयतथाविधजघनध्यानादेतादृशानन्दः, तत्र किमु वाच्यस्तत्प्राप्ताविति भावः ॥

काचित्'महत्परिगृहीतेयम्, अतस्त्वयैतस्यामासक्तिर्न कार्या' इत्यन्योक्त्या कंचिद्वक्ति—

ईश्वरपरिग्रहोचितमोहोऽस्यां मधुप किं मुधा पतसि ।
कनकाभिधानसारा वीतरसा कितवकलिकेयम् ॥ ११५ ॥

ईश्वरेति । महादेवकृताङ्गीकारेणोचितो मोहो भ्रमो यस्यैतादृशस्त्वम् । महादेवस्य धत्तूरपुष्पं प्रियमिति पुराणादौ प्रसिद्धम् । पक्ष ईश्वरो महांस्तदङ्गीकारेणोचितो मोह आसक्तिर्यस्य । एवं च महत्परिग्रहादेवास्यां समीचीनत्वभ्रमेणासक्तिः, न वास्तविकगुणवत्त्वेनेति भावः । अस्यां कलिकायाम् । मधुप । एवं च सारग्राहकत्वेन याथातथ्येन गुणमार्गणमुचितं तवेति द्योत्यते । यद्वा भ्रान्तत्वम् । मुधा किमिति पतसि । यत इयं कनकाभिधानमेव सारो यस्याः । एवं चार्थशून्यत्वं व्यज्यते । वीतरसाविद्यमानमकरन्दा कितवस्य कलिका । 'उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः' इत्यमरः । यद्वा कितव धूर्त । एवं चैतादृशाचरणमनुचितमित्यावेद्यते । कलिका । एवं च महत्तरस्यानुरागवशा-

देवास्यामुन्मादमात्रजनिकायां नायिकायामासक्तिर्न विधेया, किं तु गुणाद्यालोकनेनेति व्यज्यते ॥

वापीसविधे कियद्भिः परिवृतां कांचन दृष्ट्वा कश्चिद्वक्ति—

ईषदवशिष्टजडिमा शिशिरे गतमात्र एव चिरमङ्गैः ।
नवयौवनेव तन्वी निषेव्यते निर्भरं वापी ॥ ११६ ॥

ईषदिति । ईषदवशिष्टो जडिमा शैत्यम् । पक्षे जडत्वम् । यस्याः । शिशिरतौ समाप्तमात्र एव । वसन्तादावित्यर्थः । अङ्गैरवयवैः । पक्षे गुणभूतैश्चिरं निर्भरमत्यन्तं नवयौवना तन्वीव वापी निषेव्यते । एवं चैतादृशा गुणभूता अपि समीचीना इति व्यज्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेतेकारत्रज्या ।

उकारत्रज्या ।

सखी नायिकां स्तौति—

उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचिराङ्गि ।
अचला अपि न महान्तः के चञ्चलभावमानीताः ॥ ११७ ॥

उल्लसितेति । उल्लसितं भ्रूरूपं धनुः । पक्षे भ्रूसदृशं धनुर्यस्य । पृथुना । आकर्णान्तेनेत्यर्थः । पक्षे पृथुनाम्ना राज्ञा । लोचनेन नेत्रेण । पक्ष आलोचनेन, कथमन्यथा जनावस्थितिरिति विचारेण । रुचिराङ्गि । महान्तः श्रेष्ठाः । पक्षे महापरिमाणशालिनः । अचला अपि चापलशून्या अपि । धीरा इत्यर्थः । पक्षे पर्वताः । के न चञ्चलभावमानीताः प्रापिताः । एवं च त्वत्कटाक्षविक्षेपमात्रेण के के न धैर्यं परित्यज्य विह्वला जाता इति भावः । पक्षे महीधरव्याप्तां महीमालोक्य पृथुराज्ञेतस्ततः पर्वताः कृता इति भावः ॥

मत्प्रसादादेवैते धनिनः संवृत्ता इति काचिद्वक्ति—

उपनीय यन्नितम्बे भुजंगमुच्चैरलम्भि विबुधैः श्रीः ।
एकः स मन्दरगिरिः सखि गरिमाणं समुद्वहतु ॥ ११८ ॥

उपनीयेति । यस्य नितम्बे कटके । पक्षे यश्चासौ नितम्बश्च तस्मिन् । भुजंगं सर्पम् । पक्षे विटम् । उपनीय प्रापय्य विबुधैर्देवैः । पक्षे विशेषज्ञानवद्भिः । उच्चैः श्रीरलम्भि स मन्दरगिरिः पर्वतः । पक्षे मन्दरगिरिरिव । एकः । एवं चान्ये निरर्थका इति भावः । गरिमाणं गौरवं समुद्वहतु । एवं च मन्नितम्बप्रसादेनैते श्रीमन्त इति व्यज्यते । यद्वा कस्याश्चिन्निदर्शनं प्रदर्श्य कश्चित्कांचिद्वक्ति । एवं च सैव गर्वं करोतु, तव तु तत्करणमनर्थकमिति व्यज्यते ॥

नैष समयो जारसविधे गन्तुमिति काचित्कांचिद्वक्ति—

उल्लसितलाञ्छनोऽयं ज्योत्स्नावर्षी सुधाकरः स्फुरति ।
आसक्तकृष्णचरणः शकट इव प्रकटितक्षीरः ॥ ११९ ॥

उल्लसितेति । उल्लसितं लाञ्छनं यस्य, ज्योत्स्नां कौमुदीं वर्षति, असौ सुधाकरश्चन्द्रः स्फुरति । आसक्तः कृष्णचरणो यस्मिन् । कृष्णत्वेन लाञ्छनवत्तासादृश्यम् । प्रकटितं क्षीरं येन । क्षीरपदेन ज्योत्स्नावत्त्वसादृश्यम् । शकट इवासुरविशेष इव । एवं चैतत्समये गमने लाञ्छनमवश्यं भविष्यतीति व्यज्यते ॥

स्वमनोरथं काचित्कांचिद्वक्ति—

उपचारानुनयास्ते कितवस्योपेक्षिताः सखीवचसा ।
अधुना निष्ठुरमपि यदि स वदति कलिकैतवाद्यामि ॥ १२० ॥

उपचारेति । कितवस्य धूर्तस्य, ते पूर्वप्रसिद्धा, उपचारेण अनुनयाः प्रसादनानि । एवं च न वास्तवा इति भावः । यद्वोपचारा अनुनयाश्च सख्याः । एवं च तद्वचनादरकरणयोग्यत्वं व्यज्यते । वचनेन, एवमेव मानस्त्वया संस्थाप्यः क्षणोत्तरमयमवश्यमेत्य ते वश्यो भविष्यतीत्येवंरूपेण, उपेक्षिता अगणिताः । एवं च स्वस्यापराधशून्यत्वं ध्वन्यते । अधुना स निष्ठुरमपि परुषमपि । एवं च समीचीनभाषणं दूरापास्तमिति भावः । यदि वदति तर्हि कलिकैतवात्कलहकपटाद्यामि गच्छामि । अर्थात्तं द्रष्टुमिति भावः । एवं चाधुना तेन तथौदासीन्यमालम्बितं यथा न निष्ठुरमपि वक्ति । येन किमिति तादृशं वदसीति वक्तुमहं गमिष्यामीति भावः । एवं चाधुना कोऽप्युपायस्तद्दर्शन इति चिन्तातिशयो द्योत्यते ॥

सखी नायिकां वक्ति—

उषसि परिवर्तयन्त्या मुक्तादामोपवीततां नीतम् ।
पुरुषायितवैदग्ध्यं व्रीडावति कैर्न कलितं ते ॥ १२१ ॥

उषसीति । व्रीडावति, उपवीततां नीतम् । उपवीतरूपं कृतमित्यर्थः । मुक्तादाम परिवर्तयन्त्याः सज्जीकुर्वन्त्या उषसि पुरुषायितस्य वैदग्ध्यं कैर्न कलितम् । अपि तु सर्वैरिति भावः । एवं चेदानीं मत्समक्षं लज्जां नाटयसि, परंतु त्वदीयतत्कालीनलज्जाशून्यत्वं तथाविधमुक्तादामपरिवर्तनमेव सर्वेषां कथयतीति भावः ॥

नायिकां प्रति वक्ति—

उड्डीनानामेषां प्रासादात्तरुणि पक्षिणां पङ्क्तिः ।
विस्फुरति वैजयन्ती पवनाच्छिन्नापविद्धेव ॥ १२२ ॥

उड्डीनेति । प्रासादादुड्डीनानामेकगतिविशेषशालिनाम् । हे तरुणि, पक्षिणां पङ्क्तिः पवनेन च्छिन्ना चासावपविद्धा वैजयन्ती मालेव विशेषेण स्फुरति त्वं पश्य । एवं च नायकः प्रासादमायातस्त्वमपि प्रयाहीति ध्वन्यते । यद्वा संकेतस्थलमिदमिति व्यज्यते ॥

अतितीक्ष्णमतिभिः संरक्ष्यमाणां कांचित्कश्चिदन्योक्त्या वक्ति—

उज्जागरितभ्रामितदन्तुरदलरुद्धमधुकरप्रकरे ।
काञ्चनकेतकि मा तव विकसतु सौरभ्यसंभारः ॥ १२३ ॥

उज्जागरितेति। काञ्चनकेतकि, उज्जागरितः, भ्रामितः, उच्चावचपत्रैर्निरुद्धः, मधुकराणां प्रकरो यया तत्संबुद्धिः। तव सौरभ्यसंभारो मा विकसतु। एवं च यद्दर्शनेन येषां यूनामितस्ततस्त्वद्दर्शनाय भ्रमणरात्रिजागरणादि भवति तेषां दुष्टादिभिर्निवारणे क्रियमाणे त्वद्यौवनं निष्फलमिति व्यज्यते॥

सखी नायिकां वक्ति—

उल्लसितभ्रूः किमतिक्रान्तं चिन्तयसि निस्तरङ्गाक्षि।
क्षुद्रापचारविरसः पाकः प्रेम्णो गुडस्येव॥ १२४॥

उल्लसितभ्रूरिति। निस्तरङ्गे अक्षिणी यस्यास्तत्संबुद्धिः, निश्चलेक्षणे। एवं च चिन्तावत्त्वमभिव्यज्यते। उल्लसितभ्रूः सती त्वमतिक्रान्तं निवृत्तं किं चिन्तयसि। एवं च निवृत्तचिन्तनमनर्थकमिति भावः। यतो गुडस्येव प्रेम्णः पाकः परिपाकः क्षुद्रस्य नीचस्य। पक्षे क्षुद्राया मक्षिकाया अपचारः संबन्धस्तेन विरसो भवति। एवं च नीचमाध्यस्थे प्रेम्णो न निर्वाह इति भावः। एवं च नीचमाध्यस्थं प्रथमतो विधाय पश्चाच्चिन्ताविधानमनुचितमिति द्योत्यते। क्षुद्रासक्त्युत्तरं कथमधुना विधेयमिति सचिन्तां सखी वक्ति। एवं च क्षुद्रसंबन्धेऽवश्यं प्रेमवैरस्यमिति ध्वन्यते। तेन च तत्परित्याग एवोचित इति कश्चित्॥

कस्याश्चिद्रतौत्सुक्यं काचित्कांचिद्वक्ति—

उद्दिश्य निःसरन्तीं सखीमियं कपटकोपकुटिलभ्रूः।
एवमवतंसमाक्षिपदाहतदीपो यथा पतति॥ १२५॥

उद्दिश्येति। उद्दिश्येदं विधेयमस्तीति निःसरन्तीम्। अर्थात्केलिसदनात्। सखीमियं नायिका कपटकोपेन। न वास्तवेनेति भावः। कुटिले भ्रुवौ यस्याः। अवतंसं यथाहतो दीपो यस्मिन्कर्मणि पतत्येवमाक्षिपत्। सख्या उपरि त्यजति स्म। एवं च दीपनाशनेन रतौत्कण्ठ्यं व्यज्यते॥

स्वल्पबलेऽपि शान्तिशालिनि प्रबलस्य न तथा तेजोऽधिकं भवतीति कश्चिदन्योक्त्या कंचन वक्ति—

उदितोऽपि तुहिनगहने गगनप्रान्ते न दीप्यते तपनः।
कठिनघृतपूरपूर्णे शरावशिरसि प्रदीप इव॥ १२६॥

उदितोऽपीति। उदितोऽपि। एवं च क्षीणत्वाभावो व्यज्यते। तुहिनस्य हिमस्य गहनं यस्मिन्। अथवा तुहिनेन गहने निबिड आकाशप्रान्ते। तापयतीति तपनः सूर्यो न दीप्यते नात्यन्तं प्रदीप्तो भवति। कठिनघृतपूरेण पूर्णे शरावस्य मृद्भाजनविशेषस्य शिरसि प्रदीप इव। एवं च शीलशीतले न कस्यचित्क्रोधाग्नेराधिक्यमिति व्यज्यते। तेन शान्तिप्रवणत्वमुचितमिति। यद्वा सौम्यसमुदाये क्रूरेण न किंचित्कर्तुं शक्यमिति कश्चिदन्योक्त्या वक्ति। दीपसादृश्यार्थं प्रान्तपदम्। अथवा हीनबलसमुदायाक्रान्तप्रब-

लस्य शनैः शनैर्बलं भवत्येवेत्यन्योक्त्या वक्ति । उदितः । 'अपिः' 'तुहिनगहने' इत्यत्रान्वेति । नेति काकुः । अथवा बहुतरशान्तिमति हृदयाकाशे न कामक्रोधादेस्तथा प्रसर इति कश्चित्कंचिद्वक्ति ॥

उद्गमनादि व्यापारालसा त्वं किमितीति वादिनीं सखीं नायिका वक्ति—

उद्गमनोपनिवेशनशयनपरावृत्तिवलनचलनेषु ।
अनिशं स मोहयति मां हृल्लग्नः श्वास इव दयितः ॥ १२७ ॥

उद्गमनेति। स दृष्टपूर्वः, अनिशं निरन्तरम्, हृल्लग्नो हृदयमधिष्ठितः। यद्वानिशं मोहयतीति योजना । दयितः, उद्गमन उत्थाने, उपनिवेशने स्थितौ, शयनपरावृत्तौ पार्श्वपरिवर्तने, वलने वक्राङ्गकरणे, वचनव्यापारे च मोहयति भ्रान्तिं जनयति । तत्तद्व्यापारासमर्थां करोतीति भावः । एवं च तथाविधनायकाप्राप्त्या ममैतादृशं दुःखं भवतीति व्यज्यते। तेन च तदानयनार्थं यतस्वेति। हृल्लग्नः श्वास इव। हृच्छ्वासरोगेणापि गमनोपवेशनादि व्यापारेष्वत्यन्तं दुःखं भवति ॥

कयोश्चित्कटाक्षमात्रेणैव योगः संवृत्त इति काचिद्वक्ति । यद्वा न दूत्यादेरुपयोगः, किं तु कटाक्षमात्रेणैव कार्यं कर्तुं शक्यमिति काचित्कांचिद्वक्ति—

उज्झितसौभाग्यमदस्फुटयाच्ञानङ्गभीतयोर्यूनोः ।
अकलितमनसोरेका दृष्टिर्दूती निसृष्टार्था ॥ १२८ ॥

उज्झितेति । उज्झितस्त्याजितः सौभाग्यस्य मदो ययैतादृशी या प्रकटयाच्ञा, अनङ्गश्च । एतद्भीतयोः । स्फुटप्रार्थनायां सौभाग्यमदभङ्गः, अप्रार्थनायां मदनबाधेत्युभयत्रापि भीतिरिति भावः। 'भङ्ग' इति पाठे सौभाग्यमदभङ्गं सोढापि याच्ञायां कृतायां तत्फलाभावे भीतिरित्यर्थः । अकलितं मनो याभ्यां तयोः । अविज्ञातपरस्पराभिप्राययोरित्यर्थः । यूनोरेका दृष्टिः परस्परावलोकनं निसृष्टार्था दूती । 'उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् । सूत्कृष्टं कुरुते कार्यं निसृष्टार्था तु सा स्मृता' । एवं च कटाक्षमात्रेणैव संयोगः संवृत्तः कर्तुं शक्य इति ध्वन्यते ॥

यद्यपीयं बहुभिर्भुज्यते तथाप्येकस्मिन्नेव जारेऽत्यन्तमासक्तेति काचित्कांचिद्वक्ति—

उत्तमभुजंगसंगमनिस्पन्दानितम्बचापलस्तस्याः ।
मन्दरगिरिरिव विबुधैरितस्ततः कृष्यते कायः ॥ १२९ ॥

उत्तमेति । उत्तमो यो भुजंगः सर्पः । उत्तमपदेन चित्तस्थिरीकरणयोग्यत्वं व्यज्यते । पक्षे षिङ्गः । तत्संगमेन बन्धनेन । पक्षे संभोगेनेति भावः । चपलत्वे हेतुः । निस्पन्दस्य निश्चलस्य । पूर्वमिति भावः । नितम्बस्य कटकस्य । पक्षे कटिप्रदेशस्य । चापलं यस्मिन । यद्वोत्तमभुजंगसंगमेन निश्चलनितम्बो यस्मिन्नेतादृशं चापलं यस्य । एवं च बाह्यरतवत्तान्येषां नान्तररतवत्तेति भावः। तस्याः कायो देहो मन्दराचल इव विबुधै-

ज्ञानवद्भिः । पक्षे देवैः । इतस्ततः कृष्यते । एवं चान्यैर्भुज्यमानापि न मनो निवेशयति तेषु, किं तु तथाविधजारसंभोगतृष्णया तस्मिन्नेवासक्तेति ध्वन्यते ॥

एतस्याः पतिरत्यन्तजडोऽस्ति, अतस्त्वया न भेतव्यमिति काचित्कंचिद्वक्ति—

उपनीय कलमकुडवं कथयति सभयश्चिकित्सके हलिकः ।
शोणं सोमार्धनिभं वधूस्तने व्याधिमुपजातम् ॥ १३० ॥

उपनीयेति । कलमानां शालिविशेषाणां कुडवं पलालनिर्मितं पात्रमुपनीय समीपे संस्थाप्य सभयः । कथमियं जीविष्यतीति धियेति भावः । हलिकः । एवं च मूर्खत्वं व्यज्यते । चिकित्सके वैद्ये, वधूस्तने, शोणमारक्तम्, अर्धचन्द्राकारम्, उप समीपे जातम्, व्याधिं रोगं कथयति । एवं चैतस्यैतन्नखक्षतज्ञानं नास्तीति व्यज्यते । तेन त्वया यथेष्टमागन्तव्यं चेति । कुडवशब्दः परिमाणविशेषवाचीति केचित् ॥

कांचिदग्निं ज्वालयन्तीं जारातिसक्त्या मानसतत्संभोगं कुर्वतीं धूर्तनिजदयितेनालोच्यमानां सनिह्नवं सखी निवारयति—

उन्मुकुलिताधरपुटे भूतिकणत्रासमीलितार्धाक्षि ।
धूमोऽपि नेह विरम भ्रमरोऽयं श्वसितमनुसरति ॥ १३१ ॥

उन्मुकुलितेति । उत्कृष्टमुकुलवदाचरितमधरपुटं यया तत्संबुद्धिः । वह्निप्रज्वलनाय फूत्कारविधानादिति भावः । भूतेर्भस्मनः कणानां त्रासेन नेत्रान्ते भस्मसंबन्धभयेन मीलिते अर्धमक्षिणी यया तत्संबुद्धिः । एवं च विशिष्य भ्रमराज्ञानाद्धूमभ्रमवत्त्वौचित्यं व्यज्यते । धूमोऽपीह न । अपिना व्यक्तिव्यवच्छेदः । विरम । फूत्कारकरणादिति भावः । ननु धूमलेखा दृश्यते, तत्कथम् 'नेह धूमः' इति वदसीत्याह—ते श्वसितं भ्रमरोऽयमनुसरति । एवं च त्वद्वदनामोदवशाद्भ्रमरः परिभ्रमति, परंतु न वास्तवो धूमः । अतोऽनर्थकैतद्व्यापाराद्विरमेति भावः । इति निह्नवपुरःसरमधरोन्मुकुलननयनार्धनिमीलने फूत्कारभस्मसंबन्धभयेन समाधातुं शक्ये, परंतु कथमपि श्वसितं न समाहितुं शक्यम् । अयं च ते भ्रमर इव भ्रमरः । यद्वा भ्रमं राति । एवं च यथार्थवार्ताग्राहकस्यास्य यथार्थवार्ताग्रहणे न कोऽपि विलम्बः । दयितश्च श्वसितमिदमवश्यं ज्ञास्यत्येव । तव त्वधरोन्मुकुलनयनार्धनिमीलनश्वसितानि मानससंभोगजन्यान्येव । अतो न विधेयमेतदिति व्यज्यते । यद्वा वह्निप्रज्वालनार्थमादिष्टां तत्समय एव जाराय चुम्बनं प्रयच्छन्तीं नायिकामवलोक्य तत्सखी तदुत्साहवर्धनाय वक्ति—हे भूतिकणत्रासमीलितार्धाक्षि, इति । सोल्लुण्ठनवचनमेतत् । एवं च न भूतिकणत्रासेन तवार्धाक्षिनिमीलनम्, अपि तु जारचुम्बनसुखोदयेनेति व्यज्यते । उन्मुकुलितम् । चुम्बनार्थमिति भावः । अधरपुटं येन तस्मिन् । इह जारो न विरमति । चुम्बनदानार्थमिति भावः । दन्तक्षतभीतिं स्वयमाशङ्क्य परिहरति—अपिरवधारणे । नकारोऽप्यत्रान्वेति । अयं धूमो न, किंतु भ्रमर एव श्वसितम् । अर्थात्तव । अनुसरति । एवं च न धूमलेखा, अपि तु फूत्कारकालीन-

त्वद्वदनसमीरणसौरभ्यलुभ्यन्मधुकरश्रेणिरत एतद्दंशमिषेणैव दन्तक्षतसमाधेर्विधातुं शक्यत्वेन दन्तक्षतभयमपास्यास्य यथेच्छं चुम्बनं देहीति ध्वन्यते । अथवा नायकदूत्युक्तिरियम् । भूतिकणत्रासमीलिताधोक्षीत्यनेन चुम्बनप्राप्यौत्कण्ठ्येनैतदीयाधरोन्मुकुलनमपि न मयावधारितमिति व्यज्यते । इतरत्समम् ॥

कान्तसविधे तथाविधबालायातायातमवलोक्य कुपितां गृहिणीं नायकः समाधत्ते—

उपरि परिष्ठवते मम बालेयं गृहिणि हंसमालेव ।
सरस इव नलिननाला त्वमाशयं प्राप्य वससि पुनः ॥ १३२ ॥

उपरीति । हे गृहिणि । एवं च गृहभारस्य त्वदधीनत्वेन त्वमेव मुख्येति व्यज्यते । यथा सरसः सरोवरस्योपरि हंसमाला भ्रमति, नलिननाला त्वभ्यन्तरे वसति, तथेयं बाला ममोपरि । नान्तःकरण इत्यर्थः । परिप्लवते भ्रमति । त्वं त्वन्तःकरणं प्राप्य वससि । एवं चैतस्या मच्चेतसि नाधिष्ठानं तव तु वर्तत इति व्यज्यते । पुनस्त्वर्थे । 'नाला नालम्' इतिपाठान्नालाशब्द आबन्तः ॥

कश्चन कस्याश्चिद्यौवनलुब्धस्तदप्राप्तिखिन्नस्तां प्रति वक्ति—

उत्कम्पघर्मपिच्छिलदोःसाधिकहस्तविच्युतश्वौरः ।
शिवमाशास्ते सुतनु स्तनयोस्तव चञ्चलाञ्चलयोः ॥ १३३ ॥

उत्कम्पेति । हे सुतनु । एवं च कामुकेच्छायोग्यत्वं व्यज्यते । उत्कृष्टः कम्पो यस्य, घर्मेण पिच्छिलश्च, यो दोःसाधिकस्य यामिकस्य हस्तस्तस्माद्विच्युतः । उत्कम्पपिच्छिलपदाभ्यां च्यवनार्हत्वं व्यज्यते । चोरस्तव चञ्चलाञ्चलयोः । एवं च दर्शनयोग्यत्वं व्यज्यते । स्तनयोः शिवं कल्याणमाशास्ते । एवं च त्वत्कुचकुम्भदर्शनसंजातसात्विकभावकम्पस्वेदयामिकशिथिलकरबन्धविच्युतचोरस्यैव सुखदत्वेन तदाशास्यशिवभाजनमस्मदादीनां त्वत्यन्तदुःखदत्वेन शापभाजनमेव भविष्यति त्वत्कुच इति व्यज्यते । यद्वा दुष्टवृत्त्युपजीविन एवायं ते स्तनमण्डलः सुखयिता नान्येषां समीचीनानामिति कश्चिद्वक्ति । अथवा त्वत्कुचकुम्भदर्शनादेव तथा भ्रान्तिरुदेति यथाग्रे स्वमरणमपि न विज्ञायत इति वक्ति । यामिकस्य केवलतस्करधारणमेव वृत्तिः । एवं च तद्धस्तात्तस्करापगमनेन माविप्रभुकोपफलाज्ञानवदेषामपि न तदनुसंधानमिति व्यज्यते । यद्वा त्वया रात्रावभिसरणं कृतमिति कश्चिद्वक्ति ॥

कयाचन नायिकया कृष्यमाणाञ्चलं नायकं प्रत्यन्योक्त्या तत्सखी वक्ति—

उत्क्षिप्तबाहुदर्शितभुजमूलं चूतमुकुल मम सख्या ।
आकृष्यमाण राजति भवतः परमुच्चपदलाभः ॥ १३४ ॥

उत्क्षिप्तेति । उत्क्षिप्तो यो बाहुस्तेन दर्शितं भुजमूलं यत्र क्रियायाम् । हे चूतमुकुल । मुकुलपदं भ्रमराद्यभुक्तप्रतिपादनेनाङ्गनासंगतिशून्यत्वं नायकै ध्वनयति । तच्चात्यन्तस्पृहणीयत्वम् । मम सख्याकृष्यमाण भवतः परमुत्कृष्टमुच्चतरपदलाभो राजति । एवं च मत्सखी-

कराकर्षणेन तवोत्कृष्टस्थानप्राप्तिर्जातेति व्यज्यते । तेन चैतत्कराकर्षणं स्वर्गसुखरूपमिति । पल्लवादेराकर्षणोत्तरमोचनादूर्ध्वगमनमिति लौकिकम् ॥

त्वद्धारदर्शनेन सर्वोऽपि त्वद्विहारमाकाङ्क्षतीति सखी नायिकां वक्ति—

उच्चकुचकुम्भनिहितो हृदयं चालयति जघनलग्नाग्रः ।
अतिनिम्नमध्यसंक्रमदारुनिभस्तरुणि तव हारः ॥ १३५ ॥

उच्चेति । उच्चौ यौ कुचकुम्भौ । कुम्भपदमाधारकाठिन्यद्योतनाय । तत्र निहितः । जघने कट्याः पुरोभागे । 'क्लीबे तु जघनं पुरः' इत्यमरः । लग्नमग्रं यस्य । अत्यन्तं निम्नो नीचो यो मध्यस्तत्संक्रमाय यद्दारु तत्तुल्यः । निम्नदेश उल्लङ्घनाय यत्काष्ठं दीयते तत्संक्रमदारु । तरुणि तव हारो हृदयम् । द्रष्टुरिति यावत् । चालयति चञ्चलं करोति । अन्योऽपि संक्रमदारुमार्गेण गच्छंश्चञ्चलताभाजनं भवतीति लौकिकम् ॥

रतश्रान्तेयमिति सखी नायकं वक्ति—

उल्लसितशीतदीधितिकलोपकण्ठे स्फुरन्ति तारौघाः ।
कुसुमायुधविधृतधनुर्निर्गतमकरन्दबिन्दुनिभाः ॥ १३६ ॥

उल्लसितेति । उल्लसितः । सुरतसुखादिति भावः । शीतदीधितिर्मुखचन्द्रस्तस्य मनोज्ञोपकण्ठे कुसुमायुधेन विधृतं यद्धनुस्तन्निर्गता ये मकरन्दबिन्दवस्ततसदृशास्तारौघाः प्रस्वेदबिन्दवः स्फुरन्ति । एवं च कुसुमसमसुकुमारताशालिनीयं रतश्रान्तेति व्यज्यते । यद्वा जातोऽयमभिसारसमय इति सखी नायिकां वक्ति । उल्लसितः प्रादुर्भूतः शीतदीधितिश्चन्द्रस्तत्समीपदेशे तारौघा नक्षत्रौघा मदनधनुर्मकरन्दतुल्याः स्फुरन्ति । अर्धचन्द्रत्वेन धनुस्तुल्यता । एवं चैतादृशसुधाकरसाहाय्यसंपन्नः कुसुमधन्वा सज्जः संवृत्तः । अतो द्रुततरमभिसरस्वेति ध्वन्यते ॥

काचिन्नायिका नायकीयविलम्बागमनजन्यं मानमासाद्य स्वल्पावशिष्टयामिन्यां नायकेन दूरीकृताभिमाना रात्रिः स्वल्पावशिष्टेति विज्ञायानुशोचति—

उपनीय प्रियमसमयविदं च मे दग्धमानमपनीय ।
नर्मोपक्रम एव क्षणदे दूतीव चलितासि ॥ १३७ ॥

उपनीयेति । हे क्षणदे रात्रि । 'त्रियामा क्षणदा क्षपा' इत्यमरः । अथ चोत्सवदे । एवं चोत्सवदायास्तदभावसंपादनमनुचितमिति व्यज्यते । असमयविदं समयज्ञानशून्यम् । एवं च पूर्वरात्रावागमनमुचितमिति व्यज्यते । प्रियम् । एवं च दुर्लभत्वं द्योत्यते । उपनीय प्रापय्य । असमयविदं रात्रेरल्पावशिष्टत्वेन करणानर्हम् । अत एव दग्धं मे मानं च । किमर्थं विलम्बितमिति हेतोः संजातमित्यर्थः । दूरीकृत्य क्रीडोपक्रम एव दूतीव । दूतीपदं संगतिसंपादनमात्रकर्तृत्वं द्योतयति । चलितासि । दूत्यपि नायकमानीय मानमपनीय क्रीडारम्भ एव निर्गच्छतीति लौकिकम् । नायिका चेयं परकीया ॥

त्वत्करस्पर्शनादेवास्मत्सखी विगतधैर्या सती त्वामनुसरतीति नायिकासक्तिं सखी वक्ति—

उत्तमवनितैकगतिः करीव सरसीपयः सखीधैर्यम् ।
आस्कन्दितोरुणा त्वं हस्तेनैव स्पृशन्हरसि ॥ १३८ ॥

उत्तमेति । उत्तमवनितानामेकगतिरूपः । एवं च स्वानुरूपान्यनायकाभावेन नायिकासक्तिस्त्वयि युक्ततरेति व्यज्यते । पक्ष उत्तमवनितावदेका मुख्या गतिर्यस्य । आस्कन्दितावूरू जङ्घे येन तेन । पक्षे संस्पृष्टस्वजङ्घेन । हस्तेनैव । पक्षे शुण्डादण्डेनैव । स्पृशन्करी सरसीपय इव सख्या धैर्यं हरसि । एवकारेणालिङ्गनादौ किं किं हरिष्यसीति न विद्म इति व्यज्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेतोकारव्रज्या ।

ऊकारव्रज्या ।

कांचिज्जरठविवाहितां तदीयप्रेमराहित्यखिन्नां सख्यन्योक्त्या वक्ति—

ऊढामुनातिवाहय पृष्ठे लग्नापि कालमचलापि ।
सर्वंसहे कठोरत्वचः किमङ्केन कमठस्य ॥ १३९ ॥

ऊढेति । हे सर्वंसहे वसुमति । एवं चैतदीयापराधसहने तव न किंचित्कठिनमिति व्यज्यते । अमुना कमठेनोढा सती पृष्ठे लग्नापि । अपिरवधारणे । लग्नैवेत्यर्थः । अचलापि । एवं च स्वतो निश्चलायाश्चाञ्चल्याभावोपदेशः पिष्टपेषणतुल्य इति व्यज्यते । कालमतिवाहय । 'असि' इति पाठे यतो निश्चलासि, अत एव कालमतिवाहयेति योजना । कठोरत्वचः । एवं च जरठत्वं ध्वन्यते । कमठस्याङ्केन किम् । एवं चैतज्जरठपाणिग्रहणशालिन्या चाञ्चल्यशून्यया त्वया कर्कशतदङ्केच्छामपहाय सर्वमेतत्तदीयापराधजातमपि सोढ्वावस्थेयमिति ध्वन्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेतोकारव्रज्या ।

ऋकारव्रज्या ।

नेदं स्वकटाक्षविक्षेपादिचातुर्यप्रदर्शनस्थलम् । अतोऽतिसरलतयैवात्रावस्थितिरुचितेति काचित्कांचिच्छिक्षयति—

ऋजुना निधेहि चरणौ परिहर सखि निखिलनागराचारम् ।
इह डाकिनीति पल्लीपतिः कटाक्षेऽपि दण्डयति ॥ १४० ॥

ऋजुनेति । ऋजुना सरलेन, अर्थान्मार्गेण चरणौ निधेहि स्थापय । समग्रां नागररीतिं त्यज । इह स्थले पल्लीपतिर्घोषाधिपः । एवं चानभिज्ञत्वं ध्वन्यते । कटाक्षसंपादनेऽप्येवं चान्यकर्तव्यता दूरापास्तेति भावः । डाकिनीति बुद्ध्या दण्डयति ॥

शास्त्रचर्चात्र भवतीति विज्ञायागतस्तत्र ग्रामीणचर्चामालोक्य कश्चिद्वक्ति—

ऋषभोऽत्र गीयत इति श्रुत्वा स्वरपारगा वयं प्राप्ताः ।
को वेद गोष्ठमेतद्गोशान्तौ विहितबहुमानम् ॥ १४१ ॥

ऋषभ इति । ऋषभः स्वरविशेषः, वृषभश्च । 'ऋषभो वृषभो वृषः' इत्यमरः । अत्र गीयत इति ज्ञात्वा स्वरज्ञानवन्तो वयं समागताः । एतत्स्थलं गोशान्तौ विहितो बहुमानो यत्रेति गोष्ठं गोस्थानकमिति को वेद । दीपोत्सवादावाभीरा गवामलंकरणं विधाय गानं कुर्वन्तीति देशाचारः । एवं च नाममात्रादेवास्माकं गानसमानत्वबुद्धिरुदभवदिति भावः ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता ऋकारव्रज्या ।

एकारव्रज्या ।

नायकोऽधरं स्तौति—

एको हरः प्रियाधरगुणवेदी दिविषदोऽपरे मूढाः ।
विषममृतं वा सममिति यः पश्यन्गरलमेव पपौ ॥ १४२ ॥

एक इति । प्रियाधरगुणान्वेत्ति । एवं च विशिष्य वक्तुमशक्यत्वं गुणेषु व्यज्यते । एको हरः । एवं च विरक्तवेषवत्तया नान्यथाभाव आशङ्कनीय इति भावः । अन्ये देवा मूढाः । उभयत्र हेतुमाह—यो हरो विषममृतं वा सममिति विचारयन्गरलमेव पपौ । एवं च प्रियाधरं विनामृतमपि विषतुल्यमिति व्यज्यते । दिविषदस्तु कमलाधरार्थं यत्नमकुर्वाणा अमृतार्थं च कुर्वाणास्ततस्तदधिकमिति मन्वाना मूढा इति भावः । यद्वा एको हरः प्रियाधरगुणज्ञानवान्, नान्ये देवाः । किं पुनर्मानुषा इति भावः । यतो यो विषमप्यमृततुल्यं विज्ञाय तदेव पपौ । एवं च प्रियाधरपानसंबन्धिनिवेदने विषमप्यमृतं भवतीति भावः । एवं च प्रियाधरेऽधिकत्वं सुधातो द्योत्यते । अत्रोभयत्र विषगरलपदान्यतरस्यैवोपादानमुचितमित्याभाति ॥

काचिदुष्टा प्रियगमनावसरेऽपुनरावृत्त्यर्थममङ्गलं कुर्वाणा तदमङ्गलभीत्यावस्थितं नायकमवलोक्यान्यथाचिन्तितस्यान्यथाभवनं दैवाधीनमिति सखीं वक्ति—

एष्यति मा पुनरयमिति गमने यदमङ्गलं मयाकारि ।
अधुना तदेव कारणमवस्थितौ दग्धगेहपतेः ॥ १४३ ॥

एष्यतीति । अयं पुनर्मा एतु, एतदर्थं यदमङ्गलं गमनकालेऽकारि तेनैव कारणेन ज्वलितगृहपतेरवस्थितिः संवृत्तेत्यर्थः ॥

त्वय्येवासक्तास्ति सेति सखी नायकं वक्ति—

एकैकशो युवजनं विलङ्घमानाक्षनिकरमिव तरला ।
विश्राम्यति सुभग त्वामङ्गुलिरासाद्य मेरुमिव ॥ १४४ ॥

एकैकश इति। प्रत्येकमित्यर्थः। 'एकैकशो दत्त्वा, एकैकशो ददाति' इति भाष्यकारप्रयोगद्वयवच्छस्। 'इहेदानीमेकैकशो वैधर्म्यमुच्यते, एकैकशस्तावववलोक्य येऽन्यत्रैकैकशो दुर्लभाः' इति प्रशस्तपादभाष्य-स्वयंवरप्रस्तावीयवासवदत्ता-समासकल्पदशकुमारप्रयोगाश्चेत्यलमत्र विचारेण। युवजनम्। युवपदेन स्पृहणीयत्वं व्यज्यते। अक्षाणां मालामणीनां समुदायमिव विलङ्घमानावगणयन्ती। पक्ष उल्लङ्घयन्ती। अङ्गुलिरिव तरला मेरुमिव मालाप्रान्तमणिमिव त्वां प्राप्य सुभग। एवं चैतादृशनायिकासक्तिर्न भाग्यं विनेति व्यज्यते। विश्राम्यति। मेरोरुल्लङ्घनं न कार्यमिति जापकसंप्रदायः॥

कश्चिद्याच्ञाखेदखिन्नो वक्ति—

एकः स एव जीवति स्वहृदयशून्योऽपि सहृदयो राहुः।
यः सकललघिमकारणमुदरं न बिभर्ति दुष्पूरम्॥ १४५॥

एक इति। सकललघुताकारणम्, दुःखेन पूरयितुमशक्यम्। दुष्पूरत्वं लघुताकारणे हेतुः। उदरं यो न बिभर्ति स स्वहृदयविहीनोऽपि। स्वपदमनर्थकमिवाभाति। सहृदयो हृदयेन सहितो राहुरेवैको जीवति। एवं च ये स्वोदरदरीपूरणाय याच्ञां कुर्वन्ति त एव मृता इति व्यज्यते॥

कश्चिद्विदेशस्थो मनोरथं करोति—

एकेन चूर्णकुन्तलमपरेण करेण चिबुकमुन्नमयन्।
पश्यामि वाष्पधौतश्रुति नगरद्वारि तद्वदनम्॥ १४६॥

एकेनेति। एकेन करेण चूर्णकुन्तलम्। 'अलकाश्चूर्णकुन्तलाः' इत्यमरः। अपरेण चिबुकमुन्नमयन्नगरद्वारदेशे। प्रेमातिशयेन तावद्दूरागमनमिति भावः। बाष्पैः। चिरकालदर्शनादिति भावः। धौता श्रुतिर्यत्र। तिर्यक्चिबुकोन्नमनादिति भावः। तस्या वदनं पश्यामि, इति काक्वा एवं जगदीश कदा करिष्यसीति व्यज्यते। 'विगलद्वारि' इति पाठे कुन्तलविशेषणम्॥

नायिकासखी नायकं वक्ति—

एकं जीवनमूलं चञ्चलमपि तापयन्तमपि सततम्।
अन्तर्वहति वराकी सा त्वां नासेव निःश्वासम्॥ १४७॥

एकमिति। एकम्। नान्यदित्यर्थः। जीवनकारणम्। एवं च त्यागानर्हत्वं ध्वन्यते। चञ्चलस्वभावमपि। एवं चान्यत्र त्वदीयानुबन्धादिश्रवणेऽपि तस्यास्त्वय्यनुराग इति दुर्लभतरेयमेतादृशी नायिकेति व्यज्यते। तेन च त्वया न चाञ्चल्यं विधेयमिति। निरन्तरं तापयन्तम्। चञ्चलस्वाभाव्यादिति भावः। नासेव सा वराकी। एवं च दीनत्वं व्यज्यते। निःश्वासतुल्यं त्वामन्तर्वहति। एवं च बहिस्तथाविधकृत्रिमचाटुवचनविज्ञानशून्यत्वेऽप्यन्तःप्रेमशालित्वमिति व्यज्यते॥

नायकप्रेषितदूतीं नायिका वक्ति—

एकं वदति मनो मम यामि न यामीति हृदयमपरं मे ।
हृदयद्वयमुचितं तव सुन्दरि हृतकान्तचित्तायाः ॥ १४८ ॥

एकमिति । हे दूति, एकं मम मनो यामीति वदति, न यामीत्यपरं हृदयं वदति । एवं च गन्तव्यं वा न गन्तव्यमिति संशयशालिन्यहमिति व्यज्यते । नायिकागमने संशयं श्रुत्वा सखी वक्ति—हे सुन्दरि । एवं च नायिकासक्तिस्त्वय्युचितैवेति ध्वन्यते । हृतं स्वाधीनीकृतं कान्तस्य चित्तं यया तस्यास्तव हृदयद्वयमुचितम् । एवं च नायकचित्तस्य त्वयि निमग्नत्वेन तवैतादृशमौदासीन्यं तच्च तस्यान्यत्रानुरागित्वेऽवश्यं त्वया द्रुततरं तत्रागन्तव्यमिति व्यज्यते । अत्र सर्वत्र चित्तार्थकयतिकचिदेकपदस्यैवादानमुचितमित्याभाति ॥

कश्चिद्बलिकवधूसङ्गं स्तौति—

एरण्डपत्रशयना जनयन्ती स्वेदमलघुजघनतटा ।
धूलिपुटीव मिलन्ती स्मरज्वरं हरति हलिकवधूः ॥ १४९ ॥

एरण्डेति । एरण्डपत्राणां शयनं यस्याः । स्वेदम् । अर्थान्नायकस्य । सुरतातिशयेनेत्यर्थः । जनयन्ती । महज्जघनतटा, मिलन्ती, हलिकस्य वधूर्धूल्याः पुटीव स्मरसंबन्धिज्वरं हरति । एरण्डपत्रान्तरिता, स्वेदमुत्पादयन्ती, स्थूलपुरोभागा, अङ्गसङ्गशालिनी, धूलिपोटली मदनज्वरशान्तिजनिकेति वैद्यकप्रसिद्धिः ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेतैकारव्रज्या ।

ककारव्रज्या ।

इयं प्रतिवेश्यासक्तेति कश्चिदुक्ति—

केलिनिलयं सखीमिव नयति नवोढां स्वयं न मां भजते ।
इत्थं गृहिणीमर्यं स्तुवति प्रतिवेशिना हसितम् ॥ १५० ॥

केलीति । केलिसदनं नवोढाम् । एवं चेयमवश्यमनेन भोक्तव्येति ज्ञानवत्त्वं ध्वन्यते । सखीमिव । एवं च द्वेषशून्यत्वं व्यज्यते । प्रापयति स्वयं मां न भजते । इत्थं च गृहिणीमर्ये वैश्ये । 'अर्यः स्वामिवैश्ययोः' इत्यमरः । स्तुवति सति प्रतिवेशिना हसितम् । इयं च मदासक्त्या सपत्नीमेतस्मिन्संयोज्यात्रायातीति नानेन मूर्खेण ज्ञायत इति धियेति भावः ॥

किंचित्कालोत्तरमियं प्राप्तयौवनास्माकमुपयुक्ता भविष्यतीत्याशंसाकारिणं कश्चिदन्योक्त्या वक्ति—

कालक्रमकमनीयक्रोडेयं केतकीति काशंसा ।
वृद्धिर्यथा यथास्यास्तथा तथा कण्टकोत्कर्षः ॥ १५१ ॥

कालेति। कालक्रमेण कमनीयः क्रोडः समीपदेशः। पक्षे भुजाभ्यन्तरम्। इयं केतकीति काशंसा। न कापीत्यर्थः। अत्रोपष्टम्भकमाह—यथा यथास्या वृद्धिस्तथा तथा कण्टकोत्कर्षो भविता। एवं चैतस्या यौवनेऽनेकदुष्टप्रचारो भवितेति व्यज्यते। तेन च न तवोपयोग इति। कण्टकोत्कर्षभवनरूपक्रियान्वयस्यैकदा तत्पदार्थे भवितुमर्हत्वात् 'संचारिणी—'इत्यादिपद्यवदत्र तच्छब्दे वीप्सा समुचितेत्याभाति॥

बहुतरसमाधानसमाहितामपि समाधानमप्राप्तां मानिनीमवलोक्य निर्विण्णहृदयतया सुप्तं नायकम् 'सुप्तोऽयम्। अतःपरं किं विधेयम्' इति विह्वला नायिका वक्ति—

कृतकस्वाप मदीयश्वासध्वनिदत्तकर्ण किं तीव्रैः।
विध्यसि मां निःश्वासैः स्मरः शरैः शब्दवेधीव॥ १९२॥

कृतकेति। कृत्रिमस्वाप। एवं च 'न शयानं बोधयेत्' इति निषेधोल्लङ्घनदोषानर्हत्वं ध्वन्यते। मदीयश्वासध्वनिषु दत्तः कर्णो येन। एवं च त्वदीयावगणनाकारिण्या मम सम्यगिदं संतापजश्वासजातं जातमिति भावः। मां तीव्रैर्दीर्घैः। एवं च स्वापे कृतकत्वमावेद्यते। पक्षे तीक्ष्णैः। निःश्वासैः शब्दवेधी स्मर इव शरैः किं किमिति विध्यसि। एवं च मद्विहितावगणनासंजातसंतापजत्वदीयश्वासैः कथमयमवगणित इति मम दुःखमुत्पद्यते। श्वासेषु स्मरशरसमताप्रतिपादनेन समुत्पन्नमन्मथतीव्रवेदना विगलिताभिमानाहं संवृत्तास्मीति च व्यज्यते। यद्वा सपत्नीसविधे गन्तुकामं नायकं विज्ञाय नायिका वक्ति—मिथ्यासुप्त। मदीयश्वासध्वनिदत्तकर्ण। यदैवेयं स्वापं करिष्यति तदैव मया तत्र गन्तव्यमिति धियेति भावः। निःश्वासैरित्यनेन मदीयनिद्रां विज्ञाय न मया सुप्तव्यमिति धीमत्त्वं ध्वन्यते। किमिति विध्यसि। एवं च छलेन किमर्थं गन्तुमुद्यतोऽसि, एवमेव गच्छ, न मया निवार्यस इति स्वदुःखं व्यञ्जयति। निःश्वासेषु स्मरशरसमताप्रतिपादनेन बहिः क्षतजनकत्वाभावेऽत्यन्तःक्षतविशेषजनकत्वमित्यावेद्यते। अथवा सपत्नीमुपभुज्यागतं मिथ्यासुप्तं नायकं नायिका वक्ति—हे मिथ्यास्वाप। मदीयश्वासध्वनिदत्तकर्ण। किमियं जागर्ति न वेति ज्ञातुमिति भावः। निःश्वासैः। संभोगजन्यैरिति भावः। मां किमिति विध्यसि। दुःखं ददासीत्यर्थः। श्वासेषु स्मरशरसमताप्रतिपादनेन केवलस्वसाक्षिकवेदनाजनकत्वं ध्वन्यते॥

कश्चित्खिन्नविशेषसंचारनिरुद्धान्यसंचारां तद्वमनोत्तरं सामान्यवनितामन्योक्त्या वक्ति—

क्व स निर्मोकदुकूलः कालंकरणाय फणिमणिश्रेणी।
कालियभुजंगगमनाद्यमुने विश्वस्य गम्यासि॥ १९३॥

केति। स प्रसिद्धो निर्मोक एव सर्पकञ्चुक एव दुकूलः क्व। अलंकरणाय फणिमणिश्रेणी क्व। कालियनामा यो भुजंगः सर्पः। पक्षे तत्तुल्यो विटः। तद्वमनाद्विश्वस्य यमुने नदि। पक्षे यमुनेति नाम। गम्यासि। एवं च तथाविधदुष्टविटसंपर्कसंजातान्योपभुक्तवसनादि सर्वं विहाय तदभावात्सकलजनसंसर्गादधुनान्यादृशमेव सर्वं संवृत्तमिति व्यज्यते।

यद्वा केनचिन्महत्तरविटेन पूर्वं पालितां तदपगमोत्तरं सर्वसुलभां सामान्यवनितामन्योक्त्या तत्प्रशंसनपुरःसरं वक्ति । एवं च तद्विटगमनोत्तरं तथाविधोज्ज्वलदुकूलबहुमूल्यमणिमयभूषणाद्यभावेऽपि सकलजनोल्लङ्घनीयत्वं तव वृत्तमिति व्यज्यते ॥

कश्चिन्नायिकाप्रसादनवृत्तान्तं वयस्यं प्रति वक्ति—

किंचिन्न बालयोक्तं न सप्रसादा निवेशिता दृष्टिः ।
मयि पदपतिते केवलमकारि शुकपञ्जरो विमुखः ॥ १९४ ॥

किंचिदिति । मयि पदपतिते कृतप्रणामे । मानापनोदनार्थमिति भावः । बालया किंचिन्नोक्तम् । सम्यगसम्यग्वेति भावः । न केवलं वचनाभावमात्रम्, अपि तु प्रसादसहिता दृष्टिर्न निवेशिता । किं तु केवलं शुकपञ्जरोऽन्यदिङ्मुखोऽकारि । एवं च शुकपञ्जरवैमुख्यसंपादनरूपरहःसंपादनेन रत्यनुमतिरेव दत्तेति व्यज्यते ॥

साधारणवनिताचेष्टां कश्चिद्वक्ति—

कृतहसितहस्ततालं मन्मथतरलैर्विलोकितां युवभिः ।
क्षिप्तः क्षिप्तो निपतन्नङ्गे नर्तयति भृङ्गस्ताम् ॥ १९५ ॥

कृतेति । कृतो हसितेन हस्ततालो यत्र । परस्परमिति भावः । मन्मथचञ्चलैः । एवं च लज्जाविरहो व्यज्यते । युवभिर्विलोकितां नायिकां क्षिप्तः क्षिप्तः । वारं वारं दूरीकृत इति भावः । अङ्गेषु शरीरावयवेषु निपतन्भृङ्ग इव भृङ्गः । एवं च रसलम्पटत्वं व्यज्यते । नर्तयति । भृङ्गोऽपि चपलकिसलयचाञ्चल्यदूरीकृतोऽपि पुनस्तामेव लतामालम्बत इति भृङ्गपदेन नायिकायां लतात्वारोपणेनावयवेषु पल्लवत्वारोपणेन कोमलत्वमावेद्यते । एवं चेयं विटेन वारं वारं तत्करनिवारणमवगणय्य लोकदृष्टिं लज्जां च कुचादौ स्पृश्यत इति कौतुकं त्वं पश्येति व्यज्यते । अन्ये तु यथाश्रुतमेवाहुः ॥

निरोधदुःखितां नायिकां काचिच्छिक्षयति—

कमलमुखि सर्वतोमुखनिवारणं विदधदेव भूषयति ।
रोधोऽरुद्धस्वरसास्तरङ्गिणीस्तरलनयनाश्च ॥ १९६ ॥

कमलेति । हे कमलमुखि, सर्वतोमुखस्य जलस्य निवारणं बन्धनेन प्रवाहविच्छेदनं सर्वस्मान्मुखस्याप्रदर्शनं च । लज्जयेति भावः । विदधदेव तीरं रोधनं च । अरुद्धः स्वस्य रसो जलम्, इच्छा च याभिस्ता नदीः, नायिकाश्च भूषयति । एवं चावश्यस्पृहणीयत्वं रोधने द्योत्यते । तरङ्गिणीतरलनयनपदाभ्यां चाञ्चल्यमभिव्यज्यते । एवं चावश्यं निरोधवत्त्वेन भवितव्यमिति ध्वन्यते ॥

किमर्थं न सा समायातीति वादिनं नायकं दूती वक्ति—

कितव प्रपञ्चिता सा भवता मन्दाक्षमन्दसंचारा ।
बहुदायैरपि संप्रति पाशकसारीव नायाति ॥ १९७ ॥

कितवेति। हे कितव। एवं चागमनभीतिरावेद्यते। भवता प्रपञ्चिता प्राकट्यं नीता चालिता च। मन्दाक्षेण लज्जया। पक्षे मन्दपाशकैः। स्वल्पसंख्यावद्भिरित्यर्थः। मन्दः स्वल्पः संचारो गृहाद्गृहान्तरगमनं यस्याः। बहुद्रव्यैरपि। पक्षे बहुदायैरित्यर्थः। वारंवारपातनैरिति यावत्। अपिनोपायान्तरशून्यत्वं ध्वन्यते। संप्रति। कालान्तरे को वेद किं भविष्यतीति न जान इति व्यज्यते। पाशकसारीव पाशक्रीडनगुटिकेव नायाति। एवं च तवैवापराधो न तस्या इति द्योत्यते॥

साधारणवनिताप्रतिवेशी कंचित्प्रति वक्ति—

कः श्लाघनीयजन्मा माघनिशीथेऽपि यस्य सौभाग्यम्।
प्रालेयानिलदीर्घः कथयति काञ्चीनिनादोऽयम्॥ १९८॥

क इति। यस्य माघार्धरात्रेऽपि सौभाग्यं प्रालेयानिलेन दीर्घः। प्रालेयानिलस्य श्रमापनोदकतया सुरतातिशयसंपादनेन काञ्चीनिनाददैर्घ्यसंपादकत्वमिति भावः। काञ्चीनिनादः कथयति। अत एव श्लाघार्हं जन्म यस्य। धनिकत्वादिति भावः। अयं कः। एवं चैतादृशशीतातिशयशालिसमयेऽपि नायिकेयमत्यन्तोल्लासेन विपरीतरतं विदधाति तस्मादयमर्थविशेषशालीति ज्ञातम्, परं तु का वास्याभिधेति न ज्ञायत इति भावः। यद्वा कः श्लाघनीयजन्मेति प्रश्न उत्तरं वक्ति—प्रालेयानिलदीर्घः। एवं च संतापापनोदकत्वं ध्वन्यते। अयमित्यत्यन्तानुसंधीयमानत्वेन प्रत्यक्षवन्निर्देशः। काञ्चीनिनादो माघनिशीथेऽपि। अपिनेतरकालसमुच्चयः। एवं च माघरात्रेरतिदीर्घत्वं तत्राप्यतिचिरकालीनं रतमितोऽन्यकाले किमु वाच्यमिति व्यज्यते। यस्य सौभाग्यं कथयति। एवं च यस्यैवातिसुप्रेमसुरतनिपुणतरुणीसंततसङ्गवत्ता स एव श्लाघनीयजन्मेति भाव इत्यर्थः॥

किमशकनीयं प्रेम्णः फणिनः कथयापि या बिभेति स्म।
सा गिरिशभुजभुजंगमफणोपधानाद्य निद्राति॥ १९९॥

किमिति। प्रेम्णः किमपि नाशक्यं यतो या सर्पवार्तयापि बिभेति स्म सा हरभुजसर्पफणारूपमुपधानं यस्या एतादृशी। अद्य। विवाहोत्तरदिन इत्यर्थः। निद्राति। एवं च प्रेम्णा किं किं न संभवतीति व्यज्यते। पार्वतीसखीवाक्यमेतत्। यद्वा प्रेमवत्त्वेऽपि तत्रागमने मम भीतिरुत्पद्यत इति वादिनीं नायिकां नायकदूती दृष्टान्तेन वक्ति—अद्य। अधुनेत्यर्थः। एवं च यदि ते प्रेम तर्हि ते नास्त्येव भीतिः, अन्यथा न प्रेम इत्युभयतोऽपि काठिन्यम्, अतः प्रयाहीति ध्वन्यते। यद्वा तद्रसास्वादोत्तरं न ते स्थास्यति भीतिरिति ध्वन्यते॥

सामान्यवनितासंगतिरनुचितेति कश्चित्कंचिच्छिक्षयति—

कृत्रिमकनकेनेव प्रेम्णा मुषितस्य वारवनिताभिः।
लघुरिव वित्तविनाशक्लेशो जनहास्यता महती॥ २००॥

कृत्रिमेति। कृत्रिमं धातुवादादिभिर्मिथ्या विधीयमानं यत्कनकं तेनेव प्रेम्णा वारव-

निताभिर्मुषितस्य वित्तविनाशक्लेशो लघुः। परं तु जनहास्यता महती। एवं च सामान्यवनितासंगमो न विधेय इति व्यज्यते॥

सखी नायिकां वक्ति—

किं पर्वदिवसमार्जितदन्तोष्ठि निजं वपुर्न मण्डयसि।
स त्वां त्यजति न पर्वस्वपि मधुरामिक्षुयष्टिमिव॥ १६१॥

किमिति। पर्वदिवसे मार्जितौ दन्तोष्ठौ यया तत्संबुद्धिः। ब्रह्मचर्यस्थितिधियेति भावः। निजं वपुः किमिति न मण्डयसि। स त्वां मधुराम्। एवं च निषेधवचनकारिणी न त्वमिति व्यज्यते। इक्षुयष्टिमिव पर्वस्वपि पर्वकालेऽपि। पक्षे ग्रन्थिष्वपि। 'ग्रन्थिर्नां पर्वपरुषी' इत्यमरः। न त्यजति। एवं च मिथ्यैतत्त्वं दर्शयसि, तेन तु त्वं यथेच्छमुपभोग्येति ध्वन्यते॥

केनचिन्नायकेन सह संयोजयितुं नायिकां दूती वक्ति—

कष्टं साहसकारिणि तव नयनार्धेन सोऽध्वनि स्पृष्टः।
उपवीतादपि विदितो न द्विजदेहस्तपस्वी ते॥ १६२॥

कष्टमिति। हे साहसकारिणि। अनुचितकारिणीत्यर्थः। एवं च मया तवोचितमेवोपदिश्यत इति व्यज्यते। तव। एवं च साक्षादनपराधत्वेऽपि स्वीयत्वेन तदपराधस्य त्वय्येवागमनमिति व्यज्यते। तेन च तत्परिहारकर्तव्यता तवैवेति। नयनार्धेन स नायकोऽध्वनि स्पृष्टः। त्वत्कटाक्षविषयीभूत इत्यर्थः। इदं कष्टम्। महदनुचितमित्यर्थः। एवं च त्वत्कटाक्षविशिखहतस्य तस्य त्वद्दर्शनं विना प्राणवियोग एव भवितेति व्यज्यते। किमेतावता इत्यत आह—तपस्वी। एवं च करुणार्हत्वं व्यज्यते। ब्राह्मणदेह उपवीतादपि। एवं च प्रत्यक्षपरिदृश्यमानत्वेन न स ब्राह्मण इति वक्तुमशक्यमिति भावः। तेन च विदितः। एवं चान्यजातीयस्य यथातथास्ताम्, अयं तु ब्राह्मणोऽवश्यं त्वया गत्वा जीवनीय इति द्योत्यते॥

श्रमातिशयप्राप्तयानया ते किं सुखमिति वादिनं कश्चिद्वक्ति—

क्लेशेऽपि तन्यमाने मिलितेयं मां प्रमोदयत्येव।
रौद्रेऽनभ्रेऽपि नभःसुरापगावारिवृष्टिरिव॥ १६३॥

क्लेशेऽपीति। क्लेशेऽपि विस्तार्यमाणे मिलितेयं मां प्रमोदयत्येव। एवं चान्यस्यैतादृशी मोदयति न वेति को वेदेति भावः। अभ्राभावेऽपि घर्मे नभसः सुरापगाया वारिवृष्टिरिव। एवं चाभ्राभावे घर्मे खिन्नस्य यथा वृष्टिरत्यन्तसुखदा तथैतस्याः संगतिरिति व्यज्यते। मेघाभावेऽप्यातपे ये जलबिन्दवः पतन्ति ते सुरापगाया इति लोकप्रथा॥

गुणाभिज्ञभीरुकुलजनायिकानामेवान्यानवलोकनीयतासंपादकपटावगुण्ठनमुचितम्, न त्वन्यासामपीति कश्चिद्वक्ति—

कूपप्रभवाणां परमुचितमपां पट्टबन्धनं मन्ये।
याः शक्यन्ते लब्धुं न पार्थिवेनापि विगुणेन॥ १६४॥

कूपेति । या विगुणेन रज्जुशून्येन । पक्षे गुणरहितेन । पार्थिवेनापि पृथिवीविकार-कलशादिनापि । पक्षे राज्ञापि । एवं च धनादिलोभशून्यत्वं नायिकासु व्यज्यते । प्रातुं न शक्यन्ते तासां कूपप्रभवाणाम् । एवं च गम्भीरत्वं तेन च दुष्प्रापत्वं ध्वन्यते । अपां जलानाम्, पट्टस्य सारिण्या बन्धनम् । पक्षे सर्वाङ्गीणाच्छादकवस्त्ररचनं परमुचितं मन्ये । यद्वात्यन्तलज्जावत्तयाच्छादनादिकारिणीं कश्चिद्वक्ति—एवं चेतस्ततो द्रव्यादि-लोभेन गमनादिशालिन्याः किं तव गोपनमिति व्यज्यते ॥

खण्डिता नायिका नायकं वक्ति—

करुरुहशिखानिखात भ्रान्त्वा विश्रान्त रजनिदुरवाप ।
रविरिव यन्त्रोल्लिखितः कृशोऽपि लोकस्य हरसि दृशम् ॥ १६५ ॥

करेति । नखाग्रनिखात बहुतरनखक्षतशालिन्, भ्रान्त्वा । इतस्ततो गत्वेत्यर्थः । पक्षे मेरुं प्रदक्षिणीकृत्य । विश्रान्त । क्षणमात्रमिति भावः । रजन्यां दुरवाप । अन्यत्रा-सक्तत्वादिति भावः । पक्षे मेरोरुत्तरगमनात् । यन्त्रोल्लिखितो रविरिव कृशोऽपि । अपिना निस्तेजस्कत्वसमुच्चयः । लोकस्य । न ममेति भावः । लोकपदमनभिज्ञत्वं ध्वनयति । दृशं हरसि । एवं चैतादृशस्वरूपस्त्वमन्याभ्य एव रोचसे न मह्यमिति व्यज्यते । सूर्योऽपि तेजोबाहुल्येन वीक्षितुमशक्यस्त्वष्ट्रा यन्त्रोल्लिखितोऽल्पतेजस्कतया लोकदृग्विषय इति भावः ॥

किमिति स्वस्वामिनं न सुखयसीति वादिनीं कांचित्काचिद्वक्ति—

किं करवाणि दिवानिशमपि लग्ना सहजशीतलप्रकृतिः ।
हन्त सुखयामि न प्रियमात्मानमिवात्मनश्छाया ॥ १६६ ॥

किमिति । सह बाल्यतः । पक्ष उत्पत्तित इत्यर्थः । जाता, शीतला शान्ता । पक्षे यथाश्रुतम् । प्रकृतिः स्वभावो यस्याः सा । एवं च सर्वदा मधुरवचनशालित्वं व्यज्यते । दिवानिशमपि लग्ना । सेवार्थमिति भावः । अहमात्मनः स्वस्य छायात्मानमिव प्रियं हन्त खेदे न सुखयामि । किं करवाणि । एवं च यथा सर्वदा निकटवर्तिनी शीतलापि स्वच्छाया न सुखजनिका तथाहं संवृत्तेत्यत्र न मद्दोषः, अपि तु ईश्वरेच्छैवात्र नियामि-केति व्यज्यते । यद्वा सततसेवाकारित्वसौम्यत्वस्वीयत्वादि दोषवत्त्वादहं न सुखजनि-केति द्योत्यते । तेन चैतदभाववत्येवैतत्तोषजनिकेति ॥

नायकसंगमे श्रमो भवतीति वादिनीं सखी वक्ति—

केशैः शिरसो गरिमा मरणं पीयूषकुण्डपातेन ।
दयितवहनेन वक्षसि यदि भारस्तदिदमचिकित्स्यम् ॥ १६७ ॥

केशैरिति । स्फुटार्थमेतत् ॥

नायको मानिनीं वक्ति—

किंचित्कर्कशतामनु रसं प्रदास्यन्निसर्गमधुरं मे ।
इक्षोरिव ते सुन्दरि मानस्य ग्रन्थिरपि काम्यः ॥ १६८ ॥

किंचिदिति । हे सुन्दरि, किंचित्कार्कश्योत्तरम् । एवं चातिकार्कश्याभावो व्यज्यते । स्वभावमृष्टं रसं रतिम् । पक्षे द्रवम् । प्रदास्यन् । ते मानस्य, इक्षोरिव ग्रन्थिरपि । दुरपनेयाग्रह इति यावत् । किमु वाच्यं मृद्वभिमान इत्यपिना द्योत्यते । काम्यः । एवं च मानग्रन्थावपि सुखम्, किमुत तदपगम इति व्यज्यते । तेन चैतादृशावगणनमनुचितमिति द्योत्यते । 'मधुरः' इति पाठे ग्रन्थिविशेषणम् ॥

कश्चिदतिरतिप्रवीणो वक्ति—

केन गिरिशस्य दत्ता बुद्धिर्भुजगं जटावनेऽर्पयितुम् ।
येन रतिरभसकान्ताकरचिकुराकर्षणं मुषितम् ॥ १६९ ॥

केनेति । गिरौ शेते तस्य । एवं च नागरिकव्यवहारशून्यत्वं व्यज्यते । तेन यस्यकस्यचिद्वचनविश्वासकारित्वम् । भुजगं जटावने । एवं च स्वतो भीषणत्वेऽपि भुजगार्पणेनातिभीषणत्वं ध्वन्यते । अर्पयितुम् । अर्पितपदेन संस्थापनाभावप्रतिपादनेनेतस्ततो जटासंचारित्वं भुजगे व्यज्यते । तेन चैकदेशस्यापि करस्पर्शायोग्यत्वम् । केन बुद्धिर्दत्ता । यद्वा जटानामवनं रक्षणं तत्र । तन्निमित्तमित्यर्थः । एवं च संरक्षणेऽन्ये बहवोऽभ्युपायाः सन्ति, एवं सत्येदृशायुक्तविचारकथनमप्रामाणिककृत्यमिति व्यज्यते । यद्वा गिरिशपदेन भुजगसंस्थापनार्हैकंदरादिज्ञानवत्त्वं द्योत्यते । जटाभिरवने । अवननिमित्तमित्यर्थः । अर्थाद्भुजगस्य । एवं च भुजगे भूषणत्वं ध्वन्यते । एवं च वनपदस्य विपिनार्थकत्वे सर्पस्यावनयोग्यत्वे न तत्करणेनानौचित्यमायातीति दूषणमपास्तम् । येन यया बुद्ध्या रतिवेगेन यत्कान्तया करेण चिकुराकर्षणं मुषितम् । भुजगभयादिति भावः । एवं च रतिकालीननायिकाविधीयमानकेशाकर्षणमत्यन्तसुखदमिति व्यज्यते । 'चिकुराकर्षरसमुषितः' इति पाठे येन रसमुषितो हरो जात इत्यर्थः ॥

को वा नायिकाप्रणयशालीति वादिनं कश्चिद्वक्ति—

करचरणकाञ्चिहार ग्रहारमविचिन्त्य बलगृहीतकचः ।
प्रणयी चुम्बति दयितावदनं स्फुरदधरमरुणाक्षम् ॥ १७० ॥

करेति । करादि ग्रहारमविचिन्त्य । नायिकाकृतमित्यर्थः । बलेन । एवं च पीडा भविष्यतीति ज्ञानविधुरत्वं तेन चात्यन्तरतिनिर्भरत्वं व्यज्यते । गृहीतकचः स्फुरदधरम् । निष्ठुरं वक्तुमिति भावः । अरुणाक्षम् । कोपोद्रेकादिति भावः । दयितावदनं यश्चुम्बति । एवं च भीतिशून्यत्वं व्यज्यते । स प्रणयी नायिकानिरूपितप्रेमवान् । अन्यथा कोपाद्यवगणय्य बलाच्चुम्बनकरणमसंभावीति भावः । 'नायिकाविषयकप्रेमवान् । एवं च प्रहारदुःखमवगणय्य यस्तथा करोति स एव तयेति भावः' इति ऋजवः ।

वस्तुतस्तु रागोद्रेकशालीत्यर्थः । यद्वैतादृशो यस्तथाविधं नायिकावदनं चुम्बति स एव धन्य इत्यर्थः । यद्वा मया कोपः प्रदर्शनीयः, त्वया तु प्रियो मयि बलात्काराय प्रेरणीय इति शिक्षिता सखी नायकं वक्ति । एवं च कोपवत्यामपि नायिकायां प्रीतिशालिना नायकेन तत्कृतकरतर्जनाद्यवगणय्य बलात्कारः क्रियत एव, अतस्त्वया भीतिमुत्सृज्य स्वेच्छाचारो विधेय इति ध्वन्यत इत्यर्थः ॥

नायकचाञ्चल्यखिन्नां नायिकां सखी समाधत्ते—

कुरुतां चापलमधुना कलयतु सुरसासि यादृशी तदपि ।
सुन्दरि हरीतकीमनु परिपीता वारिधारेव ॥ १७१ ॥

कुरुतामिति । हे सुन्दरि, अधुना नायकश्चापलमितस्ततो विलोकनादि कुरुताम् । न निवारणीय इति भावः । यतो यत्प्रकारिका त्वं सुरसासि तदपि जानातु । केव । हरीतकीमनु परिपीता जलधारेव । एवं च यथा तिक्तकटुकादिरसशालिहरीतकीस्वादोत्तरं जलधारा मृष्टतमा भवति, तथा त्वमन्यगुणहीननायिकारसास्वादोत्तरमत्यन्तसुखदा भविष्यसीति व्यज्यते । अत एवासम्यग्वस्तुदर्शनोत्तरं सम्यग्वस्तुदर्शनेन सुखम्, न तेन विना तथेति लोकप्रसिद्धिः ॥

शृङ्गाररचनार्थं कृताभ्यङ्गां साधारणवनितां सखी वक्ति—

कज्जलतिलककलङ्कितमुखचन्द्रे गलितसलिलकणकेशी ।
नवविरहदहनतूलो जीवयितव्यस्त्वया कतमः ॥ १७२ ॥

कज्जलेति । हे कज्जलतिलकेन । दृग्दोषनिवारणार्थं कृतेनेति भावः । कलङ्कितो मुखचन्द्रो यस्यास्तत्संबुद्धिः । गलितसलिलकणाः केशा यस्यास्तत्संबुद्धिः । नूतनो यो विरहवह्निस्तस्य तूलरूपस्त्वया कतमो जीवयितव्यः । 'दूनः' इत्यपि पाठः । एवं चैतादृशत्वदीयदर्शनेन सर्वेऽपि तात्कालिकविरहवह्निवृतदह्यमाना भविष्यन्ति, तेषु कस्त्वयानुग्राह्य इति सुभगत्वं ध्वन्यते ॥

स्वस्य दारिद्र्येऽपि महान्तो न दानं परित्यजन्तीति कश्चिदुक्ति—

कृच्छ्रानुवृत्तयोऽपि हि परोपकारं त्यजन्ति न महान्तः ।
तृणमात्रजीवना अपि करिणो दानद्रवार्द्रकराः ॥ १७३ ॥

कृच्छ्रेति । कृच्छ्रानुवृत्तयोऽपि कष्टजीवना अपि महान्तः । एवं च नीचानामन्यादृशी गतिरिति भावः । परोपकारम् । दानरूपमित्यर्थः । न त्यजन्ति । तृणमात्रेण जीवनं येषां तेऽपि करिणो गजाः, दानं मदः, दानोदकं च तेनार्द्रः करः शुण्डादण्डश्च येषाम् ॥

कांचन गोपिकामालिङ्ग्य तिष्ठन्तं कृष्णमवलोक्य विस्मयेन समागतान्बालकान्गोपीसखी वक्ति—

किं हसथ किं प्रधावथ किं जनमाह्वयथ बालका विफलम् ।
तदयं दर्शयति यथा रिष्टः कण्ठेऽमुना जगृहे ॥ १७४ ॥

किमिति । रिष्टो दैत्यः । एवं च भूतार्थाभिनयोऽयं न त्वन्यदपूर्वं किंचिदिति व्यज्यते ॥

कातरताकेकरितस्मरलज्जारोषमसृणमधुराक्षी ।
मोक्तुं न मोक्तुमथवा वलतेऽसावर्धलब्धरतिः ॥ १७५ ॥

कातरतेति । कातरता भीतिस्तया केकरिते वक्रीकृते स्मरलज्जारोषैर्मसृणमधुरे स्निग्धसुन्दरे अक्षिणी यस्याः । मोक्तुमथवा न मोक्तुम् । नायकमिति भावः । अर्धं लब्धा रती रतं ययासौ वलत उद्युक्ता भवति । जातिवर्णनमेतत् ॥

केचिद्दूरादागताः, परं तु नात्र तेषां तत्फलमिति कश्चिदन्योक्त्या वक्ति—

केतकगर्भे गन्धादरेण दूरादमी द्रुतमुपेताः ।
मदनस्यन्दनवाजिन इव मधुपा धूलिमाददते ॥ १७६ ॥

केतकेति । केतकपुष्पस्य मध्ये गन्धस्यादरेण लोभेन द्रुतं दूरात् । एवं च श्रमातिशयो व्यज्यते । उपेताः । गन्धस्यादरो यस्य तेन । वायुनेत्यर्थः । द्रुतं दूरादुपेता मदनरथाश्वा इव । एवं च भारवहनसमर्थत्वं व्यज्यते । तेन चोपमेयेऽतिश्रेष्ठत्वम् । मधुपाः । एवं च तदेकजीवनोपायशालित्वं ध्वन्यते । धूलिमाददते । एवं चैतादृशानां कीर्तिश्रवणादागतानामत्रैतादृशी गतिरित्यनुचितमिति व्यज्यते । पक्षे रथोद्धतरजःसंबन्धाद्धूलिमत्तेति भावः । यद्वा सामान्यवनितां सखी वक्ति—हे केतकगर्भे । अतिगौराङ्गीत्यर्थः । कीर्त्यादरेण दूराच्छीघ्रमागताः । एवं चात्रत्यानां कालान्तरेऽपि समाधातुं शक्यत्वमावेद्यते । मदनरथाश्वा इव । एवं च मदनोऽपि सौन्दर्याद्यनेकगुणवतामेतेषामेव बलेन जगज्जयं करोतीति व्यज्यते । तेन चैतादृशदुर्लभा इति । मधुपा मद्यपाः । एवं चोन्मादवत्तया द्रव्यव्ययक्लेशशून्यत्वं ध्वन्यते । धूलिम् । अर्थात्त्वच्चरणसंबन्धिनीम् । आददते । एवं चैतेन नायका अवश्यमनुग्राह्या इति ध्वन्यते ॥

मूर्खनिबद्धान्तःकरणत्वान्नैताश्चातुर्यादिगुणभाजनमिति कश्चिदन्योक्त्या वक्ति—

को वक्रिमा गुणाः के का कान्तिः शिशिरकिरणलेखानाम् ।
अन्तः प्रविश्य यासामाक्रान्तं पशुविशेषेण ॥ १७७ ॥

क इति । वक्रिमा वक्रत्वं कः, गुणाः केः, कान्तिः का, चन्द्रलेखानाम् । शिशिरकिरणपदेन तदधिपमान्द्यमावेद्यते । प्रविश्य यासामन्तरभ्यन्तरं पशुविशेषेण । अतिजडेनेति भावः । आक्रान्तम् । एवं चैतासां चातुर्यादि सर्वं मिथ्यैवेति व्यज्यते ॥

बलादियं कन्या मया परिणेयेति वादिनं कश्चिद्दृष्टान्तव्याजेन वारयति—

कृतविविधमथनयत्नः पराभवाय प्रभुः सुरासुरयोः ।
इच्छति सौभाग्यमदात्स्वयंवरेण श्रियं विष्णुः ॥ १७८ ॥

कृतेति । कृतो विविधमथने यत्नो येन सः । मथनमर्थात्समुद्रस्य । विविधपदेन बुद्धिविशेषशालित्वं व्यज्यते । देवदानवयोः पराजयाय प्रभुः समर्थो विष्णुः सौभाग्यस्य

मदादभिमानात्स्वयंवरेण श्रियम् । एवं चात्यन्तस्पृहणीयत्वं व्यज्यते । इच्छति । एवं च शारीरबुद्धिबलसत्त्वेऽपि विष्णुना लक्ष्मीपाणिग्रहणाय न बलात्कारः कृतः। अतस्त्वया नैतादृक्कर्म कर्तव्यमिति ध्वन्यते। यद्वा त्वयि सुभगत्वेऽवश्यं सा त्वामेव वरिष्यति, अन्यथा बलाद्धृतेति न तत्प्रीतिरिति ध्वन्यते ॥

एतेषु वैदेशिकेषु स्थायिभ्रमेण विहिता त्वया संगतिः, तव सा न सुखदेति काचित्कांचित्प्रति वक्ति—

किं पुत्रि गण्डशैलभ्रमेण नवनीरदेषु निद्रासि ।
अनुभव चपलाविलसितगर्जितदेशान्तरभ्रान्तीः ॥ १७९ ॥

किमिति । हे पुत्रि । एवं चोपदेशार्हत्वं ध्वन्यते । गण्डशैलानां भ्रमेण । 'गण्डशैलास्तु च्युताः स्थूलोपला गिरेः' इत्यमरः । नूतनमेघेषु । नीरदपदेनेदं देयमिदं देयमिति संकल्पमात्रकारित्वं व्यज्यते । तेन च न ततोऽर्थप्राप्तिरपीति । निद्रासि । एवं चातिविश्वस्तत्वं व्यज्यते । चपलायास्तडितो विलसितानि, गर्जितानि च, देशान्तरभ्रमणानि चानुभव । एवं चैतत्संगत्या सपत्नीवैभवतर्जनदिगन्तगमनादिदुःखमवश्यं भावीति व्यज्यते ॥

नायिकांसखी नायकसखीं वक्ति—

कान्तः पदेन हत इति सरलामपराध्य किं प्रसादयथ ।
सोऽप्येवमेव सुलभः पदप्रहारः प्रसादः किम् ॥ १८० ॥

कान्त इति । कान्तश्चरणेन हत इति सरलाम् । एवं च भवच्छाठ्यानभिज्ञेयत्वमिति ध्वन्यते । अपराध्य । सापराधां विधायेत्यर्थः । किं प्रसादयथ । सोऽपि प्रहाररूपः प्रसादः, एवमेव किं सुलभः । एवं च मानिन्यानया क्रोधात्पादाहते नायके भवंतीभीरियमनुचितकार्यकारिणी त्वमिति त्रासयित्वा प्रसादना क्रियते । परं त्वेतत्पदप्रहारोऽप्येतस्यातिदुर्लभ इति नायिकाधिक्यं द्योत्यते ॥

किमिति नायको नानीयते भवतीभिरिति दूतीषु वादिनीं नायिकां सखी द्वाभ्यां वक्ति—

कर्णगतेयममोघा दृष्टिस्तव शक्तिरिन्द्रदत्ता च ।
सा नासादितविजया क्वचिदपि नापार्थपतितेयम् ॥ १८१ ॥

कर्णगतेयमिति । यावत्कर्णविशाला, कर्णहस्तगता च । सफला । पक्षेऽमोघेति शक्तिनाम । इन्द्रेण परमेश्वरेण । पक्षे पुरंदरेण । दत्ता । आसादितो विशिष्टानां जयो यया । न विद्यत आसादितविजयो यस्याः सकाशात् । एवं चैयमेव विशिष्टजयकर्त्रीत्यर्थः । पक्षेऽप्राप्तार्जुना । यद्वासादितो विजयो यस्याः । एतज्जयकारिणी नान्येति भावः । इयं तव दृष्टिः शक्तिश्च क्वचिदप्यपगतोऽर्थो यस्याः । षण्ढेत्यर्थः । पतिता नेति न इति काकुः । पक्षेऽर्जुनभिन्ने घटोत्कचे पतिता नेति न । एवं च यस्त्वत्कटाक्षमात्रेण न वश्यः स पुरुष एव नेति द्योत्यते ॥

क्लेशयसि किमिति दूतीर्यदशक्यं सुमुखि तव कटाक्षेण ।
कामोऽपि तत्र सायकमकीर्तिशङ्की न संधत्ते ॥ १८२ ॥

क्लेशयसीति । दूतीरिति बहुवचनेन न कापि तत्र युक्तिश्चलतीति व्यज्यते । अकीर्तिशङ्की । षण्ढत्वादिति भावः । एवं च कामबाणापेक्षया कटाक्षेऽतिशयो व्यज्यते ॥

कश्चिदधरं स्तौति—

को वेद मूल्यमक्षद्यूते प्रभुणा पणीकृतस्य विधोः ।
प्रतिविजये यत्प्रतिपणमधरं धरनन्दिनी विदधे ॥ १८३ ॥

को वेदेति । प्रभुणेश्वरेण । एवं चानर्घवस्तुसत्त्वं द्योत्यते । अक्षद्यूते पणीकृतस्य चन्द्रस्य मूल्यं को वेद । यस्माद्धरति महीमिति धरः । 'धरपर्वताः' इत्यमरः । तत्तनया । एवं च चातुर्यविशेषवत्त्वं ध्वन्यते । प्रतिविजये प्रतिपणमधरं विदधे । एवं चाधरसमताप्रदर्शनेन चन्द्रेऽधिकत्वं न वास्तवमित्यधरामृतेऽधिकत्वं ध्वन्यते ॥

'मुञ्च माम्, नो चेत्ताडयामि चरणेन' इति वादिनीं कुपितनायिकां नायको वक्ति—

कुपितां चरणप्रहरणभयेन मुञ्चामि न खलु चण्डि त्वाम् ।
अलिरनिलचपलकिसलयताडनसहनो लतां भजते ॥ १८४ ॥

कुपितामिति । हे निरर्थककोपने, चरणप्रहरणभयेन कुपितां त्वां न मुञ्चामि । यतो वायुचपलपल्लवताडनसहोऽलिर्लतां भजते । अलिरिति स्वस्मिन्नलितुल्यत्वप्रतिपादनेनानन्यगतिकत्वं द्योत्यते । कोपेऽनिलतुल्यत्वप्रतिपादनेन चञ्चलत्वमावेद्यते । चरणे किसलयतुल्यत्वप्रतिपादनेन कोमलत्वं तेन च दुःखाजनकत्वं ध्वन्यते । यद्वा मन्मथशस्त्ररूपत्वं तेन च तत्संबन्धेनोन्मत्ततया वेदनानभिज्ञत्वं स्वस्मिन्व्यज्यते ॥

कथमनेन विलम्बितमिति कुपितां नायकेन च स्वापराधक्षमापनाय विहितप्रसादां नायिकां सखी वक्ति—

कोपाकृष्टभ्रूस्मरशरासने संवृणु प्रिये पततः ।
छिन्नज्यामधुपानिव कज्जलमलिनाश्रुजलबिन्दून् ॥ १८५ ॥

कोपेति । प्रिये नायकविषये कोपेनाकृष्टम् । एवं च ज्याभङ्गो युक्त इति व्यज्यते । भ्रूरूपं स्मरशरासनं यया तत्संबुद्धिः । छिन्ना या ज्या तन्मधुपानिव । स्मरधनुर्ज्या भ्रमररूपेति प्रसिद्धिः । पततः कज्जलमलिनाश्रुजलबिन्दून्संवृणु । एवं च नायकप्रणत्युत्तरकालं कोपविधानमनुचितमिति व्यज्यते । यद्वा संवृण्वित्यनेन कोपप्रदर्शनाव्यवहितमेव तत्परित्यागोऽनुचित इत्यावेद्यते । यद्वा छिन्नज्यात्वनिरूपणेन यद्यधुनापि कोपं करिष्यसि तर्हि कुपितो नायकः केनापि समाहितुमशक्य इति भीतिरावेद्यते । अत्र जलपदमाधिक्यं द्योतयति ॥

बालवनिताचित्तं स्वकरे कर्तुं कृतयत्नवैकल्यखिन्नः कश्चिद्वक्ति—

कामेनापि न भेत्तुं किमु हृदयमपारि बालवनितानाम् ।
मूढविशिखप्रहारोच्छूनमिवाभाति यद्वक्षः ॥ १८६ ॥

कामेनेति । बालवनितानां हृदयं कामेनापि । एवं चान्यस्य का वार्तेति भावः । भेत्तुम् । किमु वितर्के । नापारि । मूढस्य यद्वा मूढो मन्दो यो बाणप्रहारस्तेनोच्छूनमिव वक्ष आभाति । अन्यस्यापि धन्विनो मन्दशरप्रहारे लक्ष्यशरीर उच्छूनतामात्रमेव भवति । एवं च मदीययत्नेनैतासां हृदयं न भिद्यत इति न चित्रमित्यावेद्यते ॥

कश्चिन्नायिकां वक्ति—

किं परजीवैर्दीव्यसि विस्मयमधुराक्षि गच्छ सखि दूरम् ।
अहिमाधिचत्वरमुरगग्राही खेलयतु निर्विघ्नः ॥ १८७ ॥

किमिति । हे सखि, विस्मयेन । सर्पदर्शनकौतुकजन्येनेत्यर्थः । सुन्दराक्षि । विस्फारितत्वादिति भावः । परस्यान्यस्य प्राणैः किमिति क्रीडसि । दूरं गच्छ । चत्वरमधिकृत्याहितुण्डिको विघ्नहीनोऽहिं खेलयतु । एवं च निखिलजनेषु त्वद्वदनविलोकनासक्तेष्वाहितुण्डिकश्रमो निरर्थक एव भवितेति व्यज्यते । यद्वा चत्वरपदेन सर्वजनसमाजयोग्यत्वं ध्वन्यते । दूरं बहुकालं खेलयतु । परस्य संकेतितनायकस्य प्राणैः किमिति क्रीडसि । अतो गच्छ । एवं चान्यस्य निर्विघ्नतासंपादने स्वस्यापि तद्भवतीति नियमेनात्र सकलदुष्टासक्त्या निर्विघ्नतया संकेतितनायकसविधे गन्तव्यम् । विलम्बे तु मदनानलसंतप्तस्य तस्य प्राणा एव गमिष्यन्तीति दूती नायिकां वक्ति ॥

कुपितनायिकाचरणप्रहारखिन्नं नायकं नायिकासखी समाधत्ते—

करचरणेन प्रहरति यथा यथाङ्गेषु कोपतरलाक्षी ।
रोषयति परुषवचनैस्तथा तथा प्रेयसीं रसिकः ॥ १८८ ॥

करेति । कोपचञ्चलाक्षी करौ च चरणौ च करचरणं तेनाङ्गेषु यथा यथा प्रहरति तथा तथा क्रोधजनकवाक्यैः प्रेयसीं यः कोपयति स एव रसिकः । एवं च यदि त्वं रसिकस्तर्ह्येतादृशेऽर्थे कोपविधानमनुचितं तवेति व्यज्यते । अत्र द्वितीयतच्छब्दः 'संचारिणी दीपशिखा–' इत्यादि पद्यवदुचितः ॥

निन्दसि त्वं नायिकामिति वादिनीं नायिकासखीं नायको वक्ति—

कस्तां निन्दति लुम्पति कः स्मरफलकस्य वर्णकं मुग्धः ।
को भवति रत्नकण्टकममृते कस्यारुचिरुदेति ॥ १८९ ॥

कस्तामिति । तां को निन्दति न कोऽपि । मदनपटस्य चित्ररूपाम् । 'वर्णकः' इति पाठे मदनपटचित्रमित्यर्थः । को मूर्खो लुम्पति । रत्नकण्टको रत्ननिन्दकः । 'कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकहाटकनिष्कशुष्कवर्चस्कपिनाकभाण्डककटकद-

ण्डकपिटकतालकफलककल्कपुलाकानि नपुंसके च' इति पाणिनिलिङ्गानुशासनात्कण्टकशब्दो नपुंसकः। को भवति। सुधायामरुचिः कस्योदेति। न कस्यापीत्यर्थः। एवं चैतादृश्याः कथं मया निन्दा विधेयेति व्यज्यते॥

संकेते गत्वा तत्र नायिकामप्राप्य गतं मया तत्रेति ज्ञापनाय चूताङ्कुरमादाय नायिकादृग्विषयं नायकं प्रति नायिकासखी वक्ति—

कोपवति पाणिलीलाचञ्चलचूताङ्कुरे त्वयि भ्रमति।
करकम्पितकरवाले स्मर इव सा मूर्छिता सुतनुः॥ १९०॥

कोपवतीति। कोपवति। कथं न समागतेयमिति धियेति भावः। स्मरविशेषणमप्येतत्। पाणौ लीलया विलासेन। एवं च लोकान्यथाबुद्धिनिरासकत्वं ध्वन्यते। चञ्चल आम्राङ्कुरो यस्मिन्। करे कम्पितः। मारणोद्यमादिति भावः। खड्गो येन तस्मिन्स्मर इव त्वयि भ्रमति सति। ज्ञापनार्थमिति भावः। सा सुतनुः। एवं चोपेक्षानर्हत्वं ध्वन्यते। मूर्छिता। एवं चैतस्या अतिदुःखं जातमिति व्यज्यते। तेन चायमपराधः क्षन्तव्य इति॥

कुलवत्याः सुरते गोत्रस्खलनमनुचितं तवेति वादिनीं सखीं नायको वक्ति—

कौलीन्यादलमेनां भजामि न कुलं स्मरः प्रमाणयति।
तद्भावेन भजतो मम गोत्रस्खलनमनिवार्यम्॥ १९१॥

कौलीन्यादिति। अलमत्यर्थं कौलीन्यात्कुलीनत्वात्। 'कौलीनात्' इति पाठे तु कौलीनाल्लोकवादात्। 'स्यात्कौलीनं लोकवादे' इत्यमरः। एनां भजामि। एतस्याः परित्यागेऽन्यलोकनिन्दाभीतिरिति भावः। स्मरः कुलं न प्रमाणयति। एवं च सगुणत्वमपेक्षितमिति भावः। तस्या भावनया सेयमिति बुद्ध्या भजतः। एनामिति भावः। मम नामस्खलनम्। 'गोत्रं नाम्नि कुलेऽपि च' इति विश्वः। निवारयितुमशक्यम्।

कस्याश्चिन्नायिकायाः पतिमवलोक्य भीतं कंचन नायकं दूती वक्ति—

कुत इह कुरङ्गशावक केदारे कलममञ्जरीं त्यजसि।
तृणबाणस्तृणधन्वा तृणघटितः कपटपुरुषोऽयम्॥ १९२॥

कुत इति। हे कुरङ्गशावक। शावकपदेनाज्ञत्वं व्यज्यते। तेन च भीतियोग्यत्वम्। इह केदारे शालिमञ्जरीं कुतस्त्यजसि। नन्वत्रास्ति रक्षक इत्यत्राह—तृणरूपो बाणो यस्य, तृणरूपधनुष्मान्, तृणविहितो मिथ्यापुरुषः। एवं चाक्षमादस्माद्भीतिमपहाय यथेच्छं त्वमत्रागच्छेति द्योत्यते। यद्वा नायं पुरुषः किं तु तद्वेषधारीति भयमपास्य त्वमत्रागच्छेति॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता ककारव्रज्या।

खकारत्रज्या ।

सन्मैत्रीं स्तौति—

खलसख्यं प्राङ्मधुरं वयोऽन्तराले निदाघदिनमन्ते ।
एकादिमध्यपरिणतिरमणीया साधुजनमैत्री ॥ १९३ ॥

खलसख्यमिति । प्राक्प्रथमतः । अन्तराले मध्ये वयः । तारुण्यमित्यर्थः । अन्ते सायं ग्रीष्मर्दिनम् । मधुरं मनोहारि । एका । नान्येदृतत्सममिति भावः । एवं च सत्संगतिरेव विधेयेति ध्वन्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता खकारत्रज्या ।

गकारत्रज्या ।

केनचिद्गुणवता दरिद्रेण संयोजयितुं काचित्कांचिद्वृत्ति—

गुणमधिगतमपि धनवान्न चिरान्नाशयति रक्षति दरिद्रः ।
मज्जयति रज्जुमम्भसि पूर्णः कुम्भः सखि न तुच्छः ॥ १९४ ॥

गुणमिति । हे सखि, प्राप्तमपि । एवं चाधिकार्जनं दूरापास्तमिति भावः । दरिद्रो रक्षत्यपि । एवं च नवीनमर्जयतीति भावः । तुच्छोऽपरिपूर्णः । एवं च दारिद्र्येऽपि गुणवत्त्वादेतत्संगतिरेवोचितेति व्यज्यते । यद्वा साधारणोक्तिरियम् ॥

महदङ्गीकारेणैव महत्सविधे गमनमुचितम्, अन्यथा नेति कश्चित्कंचिदुपदिशति—

गुरुरपि लघूपनीतो न निमज्जति नियतमाशये महतः ।
वानरकरोपनीतः शैलो मकरालयस्येव ॥ १९५ ॥

गुरुरिति । आशयेऽन्तःकरणे, मध्ये च । मकरालयपदेन स्वल्पस्याप्यन्तर्वसतियोग्यत्वमिति व्यज्यते । एवं चैतादृशेऽप्यत्यन्तमहतो लघ्वङ्गीकरणान्नात्यन्तपरिचितिरिति व्यज्यते ॥

कदापि कस्याप्यवाच्यं न वाच्यमिति कश्चित्कंचिदुपदिशति—

गौरीपतेर्गरीयो गरलं गत्वा गले जीर्णम् ।
जीर्यति कर्णे महतां दुर्वादो नाल्पमपि विशति ॥ १९६ ॥

गौरीपतेरिति । महत्तरं गरलं गत्वा । एवं च तद्ग्रहणे नोद्यमो गौरीपतेरिति भावः । एवं च महद्भिः परदोषश्रवणे नोद्यमः क्रियत इति किं वक्तव्यम् । तज्जातं तदैव नश्यतीति व्यज्यते । जगदीश्वरस्य कण्ठे जीर्णम् । एवं च बहिर्निःसरणानर्हत्वं व्यज्यते । महतां कर्णे दुर्वादो जीर्यति । अल्पमपि न प्रविशति । एवं च श्रवणसमसमयमेव दुर्वादो नश्यति, न सतां स्वल्पमपि हृदयमवतरतीति भावः । अल्पं नीचपुरुषं विशत्यपि, न जीर्यतीति किमु वाच्यमिति भावः । एवं च महन्मुखान्न कस्यचिद्दूषणं निःसरति, श्रु-

द्रस्य मुखाद्बहिरेव निःसरतीति व्यज्यत इति वार्थः । एवं च यदि ते महत्त्वापेक्षा, तर्हि न कदापि कस्यापि निन्दा विधेयेति द्योत्यते । दुर्वादे गरलसमताप्रतिपादनेन दाहकत्वातिशयो द्योत्यते ॥

कस्याश्चिद्वार्ता काचिद्वक्ति—

गृहपतिपुरतो जारं कपटकथाकथितमन्मथावस्थम् ।
प्रीणयति पीडयति च बाला निःश्वस्य निःश्वस्य ॥ १९७ ॥

गृहपतीति। गृहपतिपदेन गृहव्यासङ्गप्रवणत्वेन प्रतारणार्हत्वं ध्वन्यते । तत्पुरतः । 'धनविशेषाप्राप्त्या मनसिजसंतापकदर्थितोऽहं भवद्विधद्विजराजदर्शनमपि गृहीतुं नोत्सहे, केवलं गरलगिलनमेवाश्रित्येदानीं संसारविरतिं विधास्ये' इत्यादि कपटवार्ताभिः कथितस्वमन्मथावस्थं जारम् । बाला षोडशवार्षिकी । एवं चोन्मादवत्त्वं ध्वन्यते । पतिपुरत इदमप्यत्रान्वेति । निःश्वस्य । तथाविधदारिद्र्यश्रवणानुकम्पयेति भावः। अथ च 'तावत्पर्यन्तं सुरतरङ्गं विधास्ये, यावत्ते श्रमातिशयाच्छ्वासोच्छ्वासातिशयो भावी' इति कथनेन, अथवा 'श्वासपरित्यागेन विरहेण तव प्राणापगमे ममापि प्राणा गमिष्यन्ति' इति प्रेमातिशयप्रदर्शनेन प्रीणयति । तथाविधचेष्टासङ्गितरतातिशयानुस्मारणेन पीडयति च । एवं च स्त्रीधूर्तत्वं केनापि विज्ञातुमशक्यमिति ध्वन्यते ॥

रतप्रावीण्यविहीनं पुंस्त्वाभिमानशालिनं काचिदन्योक्त्या वक्ति—

गतिगञ्जितवरयुवतिः करी कपोलौ करोतु मदमालिनौ ।
मुखबन्धमात्रसिन्धुर लम्बोदर किं मदं वहसि ॥ १९८ ॥

गतीति । गत्या गमनविशेषेण गञ्जिता तिरस्कृता । पक्षे ज्ञानेन । रतिनैपुण्येनेत्यर्थः । गञ्जिता रतिविजयेन स्वाधीनीकृता । वरा गतिविशेषशालितया । पक्षे कामकेलिकोविदात्वेन । युवतिर्येन । मुखबन्धमात्रेण । एवं च करिकार्यसत्त्वाभावो व्यज्यते । सिन्धुर गज । लम्बोदर । एवं च गतिविशेषशून्यत्वं व्यज्यते । पक्षे लम्बोदरपदेनोत्थानासामर्थ्यमभिव्यज्यते । किं मदं वहसि । एवं च पुरुषचिह्नसत्त्वमात्रेण न गर्वस्त्वया विधेय इति द्योत्यते । यद्वान्यकामुकसमताकारिणं कंचन काचिदन्योक्त्या वक्ति । एवं च तत्तुल्यं त्वयि न सामर्थ्यमिति व्यज्यते ॥

काचित्कस्याश्चिद्वार्तां वक्ति—

गेहिन्याः शृण्वन्ती गोत्रस्खलितापराधतो मानम् ।
स्निग्धां प्रिये सगर्वां सखीषु बाला दृशं दिशति ॥ १९९ ॥

गेहिन्या इति। श्रेष्ठपत्न्या नामस्खलनरूपापराधजन्यं मानं शृण्वन्ती । अत्र नुमागमश्चिन्त्यः । बाला । प्रिये स्निग्धाम् । स्वासक्तिज्ञानजनितप्रेमवत्तयेति भावः । सखीषु सगर्वाम् । ईदृश्यहं गुणशालिनीति धियेति भावः । यद्वैतासां प्रिया नैतास्वेतादृशासक्तिमन्त इति धियेति भावः ॥

केलिवने गन्तव्यमिति कश्चित्कांचिद्वक्ति—

ग्रीष्ममये समयेऽस्मिन्विनिर्मितं कलय केलिवनमूले।
अलमालवालवलयच्छलेन कुण्डलितमिव शैत्यम् ॥ २०० ॥

ग्रीष्मेति। संतापप्रचुरेऽस्मिन्समये विनिर्मितम्। वृक्षसंजीवनार्थमिति भावः। क्रीडावृक्षसमूहमूले। वनपदेन सर्वत्र तत्र शैत्यमित्यावेद्यते। अत्यर्थं शैत्यमालवालवलयमिषेण। वलयपदं कुण्डलितत्वदार्ढ्याय। कुण्डलितमिव निर्बन्धवत्तां प्रापितमिव त्वं कलय। एवं चैतत्समये क्रीडा तत्रैवोचितेति भावः। यद्वा ग्रीष्मस्वरूपे समये क्रीडावृक्षसमूहमूले विशेषेण निर्मितम्। कलशसेचनादिनेति भावः। अस्मिन्समये। वर्षाकाल इत्यर्थः। आलवालवलयमिषेणालमत्यर्थं कुण्डलितमिव निरर्थकीकृतमिव कलय। मेघोदकेन तन्निर्वाहादिति भावः। अन्यदपि निरर्थकं कुण्डलितं कृतमिति-लौकिकम्। एवं च वर्षासमयः संवृत्तः, अतस्ते प्रियः समायास्यतीति सखी नायिकां समाश्वासयतीत्यर्थः। अथवा नायको नायिकां वक्ति—अत्र संबुद्धिपदानुपादानं मदनबाधातिशयं व्यनक्ति। ग्रीष्मस्वरूपे समये केलिवनमूले विनिर्मितं शैत्यमस्मिन्। पुरोवर्तिनि त्वत्कुचमण्डले सतीत्यर्थः। आलवालवलयमिषेणेवात्यन्तं कुण्डलितम्। एवं चैतादृशग्रीष्मसमये त्वत्कुचमण्डलसमं नान्यदस्ति शीतलतरमिति ध्वन्यते। तेन चातिमनोज्ञानलसंतप्तस्य ममेदमेव शरणमिति॥

मदीयगुणनिबद्धोऽयमिति बुद्ध्या नायं नायकस्त्वया विश्वसनीय इत्यन्योक्त्या काचित्कांचिदुपदिशति—

गुणबद्धचरण इति मा लीलाविहगं विमुञ्च सखि मुग्धे।
अस्मिन्वलयितशाखे क्षणेन गुणयन्त्रणं त्रुटति ॥ २०१ ॥

गुणबद्धेति। हे सखि। एवं चोपदेशार्हत्वं व्यज्यते। मुग्धे। इत्यनेनाज्ञत्वं द्योत्यते। गुणैः सूत्रैः। पक्षे चातुर्यादिभिः। बद्धचरणः। पक्षे बद्धाचरणः। बद्धव्यवहार इति यावत्। इति हेतोर्लीलाविहगं मा विमुञ्च। निबद्धचरणत्वात्कानेन गन्तव्यमिति धियेति भावः। यतोऽस्मिन्वलयितशाखे वृक्षे गुणैर्यन्त्रणं बन्धनम्। पक्षे स्वाधीनतासंपादनम्। क्षणेन त्रुटति। एवं चात्यन्तसावधानतया स्थेयमित्यावेद्यते। लीलाविहगमित्यनेन सर्वस्पृहणीयत्वं ध्वन्यते। तेन चातिसंरक्षणीयत्वम्। विहगपदेनेतस्ततो गमनस्वाभाव्यं द्योत्यते। वलयितशाख इत्यनेन गुणत्रुटनयोग्यत्वम्। पक्षे नायिकासमूहशालित्वं व्यज्यते॥

मदनवेदनासह्येति काचिद्वक्ति—

गुरुगर्जितसान्द्रविद्युद्द्वयमुद्रितकर्णचक्षुषां पुरतः।
बाला चुम्बति जारं वज्रादधिको हि मदनेषुः ॥ २०२ ॥

गुर्विति। गुरुगर्जिश्च निबिडविद्युच्चानयोर्यद्द्वयं तेनाच्छादितश्रोत्रनेत्राणां पुरतो बाला।

एवं च भीतियोग्यत्वम् । जारं चुम्बति । हि यस्मान्मदनबाणो वज्रादधिकः । एवं च मेघगर्जितविद्युद्भयस्य क्षणिकत्वेनातिशीघ्रनेत्रोन्मीलने द्रष्टव्यमेतैरिति विवेकविधुरत्वं ध्वन्यते। यद्वा बहूनामपि भयजनके गर्जितादौ स्वयमेका न भीतेति साहसवत्त्वमावेद्यते ।।

मानसंपादनप्रधानशीलां नायिकां सखी वक्ति—

गृहिणीगुणेषु गणिता विनयः सेवा विधेयतेति गुणाः ।
मानः प्रभुता वाम्यं विभूषणं वामनयनानाम् ॥ २०३ ॥

गृहिणीति । गृहिणी गृहाधिपत्यशालिनी । तद्गुणेषु विनयादित्रितयं गुणः । वामनयनानां दुःशीलानां मानादि विभूषणम् । एवं च यदि गृहाधिपत्यप्रतिष्ठादिकामा त्वमसि तर्हि मानाद्यपहाय विनयाद्येव कुर्विति ध्वन्यते । यद्वा तव नायिकात्यन्तं प्रभुताकारिणीति वादिनं कञ्चिद्वक्ति—वामनयनानाम् । त्रिविधानामिति भावः । मध्ये गृहिणीगुणेषु स्वीयागुणेषु नम्रता, सेवा, आज्ञाकारित्वमिति गुणाः प्रधानभूता गणिताः । एवं चैतद्गुणवतीनामेव स्वीयात्वमिति व्यज्यते । तेन चैतद्वत्त्वं सर्वस्वीयास्विति तद्वत्त्वेन न कापि श्लाघ्यतेति । वामनयनानां मध्ये गृहिणीष्वेते गुणा गणिता इत्येव वक्तव्ये गुणेष्विति पदोपादानम्, अन्येऽपि गुणाः सन्ति परं तु तेऽप्रधानभूता इति द्योतयितुम् । मानः, प्रभुता, वाम्यमिदं विभूषणम् । एवं चैतत्त्रितयं कस्यचिदेव भाग्यवतोऽङ्गनायां भवतीति व्यज्यते । एवं च विनयादेः सर्वगृहिणीगुणत्वेन विद्यमानत्वेऽपि मानादिविभूषणसत्त्वेन स्वाङ्गनायामाधिक्यं व्यज्यते। यद्वा गृहिण्या गृहकर्मव्यापृतायाः । किंचिद्गतयौवनाया इति भावः। विनयादयो गुणा मुख्यत्वेन गणिताः । एवं चैतेषामेव तद्भूषणत्वं व्यज्यते । वामनयनानाम् । यौवनातिशयशालिनीनामिति भावः । मानादयो विभूषणमित्यर्थः । अथवा सर्वदा नायकस्य विनयसेवादिकमेव करोषि न कदापि किमिति प्रभुतां नाटयसीति वादिनीं काचिद्वक्ति—गृहिण्या विनयादयो विभूषणम्, कुटिलनयनानां तु मानादयो विभूषणम्। एवं च स्वस्मिन्नत्यन्तसाधुत्वमावेद्यत इत्यर्थः । यद्वा स्वीयागुणेषु विनयादयो मुख्या गणिता वामनयनानां परकीयादीनां वाम्यादि विभूषणम् । एवं च स्वीयाया एवैतत्करणमनुचितमिति भावः । विभूषणपदेन वाम्यादौ गुणव्यवहाराभावो द्योत्यते । अथवा स्त्रीषु मध्ये गृहिणीनां विनयादयो गुणाः । गुणपदेन नैसर्गित्वं व्यज्यते । भूषणपदेन वाम्यादावचिरावस्थायित्वं ध्वन्यते । एवं च न मया वाम्यादि बहुकालं स्थाप्यम्, अपि तु विनयादि विधेयमिति 'बहुकालं मानः कर्तव्यः' इति वादिनीं काचिद्वक्ति ॥

भर्तृकृतातिशयलालनेऽपि कथं त्वं दुःखितैवासीति वादिनीं काचिद्वक्ति—

गुणमान्तरमगुणं वा लक्ष्मीर्गङ्गा च वेद हरिहरयोः ।
एका पदेऽपि रमते न वसति निहिता शिरस्यपरा ॥ २०४ ॥

गुणमिति । हरिहरयोरान्तरम् । एवं च बहिर्दर्शनायोग्यत्वं ध्वन्यते । गुणं दोषं वा लक्ष्मीर्गङ्गा च वेद । यत एका लक्ष्मीः पदेऽपि । एवं च बाह्यादराभावो द्योत्यते । रमते ।

अपरा गङ्गा शिरसि निहितापि। एवं च बाह्यादरो द्योत्यते। न तिष्ठति। एवं च या यत्संगतिशालिनी सैव तद्गुणदोषं विजानाति, नान्या कापीति ध्वन्यते॥

चिरप्रत्यागतं पुनर्विदेशं गन्तुकामं नायकं काचिदुक्ति—

गत्वा जीवितसंशयमभ्यस्तः सोढुमतिचिराद्विरहः।
अकरुण पुनरपि दित्ससि सुरतदुरभ्यासमस्माकम्॥ २०५॥

गत्वेति। जीवितसंदेहं प्राप्यातिचिरकालेन विरहः सोढुमभ्यस्तः। हे अकरुण करुणाशून्य। एवं च पूर्वमपि करुणाभावो द्योत्यते। अस्माकं सुरतस्य दुरभ्यासं पुनरपि दित्ससि दातुमिच्छसि। एवं चातःपरं त्वद्विदेशगमनेऽस्माकं प्राणपरित्याग एव भविष्यतीति व्यज्यते॥

कश्चित्कस्याश्चिद्वार्तां वक्ति—

गोत्रस्खलितप्रश्नेऽप्युत्तरमतिशीलशीतलं दत्त्वा।
निःश्वस्य मोघरूपे स्ववपुषि निहितं तया चक्षुः॥ २०६॥

गोत्रेति। गोत्रस्खलितेन प्रश्नस्तस्मिन्नपि। एवं चावश्यक्रोधजननयोग्यत्वं द्योत्यते। अत्यन्तस्वभावशीतलमुत्तरं दत्त्वा। निष्फलं रूपं यस्य तस्मिन्। कान्तचित्तवश्यतासंपादनसामर्थ्याभावादिति भावः। स्वीयदेहे निःश्वस्य। दुःखोद्रेकादिति भावः। तया नेत्रं निहितम्। विद्यमानमपीदं रूपादि किमिति न नायकवश्यतासंपादकमिति धियेति भावः॥

काचित्कांचिदन्योक्त्या वक्ति—

गन्धग्राहिणि शालोन्मीलितनिर्यासनिहितनिखिलाङ्गि।
उपभुक्तमुक्तभूरुहशतेऽधुना भ्रमरि न भ्रमसि॥ २०७॥

गन्धेति। आमोदग्राहिणि। एवं च लोलुपत्वचाञ्चल्ये व्यज्येते। शालस्य वृक्षविशेषस्योन्मीलन्यो निर्यासस्तत्र निहितसर्वाङ्गि। उन्मीलत्पदेन नवीनदर्शननायकदर्शितातिशयितप्रेमशालिनी त्वमिति द्योत्यते। उपभुक्तमुक्तं वृक्षशतं यया तत्संबुद्धिः। एवं चैकस्यापि न संगतिस्त्वया निर्वाहितेति ध्वन्यते। भूरुहपदेनाल्पवयस्कसंगतिशालित्वम्, तेन चातिनीचगुणवत्त्वं ध्वन्यते। भ्रमरि, अधुना न भ्रमसि। एवं च त्वमेतादृशीति विज्ञाय सर्वैरुपेक्षितेति व्यज्यते॥

केनचिदूनसमतामापादितः कश्चिदन्योक्त्या वक्ति—

गुरुषु मिलितेषु शिरसा प्रणमसि लघुषून्नता समेषु समा।
उचितज्ञासि तुले किं तुलयसि गुञ्जाफलैः कनकम्॥ २०८॥

गुरुष्विति। गुरुताशालिषु। पक्षे श्रेष्ठेषु। मिलितेषु संयुक्तेषु। पक्षे समागतेषु। शिरसाग्रभागेन। पक्षे मस्तकेन। प्रकर्षेण नमस्यवनता भवसि। पक्षे नमस्करोषि। लघुषु न्यूनपरिमाणशालिषु। पक्षे नीचेषु। उन्नतोच्चा। पक्षे साभिमाना। समेषु

समा। अत एव तुले उचितज्ञासि। कनकं गुञ्जाफलैस्तुलयसीदं किम्। एवं चात्रैव तवोचितज्ञता कुत्र गतेति व्यज्यते॥

कश्चिद्गेहिनीसखीं वक्ति—

गेहिन्या ह्रियमाणं निरुध्यमानं नवोढया पुरतः।
मम नौकाद्वितयार्पितगुण इव हृदयं द्विधा भवति॥ २०९॥

गेहिन्येति। गेहिन्या प्रौढ्या ह्रियमाणम्। न तु हृतमिति भावः। नवोढया पुरतो निरुध्यमानम्। न तु निरुद्धम्। मम नौकाद्वितयं विपरीतगामि तत्संबन्धिगुण इव हृदयं द्विःप्रकारं भवति। नौकासमताप्रतिपादनेनोभयत्र रससंबन्धित्वं ध्वन्यते। एवं चोभयत्र समप्रीतिरहमस्मीति व्यज्यते। 'पद इव' इति क्वचित्पाठः॥

एकत्रैव गुणे दृढा परिचितिरुचिता, न तु सर्वत्र यथाकथंचिदिति कश्चिद्वक्ति—

गुण आकर्षणयोग्यो धनुष इवैकोऽपि लक्षलाभाय।
लूतातन्तुभिरिव किं गुणैर्विमर्दासहैर्बहुभिः॥ २१०॥

गुण इति। आकर्षणाय योग्यः। विचारक्षम इत्यर्थः। पक्षे यथाश्रुतम्। एवं च दृढत्वं ध्वन्यते। गुणो धनुष इवैकोऽपि लक्षसंख्याकधनलाभाय। पक्षे वेध्यलाभाय। विमर्दासहैर्विचारासहैः। पक्ष आकर्षणासहैः। लूता कीटविशेषस्तत्तन्तुभिरिव बहुभिर्गुणैः किम्। न किंचित्फलमित्यर्थः॥

नायिकासक्तिं नायके दूती वक्ति—

गायति गीते शंसति वंशे वादयति सा विपञ्चीषु।
पाठयति पञ्जरशुकांस्तव संवादाक्षरं बाला॥ २११॥

गायतीति। विपञ्चीषु, पञ्जरशुकानिति च बहुवचनम्। वादितस्य पुनर्वादनेन पाठितस्य पुनः पाठनेन संवादाक्षरे प्रेमातिशयो द्योत्यते। एवं च त्वत्संवादैकाक्षरमपि तस्याः प्राणप्रियमित्यासक्तिविशेषो व्यज्यते॥

अत्र क्षुद्रस्यापि प्राप्तिः सौम्यतया, न गर्वेण महत इति कश्चिदन्योक्त्या वक्ति—

गणयति न मधुव्ययमयमविरतमापिबतु मधुकरः कुमुदम्।
सौभाग्यमानवान्परमसूयति द्युमणये चन्द्रः॥ २१२॥

गणयतीति। मधुकरः कुमुदमापिबतु। सौभाग्यमानवानयं चन्द्रो मधुव्ययं न गणयति। परं द्युमणये सूर्यायासूयति। एवं च महतः सूर्यस्य न कुमुदोपभोगस्तत्र चन्द्रस्य न कार्पण्यं हेतुर्यतो मधुकरस्योपभोगः। किं तु सूर्यगर्व एव यथा तथात्र न गर्वेण प्राप्तिरिति ध्वन्यते॥

सखी नायिकां वक्ति—

गुणविधृता सखि तिष्ठसि तथैव देहेन किं तु हृदयं ते।
हृतममुना मालायाः समीरणेनेव सौरभ्यम्॥ २१३॥

गुणेति । सखि, गुणैर्लोकवादभीत्यादिभिर्विधृता । पक्षे दोरकैः । देहेन तथैव यथापूर्वमेव तिष्ठसि । किं तु समीरणेन मालायाः सौरभ्यमिवामुना नायकेन ते हृदयं हृतम् । एवं च न तवापराध इति भावः । एवं च नास्मल्लज्जा कार्येति द्योत्यते । एवं च यद्यपि त्वं यथास्थिता दृश्यसे तथापि त्वच्चित्तं मान्मथावस्थादुस्थं वृत्तमित्यावेद्यते । तेन चास्माकं प्रति गोपनमनर्थकमिति । यद्वा बलादेहेन कृतापि धृतिरनर्थकैव, अतो यतस्व तन्मिलनायेति व्यज्यते ॥

कश्चित्सखायं वक्ति—

गुरुसदने नेदीयसि चरणगते मयि च मूकयापि तया ।
नूपुरमपास्य पदयोः किं न प्रियमीरितं प्रियया ॥ २१४ ॥

गुर्विति । नेदीयसि निकटे सति । मयि चरणगते प्रणमति सति । एवं च नायिकायां मानवत्त्वं द्योत्यते । मूकयापि । गुरुभीत्येति भावः । तया चरणयोः । नूपुरमित्येकत्वमविवक्षितम् । अपास्य प्रियया । एवं चैतादृशविधानमुचितमेवेति ध्वन्यते । किं न प्रियमीरितम् । अपि तु सर्वमीरितम् । एवं च शब्दजनकनूपुरत्यागेन रत्यनुमतिर्दत्तेति द्योत्यते । यद्वा निःशब्दपदसंचारेण त्वयात्र रात्रावागन्तव्यमिति ध्वन्यते । अथवा निष्ठुरवचनमूलभूतो मानः परित्यक्तो मयेति व्यज्यते । प्रस्थितैवाहं त्वमग्रे गच्छेति वा ॥

किमिति दरिद्रेऽनुरक्तासीति वादिनीं काचिदुक्तिं—

ग्रन्थिलतया किमिक्षोः किमपभ्रंशेन भवति गीतस्य ।
किमनार्जवेन शशिनः किं दारिद्र्येण दयितस्य ॥ २१५ ॥

ग्रन्थिलतयेति । अनार्जवेन कौटिल्येन । एवं च रसनाश्रवणनयनाद्येकैकसुखप्रदातृतयेक्ष्वादीनां ग्रन्थिलत्वादयो दोषा न गण्यन्ते । किं पुनः सर्वाङ्गीणानन्दप्रदस्य दयितस्य दारिद्र्यैकदोषो न गण्यत इति । तद्गणनाकारिण्योऽतिभ्रान्ता इति ध्वन्यते । यद्वा ग्रन्थ्यादिसत्त्वेऽपीक्ष्वादे रसप्रदत्वं नापैति यथा तथा दारिद्र्येऽपि न सुखप्रदत्वमपैतीति व्यज्यते ॥

कश्चित्सखायं वक्ति—

गेहिन्या चिकुरग्रहसमयससीत्कारमीलितदृशापि ।
बालाकपोलपुलकं विलोक्य निहतोऽस्मि शिरसि पदा ॥ २१६ ॥

गेहिन्येति । केशग्रहस्य । चुम्बनार्थमिति भावः । समये ससीत्कारं मीलितदृशापि गेहिन्या बालायाः कपोलसंबन्धि पुलकम् । चुम्बनजन्यमिति भावः । विलोक्य शिरसि चरणेन निहतोऽस्मि । कथमीदृशावसरेऽप्येतादृशमकारि त्वयेति दोषख्यापनेनेति भावः ॥

नायकान्तरातिशयितरतातिवाहितयामिनीं प्रातस्तदत्तनखक्षतावलोकनकृतक्रोधां नायिकां सखी वक्ति—

गुरुपक्ष्म जागरारुणघूर्णत्तारं कथंचिदपि वलते ।
नयनमिदं स्फुटनखपदनिवेशकृतकोपकुटिलभ्रु ॥ २१७ ॥

गुर्विति । स्फुटनखपदनिवेशनेन । नायकदत्तेनेति भावः । कृतो यः कोपः । लोकज्ञानभिया । तेन कुटिलभ्रुकुटि । गुरुपक्ष्म । सालसत्वादिति भावः । जागरणेन रक्तं तेनैव घूर्णत्तारमिदं तव नेत्रं महता क्लेशेनापि वलते परिवर्तते । नखपदनिवेश इति भावः । एवं चैकनखक्षतविलोकनेन क्रुध्यसि, परमन्यानि नखक्षतानि नावलोकयसि । रात्रिजागरबाहुल्यालसनेत्रतयेति भावः । एवं च तदानीं न कापि भीतिः कृता, इदानीं तत्करणमनर्थकमिति व्यज्यते । यद्वा प्रकटनखक्षतदर्शनेन कोपः क्रियते । अप्रकटानि च बहूनि सन्ति । तद्दर्शनं च ते सालसनेत्रतया न भावीति द्योत्यते । 'निवेशने' इति पाठे स्फुटनखपदस्य निवेशने दाने कोपेन कुटिलभ्रु । स्फुटपदेन दृढत्वमावेद्यते । क्वचित् 'दृढ' इत्येव पाठः । गुरुपक्ष्म । सालसत्वादिति भावः । जागरारुणघूर्णत्तारमिदं नयनम् । 'तव' इति पदानुपादानं नयने नायिकाविधेयत्वं ध्वन्यते । कथंचिद्वलते । एवं च गमनकालीननखक्षतदानेऽपि केवलं भ्रुकुटिकौटिल्यमेव करोषि, परं तु राज्यतिशयितरतनिःसहतया नेत्रव्यापारमपि कर्तुं न शक्नोषि । तत्र का वार्तोत्थाय करग्रहादेरिति भाव इति नायिकासखीवाक्यमिदम् । केचित् 'स्वनायकेन सह क्रीडातिवाहितरजनीं स्फुटतरनखक्षतदर्शनजातलज्जावशादुत्पन्नक्रोधां नायिकां सखी वक्ति' इत्याहुः ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता गकारत्रज्या ।

घकारत्रज्या ।

नायिकासखी नायकं वक्ति—

घटितजघनं निपीडितपीनोरु न्यस्तनिखिलकुचभारम् ।
आलिङ्गन्त्यपि बाला वदत्यसौ मुञ्च मुञ्चेति ॥ २१८ ॥

घटितेति । घटितजघनमित्यादिना रतेच्छावत्त्वमावेद्यते । आलिङ्गनकारिण्यप्यसौ बाला तरुणी मुञ्च मुञ्चेति वक्ति । एवं चैतस्या मुञ्च मुञ्चेति वचनं मिथ्येति विज्ञाय वर्तितव्यं त्वयेति द्योत्यते । 'आलिङ्गति' इति पाठे आलिङ्गति वदत्यपीति योजनायां वचनसमय आलिङ्गनसत्त्वेन विरुद्धकार्यकारितया रतिनिर्भरत्वं ध्वन्यत इत्यर्थः । नायकवचनं वा वयस्यं प्रति ॥

अदृष्टवशादेव लक्ष्मीः स्थिरा भवति, न यत्नेनेति कश्चिद्वक्ति—

घटितपलाशकपाटं निशि निशि सुखिनो हि शेरते पद्माः ।
उज्जागरेण कैरव कति शक्या रक्षितुं लक्ष्मीः ॥ २१९ ॥

घटितेति । घटितं पत्ररूपं कपाटं यत्र । 'पत्रं पलाशं छदनम्' इत्यमरः । निशि निशि । एवं च सर्वदोद्यमशून्यत्वम् । सुखवन्तः पद्माः । 'वा पुंसि पद्मम्' इत्यमरः । स्वपन्ति । पद्मानां सूर्यविकासित्वाद्रात्रौ संकोच इति भावः । हे कैरव, उत्कृष्टजागरेण लक्ष्मीः कियद्रक्षितुं शक्या । चन्द्रविकासित्वात्कैरवाणामिति भावः । एवं च निरुद्यमा-

नामपि लक्ष्मीर्जायते, सोद्यमानामपि नश्यतीति दैवमेव संपद्रक्षणे क्षममिति ध्वन्यते । यद्वा या त्वङ्गनान्यत्र गन्तुकामा सा न केनापि रक्षितुं शक्येति कश्चिद्वक्ति। पलाशवत्कपाटम् । एवं च दूरीकरणार्हत्वं व्यज्यते । पद्मा इव पद्माः । उज्जागरेण । उत्कृष्टरक्षणेनेति यावत् । लक्ष्मीपदेन चञ्चलस्वाभाव्यमभिव्यज्यत इत्यर्थः ॥

कश्चित्प्रातःकालं वर्णयति—

घूर्णन्ति विप्रलब्धाः स्नेहापायात्प्रदीपकलिकाश्च ।
प्रातः प्रस्थितपान्थस्त्रीहृदयं स्फुटति कमलं च ॥ २२० ॥

घूर्णन्तीति । विप्रलब्धा वियोगिन्यः । यद्वा संकेतनिकेतने प्रियतमाप्राप्तिसमाकुलहृदया विप्रलब्धाः । प्रदीपकलिकाश्च । स्नेहस्य प्रीतेस्तैलस्य च नाशाद्घूर्णन्ति । मनोरथादिभिरधुना समायास्यतीति धिया च संपूर्णयामिनीजागरादिति भावः । विनश्वरा भवन्ति च । प्रस्थितो न तु गतो यो पान्थस्तत्कान्ताहृदयं कमलं च प्रातः स्फुटति द्वेधा भवति । दुःखोद्रेकादिति भावः । विकसति च । यद्वा जातोऽयं प्रातःकालः, अत इतोऽपसरणं सम्यगिति सखी नायकं वक्तीत्यर्थः ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता घकारव्रज्या ।

चकारव्रज्या ।

काचित्कांचिद्वक्ति—

चपलस्य पलितलाञ्छितचिकुरं दयितस्य मौलिमवलोक्य ।
खेदोचितेऽपि समये संमदमेवाददे गृहिणी ॥ २२१ ॥

चपलस्येति । चपलस्य । एवं च परानुरागलम्पटत्वं व्यज्यते । दयितस्य । एवं च प्रीतियोग्यत्वं ध्वन्यते । मौलिं जराचिह्नितकेशमवलोक्य खेदार्हेऽपि । स्वस्याप्यसमीचीनत्वादिति भावः । समय आनन्दमेव गृह्णाति । स्वस्याप्यकार्यसंतोषेण नायके सामान्याङ्गनालम्पटत्वेन द्वेषातिशयो व्यज्यते ॥

नायिकां नायको वक्ति—

चण्डि प्रसारितेन स्पृशन्भुजेनापि कोपनां भवतीम् ।
तृप्यामि पङ्किलामिव पिबन्नदीं नलिननालेन ॥ २२२ ॥

चण्डीति । हे चण्डि, प्रसारितेन । एवं च निकटवर्तित्वाभावो व्यज्यते । भुजेनापि । नीरसेनेति भावः । कोपनां भवतीं स्पृशन् । यद्वा अपिरत्रान्वेति । एवं च तृप्त्यजनकत्वं ध्वन्यते । तृप्तिं प्राप्नोमि । पङ्किलां नदीं नलिननालेन पिबन्निव । नलिननालेन पाने स्वच्छजलागमनात्तृप्तिः । एवं च मम दुःखाजनकत्वेन त्वन्मानधारणमनर्थकम्, अतस्त्यज मानमिति द्योत्यते । भुजे नालसमताप्रतिपादनेन कोमलत्वपाण्डुरत्वसूक्ष्मत्वशीतलत्वानि व्यज्यन्ते । तैश्चाज्ञेयस्पर्शत्वविरहक्षीणत्वसंतप्तत्वसुखदत्वानि ॥

खण्डिता नायकं प्रातस्तनसमीरणाभेदेन वक्ति—

चपलभुजंगीभुक्तोज्झित शीतलगन्धवह निशि भ्रान्त ।
अपराशां पूरयितुं प्रत्यूषसदागते गच्छ ॥ २२३ ॥

चपलेति । प्रातःकालीन वायो । अथवा प्रातःकाले सदा निरन्तरमागतिरागमनं यस्य एतादृश । एवं च कियन्मया सोढव्यमिति व्यज्यते । चपला या भुजंग्यः सर्पिण्यस्ताभिर्भुक्त्वोज्झित । एवं च सविषत्वेन स्पर्शानर्हत्वं व्यज्यते । अथ च चपलाः । एवं च सर्वजनवेद्यचाञ्चल्यानां तव तदज्ञानेन मूर्खस्त्वमसीति व्यज्यते । भुजंग्यो वेश्यास्ताभिर्भुक्तोज्झित । एवं चोच्छिष्टरूपत्वेनास्पृश्यत्वं ध्वन्यते । शीतलसमीरण । अथ च शीतलं गन्धम् । भोगार्थं परिगृहीतमिति भावः । वहतीति । निशि रात्रौ भ्रमणशील । अथ च रात्रिभ्रान्तिमन् । एवं च रात्रौ तव पैशाच्यमेव जायत इति व्यज्यते । अपरदिशम् । अथ चान्यस्या आशाम् । इच्छामित्यर्थः । पूरयितुं पूर्णा कर्तुम् । अथ च सफलां कर्तुम् । गच्छ । एवं चैतादृशस्य तव न ममाशेति व्यज्यते ॥

काचित्कस्याश्चिदवस्थां वक्ति—

चिरपथिकद्राघिमामिलदलकलताशैवलावलिग्रथिता ।
करतोयेव मृगाक्ष्या दृष्टिरिदानीं सदानीरा ॥ २२४ ॥

चिरपथिकेति । चिरकालीनो यः पथिकस्तस्य दैर्घ्येण । अतिविलम्बेनेति यावत् । मिलन्त्यः । संस्काराभावादिति भावः । याः केशरूपलतास्तद्रूपा या शैवलपङ्क्तिस्तया । पक्षेऽलकलतावदित्यर्थः । ग्रथिता । युक्तेति यावत् । अत्र लतापदं परस्परसंलग्नतामावेदयति । करतोयेव नदीविशेष इव मृगाक्ष्या दृष्टिरिदानीम् । एवं च पूर्वसमयापेक्षया दुःखवत्त्वातिशयो ध्वन्यते । सदानीरा निरन्तराश्रुपूर्णा । पक्षे सदानीरेति करतोयानाम । 'करतोया सदानीरा' इत्यमरः । यद्वा नायिकासखी नायकं वक्ति । चिरपथिकेति संबुद्धिः । द्राघिम्णा दैर्घ्येण मिलन्त्यः संबन्धवत्यः । अलकलता इत्यादि प्राग्वत् ॥

नायको नायिकां वक्ति—

चण्डि दरचपलचेलव्यक्तोरुविलोकनैकरसिकेन ।
धूलिभयादपि न मया चरणहतौ कुञ्चितं चक्षुः ॥ २२५ ॥

चण्डीति । हे चण्डि । एवं च स्वस्यानपराधित्वं ध्वन्यते । ईषच्चञ्चलचेलेन प्रकटोर्वीविलोकनं तदेकरसिकेन मया त्वत्कृतचरणहनने रेणुत्रासादपि । एवं च न ताडनत्रास इति भावः । चक्षुर्न संकोचितम् । एवं चाहं त्वय्यत्यन्तासक्तः, अतो मानं परित्यज्य सुखयितव्योऽहमिति ध्वन्यते ॥

कश्चित्कंचिद्वक्ति—

चलकुण्डलचलदलकस्खलदुरसिजवसनसज्जदूरुयुगम् ।
जघनभरक्लमकूणितनयनमिदं हरति गतमस्याः ॥ २२६ ॥

चलेति । चलकुण्डलम्, चलदलकम्, किंचिदूरीभूतस्तनवसनम्, संघट्टवदूरुयुग्मम्, जघनभारश्रमसंकुचितनेत्रमस्या इदं गतं गमनं हरति । मन्मन इति भावः । जातिवर्णनमेतत् । 'जातिरप्राणिनाम्' इत्यनेन चलकुण्डलेत्यादावेकवद्भावः । अस्या इदम् । सर्वमित्यर्थः । गतं गमनम् । ममेति भावः । हरति । इत्यपि योजना ॥

भाग्यवत्संनिहितानुपकारिजनसेवाकारिणं कश्चिदन्योक्त्या वक्ति—

चरणैः परागसैकतमफलमिदं लिखसि मधुप केतक्याः ।
इह वसति कान्तिसारे नान्तःसलिलापि मधुसिन्धुः ॥ २२७ ॥

चरणैरिति । हे मधुप । एवं च विवेकविधुरत्वं व्यज्यते । पदैः । बहुवचनेनोद्योगशालित्वं ध्वन्यते । केतक्या इदं परागरूपसैकतम् । सैकतपदेन सलिलाशायोग्यत्वं व्यज्यते । व्यर्थं लिखसि । व्यर्थत्वमेवाह—कान्तिरेव सारो यत्र । इह परागसैकते नान्तःसलिलापि । अपिना बहिःसलिलव्यवच्छेदः । मकरन्दनदी तिष्ठति । एवं च स्वरूपमात्रशालिष्वेतेषु न दयालेशः, अतोऽत्र नाशा त्वया विधेयेति ध्वन्यते । यद्वा कस्याश्चिन्नायिकायाः संगमाशया तत्संनिहितप्रदेशे यातायातकारिणं काचिदन्योक्त्या वक्ति । एवं चैतस्याः स्वान्तरेऽपि न मद इति व्यज्यते । तेन चेयं सतीति । तेनात्र तवानर्थकः श्रम इति ॥

नायिकाङ्गीननखक्षतकिणदर्शनसंजातसंशयं नायकं नायिकासखी वक्ति—

चिरकालपथिक शङ्कातरङ्गिताक्षः किमीक्षसे मुग्ध ।
त्वन्निस्त्रिंशाश्लेषव्रणकिणराजीयमेतस्याः ॥ २२८ ॥

चिरेति । हे चिरकालीनपथिक । एवं च विरहातिशयादुन्मादान्निस्त्रिंशालिङ्गनकारित्वौचित्यं ध्वन्यते । मुग्ध सुन्दर । अथ च मूढ । संशयेन । व्रणाः किंजन्या एवंरूपेण । तरङ्गितं कृतं दूरव्यापारवत्कृतमक्षि येन सः । किमीक्षसे । एतस्यास्त्वदीयो यन्निस्त्रिंशद्भुल्यधिकः खड्गस्तदालिङ्गनव्रणकिणपङ्क्तिरियम् । एवं च क्षतादिवेदनामविचार्याप्यनया त्वदीयत्वेन प्रीतिपात्रत्वत्खड्गालिङ्गनेन समतिवाहितोऽतितरां समयः । अतो नैतस्यामन्यथा संभावनीयं बहुतरदिवसपरदेशावस्थितिरूपापराधशालिना त्वयेति ध्वन्यते । एवं चैतस्या यथा त्वयि प्रेमातिशयस्तथा न कस्याश्चित्कस्मिंश्चिदिति व्यज्यते ॥

स्वाविवेकाच्चाञ्चल्यदोषशालिनीं निजनायिकां ताडयन्तं कंचन तत्प्रतिवेशी तदङ्गनालम्पटतया तं प्रति कलहं कर्तुमुद्यतोऽपि निरुद्ध इति काचिदन्योक्त्या वक्ति—

चपलां यथा मदान्धश्छायामयमात्मनः करी हन्ति ।
आस्फालयति करं प्रतिगजस्तथायं पुरो रुद्धः ॥ २२९ ॥

चपलामिति । मदान्धः । एवं चानुचितकारित्वं व्यज्यते । अयं करी । आत्मनश्चपलां

छायां यथा हन्ति, तथा रुद्धः प्रतिगजः करमास्फालयति। एवं च जनलज्जयैव न किंचिद्वक्तीति व्यज्यते॥

कश्चित्सखायं वक्ति—

चुम्बनलोलुपमदधरहृतकाश्मीरं स्मरन्न तृप्यामि।
हृदयद्विरदालानस्तम्भं तस्यास्तदूरुयुगम्॥ २३०॥

चुम्बनेति। चुम्बनसतृष्णस्य ममाधरेण हृतं केसरं यस्याः। कामशास्त्रे तत्रापि चुम्बनविधानात्। चुम्बनलोलुपो यो मदधारीति गजपक्षेऽपि योज्यम्। हृदयरूपगजबन्धनस्तम्भम्। एवं च चित्तं ततोऽन्यत्र न गच्छतीति भावः। तस्यास्तदूरुयुगं स्मरन्न तृप्यामि॥

काचित्कांचिद्वक्ति—

चिकुरविसारणतिर्यङ्नतकण्ठी विमुखवृत्तिरपि बाला।
त्वामियमङ्गुलिकलितकचावकाशा विलोकयति॥ २३१॥

चिकुरेति। चिकुराणां विसारणं परिष्करणं तेन तिर्यङ्नतः कण्ठो यस्याः। विमुखवृत्तिरपीयं बालाङ्गुलीभिः कृतः केशावकाशो यया त्वां विलोकयति। एवं च त्वयापीयं विलोकनादिनानुग्राह्येति द्योत्यते॥

सखी नायिकां वक्ति—

चुम्बनहृताञ्जनार्धं स्फुटजागररागमीक्षणं क्षिपसि।
किमुषसि वियोगकातरमसमेषुरिवार्धनाराचम्॥ २३२॥

चुम्बनेति। चुम्बनेन हृतमञ्जनार्धं यस्याः। कामशास्त्रे नेत्रप्रान्तचुम्बनविधानादिति भावः। प्रकटो जागरेण रागो यस्य तत्। वियोगाय। भाविन इति भावः। भीतमीक्षणं प्रातः किमिति क्षिपसि। एवं च भीरुतातिशयो व्यज्यते। मदनोऽर्धनाराचमिव। एवं च निःसारणानर्हत्वेन नायके गमनसामर्थ्याभावो द्योत्यते। एवं च नायके नायिकासक्तिविशेषो ध्वन्यते॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता चकारव्रज्या।

छकारव्रज्या।

सखी कुपितनायिकां वक्ति—

छायाग्राही चन्द्रः कूटत्वं सततमम्बुज व्रजति।
हित्वोभयं सभायां स्तौति तवैवाननं लोकः॥ २३३॥

छायाग्राहीति। चन्द्रस्य सकलङ्कतया कमलस्य नित्यसंकोचितयोभयपरित्यागेन

नित्यनिरतिशयोल्लासवत्कलङ्कहीनतया लोके त्वदाननस्तुतिरिति भावः। एवं च निरुपमानं त्वदाननमिति व्यज्यते । तेन च कोपादिमालिन्यं न विधेयमिति। अत्र कूटत्वमवसादः। संकोच इति यावत् । अथवा प्रमोदाभाव एव कूटत्वम् । 'कूट अप्रमोदावसादनयोः' इति चुरादिः । 'कूटं कुप्रदाप्रमुदोः' इति कल्पद्रुमः । यद्वा कूटत्वं परितापभावम् । संकोचमिति यावत् । 'कूट परितापे' ॥

नायिका सखीं वक्ति—

छायामात्रं पश्यन्नधोमुखोऽप्युद्गतेन धैर्येण ।
तुदति मम हृदयमिषुणा राधाचक्रं किरीटीव ॥ २३४ ॥

छायामात्रमिति । छायामात्रं पश्यन् । एवं च लोकभीतिरावेद्यते । अधोमुखोऽपि । एवं च तरलत्वाभावो व्यज्यते । उद्गतेन धैर्येण मम हृदयं तुदति । अर्जुनो बाणेन राधाचक्रमिव । पाञ्चालीस्वयंवरेऽर्जुनेनाधस्तनध्वजाग्रस्थितचपलमीनच्छायामात्रमालोकयता मीननयनं बाणेन हृतमिति पुराणप्रसिद्धिः । एवं च गुरुसमक्षं छायामात्रमालोकयन्मल्लज्जारक्षणमकरोदित्यासक्तिविशेषो ध्वन्यते । अथवा यद्यप्ययं न साक्षादवलोकयति तथापि मन्मनोपहृतमनेनेति व्यज्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्याख्यार्थदीपनया समेता छकारव्रज्या ।

जकारव्रज्या ।

प्रस्थानावसरे नायको नायिकां वक्ति—

जलबिन्दवः कतिपये नयनाद्गमनोद्यमे तव स्खलिताः ।
कान्ते मम गन्तव्या भूरेतैरेव पिच्छिलिता ॥ २३५ ॥

जलेति । गमनोद्यमे । ममेति भावः । तव नयनात्कियत्संख्याका जलबिन्दवः स्खलिताः, न तु निर्गताः । मङ्गलाभावशङ्केयेति भावः । एवं च निबिडपक्ष्मशालित्वं नेत्रे द्योत्यते । कान्ते मनोज्ञे ममैतैरेवाश्रुबिन्दुभिरेव पिच्छिला । एवं च चरणावस्थित्यनर्हत्वं द्योत्यते । भूर्गन्तव्या । गन्तव्येत्यनेनावश्यकत्वं ध्वन्यते । एवं च त्वदपेक्षया ममातिशयितदुःखमित्यावेद्यते ॥

नायको वयस्यं वक्ति—

जृम्भोत्तम्भितदोर्युगयन्त्रिततटङ्कपीडितकपोलम् ।
तस्याः स्मरामि जलकणलुलिताञ्जनमलसदृष्टि मुखम् ॥ २३६ ॥

जृम्भेति । जृम्भयोर्ध्वीकृतहस्तद्वयसंघट्टिततटङ्कपीडितकपोलम् । जलकणैः । नेत्रसंबन्धिभिरिति भावः । लुलितं विस्तृतमञ्जनं यस्य । अलसा दृष्टिर्यस्य तस्या मुखं स्मरामि । जातिवर्णनमेतत् ॥

काचित्कांचिद्वक्ति—

जागरयित्वा पुरुषं परं वने सर्वतो मुख हरसि ।
अयि शरदनुरूपं तव शीलमिदं जातिशालिन्याः ॥ २३७ ॥

जागरेति । वने कानने । पक्षे जले । शयितमिति भावः । परमन्यम् । पक्ष उत्कृष्टम् । पुरुषं जागरयित्वा सर्वतो मुखं वदनं हरसि । कमपि लज्जया न संमुखमवलोकयसीत्यर्थः । पक्षे जलं हरसि । वर्षासमयस्य समाप्तत्वादिति भावः । अयि शरत्तुल्यं शीलं जातिशालिन्या इति साकूतोक्तिः । पक्षे मालतीशालिन्याः । तवेदं शीलम् । एवं च किमर्थमत्र मिथ्या लज्जां नाटयसीति व्यज्यते । यद्वान्योक्त्या काचिद्वक्ति । अयि शरज्जातिशालिन्या इदं शीलं तवानुरूपं नान्यस्या इति भावः । तदेवाह—जागरयित्वेत्यादि ॥

कश्चित्सखायं वक्ति—

जीवामि लङ्घितावधिदिनेति लज्जावशेन गेहिन्या ।
मयि निह्नुतोऽपि बाष्पैरसंवरैर्व्यञ्जितो मानः ॥ २३८ ॥

जीवामीति । लङ्घितमवधिदिनं यया जीवामीति लज्जावशेन । वशपदेन स्वातन्त्र्याभावो व्यज्यते । गेहिन्या गोपितोऽपि मानः संवर्तुमशक्यैर्बाष्पैर्ज्ञापितः । एवं च मानसंगोपनमसंभवीति व्यज्यते ॥

काचित्कंचिदन्योक्त्या वक्ति—

जाल्मो गुरुः सुधृष्टो वामेतरचरणभेद उपदेशः ।
ख्यातिर्गुणधवल इति भ्रमसि सुखं वृषभ रथ्यासु ॥ २३९ ॥

जाल्म इति । सुधृष्टो जाल्मः । 'सुघृष्टः' इति पाठ उपदेशविशेषणमेतत् । असमीक्ष्यकारी गुरुरुपदेष्टा । एवं च तवोपदेशकोऽपि न समीचीन इति व्यज्यते । वामं सव्यम् । 'वामं शरीरं सव्यं स्यात्' इत्यमरः । इतरो दक्षिणस्तयोर्भेदः, अयं वामोऽयं दक्षिण इति स एवोपदेशो ज्ञानम् । नान्यदिति भावः । यद्वा दक्षिणेन ताडनं तदेव तवोपदेशकमित्यर्थः । वृषभ रथ्यासु सुखं भ्रमसि । एवं च यथा शिक्षितवृषभो रथ्यासु भ्रमति तथा त्वमिति व्यज्यते । तेन च नास्मद्गृहागमनयोग्यस्त्वमसीति द्योत्यते ॥

वैद्यासक्ता काचिद्वक्ति—

ज्वर वीतौषधबाधस्तिष्ठ सुखं दत्तमङ्गमखिलं ते ।
असुलभलोकाकर्षणपाषाण सखे न मोक्ष्यसि माम् ॥ २४० ॥

ज्वरेति । हे ज्वर, वीतापगतौषधिबाधा यस्यैतादृशस्त्वं सुखं तिष्ठ । समग्रमङ्गं तव दत्तम् । सर्वाङ्गमभिव्याप्य तिष्ठेति भावः । दुर्लभो यो वैद्यरूपो लोकस्तस्याकर्षणपाषाण । 'चुम्बकः' इति लोके प्रसिद्धिः । एवं च नायके स्वत आगमनशून्यत्वमावेद्यते । सखे, मां न मोक्ष्यसि । मा मुञ्चेत्यर्थः । एवं च त्वयि विद्यमाने तदागमनं नान्यथेति द्योत्यते ॥

एतत्संगत्या स्वनिर्वाहो मया विधेय इति बुद्ध्या कृतनायकसङ्गां नायिकामप्रतिष्ठादिभीत्या परित्यक्तुमुद्यतं नायकं सखा समुपदिशति—

जीवनहेतोर्मिलिता मुञ्चति करकर्षणेन न खलु त्वाम् ।
नौरिव निम्नं सुन्दर मुग्धा तद्विरसतां मा गाः ॥ २४१ ॥

जीवनहेतोरिति । जीविकार्थं मिलिता करकर्षणेन परित्यागेन खलु त्वां न मुञ्चति । निम्नं नौरिव तद्विरसतां मा गाः । एवं च त्वयैतत्त्यागे क्रियमाणेऽपि नेयं त्वां त्यक्ष्यति परं त्वेतत्करणे लौकिकमात्रं भावीति व्यज्यते । यद्वा नायिकासखी नायकं वक्ति—जीवनेति । जीवनाद्धेतोर्मिलिता जीवनार्थमागता । पक्षे जलहेतुना समागता । मुग्धा सुन्दरी । एवं च स्पृहणीयत्वं व्यज्यते । करस्य हस्तस्याकर्षणेन । पक्षे करेण कर्षणं तेन । त्वां न खलु मुञ्चति । नौरिव निम्नम् । पक्षे नीचम् । अत एव मूढार्थकं मुग्धेति पदमर्थवत् । हे सुन्दर तद्वैरस्यम् । पक्षे जलाभाववत्त्वं मा गाः । एवं च नीचमपि त्वामियं विरहभीता न त्यजतीति ध्वन्यते ॥

काचित्कांचिद्वक्ति—

जघनेन चापलं तव वितन्वतेयं तनूकृताऽपि तनुः ।
शाणेनेव क्षीणा स्मरासिपुत्री मनो विशति ॥ २४२ ॥

जघनेनेति । चाञ्चल्यं विस्तारयता जघनेन । अर्थादन्याङ्गनानाम् । क्षीणीकृतापि तव तनुः । शाणेन क्षीणा । एवं च तीक्ष्णत्वं ध्वन्यते । स्मरस्य च्छुरिकेव मनो विशति । एवं च विपरीतसुरतातिशयक्षीणमपि तव शरीरं मन्मनोमोहजनकमिति व्यज्यते । एवं चैतादृशं दृष्ट्वापि न मया मानः क्रियत इति स्वस्मिन्साधुत्वमावेदयति ॥

कश्चित्कांचिद्वक्ति—

ज्योत्स्नाभिसारसमुचितवेषे व्याकोशमल्लिकोत्तंसे ।
विशसि मनो निशितेव स्मरस्य कुमुदत्सरुच्छुरिका ॥ २४३ ॥

ज्योत्स्नेति । ज्योत्स्नाभिसारे समुचितो वेषो यस्यास्तत्संबुद्धिः । अत एव विकसितमल्लिकोत्तंसे । निशिता स्मरस्य कुमुदरूपा त्सरुर्मुष्टिर्यस्याः । 'त्सरुः खड्गादिमुष्टौ स्यात्' इत्यमरः । एतादृशी छुरिकेव मनो विशसि । एवं चैतादृशवेषशालिनी त्वं मन्मनोमोहजनिकेति द्योत्यते ॥

कश्चित्कांचिदुपदिशति—

जड सुखयसि परतरुणीं गृहिणीं कारयसि केवलं सेवाम् ।
आलिङ्गति दिशमिन्दुः स्वां तु शिलां वारि वाहयति ॥ २४४ ॥

जडेति । जड । एवं च कार्याकार्यविवेकवैधुर्यं ध्वन्यते । पक्षे जलमयत्वाज्जडत्वम् । परयुवतिम् । तरुणीपदेन साहजिकरूपशालित्वाभावो व्यज्यते । सुखयसि । स्वाङ्गनां

केवलं सेवां कारयसि। अत्र दृष्टान्तमाह—चन्द्रो दिशम्। अन्यस्वामिकामिति भावः। आलिङ्गति। स्वशिलां जलं वाहयति। चन्द्रोदये चन्द्रोपलानां स्रवणं भवतीति लोकप्रसिद्धिः। एवं चैतादृशकार्यकरणेन कलङ्कादिभूषणमेव भावीति द्योत्यते। तेन नैतादृक्कर्तव्यमिति। यद्वा सिद्धानुवादोत्तरमुत्तरार्धम्। अत्र 'वह प्रापणे' इत्यस्य गत्यर्थकत्वेन प्राप्तद्विकर्मकत्वस्य 'नीवह्योर्न' इति निषेधाच्छिलयेत्यपेक्षितम्॥

कश्चित्कांचित्संकेतं वक्ति—

ज्योत्स्नागर्भितसैकतमध्यगतः स्फुरति यामुनः पूरः।
दुग्धनिधौ नागाधिपतल्पतले सुप्त इव कृष्णः॥ २४५॥

ज्योत्स्नेति। चन्द्रिकायां गर्भितम्। चन्द्रिकागर्भमध्ये स्थितमिति भावः। क्वचित् 'गर्वित' इति पाठः। यत्सैकतं तन्मध्यगतः। एवं च शरत्कालीनत्वं व्यज्यते। तेन च निश्चलत्वम्। यमुनासंबन्धी पूरः स्फुरति। अत्र दृष्टान्तमाह—दुग्धसमुद्रे शेषरूपतल्पे। तल्पपदेन समत्वमावेद्यते। सुप्तः कृष्ण इव। सर्वतो विद्यमानतयोज्ज्वलतया चन्द्रिकायां दुग्धोदधेः, लम्बतया श्वैत्याच्च सैकते शेषस्य, श्यामतया निश्चलतया च पूरे सुप्तकृष्णस्योपमानता। एवं च यमुनासैकततुल्यं नान्यस्थलमिति व्यज्यते॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता जकारव्रज्या।

झकारव्रज्या।

नायको नायिकां वक्ति—

झंकृतकङ्कणपाणिक्षेपैः स्तम्भावलम्बनैर्मौनैः।
शोभयसि शुष्करुदितैरपि सुन्दरि मन्दिरद्वारम्॥ २४६॥

झंकृतेति। एवं चैतादृश्यवस्थितिरपि नवोढाया नायकसुखदेति व्यज्यते॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता झकारव्रज्या।

ढकारव्रज्या।

नायकीयोन्मादद्दौःशील्यमाकलय्य स्वयमपि दौःशील्यं विधातुकामां नायकां सखी वक्ति—

ढक्कामाहत्य मदं वितन्वते करिण इव चिरं पुरुषाः।
स्त्रीणां करिणीनामिव मदः पुनः स्वकुलनाशाय॥ २४७॥

ढक्कामिति। ढक्कां यशःपटहम्। 'स्याद्यशःपटहो ढक्का' इत्यमरः। आहत्य वादयित्वा करिण इव पुरुषा बहुकालं मदं वितन्वते। करिणीनामिव स्त्रीणां मदः स्वकुलनाशाय। एवं च पुरुषाणां मदो यशसे, स्त्रीणां तु कुलकलङ्कायेति व्यज्यते। तेन च त्वयैतादृङ्मानसि न विधेयमिति॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता ढकारव्रज्या।

तत्कारव्रज्या ।

नायिकासखी नायकं वक्ति—

तां तापयन्ति मन्मथबाणास्त्वां प्रीणयन्ति बत सुभग ।
तपनकरास्तपनशिलां ज्वलयन्ति विधुं मधुरयन्ति ॥ २४८ ॥

तामिति । मदनबाणास्तां नायिकां तापयन्ति । त एव बाणा हे सुभग । दुःखदबाणानामपि सुखदत्वादिति भावः । त्वां तोषयन्ति । एवं च कथमन्यथैतादृशविलम्बकरणमिति व्यज्यते । नन्विदमसंभवीत्यत्र दृष्टान्तमाह—तपनकिरणास्तपनशिलां ज्वलयन्ति । तपनशिलासाम्येन स्वीयात्वप्रतिपादनेन तत्तुल्यत्वं नायिकायामावेद्यते । विधुं चन्द्रम् । एवं च चन्द्रसाम्येन संतापापनोदकत्वेन नायिकास्पृहणीयत्वं नायके द्योत्यते । यद्वा मदनतुल्यरूपशालित्वेन मदनविरोधित्वं नायके द्योत्यते । तेन च पीडाकरणौचित्येऽपि तदकरणेनाज्ञत्वं मदने व्यज्यते । मधुरयन्ति । पुष्टिदत्वादिति भावः । यद्वा तपनखिन्नानामेव चन्द्रमसः सुखदत्वादिति भावः ॥

कश्चित्कांचिद्वक्ति—

तव सुतनु सानुमत्या बहुधातुजनितनितम्बरागायाः ।
गिरिवरभुव इव लाभेनाप्नोमि द्व्यङ्गुलेन दिवम् ॥ २४९ ॥

तवेति । हे सुतनु । एवं च स्पृहणीयत्वं ध्वन्यते । यद्वदसि तद्विधेयं मयेत्यनुमतिसहितायाः । पक्षे शिखरवत्याः । तु इति निश्चयेन बहुप्रकारमुत्पादितो नितम्बे रागः प्रीतिर्यया तस्याः । पक्षे बहुप्रकारगैरिकादिधातुभिर्जनितो नितम्बे कटके । 'कटकोऽस्त्री नितम्बोऽद्रेः' इत्यमरः । रागो लौहित्यादिर्यस्याः । हिमालयवसुधाया इव तव लाभेन द्व्यङ्गुलेन स्वर्गं प्राप्नोमि । लाभे इति च्छेदे नञि काकुः । 'आप्नोति' इति पाठे मल्लक्षण इति शेषः । एवं च तव प्राप्तिहर्षोत्कर्षेणाहं स्वर्गमपि द्व्यङ्गुलान्तरितं मन्य इति भावः । एवं च त्वत्प्राप्त्या स्वर्गसुखमपि ममात्यन्तनिकटमिति व्यज्यते ॥

काचिन्नायिका सखीं वक्ति—

त्यक्तो मुञ्चति जीवनमुज्झति नानुग्रहेऽपि लोलत्वम् ।
किं प्रावृषेव पद्माकरस्य करणीयमस्य मया ॥ २५० ॥

त्यक्त इति । त्यक्तो जीवनं प्राणनम् । पक्षे जलम् । त्यजति । अनुग्रहेऽपि लोलत्वं चाञ्चल्यम् । पक्ष उच्छलद्वीचिकत्वम् । नोज्झति । प्रावृषा पद्माकरस्येव तडागस्येव मयास्य किं करणीयम् । एवं चोभयतोऽपि काठिन्यं ममेति ध्वन्यते ॥

नायिकात्यन्तं त्वद्विरहक्षीणेति सखी नायकं वक्ति—

त्वद्विरहापदि पाण्डुस्तन्वङ्गी छाययैव केवलया ।
हंसीव ज्योत्स्नायां सा सुभग प्रत्यभिज्ञेया ॥ २५१ ॥

त्वद्विरहेति। सा तन्वङ्गी त्वद्विरहापदि पाण्डुः केवलया छाययैव कान्त्यैव। पक्षे यथाश्रुतम्। ज्योत्स्नायां हंसीव। सुभग। यत एतादृश्यपि नायिका त्वद्विरहेण खिद्यत इति भावः। प्रत्यभिज्ञेया ज्ञातुं शक्या। एवं चातिक्षीणत्वमावेद्यते। अत्र केवलपदैवकारान्यतरदनर्थकमाभाति॥

कथमितो गतेयमिति वादिनं नायकं नायिकासखी वक्ति—

त्वयि विनिवेशितचित्ता सुभग गता केवलेन कायेन।
घनजालरुद्धमीना नदीव सा नीरमात्रेण॥ २९२॥

त्वयीति। हे सुभग। नायिकासक्तिमत्त्वादिति भावः। त्वयि विनिवेशितम्। बुद्धिपुरःसरं स्थापितमिति भावः। चित्तं यया। केवलशरीरेण गता। अत्र दृष्टान्तमाह—निबिडं यज्जालं तद्रुद्धमत्स्या जलमात्रेण गता नदीव। चेतसश्चाञ्चल्यान्मत्स्यसाम्यम्। एवं च पुनरधुनैवायास्यतीति व्यज्यते॥

त्वय्यासक्तिवशादत्यन्तदुःखभागिनी कामिनी संजातेति सखी नायकं वक्ति—

त्वयि संसक्तं तस्याः कठोरतर हृदयमसमशरतरलम्।
मारुतचलमञ्चलमिव कण्टकसंपर्कतः स्फुटितम्॥ २९३॥

त्वयीति। हे कठोरतर। कथमन्यथैतादृशमौदासीन्यं कृतवानिति भावः। त्वयि संसक्तम्। आसक्तिमदिति भावः। 'सं'पदेन निःसारणानर्हत्वं व्यज्यते। मदनचपलं तस्या हृदयं वायुचञ्चलं कण्टकसंलग्नमञ्चलमिव विदीर्णम्। मारुतचलकण्टकसंपर्कार्थान्वययोग्यतावशादञ्चलपदेन चेलाञ्चल एव प्रतीयते। अत्र कण्टकसाम्येन नायिकाचित्तवेधक्षमत्वं नायके द्योत्यते। अञ्चलसाम्येन नायिकाचित्ते सूक्ष्मत्वं ध्वन्यते। मारुतसाम्येन सर्वगततया निवारणानर्हत्वं ध्वन्यते॥

यद्यपि त्वया भूयसी लज्जा क्रियते तथापि बहवस्त्वय्यासक्ता इति सखी नायिकामन्योक्त्या वक्ति—

त्वमसूर्यंपश्या सखि पदमपि न विनापवारणं भ्रमसि।
छाये किमिह विधेयं मुञ्चन्ति न मूर्तिमन्तस्त्वाम्॥ २९४॥

त्वमिति। हे छायारूपे सखि, त्वं सूर्यदर्शनं न करोषि। छायाया अधोमुखत्वान्न सूर्यदर्शनम्। अपवारणमन्तर्धि विना पदमपि न भ्रमसि छायाप्यन्तर्धिं विना न भवति। मूर्तिमन्तः। सर्वेऽपीत्यर्थः। पक्ष इयत्तावच्छिन्नपरिमाणशालिनः। त्वां न मुञ्चन्ति। इह किं विधेयम्। एवं चात्र न ममापि प्रतीकारस्फुरणमिति भावः। एवं चैतादृशलज्जाकरणमनर्थकमिति द्योत्यते॥

नायिकाविरहदुःखातिशयं सखी नायकं वक्ति—

तव विरहे विस्तारितरजनौ जनितेन्दुचन्दनद्वेषे।
बिसिनीव माघमासे विना हुताशेन सा दग्धा॥ २९५॥

तवेति। विस्तारिता रात्रिर्येन तस्मिन्। निद्राविरहादिति भावः। पक्षे रात्रिमानस्याधिक्यादिति भावः। जनितश्चन्द्रचन्दनद्वेषो येन तस्मिन्। उद्दीपकत्वादिति भावः। पक्षे शीतलत्वादिति भावः। तव विरहे माघमासे बिसिनीव सा हुताशेनाग्निं विना दग्धा। हिमेन बिसिनीविनाशनमिति लोकप्रसिद्धिः। एवं चैतादृशैतत्कालीननायिकावस्थास्ति, अतोऽवश्यं भवतानुग्राह्या सेति व्यज्यते॥

सखी नायिकां वक्ति—

तरुणि त्वच्चरणाहतिकुसुमितकङ्केल्लिकोरकप्रकरम्।
कुटिलचरिता सपत्नी न पिबति बत शोकविकलापि॥ २९६॥

तरुणीति। हे तरुणि। एवं च नायकासक्तियोग्यत्वं ध्वन्यते। त्वच्चरणहननजातकुसुमाशोककलिकासमूहम्। 'कलिका कोरकः पुमान्' इत्यमरः। कुटिलाचरणा सपत्नी शोकविकलापि न पिबति। अशोककलिकारसपानेन शोकहानिर्भवतीति लौकिकम्। एवं च शोककालेऽप्येतादृशद्वेषवत्त्वेन समीचीनकाले किं किं तया न विधेयम्, अतस्त्वया सर्वप्रकारेण मानाद्यपहाय नायकोऽनुरञ्जनीय इति व्यज्यते॥

कश्चिन्नायिकां स्तौति—

तल्पे प्रभुरिव गुरुरिव मनसिजतन्त्रे श्रमे भुजिष्येव।
गेहे श्रीरिव गुरुजनपुरतो मूर्तेव सा व्रीडा॥ २९७॥

तल्प इति। प्रभुरिव। प्रौढिमत्त्वादिति भावः। तन्त्रं शास्त्रम्। गुरुरिव। मन्मथकलाकलापोपदेशकत्वादिति भावः। भुजिष्या दासी। एवं चैतादृशी नायिका नान्येति ध्वन्यते। तेन च तद्वत्तया स्वाधिक्यम्॥

नायकः पुष्पितां नायिकां वक्ति—

त्वमलभ्या मम तावन्मोक्तुमशक्तस्य संमुखं व्रजतः।
छायेवापसरन्ती भित्त्या न निवार्यसे यावत्॥ २९८॥

त्वमिति। संमुखं व्रजतः। चुम्बनार्थमिति भावः। मोक्तुमशक्तस्य। आसक्तिविशेषादिति भावः। ममापसरन्ती। स्पर्शानर्हत्वादिति भावः। भित्त्या कुड्यादिना यावन्न निवार्यसेऽपसरणप्रतिबन्धवती न क्रियसे तावत्त्वं छायेवालभ्या। एवं च भित्तिप्रतिबद्धापसरणां त्वां विना चुम्बनदानं न विमोचयामीति व्यज्यते॥

वसन्ते मदनवेदनासह्येति कश्चिदुक्ति—

तपसा क्लेशित एष प्रौढबलो न खलु फाल्गुनेऽप्यासीत्।
मधुना प्रमत्तमधुना को मदनं मिहिरमिव सहते॥ २९९॥

तपसेति। तपसा तपश्चर्यया। पक्षे माघमासेन। क्लेशिते। कार्श्यं गमित इत्यर्थः। पक्षे क्लेशिते। निस्तेजस्कत्वादिति भावः। फाल्गुनेऽर्जुने। पक्षे मासि। एष मदनो मिहिरश्च। खलु निश्चयेन प्रौढबलोऽपि। अपिना प्रौढबलफलजनकत्वाभावो द्योत्यते।

नासीत् । तपस्याविभेदायेन्द्रप्रहितोर्वश्याद्यप्सरोऽवगणनादिति भावः । पक्ष उत्तरायणारम्भात्प्रौढतेजसोऽभावादिति भावः । अधुना मधुना वसन्तेन । पक्षे चैत्रेण । मधुपदमुन्मादजनकतां व्यञ्जयति । उत्कृष्टोन्मादशालिनं मदनं सूर्यमिव कः सहते । न कोऽपीत्यर्थः । एवं च वसन्तकालीनमदनवेदनात्यन्तमसह्येति ध्वन्यते ॥

सखी नायिकाविरहं नायकं प्रति वक्ति—

त्वद्गमनदिवसगणनावलक्षरेखाभिरङ्किता सुभग ।
गण्डस्थलीव तस्याः पाण्डुरिता भवनभित्तिरपि ॥ २६० ॥

त्वद्गमनेति । हे सुभग । एतादृशनायिकाप्रेमसत्त्वादिति भावः । त्वद्गमनदिवसानां गणना तया वलक्षा अर्जुनाः । 'वलक्षो धवलोऽर्जुनः' इत्यमरः । या रेखास्ताभिश्चिह्निता । इयन्ति दिनानि जातानीति ज्ञानार्थमिति भावः । तस्या गेहभित्तिरपि । एवं च तद्देहभुवः का वार्तेति व्यज्यते । गण्डस्थलीव पाण्डुरिता । एवं चातःपरं विलम्बो न विधेय इति ध्वन्यते ॥

कथमन्यत्रानुरागं बध्नासीति वादिनीं सखीं प्रति नायिका वक्ति—

तस्याग्राम्यस्याहं सखि वक्रस्निग्धमधुरया दृष्ट्या ।
विद्धा तदेकनेया पोत्रिण इव दंष्ट्रया धरणी ॥ २६१ ॥

तस्येति । हे सखि । एवं च रहस्यकथनार्हत्वं ध्वन्यते । तस्याग्राम्यस्य । नागरिकस्येत्यर्थः । एवं चासक्तियोग्यत्वं ध्वन्यते । पक्षे वन्यस्य । वक्रप्रेमार्द्रसुन्दरया । 'तीव्र' इति पाठे वेधजननयोग्यत्वं ध्वन्यते । दृष्ट्या विद्धा । विद्धापदमन्यत्रगमनानर्हत्वं ध्वनयति । पोत्रिणो वराहस्य दंष्ट्रया धरणीवाहं तदेकनेया । एवं चान्यत्र न ममानुराग इति द्योत्यते ॥

बहुतरवसुसत्त्वेऽपि कुग्रामे वसतौ केवलं तव चण्डालानुग्रहादेवाभयं नान्यत इति कश्चित्कंचिदन्योक्त्या वक्ति—

त्वयि कुग्रामवटद्रुम वैश्रवणो वसतु वसतु वा लक्ष्मीः ।
पामरकुठारपातात्कासरशिरसैव ते रक्षा ॥ २६२ ॥

त्वयीति । हे कुग्रामवटद्रुम । कुग्रामपदेन निवासानर्हत्वं द्योत्यते । वैश्रवणः कुबेरः । 'किंनरेशो वैश्रवणः' इत्यमरः । वसतु । अथवा लक्ष्मीर्वसतु । पामरस्य मूर्खस्य । एवं च कुबेरादिवसत्या छेदानर्हत्वज्ञानविधुरत्वमिति व्यज्यते । कुठारपातात्ते रक्षणं कासरस्य महिषस्य मस्तकेनैव । चण्डालसदनस्थत्वादिति भावः ॥

नायिकासखी नायकं वक्ति—

तव मुखर वदनदोषं सहमाना मोक्तुमक्षमा सुतनुः ।
सा वहति विट भवन्तं घुणमन्तः शालभञ्जीव ॥ २६३ ॥

तवेति । हे मुखर, तव वदनदोषम् । असमीचीनभाषणमिति भावः । यद्वा मुखरे

यद्वदनं तद्दोषम् । सहमाना मोक्तुम् । त्वामिति भावः । असमर्था । प्रेमवशादिति भावः । यद्वा कुलीनत्वादिति भावः । सा सुतनुः । विट । न केवलं मौखर्यम्, अपि तु वेश्यासक्तिरिति भावः । एवं चोपदेशानर्हत्वं ध्वन्यते । भवन्तं शालभञ्जी काष्ठपुत्तलिका कीटमिवान्तः स्वान्तेऽभ्यन्तरे च वहति । एवं चैतादृशान्तर्दुःखशुष्काया अपि तस्यास्तवासक्तिरिति व्यज्यते ॥

निरपराधिनं कमपि कैश्चित्पीड्यमानं कश्चिदन्योक्त्या वक्ति—

तृणमुखमपि न खलु त्वां त्यजन्त्यमी हरिण वैरिणः शबराः ।
यशसैव जीवितमिदं त्यज योजितशृङ्गसङ्गामः ॥ २६४ ॥

तृणेति । हे हरिण । तृणमुखमपि । एवं च निरपराधित्वं ध्वन्यते । शरणागतत्वं वा । त्वाममी वैरिणः शबरा भिल्लाः खलु न त्यजन्ति । योजितविषाणयुद्धः कीर्त्यैवेदं जीवितं त्यज । एवं च प्रबलदुष्टशत्रुसंबन्धे युद्धेन मरणमेव वरम्, न पुनः पलायनं न वा शरणगमनमिति व्यज्यते ॥

कश्चिन्मानिनीचरणकृतमस्तकं तया च केशाकर्षणेन दूरीकृतमात्मानं विज्ञाय तां वक्ति—

त्रिपुररिपोरिव गङ्गा मम मानिनि जनितमदनदाहस्य ।
जीवनमर्पितशिरसो ददासि चिकुरग्रहेणैव ॥ २६५ ॥

त्रिपुरेति । हे मानिनि । जनितो मदनेन दाहो यस्य । पक्षे जनितो मदनस्य दाहो येन । तस्य । अर्पितमस्तकस्य । चरणयोः प्रणामार्थम् । पक्षे गङ्गाप्रवाहग्रहणार्थमिति भावः । मम त्वं महादेवस्य गङ्गेव चिकुरग्रहेणैव जीवनं जीवितम् । पक्षे जलम् । ददासि । एवं च त्वत्कोपेन जीवननिरपेक्षस्यापि मम क्रोधादपि त्वत्करस्पर्शेन संतापनिवृत्त्या जीवनं किमु प्रसन्नया त्वया कृतकरस्पर्शेन जीवनमिति ध्वन्यते । गौतमप्रार्थितगङ्गाप्रवाहसहनाय शिवेन शिरोऽग्रे कृतमिति पुराणप्रसिद्धिः ॥

सर्वसखीगोपनपुरःसरं केनचित्सह संयोगं विधाय स्थितां नायिकां काचित्सखी 'त्वया तेन सह रतं कृतम्' इति वक्ति—

त्वत्संकथासु मुखरः सनिन्दसानन्दसावहित्थ इव ।
स खलु सखीनां निभृतं त्वया कृतार्थीकृतः सुभगः ॥ २६६ ॥

त्वदिति । स सुभगो नायकः । सुभगत्वं च सकलसखीगोपनपुरःसरं नायिकया कृतार्थीकरणात् । खलु निश्चयेन सखीनां निभृतं यथा स्यात्तथा । सखीनामिति बहुवचनेन सर्वप्रतारणकरणसमर्थायास्तव मत्प्रतारणमतिसुकरमित्यावेद्यते । त्वया कृतार्थीकृतः । यतस्त्वदीयसद्वार्तासु । क्वचिज्जायमानास्विति भावः । सनिन्द इव । कथमधन्यैरस्मत्सदृशैः सा द्रष्टुं शक्येति लोकगोपनार्थमिति भावः । सानन्द इव । तदानीं त्वत्संनिध्याभावेऽपि त्वत्संनिधानजनितानन्द इव । सावहित्थ इव । केनाप्यानन्दचिह्नं न वि-

ज्ञेयमिति धियाकारगोपनवानिव। एवं चाकारगोपनस्याशक्यत्वं द्योत्यते। मुखरः। वारं-वारं त्वत्कथासूत्तरप्रत्युत्तरकारी। एवं च यदि न तव तेन सह संगतिस्तर्हीदृग्व्यवहारस्तस्मिन्कथं भवेत्। अतस्त्वयास्मान्प्रतार्य तेन सह संगतिः कृतेति ध्वन्यते। 'पुरतः' इति पाठे सखीनामस्मद्विधानां पुरतस्त्वद्वदनविनिःसृतमद्गोष्ठीषु सनिन्दसानन्दसावहित्थ इव मुखरो वक्तुं प्रौढः। अतः खलु त्वया कृतार्थीकृतः। एवं च त्वया सहैतत्संगतिरस्ति। कथमन्यथा त्वद्वदनविनिःसृतविचित्रवार्ताविज्ञोऽयमिति ध्वन्यते। यद्वा सखीनां पुरतः सनिन्दसानन्दसावहित्थ इव त्वद्विषयकवार्तासु मुखरः। सुभगः। एवं च संगतियोग्यत्वं ध्वन्यते। कृतार्थीकृत इति काक्वा प्रश्नः। एवं चैतादृशोऽहर्निशमस्मत्समक्षं त्वदेकवार्ताविधानप्रवणः सुभगः कथमद्यापि नानुगृह्यते। अपि तु झटित्यनुग्राह्य इति द्योत्यते॥

नायिकासखी नायकं वक्ति—

त्वयि सर्पति पथि दृष्टिः सुन्दर वृतिविवरनिर्गता तस्याः।
दरतरलभिन्नशैवलजाला शफरीव विस्फुरति॥ २६७॥

त्वयीति। हे सुन्दर। एवं च स्पृहणीयत्वं ध्वन्यते। त्वयि मार्गे चलति सति वृतिरावरणं तद्रन्ध्रनिर्गता तस्या दृष्टिः शैवालप्राबल्यादीषच्चञ्चला चासौ भिन्नशैवलजाला च शफरीव विस्फुरति। एवं च त्वय्यासक्ता सेति व्यज्यते॥

नायको नायिकां वक्ति—

ते सुतनु शून्यहृदया ये शङ्खं शून्यहृदयमभिदधति।
अङ्गीकृतकरपत्रो यस्तव हस्तग्रहं कुरुते॥ २६८॥

त इति। हे सुतनु, ये शङ्खं हृदयविहीनम्। यद्वा शून्यं बिन्दुरूपमवकाशरूपं वा हृदयं यस्य। एवं च प्राणशून्यत्वं व्यज्यते। वदन्ति ते हृदयशून्याः। मूर्खा इत्यर्थः। यः शङ्खोऽङ्गीकृतक्रकचस्तव करग्रहं कुरुते। एवं च यद्ययं हृदयशून्यः स्यात्तर्हि त्वत्करग्रहाय करपत्रविदारणं कथं कुर्यादिति भावः। एवं च प्रयागे करपत्रकर्तनादिना येन शरीरं त्यज्यते तेनैव त्वं प्राप्येति व्यज्यते॥

कंचन महान्तं गुणिनं सीदन्तं कञ्चिदन्योक्त्या वक्ति—

ते श्रेष्ठिनः क्व संप्रति शक्रध्वज यैः कृतस्तवोच्छ्रायः।
ईषां वा मेढिं वाधुनातनास्त्वां विधित्सन्ति॥ २६९॥

ते श्रेष्ठिन इति। हे शक्रध्वज, यैस्तवोच्छ्रायः कृतस्ते श्रेष्ठिनो वणिजः संप्रति क्व। न सन्तीति भावः। अधुनातनास्त्वामीषां लाङ्गलपद्धतिं मेढिं स्तम्भं वा करिष्यन्ति। एवं चाधुनातनेषु मूर्खत्वं व्यज्यते। एवं च प्राक्तनगुणज्ञसद्वृत्तलोकाभावात्तवैतादृशाः क्लेशा इति व्यज्यते। यद्वा प्राक्तनलोकाभावान्न तव तथाविधप्रतिष्ठादीति कश्चित्कंचिदन्योक्त्या वक्ति॥

प्रेम्णो भङ्गे पुनः संधानं न तथेति काचित्कांचिद्वक्ति—

तानवमेत्य च्छिन्नः परोपहितरागमदनसंघटितः ।
कर्ण इव कामिनीनां न शोभते निर्भरः प्रेमा ॥ २७० ॥

तानवमिति । तानवं स्वल्पत्वम् । पक्षे कार्श्यम् । प्राप्य च्छिन्नः । परेणान्येनोपहितः कृतो रागोऽनुरागो यस्य स चासौ मन्मथसंघटितश्च । कस्यचिद्वचनेन मन्मथविकारेण च पुनः कृत इति भावः । पक्षे परेणान्येन द्रव्येणोपहितो रागो रञ्जनं यस्यैतादृङ्मदनेन मधूच्छिष्टेन संधानं नीतः कामिनीनां प्रेमा कर्ण इव निर्भर आधिक्यशून्यः । पक्षे भरासहः । न शोभते । 'विराजते' इति पाठे काकुः । एवं च त्वया तथा न विधेयं यथा प्रेमभङ्गो भवेदिति ध्वन्यते ॥

'तथाविधगुणाभाववति महन्नामकरणं विडम्बनमात्रफलकम्' इति कश्चित्कंचिद्वक्ति—

तस्मिन्गतार्द्रभावे वीतरसे शुण्ठिशकल इव पुरुषे ।
अपि भूतिभाजि मलिने नागरशब्दो विडम्बाय ॥ २७१ ॥

तस्मिन्निति । तस्मिन्गत आर्द्रभावः करुणा । पक्षे आर्द्रत्वम् । तस्मिन्नपि । अपिरप्रेऽप्यन्वेति । वीतो रसः शृङ्गारादिः । पक्षे पुराणत्वाद्गततिक्तादिरसे । 'गतार्द्रभावे इत्यस्य विवरणं वीतरसे' इति ऋजवः । भूतिरैश्वर्यम् । पक्षे भस्मादि । तद्वति । मलिने पापवति । पक्ष उज्ज्वलत्वाभाववति । पुरुषे शुण्ठिशकल इव । शकलपदेनानुपयुक्तत्वं ध्वन्यते । नागरशब्दो विडम्बनाय । नगरे भवो नागरः । पक्षे 'अथ शुण्ठी महौषधम् । स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम्' इत्यमरः ॥

कश्चिद्विपत्तौ कंचिदुद्दिश्य गतः, तेन च संभाषणादिविषयतामप्यनीतः कंचिदन्योक्त्या वक्ति—

तमसि घने विषमे पथि जम्बुकमुल्कामुखं प्रपन्नाः स्मः ।
किं कुर्मः सोऽपि सखे स्थितो मुखं मुद्रयित्वैव ॥ २७२ ॥

तमसीति । निबिडेऽन्धकारे, कठिनतरे पथि, उल्का मुखे यस्य तं जम्बुकं प्रपन्नाः स्मः । एतन्मुखप्रकाशेनायं मार्गो विलङ्घनीय इति धियेति भावः । हे सखे । एवं च दुःखकथनार्हत्वं द्योत्यते । सोऽपि मुखं मुद्रयित्वैव स्थितः । किमत्र कुर्मः । एवं चास्माकं दुर्दैववशान्नीचावलम्बनमपि कर्तुमुद्यतानां न तत्र शब्दमात्रावलम्बनं किमुतान्यदिति ध्वन्यते ॥

कश्चित्कांचिदङ्गनां प्रति वक्ति—

त्वामभिलषतो मानिनि मम गरिमगुणोऽपि दोषतां यातः ।
पङ्किलकूलां तटिनीं पिपासतः सिन्धुरस्येव ॥ २७३ ॥

त्वामिति । हे मानिनि । मानः प्रतिष्ठा । त्वदभिलाषवतो मम पङ्किलतीरां नदीं ग-

न्तुमिच्छतो गजस्येव गौरवगुणोऽपि दोषत्वं प्राप्तः । एवं च त्वत्सदने ममागमनस्यौचित्येऽपि दुष्टप्रतिवेशिभयात्प्रतिष्ठावतोऽन्यत्स्वल्पजनवदागमनमसंभवीति स्वमहत्त्वं महद्दोषत्वेन गणयामि, अतस्त्वयैव मत्सदने समागन्तव्यमिति प्रार्थयामीति ध्वन्यते। यद्वा पराङ्गनां मानिनीं प्रति कश्चित्संदेशं प्रेषयति । एवं च मम वारंवारागमने दुष्टत्वत्प्रतिवेशिजनैरवश्यं ज्ञातव्यम् । अतो मानं त्यक्त्वा त्वयागन्तव्यमिति व्यज्यते ॥

परपुरुषसंयोगाभिलाषिणी काचिद्वक्ति—

तिमिरेऽपि दूरदृश्या कठिनाश्लेषे च रहसि मुखरा च ।
शङ्खमयवलयराजी गृहपतिशिरसा सह स्फुटतु ॥ २७४ ॥

तिमिर इति । अन्धकारेऽपि दूरतो दृश्या । श्वेत्यादिति भावः । आलिङ्गने कठिना । एकान्ते मुखरा । शङ्खविकारकङ्कणपङ्क्तिः । गृहपतेर्न तु प्रियस्य । मस्तकेन सह स्फुटतु । एवं च पतिमरणोत्तरं सुखेन मया स्वेच्छाविहारो विधेय इति व्यज्यते ॥

सखी नायिकां वक्ति—

तव वृत्तेन गुणेन च समुचितसंपन्नकण्ठलुठनायाः ।
हारस्रज इव सुन्दरि कृतः पुनर्नायकस्तरलः ॥ २७५ ॥

तवेति । हे सुन्दरि । एवं चासक्तियोग्यत्वं व्यज्यते । समुचितप्राप्तालिङ्गनायाः । पक्षे समुचितं धनिनः कण्ठलुठनं यस्याः । हारस्रज इव मुक्तामालाया इव तव वृत्तेन शीलेन । पक्षे वर्तुलेन । चातुर्यादिगुणेन । पक्षे सूत्रेण । नायकः कान्तः । पक्षे मुख्यमणिः । तरलश्चञ्चलः । पक्षे हारमध्यगः । पुनर्वारंवारं कृतः । एवं च त्वच्छीलगुणेष्वासक्त्या स्वधैर्यं परित्यज्य नायकस्त्वामेवानुचिन्तयन्नास्त इति व्यज्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता तकारव्रज्या ।

दकारव्रज्या ।

नायकोऽधुना गृहिणीमानापनोदनाय प्रणामादि करिष्यतीति दुःखितां सपत्नीं तत्सखी वक्ति—

दर्शनविनीतमाना गृहिणी हर्षोच्छसत्कपोलतलम् ।
चुम्बननिषेधमिषतो वदनं पिदधाति पाणिभ्याम् ॥ २७६ ॥

दर्शनेति । दर्शनविनीतमाना । एवं च गुणोत्कर्षशून्यत्वं ध्वन्यते । गृहिणी । हर्षेणोच्छसत्कपोलतलं मुखम् । स्वस्येति भावः । चुम्बननिषेधव्याजाद्धस्ताभ्यामाच्छादयति । एवं च त्वां विहायागतं नायकमवलोक्य चिरकालीनबद्धापेक्षितदर्शनसंजातहर्षसमुदितपुलकगोपनेन स्वस्य सौभाग्याविष्करणायैवमकरोन्न वास्तवमानदार्ढ्यं तस्यामिति द्योत्यते । तेन च नायकप्रणामादीति ॥

सखी नायिकां वक्ति—

देहस्तम्भः स्खलनं शैथिल्यं वेपथुः प्रियध्यानम् ।
पथि पथि गगनाश्लेषः कामिनि कस्तेऽभिसारगुणः ॥ २७७ ॥

देहेति । हे कामिनि, गतिनिरोधस्खलनशैथिल्यकम्पप्रियतमचिन्तनाकाशालिङ्गनानि मार्गे मार्गे, अतस्तेऽभिसारगुणः कः । एवं चाभिसारे सर्वमेतद्विघ्नरूपम्, अतस्त्वयैतन्न विधेयमिति ध्वन्यते । तेन चात्यन्तासक्तिर्नायके तवास्तीति ॥

नायिकासखी नायकं वक्ति—

द्राघयंता दिवसानि त्वदीयविरहेण तीव्रतापेन ।
ग्रीष्मेणेव नलिन्या जीवनमल्पीकृतं तस्याः ॥ २७८ ॥

द्राघयतेति । दिवसानि । 'वा तु क्लीबे दिवसवासरौ' इत्यमरः । महत्कुर्वता । दुःखोद्रेकात् । पक्षे तद्दिनमानमाहात्म्यादलसत्वादिति भावः । तीव्रस्तापः संतापो यस्य तेन । पक्षे तापो घर्मः । तस्यास्त्वदीयविरहेण नलिन्या ग्रीष्मेणेव जीवनमायुः । पक्षे जलम् । अल्पीकृतम्, न तु नाशितम् । एवं च यथातथैतत्समयोऽतिवाहितस्तया परं तु वर्षासु प्राणाः परित्याज्या इत्यवगत्य त्वयानुग्राह्या सेति व्यज्यते ॥

दुष्टसंसर्गादपि साधोः साधुत्वं नापैतीति कश्चिद्वक्ति—

दुर्जनसहवासादपि शीलोत्कर्षं न सज्जनस्त्यजति ।
प्रतिपर्वतपनवासी निःसृतमात्रः शशी शीतः ॥ २७९ ॥

दुर्जनेति । पर्वामावस्या । अमायां चन्द्रस्य सूर्यान्तर्गतत्वमिति ज्योतिर्विदप्रवादः ॥

सखी नायिकां वक्ति—

दयितप्रहितां दूतीमालम्ब्य करेण तमसि गच्छन्ती ।
स्वेदच्युतमृगनाभिर्दूराद्गौराङ्गि दृश्यासि ॥ २८० ॥

दयितेति । प्रियप्रेषितां दूतीं करेणालम्ब्यान्धकारे गच्छन्ती स्वेदगलितकस्तूरिका त्वं गौराङ्गि दूराद्दृश्यासि । दयितदूतीत्वेनातिप्रियतया तत्करस्पर्शमात्रादेव संजातसात्विकभावस्वेदपूरदूरीभूतान्धकाराभिसरणानुकूलमृगमदवत्तया गौरशरीरतया दूरादपि दृश्यासीति भावः । एवं च नायकविषयासक्तिविशेषो ध्वन्यते ॥

काचित्कंचिद्वक्ति—

दयितागुणः प्रकाशं नीतः स्वस्यैव वदनदोषेण ।
प्रतिदिनविदलितवाटीकृतिघटनैः खिद्यसे किमिति ॥ २८१ ॥

दयितागुण इति । स्वस्यैव मुखदोषेण नायिकागुणः प्रकटीकृतः । प्रतिदिनं विघटितगृहावरणसंपादनैः किमिति खेदं प्राप्नोषि । एवं च त्वदुक्तनायिकागुणश्रवणेनासक्त्या

लोकेनैव रात्रौ वृतिघटनं विधीयत इति व्यज्यते । तेन च त्वदीय एवायमपराध इति । तेन च न कदापि नायिकागुणवर्णनं विधेयमिति ।।

चातुर्यवशात्साधुतामवलम्बमानं मैनमवगणयन्त्वित्यन्योक्त्या कश्चिदुपदिशति—

दाक्षिण्यान्म्रदिमानं दधतं मा भानुमेनमवमंस्थाः ।
रौद्रीमुपागतेऽस्मिन्कः क्षमते दृष्टिमपि दातुम् ॥ २८२ ॥

दाक्षिण्यादिति । दाक्षिण्याद्दक्षिणदिक्संबन्धादित्यर्थः । पक्षे चातुर्यात् । मृदुत्वमसंतापकत्वम् । पक्षे साधुत्वम् । भजन्तमेनं भानुम् । पक्षे सूर्यतुल्यतेजस्विनमित्यर्थः । मावगणयेथाः । अस्मिन्रौद्रीमीशानीं दिशम् । पक्षे रोषमित्यर्थः । प्राप्ते दृष्टिमपि दातुं कः क्षमते । न कोऽपीत्यर्थः । एवं चातिसंतापकत्वं द्योत्यते । यद्वा रौद्री मध्याह्नवेला ।।

कश्चित्पथिकः पथि व्याधबाणाहतिगच्छत्प्राणां हरिणीमालोक्य सखायं वक्ति—

दृष्टचैव विरहकातरतारकया प्रियमुखे समर्पितया ।
यान्ति मृगवल्लभायाः पुलिन्दबाणार्दिताः प्राणाः ॥ २८३ ॥

दृष्टचैवेति । भिल्लशरपीडिताया हरिण्या वियोगभीतनेत्रकनीनिकया । एवं च मरणभीत्यभावो द्योत्यते । अत एव प्रियवदनस्थापितया दृष्टचैव न मुखादिद्वारा प्राणाः प्रयान्ति । एवं च पश्वङ्गनाया अपि मरणकारणबाणव्यथातोऽपि विरहव्यथा दुःसहा । किमु मनुष्याङ्गनाया इति व्यज्यते । तेन च यो हि नायिकां विहाय परदेशे गच्छति स मृगतुल्यः पशुरिति । यद्वा नायकादपि नायिकाया विरहभीतिरिति व्यज्यते ॥

खलसंगतिर्न विधेयेति कश्चिदुपदिशति—

दूरस्थापितहृदयो गूढरहस्यो निकाममाशङ्कः ।
आश्लेषो बालानां भवति खलानां च संभेदः ॥ २८४ ॥

दूरेति । दूरे स्थापितं हृदयं वक्षःस्थलम् । पक्षेऽन्तःकरणम् । येन सः । गूढं रहस्यमन्तःकरणविषयीभूतम् । पक्षे मन्त्रादि । यस्य सः । निकाममत्यन्तमाशङ्का भीतिः । पक्षे विश्वासाभावः । यस्य सः । क्वचित् 'गूढरहस्यं निकामसाशङ्कः' इति पाठः । गूढरहस्यमत्यन्तरहस्यम् । बालानां मुग्धाङ्गनानामाश्लेष आलिङ्गनं खलानां च संभेदः सङ्गो भवति । एवं चोभयोः साम्यं व्यज्यते ॥

असमयरताभिलाषिणं नायकं नायिका वक्ति—

द्वारे गुरवः कोणे शुकः सकाशे शिशुर्गृहे सख्यः ।
कालासह क्षमस्व प्रिय प्रसीद प्रयातमहः ॥ २८५ ॥

द्वार इति । द्वारे गुरवः । एवं च बहिर्गमनानर्हत्वं दर्शनानर्हत्वं च व्यज्यते । कोणे शुकः । एवं च वचनरचनाशीलशुकाधिष्ठानेन कोणदेशेऽपि रतानर्हत्वं ध्वन्यते । सकाशे शिशुः । एवं च बालकापसारण एतत्कोलाहलादिना निकटवर्तिगुरुजनागमनसंभावनया

नैतदपि स्थलं रतयोग्यमिति द्योत्यते। गेहे सख्यः। एवं च तासामपि तव लज्जाकरणौचित्येन गृहमपि रतानर्हमिति व्यज्यते। कालासह। सुरतोत्सुकेत्यर्थः। प्रिय। एवं च त्वदाज्ञालङ्घनानर्होहमित्यावेद्यते। प्रसीद। तत्फलमाह—क्षमस्व। समयाभावादिति भावः। ननु कदा समयो भावीत्यत्राह—अहः प्रयातं गतमेव। एवं चागतप्राया निशैव सुरतयोग्येति ध्वन्यते॥

सखी नायिकामुपदिशति—

दधिकणमुक्ताभरणश्वासोत्तुङ्गस्तनार्पणमनोज्ञम्।
प्रियमालिङ्गति गोपी मन्थश्रममन्थरैरङ्गैः॥ २८६॥

दधीति। दधिकणरूपमुक्ताफलानामलंकरणं ययोः। श्वासेन। श्रमजन्येनेति भावः। उच्चौ यौ स्तनौ तत्समर्पणाभिरामं यथा स्यात्तथा गोपी दधिमथनश्रमनिश्चलाङ्गैः प्रियमालिङ्गति। एवं च शृङ्गारादिरचनां विनापि श्रममगणयित्वैव तथाविधज्ञानविधुरापि गोपाङ्गना स्वयं प्रियमालिङ्गति, त्वं त्वत्यन्तचतुरापि प्रियालिङ्गने विलम्बमावहसीति भ्रान्ता त्वमिति व्यज्यते। तेन च नैवं विधेयमिति। यद्वा यथैककार्यनियुक्तापि गोपी तत्समयेऽपि प्रियालिङ्गनं करोति तथा त्वयापि विधेयमिति व्यज्यते॥

नायिका सखीं वक्ति—

दलितोद्वेगेन सखि प्रियेण लग्नेन रागमावहता।
मोहयता शयनीयं ताम्बूलेनेव नीतास्मि॥ २८७॥

दलितेति। हे सखि, भञ्जितक्लेशेन। पक्षे चूर्णीकृतपूगवता। कण्ठलग्नेन रागं प्रीतिम्। पक्षे लौहित्यम्। आवहता। मोहयता विषयान्तरज्ञानाभावं कुर्वता। पक्षे भ्रान्तिं जनयता। प्रियेण ताम्बूलेनेव शयनं नीतास्मि। एवं च प्रियसङ्गे मम न किमप्यन्यविषयकं ज्ञानमिति व्यज्यते॥

कश्चित्कंचिद्वक्ति—

दृष्टमदृष्टप्रायं दयितं कृत्वा प्रकाशितस्तनया।
हृदयं करेण ताडितमथ मिथ्या व्यञ्जितत्रपया॥ २८८॥

दृष्टमिति। अथेत्यनन्तरं हृदयं करेण ताडितम्। अनुचितं मया कृतमिति प्रदर्शनार्थमिति भावः। जातिवर्णनमेतत्॥

सखी नायिकां वक्ति—

दर्शितयमुनोच्छ्राये भ्रूविभ्रमभाजि वलति तव नयने।
क्षिप्तहले हलधर इव सर्वं पुरमर्जितं सुतनु॥ २८९॥

दर्शितेति। हे सुतनु, दर्शितो यमुनात उच्छ्राय आधिक्यं यस्य तस्मिन्। श्यामत्वादिति भावः। पक्षे दर्शितयमुनाधिक्ये। मथुरामण्डले रामहलेन प्रवाहस्य विपरीतकर-

णेन जलाधिक्यादिति भावः । कटाक्षशालिनि । पक्षे कोपवशात्कुटिलभ्रुकुटिमति । तव नयने क्षितहले हलधर इव बलदेव इव वलति सति समग्रं नगरमर्जितं स्वाधीनीकृतम् । पक्षे युधिष्ठिरं प्रति कोपाद्धस्तिनापुरस्य हलेन विपरीतकरणोद्यमादिति भावः । एवं च तव कटाक्षमात्राधीनाः सर्वेऽपि युवान इति नायिकाधिक्यकथनेनान्यनायिकानिन्दा द्योत्यते ॥

विरहिणी सखीं वक्ति—

दयितप्रार्थितदुर्लभमुखमदिरासारसेकसुकुमारः ।
व्यथयति विरहे बकुलः क्व परिचयः प्रकृतिकठिनानाम् ॥२९०॥

दयितेति । दयितेन प्रार्थितोऽपि दुर्लभो मुखासवकणसेकस्तेन सुकुमारः संजातपल्लवादिः । 'शोकं जहाति बकुलो मुखसीधुसिक्तः' इति प्रसिद्धिः । प्रकृतिकठिनानाम् । काष्ठत्वादिति भावः । यद्वा 'नायकप्रार्थनावगणनापुरःसरमदिरागण्डूषसंपादितपल्लवादिरयं बकुलो विरहे मां कथं व्यथयति' इति नायकाप्रश्ने क्वेत्याद्युत्तरं सख्याः ॥

सखी नायिकां वक्ति—

द्वित्रैरेष्यामि दिनैरिति किं तद्वचसि सखि तवाश्वासः ।
कथयति चिरपथिकं तं दूरनिखातो नखाङ्कस्ते ॥ २९१ ॥

द्वित्रैरिति । द्वित्रिसंख्याकैर्दिवसैरहमागमिष्यामीति तस्य नायकस्य वचसि । तस्येत्यनेन नायकेऽन्यथाभाषित्वं द्योत्यते । कस्तव समाश्वासः । दूरनिखातो नखाङ्कः । दूरप्रवासे गम्भीरनखक्षतस्य कामशास्त्रे विहितत्वादिति भावः । तं नायकं चिरप्रवासिनं कथयति । एवं च सत्वरमयमायास्यतीति ज्ञानेनान्यनायकसंगतिमकुर्वाणा भ्रान्तासि त्वमिति व्यज्यते ॥

सखी नायिकां वक्ति—

दयितस्पर्शोन्मीलितघर्मजलस्खलितचरणनखलाक्षे ।
गर्वभरमुखरिते सखि तच्चिकुरान्किमपराधयसि ॥ २९२ ॥

दयितेति । प्रियस्पर्शप्रसृतस्वेदजलविचलितचरणनखलाक्षे गर्वभरेण मुखरीकृते सखि नायकशिरोरुहान्किमित्यपराधयसि । त्वत्सात्त्विकभावरूपस्वेदेनैव चरणनखलाक्षापगमे प्रियप्रणतिसंलग्नशिरोरुहैर्लाक्षापगतेति मिथ्या तमपराधयसीति भावः । एवं च तवैवायमपराध इति व्यज्यते ॥

कश्चिद्दुष्टपुत्रदुःखितो गेहिनीं वक्ति—

दुष्टग्रहेण गेहिनि तेन कुपुत्रेण किं प्रजातेन ।
भौमेनेव निजं कुलमङ्गारकवत्कृतं येन ॥ २९३ ॥

दुष्टेति । हे गेहिनि, तेन । दुष्टो ग्रह आग्रहो यस्य तेन । पक्षे दुष्टश्चासौ ग्रहश्च

तेन । प्रजातेनोत्पन्नेन । अत्रोपसर्गस्तथा नोपयोगीत्याभाति । कुत्सितपुत्रेण । पक्षे कुः पृथ्वी । किम् । न किंचित्फलमित्यर्थः । येन मङ्गलेनेव स्वीयं कुलमङ्गारकवत्कृतम् । प्रज्वालितमिति भावः । पक्षे 'अङ्गारकः कुजो भौमः' इत्यमरः । एवं च दुष्टपुत्रवत्त्वापेक्षयापुत्रतैव सम्यगिति व्यज्यते ।

आपद्यपि शूराणां न नीचकार्यकारित्वमिति कश्चिद्वृत्तिं—

दर्शितचापोच्छ्रायैस्तेजोवद्भिः सुगोत्रसंजातैः ।
हीरैरप्स्वपि वीरैरापत्स्वपि गम्यते नाधः ॥ २९४ ॥

दर्शितेति । प्रकटीकृत इन्द्रधनुर्वदुच्छ्रायः कान्त्याधिक्यं धनुष औन्नत्यं च । 'ताप' इति पाठे कान्तिः प्रतापश्च । तेजः प्रकाशकत्वं सामर्थ्यं च । गोत्रः पर्वतोऽन्वयश्च । हीरैर्वज्रैः । अप्स्वपि । 'अप्स्विव' इति क्वचित्पाठः । वीरैरापत्स्वपि नाधो गम्यते । जलसाम्यदर्शनेनापदि मान्द्यसंपादकत्वमावेद्यते । हीरसमताप्रदर्शनेन वीरेष्वतिकाठिन्यं द्योत्यते । तेन चान्यजन्यभङ्गानर्हत्वम् । जले हीरका न मज्जन्तीति हीरकपरीक्षा ॥

अतिसलज्जतया छन्नतनुवैभवादन्यदालोकयन्तीं तन्मध्य एव किंचित्कटाक्षविक्षेपेण नायकमप्यवलोकयन्तीं नायको वक्ति—

दरनिद्राणस्यापि स्मरस्य शिल्पेन निर्गतासून्मे ।
मुग्धे तव दृष्टिरसावर्जुनयन्त्रेषुरिव हन्ति ॥ २९५ ॥

दरेति । हे मुग्धे, दरेण भयेन। मुग्धास्वभावसुलभेनेति भावः । निद्राणस्यापि । निलीनस्यापीत्यर्थः । निद्राणपदं निलीनत्वं लक्ष्यदसमर्थत्वं पराज्ञेयत्वं निभृतकार्यकारित्वं च व्यनक्ति । स्मरस्य कलाकौशलेन निर्गतासौ तव दृष्टिरर्जुनयन्त्रबाण इव मे प्राणान्हन्ति । अपिनैतादृशमदनकौशलनिर्गतदृष्टेरेतादृशकार्यकारित्वं तत्र किमु वाच्यमनिद्रमदनकौशलनिर्गतदृष्टेः कार्यकारित्वमित्यावेद्यते । यद्वा 'अपिः' निर्गतेत्यत्रान्वेति । एवं च निर्गतमात्रया दृष्ट्या प्राणापहरणं क्रियते तत्र का वार्ता प्राप्तया क्रियमाणस्येति व्यज्यते । अथवासूनपीति योजनया देहादिसमुच्चयः । पक्षे 'पत्री रोप इषुर्द्वयोः' इत्यभिधानादिषुशब्दस्य स्त्रीलिङ्गतया कौशलेन निर्गतेतीषुविशेषणम् । एवं चैतादृशत्वदीयावलोकनेनाहमतिविकलः, अतो मामालिङ्गनादिना जीवयेति ध्वन्यते । अर्जुनोऽप्यन्यत्र विलोकयन्नन्यल्लक्ष्यमाजघानेति पुराणप्रसिद्धिः । 'शून्यम्' इति पाठे शून्यमभिसंधिरहितं निर्गता । पक्षे आकाशम् ॥

दारिद्र्यमतिदुःखदमिति कश्चिद्वृत्तिं—

दुर्गतगृहिणी तनये करुणार्द्रा प्रियतमे च रागमयी ।
मुग्धा रताभियोगं न मन्यते न प्रतिक्षिपति ॥ २९६ ॥

---

१. 'सर्वद्रव्याभेद्यं लघ्वम्भसि तरति रश्मिवत्स्निग्धम् । तडिदनलशक्रचापोपमं च वज्रं हितायोक्तम् ॥' इति बृहत्संहिता (८०।१४).

दुर्गतेति । दरिद्रकामिनी । दुर्गतपदेन धान्यादिकरणसामर्थ्याभावो व्यज्यते । तनये । एवं चातिवात्सल्यमावेद्यते । करुणाशालिनी । नायकसङ्गे स्तन्यहान्या तनयस्य दुःखं भविष्यतीति धियेति भावः । मुग्धा किं विधेयमिति निश्चयशून्या ॥

त्वं गेह एव जारोपभोगं सुखेन करोषि नास्माकं स इत्यन्योक्त्या काचित्कांचिद्वक्ति—

दुर्गतगेहिनि जर्जरमन्दिरसुप्तैव वन्दसे चन्द्रम् ।
वयमिन्दुवञ्चितदृशो निचुलितदोलाविहारिण्यः ॥ २९७ ॥

दुर्गतगेहिनीति । दरिद्रकामिनि । दुर्गतपदेनोदरदरीभरणायेतस्ततः सर्वदा संचरणशीलत्वं व्यज्यते । तेन च जारानयनसौकर्यम् । जर्जरम् । एवं च कामुकागमनयोग्यत्वं व्यज्यते । यन्मन्दिरं तत्र निद्रितैव । एवं चायासाभावो व्यज्यते । चन्द्रम् । एवं च संतापोपशामकत्वं ध्वन्यते । तेन चावश्यदर्शनीयत्वम् । वञ्चितपदेनातिपश्चात्तापवत्त्वमावेद्यते । निचुलिताच्छादिता या दोला तया यो विहारस्तच्छालिन्यः । विहारिण्य इत्यनेन बहिर्गमनेऽप्यस्माकं निर्बन्ध इति ध्वन्यते । एवं चैतादृशास्मदीयभाग्यात्तव तादृशदारिद्र्यमेव सम्यगिति । तेन चास्माकमेतद्भाग्यं न सुखदमिति व्यज्यते ॥

त्वं न तथा चतुरेति वादिनीं काचित्कांचिद्वक्ति—

दीपदशा कुलयुवतिर्वैदग्ध्येनैव मलिनतामेति ।
दोषा अपि भूषायै गणिकायाः शशिकलायाश्च ॥ २९८ ॥

दीपेति । दीपदशा वर्तिः कुलाङ्गना च । विशेषदग्धभावेन चातुर्येण च । मलिनतां कज्जलादिमत्त्वं पापवत्त्वं च । दोषा अनुचितकारित्वादयः, दोषा रात्रिः ॥

सखी नायिकां वक्ति—

दीर्घगवाक्षमुखान्तर्निपातिनस्तरणिरश्मयः शोणाः ।
नृहरिनखा इव दानववक्षः प्रविशन्ति सौधतलम् ॥ २९९ ॥

दीर्घेति । दीर्घपदेन प्रकाशसंपादकत्वं ध्वन्यते । गवाक्षो वातायनं तन्मुखनिःसृताः शोणाः । प्रातःकालीनत्वादिति भावः । सूर्यकिरणा नृसिंहनखा हिरण्यकशिपुवक्षःस्थलमिव सौधतलं प्रविशन्ति । नृहरिनखतुल्यताप्रतिपादनेन प्राणापहारसमदुःखदत्वं ध्वन्यते । एवं च सूर्योदयः संवृत्तः, अत इतो निःसारणीयः प्रिय इति व्यज्यते । अत्र नृहरिपदसांनिध्याद्दानवपदं हिरण्यकशिपुं प्रतिपादयति ॥

सखी नायिकां स्तौति—

दरतरलेऽक्षणि वक्षसि दरोन्नते तव मुखे च दरहसिते ।
आस्तां कुसुमं वीरः स्मरोऽधुना चित्रधनुषापि ॥ ३०० ॥

दरेति । अक्षणि नेत्रे ईषच्चञ्चले सति, तवेषदुन्नमिते वक्षसि, मुखे च किंचिद्वसितवति सति । एवं चाङ्कुरितयौवनात्वेन मुग्धात्वं द्योत्यते । कुसुमं पुष्पमास्ताम् । न किंचिदित्यर्थः । किं तु स्मरो वीरश्चित्रधनुषापि । अपिना शरसंग्रह आस्ताम् । एवं च कुसु-

मादेरनर्थकत्वेऽपि त्वदीयदरतरलनेत्रादिभिरेव चित्रधनुष्मानस्तु स्मर इति व्यज्यते। 'दरतरलेक्षिणि' इति पाठे संबुद्धिः। अथवा हे चञ्चलेक्षिणि, तव वक्षसीषदुन्नमिते, वदने चेषद्धसितशालिनि सति पुष्पमास्तां चित्रधनुषाप्यालेख्यगतधनुषापि स्मरोऽधुना तवैतादृशयौवनकाले वीरः। एवं च कुसुमस्य कार्याक्षमत्वेन तद्रूपधनुषा स्मरस्य वीरत्वे न किंचिदाश्चर्यमधुना त्वालेख्यगतधनुषापि स्मरस्य जगज्जयः सुकर इति भाव इत्यर्थः। यद्वा वीरोऽपि स्मरश्चित्ररूपधनुषाप्यास्ताम्। एवं चैतादृशरूपवत्या भवत्यैव मदनेन विजयः कर्तुं शक्यः। अतो मदनप्राक्तनधनुर्बाणाश्चित्रन्यस्ता इवानर्थकाः सन्त्विति ध्वन्यते। अथवा कुसुमं रजः। 'अपिः' अवधारणार्थकोऽधुनेत्यत्रान्वेति। एवं च त्वदीयैतादृशयौवनप्रादुर्भाव एव विजयातिशयसाधनभूतया त्वया मदनधनुरनर्थकं जातम्, किमु वाच्यं पुष्पोद्गमोत्तरमिति द्योत्यते॥

नायकसखी नायकं वक्ति—

दुष्टसखीसहितेयं पूर्णेन्दुमुखी सुखाय नेदानीम्।
राकेव विश्लिष्टयुक्ता भवतोऽभिमताय निशि भवतु॥ ३०१॥

दुष्टसखीति। पूर्णेन्दुवन्मुखं यस्याः। पक्षे पूर्णेन्दुरेव वदनं यस्याः। दुष्टसखीसहितेयं नायिका भद्रायुतपौर्णवासीवाधुना। दिन इत्यर्थः। तवाभिप्रायविषयीभूताय सुखाय निशि भवतु। यथा दिन एव भद्राया अतिक्रान्तत्वात्पूर्णिमा निशि कार्याहीं तथा सख्या अन्यत्र रात्रावासक्ततयैतत्सांनिध्याभावेनावश्यं रात्रौ त्वदुपयोगायेयं भविष्यतीति द्योत्यते॥

काचित्कांचिद्वक्ति—

दलिते पलालपुञ्जे वृषभं परिभवति गृहपतौ कुपिते।
निभृतनिभालितवदनौ हलिकवधूदेवरौ हसतः॥ ३०२॥

दलित इति। दलित इतस्ततः कृते सति कोपवति गृहपतौ हलिके वृषभं ताडयति सति। अनेनैव पलालं नाशितमिति धियेति भावः। गुप्तपरस्परकृतावलोकनौ। निभृतपदमन्यज्ञानभीतिमावेदयति। हलिकाङ्गनादेवरौ। देवरो भर्तुः कनिष्ठभ्राता। देवरशब्दस्य ससंबन्धिकतया तदीयत्वं लभ्यते। एवं चैतादृक्कार्यकरणानर्हत्वं ध्वन्यते। हसतः। अस्मत्सुरतविमर्दवशात्पलालपुञ्जस्यैतादृश्यवस्थामविज्ञाय निरपराधिनं वृषभमयं ताडयतीति धियेति भावः। 'पथिकवधू–' इति पाठे देवरेण तन्मातृगृहानयनावसर इदं कृतमिति काचित्कांचिद्वक्ति। एवं चैतादृशाह्वानमनुचितमिति व्यज्यते॥

महद्भिरेव स्वप्रतापः प्रदर्शनीयः, न लघुभिरिति कश्चिद्वक्ति—

दीप्यन्तां ये दीप्त्यै घटिता मणयश्च वीरपुरुषाश्च।
तेजः स्वविनाशाय तु नृणां तृणानामिव लघूनाम्॥ ३०३॥

दीप्यन्तामिति। घटिता विधातृनिष्पादिताः॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता दकारव्रज्या

धकारव्रज्या ।

कस्याश्चित्सखी कंचिदन्योक्त्या वक्ति—

धूमैरश्रु निपातय दह शिखया दहन मलिनयाङ्गारैः ।
जागरयिष्यति दुर्गतगृहिणी त्वां तदपि शिशिरानिशि ॥ ३०४ ॥

धूमैरिति । हे दहन । अनागमनादिना संतापकत्वात्सामर्थ्यविशेषवत्त्वाद्वेति भावः । दुर्गतगृहिणीत्यनेन सुरतसौख्याभावो द्योत्यते । शिशिरनिशीत्यनेन यथेच्छसुरतयोग्यत्वं निशि ध्वन्यते । एवं च त्वदीयदुष्टव्यवहारेणाश्रुसंतापमालिन्यजननेऽपि त्वां सा न त्यक्ष्यतीति ध्वन्यते ॥

सखी नायिकामुपदिशति—

धैर्यं निधेहि गच्छतु रजनी सोऽप्यस्तु सुमुखि सोत्कण्ठः ।
प्रविश हृदि तस्य दूरं क्षणधृतमुक्ता स्मरेषुरिव ॥ ३०५ ॥

धैर्यमिति । निधेहि कुरु । तस्य हृदि दूरं प्रविश । एवंप्रकारेण सोऽप्यत्यन्तासक्तो भावीति ध्वन्यते । क्षणधृतमुक्तात्वेनातिभेदकत्वं द्योत्यते । 'इषुर्द्वयोः' इत्यमरः ।

धवलनखलक्ष्म दुर्बलमकलितनेपथ्यमलकपिहिताक्ष्याः ।
द्रक्ष्यामि मदवलोकद्विगुणाश्रु वपुः पुरद्वारि ॥ ३०६ ॥

धवलेति । श्वेतनखचिह्नम् । पुराणत्वादिति भावः । दुर्बलम् । विरहक्षीणत्वादिति भावः । अकलितभूषणम् । असामर्थ्यादिति भावः । चूर्णकुन्तलाच्छादितनयनायाः । संस्काराभावादिति भावः । वपुर्मद्विलोकनेन द्विगुणाश्रु । प्रेमभरादिति भावः । पुरद्वारि । अत्यन्तविरहेण धैर्याभावादिति भावः । द्रक्ष्यामीति काकुः । वैदेशिकाशंसनमेतत् ॥

असतां धर्मारम्भोऽप्यनर्थहेतुरिति कश्चिद्वक्ति—

धर्मारम्भेऽप्यसतां परहिंसैव प्रयोजिका भवति ।
काकानामभिषेकेऽकारणतां वृष्टिरनुभवति ॥ ३०७ ॥

धर्मेति । असाधूनां धर्मारम्भेऽपि । अपिनाधर्मारम्भकालीनवार्ता किं वक्तव्येति व्यज्यते । परहिंसैव प्रयोजिका भवति । परहिंसामुद्दिश्यैवासतां धर्मारम्भ इति भावः । अत्र दृष्टान्तमाह—काकानां स्नाने वृष्टिरकारणतां कारणाभावत्वं प्राप्नोति । काकैः स्नाने कृते वृष्टिर्न भवतीति वृद्धव्यवहारः ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता धकारव्रज्या ।

नकारव्रज्या ।

कश्चित्कांचित्संकेतं वक्ति—

नीरावतरणदन्तुरसैकतसंभेदमेदुरैः शिशिरे ।
राजन्ति तूलराशिस्थूलपटैरिव तटैः सरितः ॥ ३०८ ॥

नीरेति । नद्यो जलन्यूनतयोच्चावचं यत्सैकतं तत्संघट्टनमांसलैः । तूलस्य कार्पासस्य पङ्क्तयो येषु तादृशस्थूलपटैरिव तीरैः शिशिरे राजन्ति । एवं च शिशिरे शीतबाहुल्येनान्यजनागमनशङ्काभावेनोच्चावचसैकतवत्तयान्यानवलोकनीयत्वेन वायुनिवारकतया स्वस्य शीतबाधाजनकत्वेन च तूलयुतस्थूलपटोत्प्रेक्षया मृदुलस्पर्शवत्ता प्रतिपादनेन स्वतःसिद्धशय्यासत्त्वेन च सरित्तीरमेव संकेतस्थलमिति व्यज्यते ॥

कश्चित्कांचिदन्योक्त्या वक्ति—

निजकायच्छायायां विश्रम्य निदाघविपदमपनेतुम् ।
बत विविधास्तनुभङ्गीर्मुग्धकुरङ्गीयमाचरति ॥ ३०९ ॥

निजेति । स्वशरीरच्छायायां विश्रान्तिमासाद्य घर्मविपत्तिं दूरीकर्तुम् । बतेति खेदे । इयं मुग्धकुरङ्गी विविधशरीरचेष्टाः करोति । परं तु न तापोपशमनं भावीति भावः । एवं च स्वदेहच्छायारूपस्वाधीननायकमात्रावलम्बेन मदनसंतापनिवारणाय विविधचेष्टाकरणेऽपि मूढनायिकायास्तव न तन्निवारणम्, अतोऽन्यन्नायकावलम्बनमेव मदनसंतापनिवारकमिति द्योत्यते । यद्वा सख्युपदेशोऽयम् । जातिवर्णनमेतदित्यृजवः ॥

कार्येणैव कारणप्रतिष्ठेति काचित्कांचिद्वक्ति—

न हसन्ति जरठ इति यद्वल्लवनिता नमन्ति नन्दमपि ।
सखि स यशोदातनयो नित्यं कन्दलितकंदर्पः ॥ ३१० ॥

न हसन्तीति । यद्यस्मात्कारणात्स प्रसिद्धो यशोदातनयः कृष्णो नित्यमभिवर्धमानमदनः, अतो हे सखि, वल्लवनिता नन्दं जरठ इति न हसन्ति । न केवलं हास्याभावः, अपि तु प्रणमन्ति । एवं च कृष्णस्य कंदर्पशालित्वावगमेन नन्देऽपि जरठाभावनिर्णयो मूढस्त्रीणामपि तत्र किमु वाच्यं चतुराङ्गनानां कार्येण कारणस्वरूपज्ञानमिति व्यज्यते । यद्वा स्वकार्येमेव साधनीयमिति कांचित्काचिदुपदिशति । एवं च हास्यार्हेऽपि हास्याकरणेन प्रत्युतप्रणामादिना नन्दं परितोष्य मदनातिशयशालिश्रीकृष्णाद्यनुसरणं वल्लववनिता अपि कुर्वन्ति । त्वं त्वत्यन्तचतुरात एवमेव स्वकार्यं साधयेति व्यज्यते । अथवा नायकार्थं श्वशुरादिसमाधानं त्वया विधेयमिति सखी श्वशुरादिदुःखवतीं नायिकामन्यनिदर्शनव्याजेनोपदिशति । एवं च परपुरुषीयरतिकलाप्रावीण्यमालक्ष्यैवमाचरन्त्यन्यास्तत्र स्वीयनायकपरितोषाय किं किं न विधेयमिति व्यज्यते ॥

सर्वात्मना स्त्रियः संरक्षणीया इति कश्चिद्वक्ति—

नीता स्वभावमर्पितवपुरपि वाम्यं न कामिनी त्यजति ।
हरदेहार्धग्रथिता निदर्शनं पार्वती तत्र ॥ ३११ ॥

नीतेति । स्वसदृशीकृतापि दत्तस्वशरीरापि । एवं चालंकरणादिदानमेतदग्रेऽकिंचित्करमिति भावः । कामिनी वाम्यं कौटिल्यं वामशरीरभागित्वं च न त्यजति । अत्र

दृष्टान्तमाह—हरेत्यादि । ग्रथितपदेन निःसारणानर्हत्वं ध्वन्यते । एवमन्यासां का वार्तेति ध्वन्यते ॥

काचित्कंचिद्वक्ति—

नागरभोगानुमितस्ववधूसौन्दर्यगर्वतरलस्य ।
निपतति पदं न भूमौ ज्ञातिपुरस्तन्तुवायस्य ॥ ३१२ ॥

नागरेति । नगरसंबन्धी । एवं च चातुर्यवत्त्वं ध्वन्यते । तेन च सुरूपाङ्गनासङ्गकारित्वम् । तरलस्य चञ्चलस्य कुविन्दस्य स्वकीयज्ञात्यग्रे भूमौ पदं न निपतति । गर्ववशादिति भावः । एवं चातिमूर्खत्वं व्यज्यते । एवं चैतादृशजातीयानां चतुरपुरुषेण स्वाङ्गनाभोगे क्रियमाणे नेर्ष्या संजायते, अंतस्त्वया सुखेनात्रागन्तव्यमिति ध्वन्यते ॥

एतादृशेन सह संगतिर्न कार्येति सखी वक्ति—

निपतति चरणे कोणे प्रविश्य निशि यन्निरीक्षते कस्तत् ।
सखि स खलु लोकपुरतः खलः स्वगरिमाणमुद्विरति ॥ ३१३ ॥

निपततीति । कोणे प्रविश्य । एवं चागणनीयत्वं व्यज्यते । रात्रौ चरणे प्रणमति तत्को निरीक्षते । न कोऽपीति भावः । स्वगरिमाणमहमेतादृशो गुणवान्यदियमत्यन्तासक्ता मयीत्यादि । यद्वा नायिकोक्तिरियम् ॥

समीचीनस्य कोपो न भवति । भवति चेत्तदानर्थावह एव स इति कश्चिद्वक्ति—

न विमोचयितुं शक्यः क्षमां महान्मोचितो यदि कथंचित् ।
मन्दरगिरिरिव गरलं निवर्तते ननु समुत्थाप्य ॥ ३१४ ॥

नेति । महाञ्श्रेष्ठः । पक्षे महापरिमाणशाली । क्षमां शान्तिं भूमिं च । ननु निश्चितम् । 'न तु' इति पाठे नञि काकुः । एवं च महतः कोपो नोत्पादनीय इति व्यज्यते ॥

किंचित्समीचीनावलम्बने दुष्प्रभुसेवा न विधेयेति कश्चिदुपदिशति—

नियतैः पदैर्निषेव्यं स्खलितेऽनर्थावहं समाश्रयति ।
संभवदन्यगतिः कः संक्रमकाष्ठं दुरीशं च ॥ ३१५ ॥

नियतैरिति । नियतैः पदैर्व्यवहारमार्गैश्चरणविन्यासैश्च । स्खलिते भ्रमे चरणच्युतौ वा । गतिराश्रयो गमनं च । संक्रमकाष्ठं नद्यादौ पारगमनायोभयतीरोपर्येकदारु स्थाप्यते तत् ॥

समीचीनजनं विना कवीनां न शोभा भवतीति कश्चिद्वक्ति—

निजपदगतिगुणरञ्जितजगतां करिणां च सत्कवीनां च ।
वहतामपि महिमानं शोभायै सज्जना एव ॥ ३१६ ॥

निजपदेति । चरणगतिः सुप्तिङन्तज्ञानं च । तद्रूपो यो गुणः । महिमानं महत्परि-

माणं प्रतिष्ठां च । सज्जना भूषणसंपादनाः । 'कल्पनासज्जने समे' इत्यमरः । पक्षे समीचीनजनाः ॥

काचित्कस्यचित्प्रेमाणं स्तौति—

नोत्तपते न स्नेहं हरति न निर्वाति न मलिनो भवति ।
तस्योज्ज्वलो निशि निशि प्रेमा रत्नप्रदीप इव ॥ ३१७ ॥

नोत्तपत इति । नोत्तपते नाधिकः । सम एवेत्यर्थः । पक्षे न दाहकः । न प्रीतिनाशकः । पक्षे न तैलनाशकश्च । न नश्यति । न मलिनम् । दुःखसंपादकमित्यर्थः । पक्षे न कज्जलं वमति । उज्ज्वलो मालिन्यशून्यः । अत्र मालिन्यजनकत्वाभावप्रतिपादनेनैव वैमल्यार्थसिद्धावेतत्कथनं न तथोचितमित्याभाति । निशीत्येतावता दिवा स्नेहाप्रदर्शनेन लोकगोपनादिचातुर्यवत्तया चिरकालीनसंगतिनिर्वाहकत्वं व्यज्यते ॥

काचित्कस्मिंश्चित्स्वासक्तिं कांचिद्वक्ति—

निहितान्निहितानुज्झति नियतं मम पार्थिवानपि प्रेम ।
भ्रामं भ्रामं तिष्ठति तत्रैव कुलालचक्रमिव ॥ ३१८ ॥

निहितानिति । निहितान्सख्यादिप्ररोचनया प्रेमारूढान्पार्थिवानपि भूपतीनपि । एवं चासक्त्यर्हत्वं व्यज्यते । पक्षे पृथ्वीविकारान्घटादीन् । मम प्रेम नियतम् । एवं च नान्यथाभाव आशङ्कनीय इति भावः । त्यजति । भ्रान्त्वा कुलालचक्रमिव तस्मिन्नेव तिष्ठति ॥

कश्चिन्नायिकासखीं वक्ति—

निर्भरमपि संभुक्तं दृष्ट्वा प्रातः पिबन्न तृप्यामि ।
जघनमनंशुकमस्याः कोक इवाशिशिरकरबिम्बम् ॥ ३१९ ॥

निर्भरमिति । अत्यन्तं संभुक्तमपि विगतवसनमस्या जघनं सूर्यबिम्बं कोक इव दृष्ट्वा प्रातः । एवं च तथाविधरतविरतावप्येवं गतिस्तत्र दिनक्षणवृद्धौ का वाच्येति व्यज्यते । सादरावलोकनं कुर्वन्न तृप्यामि ॥

कश्चिद्वयस्यं वक्ति—

निबिडघटितोरुयुगलां श्वासोत्तब्धस्तनार्पितव्यजनाम् ।
तां स्निग्धकुपितदृष्टिं स्मरामि रतनिःसहां सुतनुम् ॥ ३२० ॥

निबिडेति । अत्यन्तसंघटितोरुद्वयाम् । सुरतक्लेशादिति भावः । निःश्वासस्तब्धस्तनदत्तव्यजनाम् । खेदापनोदार्थं गृहीतव्यजनस्य चालनासामर्थ्यादिति भावः । स्निग्धत्वं च सौख्यात्कुपितत्वं च क्लेशवशादिति भावः । यद्वा रतनिःसहाङ्गत्वाद्वसनाग्रहादूरुघटनं प्रथमगृहीतव्यजनेन स्तनपिधानमिति भावः ॥

गुणेष्वत्यन्तं यत्नो विधेय इति कश्चित्कंचिदुपदिशति—

निर्गुण इति मृत इति च द्वावेकार्थाभिधायिनौ विद्धि ।
पश्य धनुर्गुणशून्यं निर्जीवं तदिह शंसन्ति ॥ ३२१ ॥

निर्गुण इति । गुणाश्चातुर्यादयः । एकार्थप्रतिपादकौ । अमुमेवार्थमर्थान्तरन्यासेन द्रढयति—गुणशून्यम् । 'मौर्वी ज्या शिञ्जिनी गुणः' । निर्जीवं निर्गता जीवा यस्मात्तम् । 'जीवा ज्या शिञ्जिनीत्यपि' इत्यभिधानात् । यस्माद्वदन्ति । एवं च निर्गुणजीवनापेक्षया मरणमेव सम्यगिति द्योत्यते ॥

नायिका नायकचित्तं व्याक्षिपति—

निजसूक्ष्मसूत्रलम्बी विलोचनं तरुण ते क्षणं हरतु ।
अयमुद्गृहीतबडिशः कर्कट इव मर्कटः पुरतः ॥ ३२२ ॥

निजेति । तरुणेत्यनेन स्वतो द्रढत्वेऽप्येतादृशचित्तव्याक्षेपेणातिदार्ढ्यं भावीति व्यज्यते । 'बडिशं मत्स्यवेधनम्' इत्यमरः । कर्कटः । 'स्यात्कुलीरः कर्कटकः' इत्यमरः । मर्कटो लूता । 'लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः' इत्यमरः । यद्वात्रागतं स्थितं मयेति वादिनं नायकं नायिका वक्ति । एवं च सूक्ष्मत्वेन त्रुटनार्हत्वेऽपि तदभावान्न त्वत्संचरणमिति व्यज्यते । अथवा केनाप्यत्र नागम्यत इति संकेतस्थलमिदमिति ध्वन्यते ॥

ग्रामीणवसतिशालितयेयं न तथा गुणशालिनीति विभावयन्तं कंचन नायिकासखी वक्ति—

नागर गीतिरिवासौ ग्रामस्थित्यापि भूषिता सुतनुः ।
कस्तूरी न मृगोदरवासवशाद्विस्रतामेति ॥ ३२३ ॥

नागरेति । हे नागर, असौ सुतनुर्गीतिरिव । ग्रामो नगरादिभिन्नः । पक्षे 'ग्रामः स्वरसमूहः स्यान्मूर्छनादेः समाश्रयः' इति लक्षणलक्षितः । तत्र स्थित्यापि । विस्रतां दौर्गन्ध्यम् । एवं चेयमत्यन्तलक्षणशालिनी, अतस्त्वमस्यामासक्तिं कुर्विति व्यज्यते ॥

कुरबककुसुमशय्यायां सुरतं विधायागतां नायिकां सखी वक्ति—

नखलिखितस्तनि कुरबकमयपृष्ठे भूमिलुलितविरसाङ्गि ।
हृदयविदारणनिःसृतकुसुमास्त्रशरेव हरसि मनः ॥ ३२४ ॥

नखेति । कुरबकप्रचुरपृष्ठे । भूमौ लुलितानि विरसान्यङ्गानि यस्यास्तत्संबुद्धिः । निःसृताः । पृष्ठमार्गेणेति भावः । नैतानि पृष्ठलग्नानि कुरबककुसुमानि, किं तु हृदयलग्नाः पृष्ठविनिर्गता मन्मथबाणा इति भावः । एवं च मां प्रत्येतद्गोपनमनुचितमिति द्योत्यते ॥

सर्वभार्यासु समतया वर्तितव्यमिति कश्चित्कंचिदुपदिशति—

नीता लघिमानमियं तस्यां गरिमाणमधिकमर्पयसि ।
भार इव विषमभार्यः सुदुर्वहो भवति गृहवासः ॥ ३२५ ॥

नीतेति । इयं लघुतां प्रापिता तस्यामधिकं गौरवं करोषि । विषमस्त्रीकः विषमे परस्परविरुद्धे स्त्रियौ यत्र । विषमधृतश्च भार इव । गृहवासः सुदुर्वहः सुतरां दुर्वहः । 'अर्पयति' इति पाठे लाघवं नीतेयं तस्यामतिगौरवं करोति । एवं च सा लघिमानं नीतैतस्यां गरिमाणमर्पयति । एवमेका गरिमाणं नीतान्यस्यां लाघवमापादयतीति भार इव सुदुर्वहो विषमभार्यो गृहवास इति कश्चित्सखायं वक्ति । एवं च समतासंपादनमशक्यमिति भावः ॥

अकस्मादेवानेनागत्य कथमिदमकारीति वादिनीं नायिकां सखी वक्ति—

न च दूती न च याच्ञा न चाञ्जलिर्न च कटाक्षविक्षेपः ।
सौभाग्यमानिनां सखि कचग्रहः प्रथममभियोगः ॥ ३२६ ॥

न चेति । सुभगाभिमानशालिनायकानां नायिकास्वाधीनतायां न दूतीप्रेषणाद्यपेक्षितम्, किं तु केशग्रह एव प्रथमं वश्यतासंपादनोपाय इति भावः ॥

मन्मथावस्थायां न किंचित्परिस्फुरतीति कश्चिद्वक्ति—

निशि विषमकुसुमविशिखप्रेरितयोर्मीनलब्धरतिरसयोः ।
मानस्तथैव विलसति दंपत्योरशिथिलग्रन्थिः ॥ ३२७ ॥

निशीति । विषमत्वेन दुःसहत्वं ध्वन्यते ॥

वारवनितासंगतिरनुचितेति कश्चित्कंचिदुपदिशति—

निजगात्रनिर्विशेषस्थापितमपि सारमखिलमादाय ।
निर्मोकं च भुजंगी मुञ्चति पुरुषं च वारवधूः ॥ ३२८ ॥

निजेति । स्वशरीरसमतया स्थापितम् । एवं चातिप्रियत्वमावेद्यते । समग्रं सारभूतं वस्तु गृहीत्वा कञ्चुकं सर्पिणी पुरुषं वाराङ्गना त्यजति । कञ्चुकवन्निःसारतां विधाय त्यजति वेश्या, अतो न तत्संगतिरुचितेति व्यज्यते ॥

सखी नायिकां वक्ति—

नृत्यश्रमघर्मार्द्रं मुञ्चसि कृच्छ्रेण कञ्चुकं सुतनु ।
मकरन्दोदकजुष्टं मदनधनुर्वल्लिरिव चोलम् ॥ ३२९ ॥

नृत्येति । नर्तनश्रमेण यः स्वेदस्तेनार्द्रं कञ्चुकं क्लेशेन त्यजसि । पुष्परसप्रादुर्भावाक्रान्तं चोलं मदनधनुर्वल्लिरिव । एवं च सुरतश्रमे किं त्वया विधेयमिति परिहासो व्यज्यते ॥

नायिकादुश्चरितं विज्ञाय सखी वक्ति—

नाहं वदामि सुतनु त्वमशीला वा प्रचण्डचरिता वा।
प्रेमस्वभावसुलभं भयमुदयति मम तु हृदयस्य ॥ ३३० ॥

नाहमिति। हे सुतनु, त्वं शीलशून्या प्रचण्डचरिता वेति नाहं वदामि। तु पुनर्मम हृदयस्य प्रीतिस्वभावसुलभं भयमुदेति। एवं च कदाचित्केनचिदितीदं ज्ञातं चेत्तदा कथं भविष्यतीति त्वद्विषयकप्रीतिमत्तया मम तु भयमुत्पद्यत इति भावः। एवं च प्रीत्यभावेऽप्यस्य जाताप्यसमीचीनता न दुःखदेति ध्वन्यते। तेन चैवं न विधेयमिति॥

दूती कयाचन संगमयितुं कंचन नायकं वक्ति—

न निरूपितोऽसि सख्या नियतं नेत्रत्रिभागमात्रेण।
हारयति येन कुसुमं विमुखे त्वयि कण्ठ इव देवे ॥ ३३१ ॥

नेति। सख्या नायिकया नेत्रत्रिभागमात्रेण कटाक्षमात्रेण न निरूपितोऽसि न विलोकितोऽसि। एवं चान्तःकरणेन सा त्वय्यत्यन्तमनुरागभागिनी संवृत्तेति ध्वन्यते। तेन च दैवादवलोकितोऽहं तयेति त्वया सर्वात्मना न मन्तव्यमिति तदनुरागमेव विवृणोति। येन कारणेन देव इव त्वयि विमुखे कृतपराङ्मुखीभावे सहोपमेयम्। एवं च त्वद्वैमुख्ये देववैमुख्यं जातमिति भावः। एवं च त्वद्वैमुख्यसंपादनद्वारैव देवप्रातिकूल्यमिति देवाधिकस्त्वं तस्या इति ध्वन्यते। कण्ठे। स्थितमिति भावः। कुसुमं हारयति दूरीकारयति। एवं च त्वत्पराङ्मुखताविचारसमयसंजातविरहवशात्परित्यक्तहारस्य दैवादवस्थितैककुसुमस्य न स्वतो दूरीकरणमसामर्थ्यात्, अतोऽतिविरहक्षीणतातिशयवत्तयातिदूयमाना नोपेक्षणीयेयं त्वयेति ध्वन्यते। एवं च मुखपराङ्मुखवृत्तिमात्रादेवमवस्था तस्याः का वाच्या दिवसपरिकलनायामिति कुसुमं कण्ठे हारत्वेन करोति। एवं च त्वत्पराङ्मुखवृत्तिसमयमेवं कार्श्यं तस्याः संवृत्तमित्यावेद्यत इत्यप्याहुः॥

कथमनया त्वं ताडित इति वादिनं कश्चित्समाधत्ते—

नखदशनमुष्टिपातैरदयैरालिङ्गनैश्च सुभगस्य।
अपराधं शंसन्त्यः शान्तिं रचयन्ति रागिण्यः ॥ ३३२ ॥

नखेति। अत्र पातशब्देन संयोगो लक्ष्यते। एवं च दन्तनखक्षताभिपातैरित्यर्थः। अदयैः। गाढैरित्यर्थः। आलिङ्गनैः। सुभगस्य, न त्वभाग्यस्य। अपराधम्। एवं चैकापराध एतादृशम्, किं पुनर्बह्वपराध इति भावः। शंसन्त्यः। एवं च न वास्तवापराधख्यापनमिति भावः। अनुरागवत्यः। एवं चान्यासामन्यादृशी रीतिरिति भावः। शान्तिं क्रोधोपशमं रचयन्ति। एवं च नायककर्तृककोपपरिहारापेक्षापि नेति भावः। एवं च यस्यैवात्यन्तमासक्ता नायिका तस्यैवैतादृशी रीतिः, नान्यस्येति व्यज्यते॥

कस्यचिदासक्त्या गर्वितां कांचित्काचिदन्योक्त्या वक्ति—

न गुणे न लक्षणेऽपि च वयसि च रूपे च नादरो विहितः।
त्वयि सौरभेयि घण्टा कपिलापुत्रीति बद्धेयम् ॥ ३३३ ॥

नेति। गुणे बहुदोग्धृत्वादौ कलाकौशले च। लक्षणे सामुद्रिकोक्तादौ। तारुण्ये। रूपे शुक्लादौ सौन्दर्ये च। आदरो न विहितः। सौरभेयि, त्वयि कपिलायाः पुत्रीति हेतोरियं घण्टा निबद्धा। एवं च त्वन्मातुर्गुणवत्त्वादिना प्रसिद्ध्या तज्जन्यत्वमात्रेणैवं वृत्तमिति किं गर्वमावहसीति व्यज्यते॥

निष्कारणमेव कलहादिकं भवति भवद्गेहे किमिदमिति वादिनं कश्चिद्वक्ति—

निष्कारणापराधं निष्कारणकलहरोषपरितोषम्।
सामान्यमरणजीवनसुखदुःखं जयति दांपत्यम् ॥ ३३४ ॥

निरिति। कारणं विनैवापराधो यस्य। कारणं विनैव कलहक्रोधसंतोषा यस्य। साधारणं मरणं जीवनं सुखं दुःखं यस्य। जायापतिभावो दांपत्यं सर्वोत्कर्षेण वर्तते। एवं चैतादृग्यत्र भवति दांपत्यं तदपकृष्टमिति व्यज्यते। तेन च स्वस्मिन्नाधिक्यम्। एवं चातिशयितप्रेमवत्तया क्षणक्षण एवापराधसंभावना तद्विलयश्चेति ध्वन्यते। सामान्यमित्यादिनैकात्म्यमभिव्यज्यते॥

कश्चिदेकदा प्राप्तसङ्गां तदुत्तरं च किंचिन्निमित्तविच्युतसङ्गां कांचिद्वक्ति—

न प्राप्यसे कराभ्यां हृदयान्नापैषि वितनुषे बाधाम्।
त्वं मम भग्नावस्थितकुसुमायुधविशिखफलिकेव ॥ ३३५ ॥

नेति। भग्ना सत्यवस्थिता या मदनशराग्रलोहशलाका तद्वत्त्वं हस्तगता न भवसि। हृदयान्न निःसरसि। पीडां च विस्तारयसि। भग्नावस्थितेत्यनेन करग्रहोद्यमे भीतिरावेद्यते। कुसुमायुधपदेन कोमलाङ्गीत्वं तेन चासक्तियोग्यत्वं ध्वन्यते। विशिखफलिकेत्यनेन तीक्ष्णप्रतापशालित्वं व्यज्यते। एवं च त्वदप्राप्त्याहमतिदुःखित इति ध्वन्यते॥

ममाज्ञाकारी मन्नायक इति वादिनीं कांचित्काचिद्वक्ति—

नाथेति परुषमुचितं प्रियेति दासेत्यनुग्रहो यत्र।
तद्दांपत्यमितोऽन्यन्नारी रज्जुः पशुः पुरुषः ॥ ३३६ ॥

नाथेति। यत्र नाथेति संबोधनमतिनिष्ठुरम्। प्रियेत्युचितम्। यथा कस्यचिदागतस्य किंचिदुचितं क्रियते तथा प्रियेति संबोधनमुचितमित्यर्थः। दासेत्यनुग्रहः। आत्मत्वेनाङ्गीकार इत्यर्थः। एवं चाभिन्नप्रायतया नोपचारादिर्यत्रेति भावः। तद्दांपत्यं जायापतिभावः। इतोऽन्यन्नारी रज्जुः। एवं चाकर्षणयोग्यत्वं ध्वन्यते। पुरुषः पशुः। एवं च रसानभिज्ञत्वं ध्वन्यते। यद्वा नायकस्येयमुक्तिः॥

पूर्वनायिकासखीं प्रति नायको वक्ति—

निहितायामस्यामपि सैवैका मनसि मे स्फुरति।
रेखान्तरोपधानात्पत्राक्षरराजिरिव दयिता ॥ ३३७ ॥

निहितायामिति। अस्यां पुरोवर्तिन्यां मनसि निहितायामपि सैव त्वन्नायिकैवैका दयिता मे मनसि स्फुरति। एवं च तस्यामेव ममासक्तिरिति व्यज्यते। रेखान्तरविधानात्पत्ररूपाक्षरपङ्क्तिरिव। एवं च स्थिरत्वं ध्वन्यते॥

कयाचन किंचिदवलोकितः कश्चित्तां सपरिहासं वक्ति—

निधिनिःक्षेपस्थानस्योपरि चिह्नार्थमिव लता निहिता।
लोभयति तव तनूदरि जघनतटादुपरि रोमाली ॥ ३३८ ॥

निधीति। निधेः। 'निधिर्नाशेवधिर्भेदाः' इत्यमरः। निःक्षेपस्थानं तदुपरि चिह्नार्थम्। विस्मरणाभावायेति भावः। निहिता लतेव। हे तनूदरि। एवं च निधिनिःक्षेपयोग्यत्वं ध्वन्यते। तव जघनस्य तटात्प्रान्तात्। तटपदेन लतारोपणयोग्यत्वं ध्वन्यते। रोमराजिर्लोभयति। निधिस्थानस्थिताया लोभजनकत्वौचित्यमिति भावः। एवं च जघनाधो निधिनिःक्षेपस्थानमस्तीति परिहासो व्यज्यते। यद्वा सगर्भासीति। यत्र हि निधिः स्थाप्यते तच्चिह्नार्थं लतादि क्रियत इति लौकिकम्॥

तस्याः सखी तं वक्ति—

निहितार्धलोचनायास्त्वं तस्या हरसि हृदयपर्यन्तम्।
न सुभग समुचितमीदृशमङ्गुलिदाने भुजं गिलसि ॥ ३३९ ॥

निहितेति। निहितार्धलोचनायास्त्वयि किंचित्कटाक्षं कुर्वाणायास्तस्यास्त्वं हृदयपर्यन्तं हरसि। कथमन्यथैतादृशं वचनमिति भावः। सुभग। एवं चान्यादृशवचनानौचित्यं व्यज्यते। ईदृशं समुचितं न। यदङ्गुलिदाने भुजं गिलसि॥

बहवस्तरुणा ममापेक्षां कुर्वन्तीति गर्वशालिनीं कांचित्काचिद्वक्ति—

नीत्वागारं रजनीजागरमेकं च सादरं दत्त्वा।
अचिरेण कैर्न तरुणैर्दुर्गापत्रीव मुक्तासि ॥ ३४० ॥

नीत्वेति। आगारं गृहं नीत्वा। एवं चान्यगृहगमनेन लघुत्वमावेद्यते। आदरसहितमेकं न बहुरात्रिजागरम्। दत्त्वा तरुणैर्दुर्गापत्रीव शीघ्रं कैर्न मुक्तासि। एवं चैकादिनोत्तरमेव सर्वेषां न तवासक्तिरिति व्यज्यते। तेन च त्वं गुणरहितैव। एवं चैकमात्रासक्तिमत्येव समीचीनेति ध्वन्यते। नवरात्रे बिल्वशाखामष्टम्यामानीय रात्रौ संपूज्य जागरादि विधाय नवम्यां परित्यज्यत इति देशविशेषरीतिः॥

यत्र यत्र यद्यत्सामर्थ्यं तत्र तत्र तवैवेत्यन्योक्त्या कश्चित्कंचिद्वक्ति—

नक्षत्रेऽग्राविन्दावुदरे कनके मणौ दृशि समुद्रे ।
यत्खलु तेजस्तदखिलमोजायितमब्जमित्रस्य ॥ ३४१ ॥

नक्षत्र इति । अग्रावग्र्याश्रये । उदरे । अन्नादिपाकतेजसः सत्त्वादिति भावः । कनके । तैजसत्वादिति भावः । मणौ । प्रकाशकत्वादिति भावः । समुद्रे । वडवानलस्य सत्त्वादिति भावः । यत्तेजस्तदखिलमब्जमित्रस्य । एवं च येन सह विरोधस्तेनैव सह तत्करणमुचितं न त्वन्येनापि सह तत्करणमुचितमिति ज्ञानविशेषशालित्वं ध्वन्यते । ओजायितम् । सामर्थ्यमित्यर्थः ॥

नायिकादूती नायकं वक्ति—

न सवर्णो न च रूपं न संस्क्रिया कापि नैव सा प्रकृतिः ।
बाला त्वद्विरहापदि जातापभ्रंशभाषेव ॥ ३४२ ॥

न सवर्ण इति । स पूर्वानुभूतो वर्णः कान्तिः । पक्षे सवर्णकार्यम् । न । न केवलं पूर्वकान्तिहानिः, अपि तु न तत्स्वरूपमपीत्याह—न च रूपम् । पक्षे प्रकृतिप्रत्ययनिष्पाद्यशब्दस्वरूपम् । ननूद्वर्तनादिसंस्कारेण कान्तिर्भविष्यतीत्यत्राह—संस्क्रिया न । पक्षे साधुत्वम् । ननु संस्क्रिया कार्येत्युपदिश्यते न कुतो भवत्येत्यत आह—सा पूर्वानुभूता कापि स्वल्पापि प्रकृतिः स्वभावो नैव । एवं चोपदेशकरणे भीतिरावेद्यते । पक्षे प्रातिपदिकम् । बाला । एवं चाज्ञत्वं तेन च नायके शठत्वं द्योत्यते । त्वत्संबन्धिवियोगविपत्तौ । एवं च विपन्नस्य पूर्वकान्त्याद्यपगच्छतीति भावः । अपभ्रंशभाषासाधुवाक्यम् । यद्वा इवशब्दोऽवधारणार्थकः । अपगतो भ्रंशोऽसमीचीनत्वं यस्या एतादृशी भाषा यस्यास्तादृश्येव संवृत्ता । एवं च त्वद्विरहजनितदुःखेन पूर्वकान्त्याद्यपगमेऽपि त्वद्विषये न कदाप्यसम्यग्वदतीति न तादृशी काप्यन्या सहनशीलेति व्यज्यते । तेन चैतादृश्यामौदासीन्यमत्यन्तानुचितमिति ॥

अलंकारादिकरणेन विलम्बकारिणीं नायिकां संकेतं प्रति सत्वरनिर्गमनाय सखी वक्ति—

न विभूषणे तवास्था वपुर्गुणेनैव जयसि सखि यूनः ।
अवधीरितास्त्रशस्त्रा कुसुमेषोर्मर्मच्छिदेव ॥ ३४३ ॥

नेति । हे सखि । एवं च यथार्हवादार्हत्वं ध्वन्यते । तव । एवं चान्यादृशी गतिरन्यासामिति भावः । एवं चान्याभिर्यद्विधीयते तत्स्वयमपि विधेयमिति मनसि न विधेयमिति व्यज्यते । विशिष्टभूषणे । एवं च सामान्यतो भूषणानि सन्त्येवेति भावः । 'न च' इति तु युक्तः पाठः । आस्थासक्तिः । न । उचितेति शेषः । तत्कार्यस्य नायकवशत्वसंपादनादेः साहजिकवपुर्गुणेनैव संपादनादिति भावः । इदमेव द्रढयति—वपुःकान्त्यैव

तरुणान्स्वाधीनीकरोषि । अत्र दृष्टान्तमाह—मदनस्य तिरस्कृतास्त्रशस्त्रा मल्लविद्येव । सापि शारीरकर्तव्यतैव जयकर्त्रीति भावः । एवं च मा विलम्बं कुर्विति व्यज्यते ॥

काचिन्नायिका सखीं प्रत्याह—

नेत्राकृष्टो भ्रामं भ्रामं प्रेयान्यथा यथास्ति तथा ।
सखि मन्थयति मनो मम दधिभाण्डं मन्थदण्ड इव ॥ ३४४ ॥

नेत्रेति । नेत्रेण चक्षुषाकृष्टः । पक्षे गुणेन । 'नेत्रमक्षिणि गुणेऽपि च' इत्यभिधानात् । भ्रान्त्वा भ्रान्त्वा प्रेयान् । एवं च मनः संलग्नतायोग्यत्वं व्यज्यते । यथा यथास्ति तथा मन्थदण्डो दधिपात्रमिव मम मनो मन्थयति । एवं च मया कटाक्षित इतस्ततो मत्सविधभ्रममाणस्त्वया सत्वरं संगमनीयो येन मनोदुःखं दूरीभविष्यतीति व्यज्यते ॥

दूती नायकं प्रत्याह—

नानावर्णकरूपं प्रकल्पयन्ती मनोहरं तन्वी ।
चित्रकरतूलिकेव त्वां सा प्रतिभित्ति भावयति ॥ ३४५ ॥

नानेति । चित्रलेखकहस्तगतलेखनीवत्सा तन्वी कृशाङ्गी सूक्ष्मा च भित्तौ भित्तौ मनोज्ञं नानाप्रतिमारूपम् । पक्षे नानावर्णा एव नानावर्णकानि तैः कृत्वा रूपं यस्यैतादृशं चित्रं प्रकल्पयन्ती भावयन्ती । एवं च चित्रविलोकनव्याजेन त्वामेव भावयतीति भावः ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता नकारव्रज्या ।

पकारव्रज्या ।

कस्याश्चिद्वचनमात्रादेव भीतान्प्रति कश्चिदन्योक्त्या वक्ति—

पथिकासक्ता किंचिन्न वेद घनकलमगोपिता गोपी ।
केलिकलाहुंकारैः कीरावलि मोघमपसरसि ॥ ३४६ ॥

पथिकेति । पथिके आसक्ता । घनाः कलमाः श्वेतशालयस्तैर्गोपिता । घनपदेन किंचिद्भक्षणेऽपि ज्ञानायोग्यत्वं व्यज्यते । गोपीत्यनेन स्वतो मौर्ख्यं द्योत्यते । अतः केलिकलासंबन्धिहुंकारैः । एवं च न भवन्निवारणार्थमेते शब्दा इति भावः । कीरावलीत्यनेन वचनपटुत्वं व्यज्यते । वृथापसरसि । एवं च भवद्भिः कलमभक्षणं विधेयमिति भावः । एवं चैतस्याः प्रचुरधनवत्याः सापराधत्वाच्च वचनमात्रभीतिमुत्सृज्य किंचिदेतस्याः सकाशाद्ग्राह्यमिति व्यज्यते ॥

नायिकासखी दूतीं प्रत्याह—

प्रणमति पश्यति चुम्बति संश्लिष्यति पुलकमुकुलितैरङ्गैः ।
प्रियसङ्गाय स्फुरितां वियोगिनी वामबाहुलताम् ॥ ३४७ ॥

प्रणमतीति । प्रियसंगमसूचकस्फुरणशालिनीं वामबाहुलतां वियोगिनी प्रणमती-

त्यादि योजना । एवं च यत्र प्रियसंगमसूचकस्फुरणवदचेतनवामबाहुलतायाः किं किं न क्रियते विरहवत्या तत्र किमु वाच्यं सद्यः प्रियसमागमकारिण्या दूत्या इति भावः । अत एव प्रणामानर्हत्वव्यञ्जकं वामपदमर्थवत् ॥

काचन कंचित्प्रति वक्ति—

प्रविशसि न च निर्गन्तुं जानासि व्याकुलत्वमातनुषे ।
बालक चेतसि तस्याश्चक्रव्यूहेऽभिमन्युरिव ॥ ३४८ ॥

प्रविशसीति । हे बालक । एवं च ज्ञानशून्यत्वं व्यज्यते । चक्रव्यूहेऽभिमन्युरिव तस्याश्चेतसि त्वं प्रविशसि । व्याकुलत्वं पीडामातनुषे । निर्गन्तुं न च जानासि । एवं च सा त्वय्यत्यन्तमासक्ता त्वमेवाज्ञत्वमाचरसीति व्यज्यते । यद्वा त्वं व्याकुलतां कुरुषे । एवं चैतस्या हस्तात्तव न निर्गम इत्यावेद्यते ॥

समीचीनानां समीचीनोऽसमीचीनानामसमीचीन एवाश्रय इति कश्चिदन्योक्त्या वक्ति—

पश्यानुरूपमिन्दिन्दिरेण माकन्दशेखरो मुखरः ।
अपि च पिचुमन्दमुकुले मौकुलिकुलमाकुलं मिलति ॥ ३४९ ॥

पश्येति । हे सखि, इन्दिन्दिरेण भ्रमरेण । एकत्वमविवक्षितम् । माकन्दस्य । 'माकन्दः सहकारोऽस्त्री' इत्यनुशासनाच्चूतस्य मस्तको मुखरः । अन्यच्च पिचुमन्दस्य । 'पिचुमन्दश्च निम्बः' इत्यमरः । तन्मुकुले मौकुलीनाम् । 'एकदृष्टिश्चिरंजीवी मौकुलिर्द्विक इत्यपि' इति क्षीरस्वामी । काकानां समूहः । आकुलमिति क्रियाविशेषणम् । मिलति । इदमनुरूपं त्वं पश्य । एवं च यथायोग्य एवाश्रयो भवतीति भावः । यद्वा समीचीनानामन्यादृशरीत्यार्जनमसमीचीनानामन्यादृशरीत्या भवतीति कश्चिदन्योक्त्या वक्ति । माकन्दत्वेन परिमलबहुलत्वं तेन च गमनयोग्यत्वं ध्वन्यते । शेखरो मुखर इत्यनेन संनिधिसंस्थित्या पाण्डित्यप्रदर्शनद्वारार्जनकारित्वमावेद्यते । यद्वा शिखरस्थितिप्रतिपादनेन प्रतिष्ठावत्त्वं द्योत्यते । मुकुल इत्येकवचनेनातिस्वल्पत्वमाकुल इत्यनेनाधैर्यवत्त्वप्रतिपादनेन प्रतिष्ठावैधुर्यवत्त्वं ध्वन्यते । एवं च यथा भ्रमरकाकयोरर्जने भेदस्तथा समीचीनासमीचीनयोरिति ध्वन्यते । अथवा समुदायसंपादनपुरःसरातिलौल्येऽपि न किंचित्फलं नीचानामेकस्य समीचीनस्यापि फलं भवतीत्यन्योक्त्या कश्चिद्वक्ति ॥

सखी नायकसमक्षं नायिकां कयाचन भङ्ग्या स्तौति—

प्रतिबिम्बसंभृताननमादर्शं सुमुख मम सखीहस्तात् ।
आदातुमिच्छसि मुधा किं लीलाकमलमोहेन ॥ ३५० ॥

प्रतीति । हे सुमुख, प्रतिबिम्बेन संभृतं व्याप्तमाननं यस्मिंस्तमादर्शम् । एवं च प्रतिबिम्बभवनयोग्यत्वं ध्वन्यते । लीलाकमलभ्रान्त्या मम सखीकरादृथा । लीलाकमलाभावादिति भावः । ग्रहीतुं किमितीच्छसि । सुमुखेत्यनेन बुद्धिशालित्वमावेद्यते ।

एवं च बुद्धिविशेषवतोऽपि तव यत्र मत्सखीकरतलाकलितललितप्रतिबिम्बितवदनारविन्दादर्शे लीलाकमलभ्रमः, तत्रास्मद्विधानामीदृशभ्रमवत्तायां किमपूर्वमिति व्यज्यते । तेन च नायिकासौन्दर्यम् । अत्र च नायिकावदनप्रतिबिम्बभरितत्वादादर्श एव लीलाकमलभ्रमः । 'सुमुखि' इति पाठे नायको नायिकां वक्ति । सुमुखीत्यनेन कमलभ्रान्तिजनकत्वमावेद्यते ॥

सखी मानवतीं नायिकां वक्ति—

प्राचीनाचलमौलेर्यथा शशी गगनमध्यमधिवसति ।
त्वां सखि पश्यामि तथा छायामिव संकुचन्मानाम् ॥ ३९१ ॥

प्राचीनेति । हे सखि, प्राक्प्राच्यां भवो योऽचलः । पूर्वाचल इत्यर्थः । तन्मस्तकाद्यथा चन्द्रो गगनमध्यमधिवसति तथा छायामिव त्वाम् । संकुचन्मानः प्रियापराधजन्यचेष्टारूपः । पक्षे परिमाणं यस्या एतादृशीम् । पश्यामि । अत्रोभयत्र वीप्सा युक्तेत्याभाति । एवं च यथा यथा चन्द्रप्रकाशातिशयस्तथा तथोद्दीपनातिशयेन मानक्षीणता भवतीत्यत इदानीं तव समयो गतः पुनर्नायास्यतीत्यत इदानीमेव त्वं तं परित्यज्य यथेच्छं नायकेन सह रमस्वेति व्यज्यते । यथा यथा शशी गगनमध्यमधिवसति करोति तथा तथा छायापि संकुचिता भवति ॥

कथमागतेन तेन सह संगतिः स्थलाभावान्न वृत्तेति वादिनीं सखीं नायिका वक्ति—

प्राङ्गणकोणेऽपि निशापतिः स तापं सुधामयो हरति ।
यदि मां रजनिज्वर इव सखि स न निरुणद्धि गेहपतिः ॥ ३९२ ॥

प्राङ्गणेति । हे सखि, प्रकृष्टमङ्गणं तत्कोणेऽपि । एवं च स्थलसत्त्वमावेद्यते । स तद्वारकसंकेतशाली । सुधामृतं तत्प्रचुरः । संतापापनोदकत्वादिति भावः । निशापतिश्चन्द्रः । अथ च निशायां पतिः । उपपतिरित्यर्थः । तापं हरति । यदि मां रात्रिज्वर इव स दुष्टत्वेन प्रसिद्धो गेहपतिः, न तु प्रियः । न निरुणद्धि । एवं च यदि न तेन रात्रौ निरोधः कृतः स्यात्तदा क्वचिदङ्गणकोणेऽपि मया तेन सह रतं कृतं स्यादित्यावेद्यते । एवं च न ममापराध इति । तेन चैतत्क्षन्तव्यमिति प्रार्थना । ज्वर इवेत्युपमया नायकं प्रति स्वस्यासामर्थ्यं व्यज्यते । ज्वरवतो बहिर्निःसरणं निशि निषिद्धमिति वैद्यकम् । यद्वा गेहपतिरित्यनेन गेहस्थितवस्तुसंरक्षणकर्तृत्वं न मद्रक्षणकर्तृत्वम् । अतो दैवादद्य गृहवस्तुसंरक्षणप्रवृत्तेन द्रुतमेव गृहकपाटादिदानेन ममापि रक्षणं जातम् । अतः श्वस्तथा यतिष्ये यथावश्यं तेन सह संगमो भविष्यतीति ध्वन्यते । 'साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके' इतिवदुत्तरवाक्यान्तर्गतस्य यच्छब्दस्य तच्छब्दापेक्षेति बोध्यमत्र ॥

सखी नायकं प्रति नायिकाप्रेमाधिक्यं वक्ति—

पतिपुलकदूनगात्री स्वच्छायावीक्षणेऽपि या सभया ।
अभिसरति सुभग सा त्वां विदलन्ती कण्टकं तमसि ॥ ३९३ ॥

पतीति । पतिः, न तु प्रियः । तत्पुलकैः प्रेमजन्यसात्त्विकभावरूपैः खिन्नानि गात्राणि यस्याः सा । एवं चातिकोमलाङ्गीत्वं व्यज्यते । स्वस्य छायाया वीक्षणे सभयापि या । अपिः प्रागप्यन्वेति । सा कण्टकं दलयन्ती । कण्टकमित्येकत्वमविवक्षितम् । अन्धकारे त्वामभिसरति । हे सुभग । एतादृशनायिकाया एतादृशाभिसरणवत्त्वादिति भावः । स्वच्छायेत्यनेन परसंसर्गराहित्येनातिप्रामाणिकत्वं द्योत्यते । तेन चैतादृश्यपि त्वय्यासक्तेत्यतस्त्वया न कदापीयं परित्याज्येति ॥

अक्षक्रीडनं विधेयमधुनेति वादिनीं नायिकां नायको वक्ति—

प्रतिभूः शुको विपक्षे दण्डः शृङ्गारसंकथा गुरुषु ।
पुरुषायितं पणस्तद्बाले परिभाव्यतां दायः ॥ ३९४ ॥

प्रतिभूरिति । शुकः । एवं चान्यथाकरणशीलाभावो व्यज्यते । प्रतिभूर्लेमकः । गुरुषु शृङ्गारस्य कथनमेव विपक्षे उक्ताकरणेऽयमेव दण्डः । पुरुषायितं विपरीतरतं पणः पराजये देयं वस्तु । तत्तर्हि बाले दायः पाशपातनं परिभाव्यतां क्रियताम् । एवं चाक्षक्रीडने यदि तवास्ति रतिस्तर्ह्यनया रीत्याक्षक्रीडनं विधेयमिति भावः । एवं च रत्युत्कण्ठा ध्वन्यते । अत्र बालापदेन मुग्धा न विवक्षिता । तस्यास्त्वेवंविधप्रागल्भ्याभावात् ॥

कयाचन विलोकितः कश्चित्तां प्रत्याह—

परमोहनाय मुक्तो निष्करुणे तरुणि तव कटाक्षोऽयम् ।
विशिख इव कलितकर्णः प्रविशति हृदयं न निःसरति ॥३९५॥

परेति । उत्कृष्टसुरताय । 'मोहनं नारभेत्तावत्' इत्यादि कामतन्त्रे मोहनशब्दस्य सुरतार्थकत्वेन कथनात् । यद्वोत्कृष्टभ्रान्त्यै । अथवान्यस्य वश्यतासंपादनाय । पक्षे शत्रुमूर्छायै मरणायेति वा । मुक्तः । कलितः कर्णो येन । आकर्णविशाल इत्यर्थः । पक्षे कर्णान्ताकृष्ट इत्यर्थः । तव कटाक्षो बाण इव हृदयं प्रविशति । न निःसरति । हे तरुणि । एवं च बलवत्प्रेरितत्वेन दुःसहत्वं ध्वन्यते । अत एव निर्गतकरुणे । कलितकर्ण इत्यनेन संपूर्णाकर्षणेन भेदविशेषकर्तृत्वं द्योत्यते । एवं चाहं त्वदायत्त इति व्यज्यते ॥

सखी नायकं प्रति वक्ति—

प्रपदालम्बितभूमिश्चुम्बन्ती प्रीतिभीतिमधुराक्षी ।
प्राचीराग्रनिवेशितचिबुकतया न पतिता सुतनुः ॥ ३९६ ॥

प्रपदेति । पदाग्रावलम्बितभूमिः । प्रीतिभयाभ्यां मनोज्ञनयना । त्वां चुम्बन्ती सुतनुः । एवं च सङ्गयोग्यत्वं ध्वन्यते । वृत्यग्रस्थापितचिबुकभावेन न पतिता । एवं च साहसकारित्वमावेद्यते ॥

नायिका सखीं वक्ति—

प्रातरुपागत्य मृषा वदतः सखि नास्य विद्यते व्रीडा ।
मुखलग्नयापि योऽयं न लज्जते दग्धकालिकया ॥ ३९७ ॥

प्रातरिति । प्रातः समीपमागत्य मृषाभाषिणः । नाहमन्यत्र गत इति । अस्य । प्रियस्येत्यनुपादानादत्यन्तदुःखवत्त्वं ध्वन्यते । लज्जा न विद्यते । ननु वास्तवं न गत एव भविष्यतीयत आह—योऽयं वदनलग्नया दग्धकालिकया । नयनचुम्बनजन्ययेति भावः। दग्धपदेन तस्या द्वेषविशेषवत्तावेद्यते । न लज्जते । एवं च प्रात्यक्षिकरतचिह्नवत्त्वान्मिथ्याभाषित्वं दृढीक्रियते । अथ च श्याममुखत्वेऽपि परिहारकारकतया निर्लज्जत्वं द्योत्यते ॥

सखी नायिकां वक्ति—

पश्योत्तरस्तनूदरि फाल्गुनमासाद्य निर्जितविपक्षः ।
वैराटिरिव पतङ्गः प्रत्यानयनं करोति गवाम् ॥ ३९८ ॥

पश्येति । हे कृशोदरि, उत्तरा दिगस्त्यस्य । अर्शआदित्वादच् । उत्तरदिक्संबन्धी । पक्ष उत्तर इति तन्नाम । निर्जितहिमादिविपक्षः । पक्षे विपक्षः सुयोधनादिः । पतङ्गः सूर्यः । फाल्गुनं मासम् । पक्षेऽर्जुनम् । प्राप्य विराटापत्यमिव गवां किरणानाम् । पक्षे धेनूनाम् । परावृत्तिं करोति । हेमन्तापगमात्तेजोविशेषशालितया किरणप्रत्यायनोक्तिः । एवं च हेमन्ते गतेऽपि वसन्तादाववश्यं मदनमहत्तरशरसंत्रस्तस्तव प्रियः समायास्यतीति व्यज्यते । यद्वा यथा फाल्गुनसाहाय्येन वैराटिना गावः परावृत्त्यानीताः पतङ्गेन किरणाः, तथा त्वमपीदानींतनैतादृशसमयसाहाय्येन नायकचित्तस्याङ्गनातः परावृत्तिं विधेहीति ध्वन्यते । श्लेषमात्रमत्रेति ऋजवः । केनचित्कस्यचित्साहाय्येन स्वकीयं गतं वस्त्वानीयत इत्यन्योक्तिरपि ॥

नायको नायिकां वक्ति—

प्रमदवनं तव च स्तनशैलं मूलं गभीरसरसां च ।
जगति निदाघनिरस्तं शैत्यं दुर्गत्रयं श्रयति ॥ ३९९ ॥

प्रमदेति । अन्तःपुरसमीपवनं प्रकृष्टमदकारि वनं वा । त्वदीयस्तनशैलम्, गभीरसरसां मूलमिति दुर्गत्रयं निदाघेन ग्रीष्मेण जगति निरस्तं शैत्यं श्रयति । एवं च नितरां दाघो यस्मादिति व्युत्पत्त्या मदनसंतापसंतप्तस्य मम त्वत्कुचावेव शरणाविति व्यज्यते । तेन च त्वं मदङ्गीकारं कुर्विति । अन्योऽपि केनचित्पराभूतो वनशैलजलदुर्गाश्रयेण जीवतीति लौकिकम् । अत्र किं किं दुर्गमिति विशेषकर्माकाङ्क्षायां प्रमदेत्यादि । एवं च निदाघकाले शैत्यं स्थलत्रयेऽधिवसतीति भावः ॥

नायिकासखी नायकं वक्ति—

प्रोञ्छति तवापराधं मानं मर्दयति निर्वृतिं हरति ।
स्वकृतान्निहन्ति शपथाञ्जागरदीर्घा निशा सुभग ॥ ३९० ॥

प्रोञ्छतीति । त्वत्कृतापराधम् । एकत्वमविवक्षितम् । प्रोञ्छति । एवं च निः-

शेषतो दूरीकरोति । मानम् । नायिकया कृतमिति भावः । मर्दयति । निर्वृतिं हरति । दुःखं जनयतीत्यर्थः । नायिकाया एवेति भावः । नायिकाकृताञ्शपथान् । यद्यहमधुनानेन सह संभाषणमपि करिष्ये तर्हि विरचिताननुचरणपरिचरणं विफलीकरिष्य इत्येवमादीन् । निहन्ति । उपसर्गेण स्वकृतशपथस्मृतिबीजसंस्काराभावो व्यज्यते । जागरेण दीर्घा रात्रिः । हे सुभग । अचेतनयापि निशयानुकूल्यसंपादनादिति भावः । जागरेण दीर्घा निशा यस्या इति वा ॥

सखी नायिकावृत्तमपरसखीं वक्ति—

प्रिय आयाते दूरादभूत इव संगमोऽभवत्पूर्वः ।
मानरुदितप्रसादाः पुनरासन्नपरसुरतादौ ॥ ३६१ ॥

प्रिय इति । प्रिये, न तु पत्यौ । दूरादायाते । एवं च विरहवत्त्वमावेद्यते । प्रथमः सङ्गोऽसंजातप्राय इवाभवत् । द्वितीयसुरतारम्भे मानरुदितप्रसादाः । पुनस्त्वर्थे । अभवत् । एवं च संगमस्याप्यज्ञानादत्यन्तमन्मथविकारशालित्वमावेद्यते । स्वभाववर्णनमेतत् ॥

सखी नायिकां वक्ति—

पूर्वमहीधरशिखरे तमः समासन्नमिहिरकरकलितम् ।
शूलप्रोतं सरुधिरमिदमन्धकवपुरिवाभाति ॥ ३६२ ॥

पूर्वेति । उदयाचलमस्तके निकटवर्त्यरुणकिरणकवलितमिदं तमः शूलाग्रप्रोतसरुधिरान्धकनामकदैत्यशरीरमिव शोभते । एवं च प्रातःकालः संवृत्तः, अत उपपतिर्निःसार्यतामिति द्योत्यते । नायकसहचरवचनमिदं वा । एवं चाधुना निर्गन्तव्यमिति भीतिप्रदर्शनपुरःसरं व्यज्यते । अथवा नायिकायाः पद्मिनीत्वात्सूर्योदयोत्तरं सुरतविधानस्यौचित्येन सूर्योदयः सत्वरमेव भविष्यतीति ज्ञापकमिदं नायिकासहचरीवाक्यम् । यद्वा नायको नायिकां वक्ति । अक्षरच्युतकालंकारवदक्षरपूर्वकस्यापि युक्तितौल्यादलंकारतया पूर्वमहीधरशिखर इत्यस्याभिनवस्तनाग्र इत्यर्थः । संलग्नकाश्मीरदीप्तिकलितमिदं केशजातं शूलाग्रप्रोतरुधिराक्तान्धकासुरवपुरिव । तस्य श्यामत्वादिति भावः । आभाति । एवं च विपरीतरतसमग्रसंजातमुक्तिमुखचुम्बननमनकुचशिखरनिपतितकेशकलापवत्तयातिशयितशोभास्ति, अत एवमेव केशकलापावस्थितिरास्तामिति व्यज्यते । तेन च विपरीतरतान्न विरतिर्विधेयेति । ननु शृङ्गारबीभत्सयोर्विरोधात्कथमत्रोभयनिबन्धनमिति चेत् 'स्मर्यमाणो विरुद्धोऽपि साम्येनाथ विवक्षितः । अङ्गिन्यङ्गत्वमापन्नौ यौ तौ न दुष्टौ परस्परम् ॥' इत्युक्त्या यथा तथाविधान्धकवपुश्चमत्करोति तथैवंविधकेशकलाप इति साम्यप्रतिपादनेन दोषाभावात् ॥

सखी नायिकां शिक्षयति—

परिवृत्तनाभि लुप्तत्रिवलि श्यामस्तनाग्रमलसाक्षि ।
बहुधवलजघनरेखं वपुर्न पुरुषायितं सहते ॥ ३६३ ॥

परीति । हे अलसाक्षि । गर्भभरालसत्वादिति भावः । परिवृत्तनाभि । लुप्तत्रिवलि । श्यामचूचुकम् । बह्वयो धवला जघने नखरेखा यस्मिंस्तत् । गर्भे जघने कण्डूतेर्जायमानत्वादिति भावः । सर्वमेतत्परिपक्वगर्भचिह्नम् । ते एवंविधं शरीरं पुरुषायितं विपरीतरतम् । तत्करणसमर्थं न । एवं चाधुना प्राग्वद्विपरीतरतं न विधेयमिति व्यज्यते ॥

सखी नायकोत्साहवर्धनाय नायिकां वक्ति—

प्रारब्धनिधुवनैव स्वेदजलं कोमलाङ्गि किं वहसि ।
ज्यामर्पयितुं नमिता कुसुमास्त्रधनुर्लतेव मधु ॥ ३६४ ॥

प्रारब्धेति । आरब्धसुरतैव । अत्रोपसर्गोऽनुचितः । हे कोमलाङ्गि, स्वेदजलम् । जलपदमाधिक्यं द्योतयति । वहसि । इदं तत्किम् । नोचितमित्यर्थः । सज्जीकर्तुं नमिता कुसुमास्त्रस्य मदनस्य धनुर्लतेव मधु । एवं च सुरतारम्भ एवैतादृशश्रमः, तत्राग्रे कथं भविष्यतीति नायिकायां सौकुमार्यमावेद्यते । तेन चैतादृशी नायिका दुर्लभतरेति । मदनधनुर्लतासमताप्रतिपादनेनानयैव मदनस्य जगज्जय इति प्रतिपादनेनेतरनायिकाव्यतिरेको ध्वन्यते । यद्वारब्धनिधुवनैवेत्यनेनैतस्या अयं स्वभावो यत्सुरतादावेव श्रमो नोत्तरकालमिति ज्ञापनेन यथेच्छं भीतिमपहाय सुरतसंगरो विधेय इति नायकं प्रति व्यज्यते । नायकोक्तिरियं वा ॥

जायाजितोऽयमित्यपकीर्तिभाषिसर्वलोकावगणनां विधायापि मया त्वदधीनतयैव स्थीयत इति ज्ञापयितुं भङ्ग्यन्तरेण नायको नायिकां वक्ति—

पुंसां दर्शय सुन्दरि मुखेन्दुमीषत्रपामपाकृत्य ।
जायाजित इति रूढा जनश्रुतिर्मे यशो भवतु ॥ ३६५ ॥

पुंसामिति । हे सुन्दरि, लज्जां दूरीकृत्य स्वमुखचन्द्रमितरनायकानामीषद्दर्शय । एवं च लज्जापरित्यागस्यैतत्फलं यदीषन्मुखदर्शनमित्यत्यन्तलज्जावत्त्वमावेद्यते । ईषत्रपामपाकृत्येत्यपि योजना । चन्द्रपदेन दर्शनीयत्वमावेद्यते । तत्फलमाह—जायया जित इति ख्यातो जनवादो मे यशो भवतु । एवं च त्वदीयैतादृशसौन्दर्योत्कर्षं दृष्ट्वैतादृशनायिकाजितत्वमत्यन्तपुण्योद्रेकलभ्यमिति यशसे भवत्विति भावः । एवं च त्वमेतादृशसौन्दर्यशालिनीति ध्वन्यते । एवं चैतादृशे मयि कोपकरणमनुचितमित्यावेद्यते ॥

यद्यपि घटनाविधाननिपुणा दूती, संतापापनोदको नायकश्च वर्वर्ति तथापि निर्बन्धशालितयास्माकं न किंचिदपि फलमिति काचिदुक्ति—

प्रसरतु शरत्रियामा जगन्ति धवलयतु धाम तुहिनांशोः ।
पञ्जरचकोरिकाणां कणिकाकल्पोऽपि न विशेषः ॥ ३६६ ॥

प्रसरत्विति । शरत्कालीना रात्रिः प्रसरतु । तुहिनांशोर्धाम जगन्ति धवलयतु ।

संतापजन्यमालिन्यनिवारकतयेति भावः । पञ्जरस्थचकोरिकाणाम् । चकोरीपदेन तदेकाधीनजीवनवस्त्वमावेद्यते । कणिकातो न्यूनोऽपि न विशेषः ॥

कथमनयातिविलम्बितमिति वादिनं नायकं नायिकासखी समाधत्ते—

प्रथमागत सोत्कण्ठा चिरचलितेयं विलम्बदोषे तु ।
वक्ष्यन्ति साङ्गरागाः पथि तरवस्तव समाधानम् ॥ ३६७ ॥

प्रथमेति । हे प्रथमागत । एवं च कोपौचित्यमिति व्यज्यते । उत्कण्ठासहितेयम् । अत एव चिरकालं चलिता । स्वसदनादिति भावः । ननु विलम्बः किमित्यत आह—विलम्बदोषे तु । दोषपदेन करणानर्हत्वं ध्वन्यते । समाधानं सहाङ्गरागेण वर्तन्त एतादृशा मार्गस्थतरवो वक्ष्यन्ति । एवं च किमर्थमत्रास्माभिः समाधानं विधेयमिति भावः । पथिपदमवश्यंभाविदर्शनवत्तामावेदयति । एवं च त्वद्विरहाङ्क्रान्तिवशात्त्वङ्क्रमेण प्रतिपदपद्धतिपादपालिङ्गनेन विलम्बः संवृत्त इति व्यज्यते । तेन च क्षणमपि त्वद्विरहमसहमानेयमिति । 'विलम्बदोषेण' इति पाठे संकेते बहुकालं नायकं प्रतीक्ष्य स्वगृहं प्रति गतायां नायिकायां समागतनायकं प्रति नायिकासखी वक्ति । प्रथममागता । यतः सोत्कण्ठेयं नायिका । विलम्बदोषेण । तवेति भावः । पथि । स्वगृहस्येति भावः । अचिरम् । अधुनेत्यर्थः । चलिता । ननु मिथ्यैव त्वं वदसीत्यत्राह—तव समाधानं साङ्गरागाः । स्वगमनज्ञानाय चिह्नवन्तः कृता इत्यर्थः । तरवो वक्ष्यन्ति । एवं च न तस्या अपराध इति भावः । नकारपाठे पदच्छेदेन काक्वा व्याख्येयमाद्यव्याख्यावत् ॥

पतितेंऽशुके स्तनार्पितहस्तां तां निबिडजघनपिहितोरुम् ।
रदपदविकलितफूत्कृतिशतधुतदीपां मनः स्मरति ॥ ३६८ ॥

पतितेति । अंशुके पतिते सति स्तनस्थापितहस्ताम् । अत्यन्तं जघनाच्छादितोरुम् । ओष्ठयोर्विकलतामाप्ता या फूत्कृतिः । अत एव तच्छतेन कम्पितः, न तु निर्वापितः, दीपो यया ताम् । लज्जाभयवशादिति भावः । तां पूर्वानुभूतां नायिकां मनः स्मरति । एवमेव किमिति स्थितोऽसीति वादिनं कंचित्प्रति कस्यचिदुक्तिरियम् ॥

संकेतितक्रीडाचलमौलिकुञ्जे नायकः समधिवसतीत्यतस्त्वरया तत्र गन्तव्यमिति ज्ञापयितुमन्येषां च गमने भीतिमुपदर्शयन्ती दूती नायिकां वक्ति—

परितः स्फुरितमहौषधिमणिनिकरे केलितल्प इव शैले ।
काञ्चीगुण इव पतितः स्थितैकरत्नः फणी स्फुरति ॥ ३६९ ॥

परित इति । हे सखि, केलिशयनीय इव समन्तात्सप्रकाशौषधिमणिसमूहवति शैले । पक्षे महौषधितुल्यमणिसमूहवतीत्यर्थः । काञ्चीसूत्रमिव पतितश्चासौ स्थितैकरत्नश्च फणी स्फुरति । एवं च दीपादिस्थानाभिषिक्तौषधिसप्रकाशे विविधपल्लवादिमृदुशय्याशालिनि क्रीडाशैले निरन्तरजघनसङ्गयोग्यश्चिरागमनतया त्वदनागमनेन सालस

१. पतितेत्याद्यार्या केषुचित्पुस्तकेषु नास्ति.

इव सकलनायकशिरोरत्नरूपः प्रबलतरतयान्यजननिर्भयः खिन्नविद्याविशारदो नायकः समधिवसतीत्यतस्त्वरस्व गमनायेति ध्वन्यते। महत्तरसर्पाक्रान्ततया शैलस्य गमनानर्हत्वमन्येषामावेद्यते। केलितल्पसादृश्येन नायिकायाः सुखगमनयोग्यत्वं ध्वन्यते। काञ्चीगुणसादृश्येन निरन्तरजघनसंगतिशालित्वप्रतिपादनेनातिमदनशालित्वं व्यज्यते। पतित इत्यनेन दैववशाल्लब्ध इति ध्वन्यते। यद्वा सखी नायिकां वक्ति—समन्तान्महौषधिमणिसमुदायवति। पक्षे प्रकाशातिशयशालिमणिनिकरवति। निर्भरतातिशयविधानान्मणिमुक्तादिश्रीवाद्याभरणभ्रंशादिति भावः। शैल इव केलितल्पे। शैलसमताप्रतिपादनेनातिदृढत्वं तल्प आवेद्यते। तेन चैतादृशरतविमर्दसहनयोग्यत्वम्। पतितः। प्रसुप्त इति यावत्। स्थितमेकरत्नं यस्मिन्सः। फणायामिति भावः। पक्षे पतितः। त्रुटितत्वादिति भावः। स्थितं मुख्यं रत्नं यस्मिन्स फणीव काञ्चीगुणः स्फुरति। तवेति भावः। फणिपदेन स्पर्शायोग्यत्वं ध्वन्यते। एवं च तथाशयितरतसंविधानजन्यालसतया निकटस्थकाञ्चीगुणोऽपि स्प्रष्टुं न शक्यते त्वयेत्यतो मामाज्ञापयसि तदानयनार्थमित्यावेद्यते॥

अन्याङ्गनासक्त्येतस्ततः परिभ्रमन्तं नायकं नायिकान्योक्त्या वक्ति—

प्रावृषि शैलश्रेणीनितम्बमुज्झन्दिगन्तरे भ्रमसि।
चपलान्तर घन किं तव वचनीयं पवनवश्योऽसि॥ ३७०॥

प्रावृषीति। वर्षासमये। एवं च बहिर्गमनानर्हत्वं व्यज्यते। पर्वतश्रेणीनितम्बम्। 'नितम्बः कटकोऽस्त्रियाम्'। अथ च स्वनितम्बिनीस्तननितम्बम्। उज्झंस्त्यजन्। दिगन्तरे। इतस्तत इत्यर्थः। भ्रमसि। चपला विद्युत्सान्तरे मध्ये यस्य। अथ च चपलेतस्ततो गमनस्वभावा पराङ्गनान्तरे चित्ते यस्य। यद्वा चञ्चलस्वभाव चलचित्त। घन तव किं वचनीयम्। वाच्यमित्यर्थः। यतः पवनवश्योऽसि वाय्वधीनोऽसि। अथ च वातूलोऽसि। पिशाच इति यावत्। एवं च यतो यतो वायुना नीयसे तत्र तत्र गच्छसीति न तवापराध इति व्यज्यते। एवं च सुन्दरीं नवयौवनलालसां मादृशीं विहायेतस्ततो व्यभिचरणशीलामन्तःकरणे विधाय पिशाचवदितस्ततो भ्रमसि तत्र न तवापराधः किं तु मौढ्यस्येति व्यज्यते॥

सर्वदा मानवत्तयैव त्वया स्थीयत इदमनुचितमिति भङ्ग्यन्तरेण सखी नायिकां वक्ति—

प्रतिदिवसक्षीणदशस्तवैष वसनाञ्चलोऽतिकरकृष्टः।
निजनायकमतिकृपणं कथयति कुग्राम इव विरलः॥ ३७१॥

प्रतीति। प्रतिदिनं क्षीणा दशा प्रान्तभागो यस्य। पक्षे क्षीणावस्थः। अत्यन्तं करेण हस्तेनाकृष्टः। पक्षेऽत्यन्तराजदण्डपीडितः। विरलः शिथिलतन्तुसंयोगवान्। पक्षे स्वल्पजनवसतिः। तव एष वसनाञ्चलो निजस्वामिनं कुग्राम इव कृपणम्। वसनान्तरग्रहणासामर्थ्यादिति भावः। पक्षे द्रव्यलोभकरणेनेति भावः। कथयति। एवं चैतादृश-

मानसंपादनेन नायकस्य वारं वारं प्रार्थनादिसंपादनावगणनेन नायं नायिकासुखप्रदो यतः सर्वदेयं क्लेशवत्येव लक्ष्यत इत्ययशस्तदीयं भवति । तदियं स्वस्यैवानौचितीमाविष्करोति, अतो नैतादृशं विधेयमित्यावेद्यते ॥

काचित्पथिकं वक्ति—

पथिक कथं चपलोज्ज्वलमम्बुदजलबिन्दुनिवहमविषह्यम् ।
मयपुरकनकद्रवमिव शिवशरशिखिभावितं सहसे ॥ ३७२ ॥

पथिकेति । हे पथिक । एवं च वसत्यभाववत्त्वमावेद्यते । चपलाभिर्विद्युद्भिरुज्ज्वलम् । पक्षे चपलावदुज्ज्वलम् । अविषह्यम् । उद्दीपकत्वादिति भावः । पक्ष उष्णत्वादिति भावः । मेघजलसमुदायबिन्दुसमुदायम् । न तु कतिपयजलबिन्दवः । शंकरबाणानलसंतापितम् । अत्र शिवपदं प्रकृताननुगुणम् । मयनामकदैत्यनगरकनकद्रवमिव कथं सहसे । एवं च कथं वृष्टिमध्य एव स्थीयते कुतो नागम्यते वृष्टिबाधोपशमनस्थल इति भावः । एवं चैतादृशोद्दीपनविभाववति समये कथमेकाकितया स्थातुं शक्यम्, अतो मत्सविधमागत्यैनं समयमतिवाहयेति व्यज्यते ॥

काचित्कांचिद्वदति—

पथिकं श्रमेण सुप्तं दरतरला तरुणि सुमधुरच्छाया ।
व्यालम्बमानवेणिः सुखयसि शाखेव सारोहा ॥ ३७३ ॥

पथिकमिति । हे तरुणि । ईषच्चञ्चला । सुष्ठु मधुरा छाया यस्याः । व्यालम्बमाना वेणिर्यस्याः । विपरीतरतसंविधानादिति भावः । सारोहा सशिफा । 'शाखा शिफावरोहः स्यात्' इत्यमरः । पक्ष आरोहणमारोहः । शाखेव सुखयसि । मदनानलतापनिवारकत्वादिति भावः । श्रमेण सुप्तं पथिकम् । पथिकपदेन सुखसंपादनयोग्यत्वं ध्वन्यते । शाखापि किंचिच्चञ्चला शीतलच्छाया लम्बमानजटा श्रमसुप्तपथिकसुखहेतुर्भवति । एवं चानेन सह त्वया विपरीतरतं विहितमिति ध्वन्यते । यद्वा पथिकं सुखयसीति सुखयिष्यसीति प्रश्नः । पथिकमित्यनेनातिकामुकत्वं तत्सुखदानेन पुण्यवत्त्वमन्यापरिचेयत्वं च व्यज्यते ॥

निगूढमन्याङ्गनासक्तचित्तं नायकं नायिकासखी वक्ति—

प्रददाति नापरासां प्रवेशमपि पीनतुङ्गजघनोरूः ।
या लुप्तकीलभावं याता हृदि बहिरदृश्यापि ॥ ३७४ ॥

प्रददातीति । या तव हृदि बहिरदृश्यापि लुप्तकीलधर्मं याता सा तुङ्गपीनजघनोरूरपरासां प्रवेशमपि न प्रददाति । लुप्तकीलभावे बहिरदृश्यत्वं हेतुः । अन्यासां प्रवेशाप्रदाने तुङ्गपीनजघनोरुत्वं हेतुः । अपिनावस्थितिव्यवच्छेदः । एवं च काचित्तवान्तःकरणेऽस्ति ययान्यत्र चित्तं न ददासीति व्यज्यते । भूमावन्तर एकस्मिन्कीले सत्यन्यकीलस्य न तत्र प्रवेश इति लौकिकम् । यद्वा कथमन्याङ्गनालम्पटस्त्वमसीति वादिनीं

नायिकासखीं नायको वक्ति । तुङ्गेत्यादिनान्याङ्गव्यतिरेको ध्वन्यते । एवं च यद्यपि न मया मुखतस्तथा चाटुवचनादि विधीयते परं तु मम हृदयमियमेवाधिवसति न काचिदन्या हृदयविषयापीति व्यज्यते । अथवा नायिकोक्तिरियम् ॥

कथमस्मासु श्वश्रूर्न स्निह्यतीति वादिनमनभिज्ञनायकं नायिकासखी वक्ति—

प्रातर्निद्राति यथा यथात्मजा लुलितनिःसहैरङ्गैः ।
जामातरि मुदितमनास्तथा तथा सादरा श्वश्रूः ॥ ३७५ ॥

प्रातरिति । यथा यथा । लुलितानि ग्लानान्यत एव निःसहानि । सालस्यानीत्यर्थः । एवंविधैरङ्गैः प्रातरात्मजा निद्राति, मुदितमनाः श्वश्रूर्जामातरि तथा तथा सादरा भवति । लुलितनिःसहैरित्यनेन रतातिशयशालित्वमावेद्यते । आत्मजेत्यनेन तत्सुखवत्त्वेन तस्याः सुखवत्त्वमिति ध्वन्यते । एवं च त्वयाद्य रात्रौ तथा रतातिशयो विधेयो यथेयं मत्सखी प्रातरत्यन्तनिःसहाङ्गतया स्वापं करिष्यतीति व्यज्यते ॥

नायिका सखीं वक्ति—

प्रणयचलितोऽपि सकपटकोपकटाक्षैर्मयाहितस्तम्भः ।
त्रासतरलो गृहीतः सहासरभसं प्रियः कण्ठे ॥ ३७६ ॥

प्रणयेति । हे सखि, प्रणयात्प्रीतेश्चलितोऽपि, प्रणयेन वा चलितः । सकपटा ये कोपकटाक्षास्तैराहितस्तम्भः संपादितस्थैर्यः । त्रासेन तरलः । मत्कृतकोपकटाक्षादिति भावः । प्रियो मया सहासरभसं कण्ठे कृतः । एवं च नायकेऽतिसरलत्वमावेद्यते ॥

काचिन्नायका कस्मिंश्चिदासक्ता तदीयान्याङ्गनासक्तिं विज्ञायात्यन्तदुःखिता स्वहृदयं प्रति वक्ति—

प्रियदुर्नयेन हृदय स्फुटसि यदि स्फुटनमपि तव श्लाघ्यम् ।
तत्केलिसमरतल्पीकृतस्य वसनाञ्चलस्येव ॥ ३७७ ॥

प्रियेति । हे हृदय । एवं चोपदेशयोग्यत्वं ध्वन्यते । प्रियस्य दुर्नयेन । एवं चातिदुःखवत्त्वमावेद्यते । यदि स्फुटसि विदीर्णतामाप्नोषि तर्हि तव स्फुटनमपि श्लाघ्यम् । तस्य केलिरूपसङ्ग्रामे तल्पीकृतवस्त्रप्रान्तस्येव । समरपदेनातिदुःसहत्वं रत आवेद्यते । एवं च शय्यादिविरहवत्यपि देशेऽत्यन्तसाहसेन चिरतरसुरतसुखसंपादनेन यः प्रियत्वात्परितोषितस्तदीयैतादृशदुश्चेष्टितस्यातिदुःसहतया 'विरमति कथनं विना न खेदः' इत्यादिवचनात्कस्यचित्कथनानर्हत्वेऽपि स्वस्यैवैतादृशाविचारितकार्यकारितयातिमौर्ख्यावहतया कथनीयत्वेन तद्भराद्विदीर्णतापि समुचिता न पुनरन्यत्र तत्कथनमिति ध्वन्यते । तेन चैतादृशप्रियानुचिताचरणस्य कथने स्वस्यैव लज्जाजनकत्वमिति । यद्वा येनैतादृशसंभोगसुखमुत्पादितं तदीयैतादृशौदासीन्ये मरणमेव वरं न पुनर्दूत्यादिप्रेषणं मानादिधारणं वेति व्यज्यते । अपिरवधारणार्थः । 'प्रियदुर्नयेनात्यन्तं दुःखं भक्तीति भावः' इति ऋजवः ॥

कश्चिदन्योक्त्या कस्यचित्कर्तव्यतामालोक्य स्वयमपि तथाकर्तुमुद्यतं कंचन वक्ति—

पवनोपनीतसौरभदूरोदकपूरपद्मिनीलुब्धः ।
अपरीक्षितस्वपक्षो गन्ता हन्तापदं मधुपः ॥ ३७८ ॥

पवनेति । समीरणाहृतसौरभा, उदकपूरवर्तिनी या पद्मिनी तस्यामासक्तोऽविचारितस्वपक्षबलो मधुपः । हन्त इति खेदे । आपदं गन्ता । पवनपदेन चञ्चलस्वभावेन केनचिदेतस्याः कीर्तिः कृतेति व्यज्यते । दूरोदकपूरेत्यनेन प्राप्तावपि काठिन्यमावेद्यते । अपरीक्षितेत्यनेन यथाकथंचित्स्वसहायवचनमात्रादेव नोद्योगः कर्तव्य इति ध्वन्यते । आपदमित्येकत्वमविवक्षितम् । मधुप इत्यनेनाविवेकित्वं ध्वन्यते । एवं यथाकथंचित्कस्यचिन्मुखान्नायिकागुणश्रवणमात्रेण दुष्प्रापायां तस्यामासक्तिर्यद्यनेन क्रियते तर्ह्यनेनावश्यं क्लेशाः प्राप्या एवेति भावः । एवं च त्वयैतादृगनुचितं नाचरणीयमिति व्यज्यते ॥

प्रेमवशान्नायके लघुतामङ्गीकुर्वत्यपि स्वयं नावगणना विधेयेति सखी नायिकां भङ्ग्यन्तरेण शिक्षयति—

प्रेमलघूकृतकेशववक्षोभरविपुलपुलककुचकलशा ।
गोवर्धनगिरिगुरुतां मुग्धवधूर्निभृतमुपहसति ॥ ३७९ ॥

प्रेमलघूकृतेति । प्रेम्णा । नायिकाविषयकेणेत्यर्थः । लघूकृतः । वास्तवतया तस्य चतुर्दशभुवनाधारतयातिगुरुत्वादिति भावः । एवं च प्रियाप्रणयार्त्तिं किं न क्रियत इति ध्वन्यते । यः केशवस्तस्य वक्षसि धारणे विपुलपुलकौ कुचकलशौ यस्या एतादृशी मुग्धा सुन्दरी । अथ च मूढा । वधूः । यद्वा मुग्धस्य वधूः । एवं च प्रियस्य चातुर्यवत्त्वे नायिकाया अपि तद्वत्त्वं भवतीति ध्वन्यते । गोवर्धननामधेयमहीधरस्य गुरुतां गुप्तं हसति । येन गोवर्धनोद्धारणं कृतं सोऽपि मया लघुतया वक्षसि धृत इति न किंचिद्गौरवमिति धियेति भावः । एवं च केशवस्याप्युपहासो व्यज्यते । एवं चैतादृशमौर्ख्यं न कदापि विधेयं त्वयेति ध्वन्यते ॥

प्रियप्रीतौ सत्यां न केनापि किमपि कर्तुं शक्यमिति काचित्कांचिद्वक्ति—

प्रियविरहनिःसहायाः सहजविपक्षाभिरपि सपत्नीभिः ।
रक्ष्यन्ते हरिणाक्ष्याः प्राणा गृहभङ्गभीताभिः ॥ ३८० ॥

प्रियेति । दयितविरहक्षीणायाः । एवं च प्रकारान्तरमरणे समाधेः सत्त्वादिति भावः । सहजशत्रुभूताभिरपि । एवं चावश्यापकारकरणयोग्यत्वं द्योत्यते । अपिनान्येषां का वार्तेति व्यज्यते । गृहभङ्गभीताभिः । एतस्या मरणे प्रियमरणस्यावश्यं भावित्वादिति भावः । एवं च प्रियानुरागातिशयवत्त्वमाविद्यते । मृगाक्ष्याः प्राणा रक्ष्यन्ते । एवं च यथा नायकः स्निह्यति तथावश्यं विधेयं त्वयेति ध्वन्यते ॥

नायिका दूतीं वक्ति—

प्रकटयति रागमधिकं लपनमिदं वक्रिमाणमावहति ।
प्रीणयति च प्रतिपदं दूति शुकस्येव दयितस्य ॥ ३८१ ॥

प्रकटयतीति । हे दूति । एवं च तद्योगसंपादनं त्वदधीनमित्यावेद्यते । शुकस्येव दयितस्य लपनं संभाषणम् । पक्षे वदनम् । अधिकं रागं प्रीतिम् । पक्षे लौहित्यम् । प्रकटयति । वक्रिमाणं वक्रोक्तिमत्त्वम् । पक्षे वक्रत्वम् । आवहति । आङा नैकमपि वक्रोक्तिरहितं पदं तत्रेत्यावेद्यते । तेन च नायके चातुर्यातिशयशालित्वम् । प्रतिपदं प्रतिशब्दम् । पक्षे प्रतिक्षणम् । प्रीणयति च । यच्चाधिकरागशालि न तद्वक्रतामावहति । यच्च वक्रतामावहति न तत्प्रीतिजनकम् । इदं चैकमेतत्त्रितयजनकमित्याश्चर्यमिति भावः । केचित्तूभयत्रापि लपनं मुखमेवेत्याहुः । एवं चैतादृशनायकं सपदि संयोजय मया सहेति ध्वन्यते ॥

स्वकटाक्षविक्षेपादिना नायकः स्वाधीनताभाजनं विधेय इति काचित्कांचिच्छिक्षयति—

प्रविशन्त्याः प्रियहृदयं बालायाः प्रबलयौवतव्याप्तम् ।
नवनिशितदरतरङ्गितनयनमयेनासिना पन्थाः ॥ ३८२ ॥

प्रविशन्त्या इति । प्रबला रूपादिसंपत्तिशालिन्यः । प्रबलपदमन्यस्याजेयत्वमावेदयति । या युवत्यस्तत्समुदायव्याप्तम् । एवं च स्वस्थित्यर्थमवकाशाभावो व्यज्यते । प्रियहृदयम् । एवं चावश्यप्रवेशसंपादनौचित्यं ध्वन्यते । प्रविशन्त्या बालायाः । नूतनस्तीक्ष्णः । ईरमीषत् । किंचिल्लज्जावत्त्वादिति भावः । तरङ्गितमुत्तरोत्तराधिक्यं तच्छालीयः कटाक्षस्तद्रूपेणासिना खड्गेन पन्था मार्गः । एवं च त्वयैतादृशकटाक्षेण विलोकितेऽवश्यं नायकस्ता अपहृत्य त्वय्यासक्तो भविष्यतीति ध्वन्यते । अन्योऽपि प्रबलव्याप्तस्थलादौ केवलं खड्गसहायेन प्रवेशं करोतीति लौकिकम् ॥

नायिकासखी नायकं वक्ति—

प्रणयापराधरोषप्रसादविश्वासकेलिपाण्डित्यैः ।
रूढप्रेमा ह्रियते किं बालाकुतुकमात्रेण ॥ ३८३ ॥

प्रणयेति । प्रणयापराधेन रोषः, प्रसादः, विश्वासः, क्रीडाविषयकपाण्डित्यमेतै रूढं प्रेम यस्या एतादृशी नायिका । यद्वा प्रवृद्धप्रेमा । अर्थान्नायिकायाः । एवं च भाविसुखसंभावनया स्वतःसिद्धसुखपरिहारकर्तव्यता नोचितेति ध्वन्यते । तेन च भवतामीदृशकर्तव्यतया नायिका खिन्ना भवतीत्यावेद्यते । यद्वा नायको नायिकासखीं वक्ति । रूढप्रेमा । अर्थान्नायिकया सह बालायाः कुतुकमात्रेण किं ह्रियते । काक्वा न ह्रियत इत्यर्थः । एवं च बालायाः कौतूहलमात्रमेतत् । वास्तवानुरागो मम तस्यामेवेति ध्वन्यते ॥

काचिदन्योक्त्या पूर्वं स्वस्मिन्सक्तं वार्धक्यात्सुरतादावुपेक्षितमन्यविटद्वेषिणं कंचन वक्ति—

पूर्वैरेव चरित्रैश्चरितैर्जरतोऽपि पूज्यता भवतः ।
मुञ्च मदमस्य गन्धाद्युवभिर्गज गञ्जनीयोऽसि ॥ ३८४ ॥

पूर्वैरिति । हे गज, मदं मुञ्च । नन्वेतत्त्यागे किमित्यत आह—प्राक्तनैरेवाद्भुतैराचरितैर्जरतोऽपि वृद्धस्यापि । 'जीनो जीर्णो जरन्' इत्यमरः । भवतः पूज्यता । एवं च मदाभावेऽपि पूज्यतायाः सत्त्वान्मदकरणमनर्थकमिति भावः । न केवलं मदकरणमनर्थकम्, अपि तु दुरर्थकमित्याह—अस्य मदस्य गन्धाद्युवभिर्गजनीयोऽसि । एवं च पूर्ववत्सामर्थ्याभावादस्मत्कृतमानवत्त्वेऽपि विधीयमाने मदो युवभिर्न सोढव्य इति ध्वन्यते । तेन च भीतिः ॥

यावत्पर्यन्तं नायकाङ्गसुखं नानुभूतं तावदेव गमने नकारः क्रियते, तदुत्तरं तु स्वयमत्यन्तासक्ता नायके भविष्यसीत्यत इदानीं मद्वाक्यं न तिरस्कुर्विति काचित्कांचिद्वक्ति—

प्रथमं प्रवेशिता या वासागारं कथंचन सखीभिः ।
न शृणोतीव प्रातः सा निर्गमनस्य संकेतम् ॥ ३८५ ॥

प्रथममिति । प्रथमतः सखीभिः । न तु सख्या । महता क्लेशेन शयनसदनं या प्रवेशिता सा प्रातः । एवं च चिरपरिचयाभावो व्यज्यते । निर्गमसंकेतं न शृणोतीव । एवं च न निर्गच्छतीति किमु वाच्यमिति भावः । एवं च तथैव त्वमपि करिष्यसीति व्यज्यते । 'प्रसभम्' इत्यपि क्वचित्पाठः ॥

मन्त्रवत्त्वमावश्यकमिति कश्चिद्वक्ति—

पूजा विना प्रतिष्ठां नास्ति न मन्त्रं विना प्रतिष्ठा च ।
तदुभयविप्रतिपन्नः पश्यतु गीर्वाणपाषाणम् ॥ ३८६ ॥

पूजेति । प्रतिष्ठां विना पूजा नास्ति । मन्त्रं विना प्रतिष्ठा नास्ति । तदुभयविप्रतिपन्नः । मन्त्रं विनापि प्रतिष्ठा, प्रतिष्ठां विना पूजेति वादीत्यर्थः । देवतायाः पाषाणं प्रतिमां पश्यतु । एवं च देवताप्रतिमायामेवैतन्निर्णय इति भावः । यद्वा केनचित्कस्यचित्पूजायां क्रियमाणायामीर्ष्यावशात् 'किमस्य ज्ञानं का वास्य प्रतिष्ठा येनेदृशी पूजेयमस्य विधीयते' इति वादिनं कश्चिद्भङ्ग्यन्तरेण वक्ति—प्रतिष्ठां देवतासंनिधिरूपां विना पूजा नास्ति । 'प्रतिष्ठितं पूजयेत्' इति वचनात् । पक्षे प्रतिष्ठा विख्यातिः । मन्त्र उत्तमपुरुषामन्त्रणास्यजत्वं तत्त्वम्(?) । मन्त्रप्रसिद्ध्यन्यतमवन्तम् । पक्षे विचारं विना प्रतिष्ठा च नास्ति । मन्त्रसाध्यत्वात्प्रतिष्ठायाः । प्रतिष्ठामन्त्रोभयाप्रामाण्यवादी । पक्षे प्रतिष्ठामन्त्रोभयाभाववादी । देवतापाषाणं पश्यतु । एवं च वेदाप्रामाण्यवादिना नास्तिककक्षाधिरूढेन केनचिद्विष्ण्वादिप्रतिमादौ [विष्ण्वादि]प्रस्तरबुद्धौ कृतायां न किंचित्समीचीनस्य दुःखमिति भावः । एवं च नास्तिककल्पेन भवता मात्सर्यात्पाण्डित्यप्रतिष्ठादिकमेतेषां नास्तीत्युक्तं चेत्तावता न काचित्क्षतिरिति ध्वन्यते ॥

नायिकासखी नायिकायां मानाद्युपचारप्रदर्शकं नायकं वक्ति—

पूर्वाधिको गृहिण्यां बहुमानः प्रेमनर्मविश्वासः ।
भीरधिकेयं कथयति रागं बालाविभक्तमिव ॥ ३८७ ॥

पूर्वाधिक इति । गृहिण्यां पूर्वापेक्षयाधिकः । बह्वनेकप्रकारः । इदं च लिङ्गविपरिणामादग्रेऽप्यन्वेति । मानः । प्रेम । नर्म क्रीडा । विश्रासः । इयमधिका भीः । एवं च भीतेः पूर्वमभावो ध्वन्यते । रागं बालाविभक्तमिव कथयति । एवं च यावत्पर्यन्तं तस्यामेवानुरागः स्थितस्तावत्पर्यन्तं नैतादृशमानादिकं न भीतिः । तद्धेत्वभावात् । इदानीं तु मानादिनैतत्समाधानेनेयं मां न पीडयिष्यतीति धियैतादृशाचरणं तवेति भावः । एवं च यत्रासाधारणं प्रेम न तत्र किमपि मानादि बाह्योपचारकरणमपेक्षितमिति ध्वन्यते ॥

स्वपीडाभयेन स्वप्रभोरप्यनिष्टं चिन्तयत एवेति कश्चित् 'कथं स्वप्रभोरनुचिताशंसनं करोषि' इति वादिनं वक्ति—

पुलकितकठोरपीवरकुचकलशाश्लेषवेदनाभिज्ञः ।
शंभोरुपवीतफणी वाञ्छति मानग्रहं देव्याः ॥ ३८८ ॥

पुलकितेति । संजातपुलकौ । नायकस्पर्शजसुखाविर्भावादिति भावः । यौ कठोरपीवरकुचकलशौ तदाश्लेषपीडाभिज्ञः शंभोरुपवीतरूपफणी पार्वत्या मानग्रहं वाञ्छति । एवं चालिङ्गनाद्यभावेन स्वपीडानुत्पत्तिर्भविष्यतीति धियेति भावः । कठोरेत्यनेन वेदनायामाधिक्यं ध्वन्यते । एवं च शंभोरित्यनेन सुखजनकत्वप्रतिपादनादुपवीतपदेनातिनिकटतयातिप्रेमवत्त्वव्यञ्जनात्फणीत्यनेन भारसहनसामर्थ्यद्योतनादीदृशस्यापि क्लेशविशेषासहिष्णुत्वं किमुतान्यस्येति द्योत्यते । यद्वा यो हि स्वयं दुःखाभिज्ञः स एव परस्य दुःखनिवृत्तिं वाञ्छतीति कश्चित्कंचिद्वक्ति । एवं च फणेर्वेदनाभिज्ञत्वेन शंभोः कठोरकुचवेदना मा भवत्विति बुद्धिरुदेतीति ध्वन्यते । अथवात्यन्तमानवती सा नायातीति दुष्टदूतीवचनाच्छिथिलयत्नं नायकं नायिकासखी वक्ति । फणीत्यनेन दुष्टत्वं द्योत्यते । यद्वा नायकं प्रति स्वयातायातभयान्नायिकादुःस्वभावेति कथयन्तीं नायकसखीं ज्ञात्वा नायिकासखी नायकं प्रति वक्ति । एवं चेयं त्वदीयदुष्टसखी स्वयातायातादिपीडाभयेन तस्या एतादृशस्वभावशालित्वं त्वय्यावेदयति, न वास्तवं सा तयेति ध्वन्यते । तेन च त्वरस्व तद्दर्शनयत्न इति ॥

काचित्कांचित्कस्याश्चिद्वार्त्तां वक्ति—

प्रिय आयातो दूरादिति या प्रीतिर्बभूव गेहिन्याः ।
पथिकेभ्यः पूर्वागत इति गर्वात्सापि शतशिखरा ॥ ३८९ ॥

प्रिय इति । दूरादायात इति हेतोर्गेहिन्या या प्रीतिर्बभूव सा पथिकेभ्योऽपि पूर्वमागत इति गर्वादत्यधिका जाता । अन्येषां न तथा स्वप्रियासु प्रीतिर्यथा मत्प्रियस्येति धियेति भावः । प्रियपदमागमनेन प्रीतिजनकत्वमावेदयति । दूरादित्यनेन चिरविरहशालित्वं द्योत्यते । गेहिनीपदेन गृहव्यासङ्गप्रवणाया अप्येतादृशावस्थावत्त्वं तत्रेतरस्याः किं वक्तव्यमिति ध्वन्यते । पथिकपदं प्रियात्पूर्वं प्रचलितत्वं व्यञ्जयति । बहुवचनेन सर्वेषामपि पश्चात्परित्यागेनोत्कण्ठातिशयशालित्वं नायके व्यज्यते । एवं चान्येषां त्वरयानागमनेन

स्वप्रियस्यागमनेन नायिकायां गुणातिशयो द्योत्यते। तेन चेतरनायिकाव्यतिरेको ध्वन्यते। शिखरस्य पर्वतसंबन्धित्वात्प्रीतौ चात्युत्कटत्वं लक्ष्यते । प्रयोजनं चेतरगर्वव्यतिरेकः ॥

नायिकासखी नायकमन्योक्त्या नायिकाप्रेम वक्ति—

पृष्ठं प्रयच्छ मा स्पृश दूरादपसर्प विहितवैमुख्य ।
त्वामनुधावति तरणिस्तदपि गुणाकर्षतरलेयम् ॥ ३९० ॥

पृष्ठमिति । हे विहितवैमुख्य । पक्षे कृतौदासीन्य । वैमुख्यकार्यमाह—पृष्ठं प्रयच्छ । तीरस्थिततरणेः पृष्ठेनैव गभीरजलनिरसनमिति कैवर्तकसंप्रदायः । यद्वा गुणाकर्षकस्य नौकासांमुख्याभावादिति भावः । अत एव मा स्पृश । करणेति भावः । पक्षे विलोकनाभावं कुरु, आलिङ्गनं च मा कुरु । दूरादपसर्प । पक्षे निकटवर्तित्वाभावं कुरु । तथापि गुणैस्तृणरचितैः । पक्षे चातुर्यादिभिः । आकर्षणं तेन चञ्चलेयं तरणिस्त्वामनुधावति । एवं च यद्यपि त्वमुदासीनस्तथापि त्वदीयचातुर्यादिगुणलुब्धा त्वामेवानुसरतीति ध्वन्यते । तेन च नैतादृगाचरणमुचितं तवेति । नौरपि पृष्ठप्रदानादिकारिणमनुलक्षीकृत्य निषादकर्तृकगुणकरणकाकर्षणेनागच्छतीति भावः ॥

नायकः सखायं वक्ति—

प्रियया कुङ्कुमपिञ्जरपाणिद्वययोजनाङ्कितं वासः ।
प्रहितं मां याच्ञाञ्जलिसहस्रकरणाय शिक्षयति ॥ ३९१ ॥

प्रिययेति । प्रियया, न तु नायिकया । कुङ्कुमेन पिञ्जरं यत्करयुगलं तद्विधानचिह्नितं प्रेषितं वासोऽनेकप्रार्थनाञ्जलिसंपादनाय मां शिक्षयति । कुङ्कुमपिञ्जरत्वेनारक्तत्वम्, तेन च कोपवत्त्वं द्योत्यते । पाणिद्वययोजनाङ्कितमित्यनेन मत्प्रणतिरावेद्यते । एवं च प्रणामोऽयं भवतामास्तामत्रागमनं भवतामिति द्योत्यते । तेन कुपितत्वे ज्ञातेऽनेकप्रार्थनाञ्जलिकरणं मम प्राप्तमिति ध्वन्यते । यद्वा प्रियैकप्रणामग्रहणजन्यौद्धत्यनिवारणकारणानेकप्रणामकरणं मम प्राप्तमिति ध्वन्यते । तेन च नायिकायामाधिक्यम् । यद्वा यथा मया त्वत्प्राप्त्यर्थमञ्जलिः क्रियते तथा त्वया मदर्थं मदीयगुरुष्वञ्जलयो विधेया इति शिक्षा । माङ्गलिकत्वेन कुङ्कुमसंबन्धः । अथवाहं रजःशालिनीत्यतः क्षन्तव्यो मदनागमनापराध इति ज्ञापनायैकाञ्जलिकरणे मयाञ्जलिसहस्रकरणेनेदानीमेव रतमभ्यर्थनीयमिति भावः ॥

दूती कस्याश्चित्साहसकथनेन नायिकायाः साहसकर्तृत्वमुपदिशति—

प्राचीरान्तरितेयं प्रियस्य वदनेऽधरं समर्पयति ।
प्राग्गिरिपिहिता रात्रिः संध्यारागं दिनस्येव ॥ ३९२ ॥

प्राचीरेति । इयं तव प्रतिवेशिनी प्राचीरेण व्यवहिता । 'प्राचीरं प्रान्ततो वृतिः' इत्यमरः । प्रियस्य वदनेऽधरं समर्पयति । प्राचीनाचलाच्छादिता रात्रिः संध्यारागं दिवसस्येव वदने । प्राग्गिरिसमताप्रतिपादनेन प्राचीरेऽतितुङ्गत्वं ध्वन्यते । तेन चोल्लङ्घनानर्हत्वम् । रात्रिसमताप्रतिपादनेन तमःप्रधानतयान्यजनावलोकनभीतिशून्यत्वं नायिकायामावेद्यते ।

तेन चात्यन्तानुरागवत्त्वम्। संध्यारागमित्यनेनात्यन्तलौहित्यवत्त्वमधरे व्यज्यते। दिनस्येत्यनेन बहिर्वीततया नायके लोकदृश्यत्वं ध्वन्यते। समर्पयतीत्यनेन स्वयं चुम्बनविरामसंपादनेन रागोद्धुरत्वं नायिकायां द्योत्यते। एवं च त्वयापि भीतिमुत्सृज्यैवंविधाचरणमाचरणीयमिति ध्वन्यते॥

नायिका नायकं वक्ति—

परपतिनिर्दयकुलटाशोषित शठ नेर्ष्यया न कोपेन।
दग्धममतोपतप्ता रोदिमि तव तानवं वीक्ष्य॥ ३९३॥

परेति। परस्याः पत्यौ निर्दया या अनेकगामिन्यस्तामिर्हृतशरीरसार। सर्वस्वपरत्वेन कादाचित्कलाभवत्त्वम्, तेन चात्यन्तसुरतसंपादनार्हत्वं ध्वन्यते। शठ। एवं च विश्वासाभाववत्त्वमन्यवचनप्रामाण्यानभ्युपगन्तृत्वं च व्यज्यते। नेर्ष्यया। तासामिति भावः। न कोपेन। किमिति तत्र गम्यत इति हेतोरिति भावः। दग्धममतोपतप्ताहं तव कार्श्यं वीक्ष्य रोदिमि। दग्धपदेन ममताया निवारणानर्हतयात्यन्तदुःखदत्वं ध्वन्यते। एवं चैतादृशेऽपि त्वयि मम ममतेति स्वस्मिन्नाधिक्यमावेद्यते। अन्योऽपि संतप्तो रोदितीति लौकिकम्॥

प्राङ्गण एव कदा मां श्लिष्यन्ती मन्युकम्पिकुचकलशा।
अंसनिषण्णमुखी सा स्नपयति बाष्पेण मम पृष्ठम्॥ ३९४॥

प्राङ्गण इति। प्राङ्गण एव। एवं च प्रेमाधिक्यमावेद्यते। मां श्लिष्यन्ती। कोपेन। कथमियन्ति दिनान्यतिवाहितानि विदेश इति धियेति भावः। कम्पितस्तनकलशा। स्कन्धस्थितवदना सा पूर्वानुभूता बाष्पेण मम पृष्ठं कदा स्नपयति। स्नपयिष्यतीत्यर्थः। पथिकाशंसनमेतत्॥

कथमीदृशभयानकावसरे प्रियसविधे समभिसरणमिति वादिनीं नायिकां दूती कस्याश्चिद्वृत्तकथनव्याजेन सति प्रेम्णि न कस्यापि भीतिरिति वक्ति—

प्रेतैः प्रशस्तसत्त्वा साश्रु वृकैर्वीक्षिता स्खलद्ग्रासैः।
चुम्बति मृतस्य वदनं भूतमुखोल्केक्षितं बाला॥ ३९५॥

प्रेतैरिति। प्रेतैः स्तुतसामर्थ्यात्। स्खलद्ग्रासैः। विस्मयादिति भावः। साश्रु। क्रियाविशेषणमेतत्। कथमीदृश्या अपि प्रियः प्रपेदे पञ्चत्वमिति शोकोद्रेकादिति भावः। वीक्षिता बाला। एवं च भीतियोग्यत्वं ध्वन्यते। भूतमुखसंबन्धिनी योल्का तयेक्षितम्। एवं चान्धकारबाहुल्यं ध्वन्यते। मृतस्य। अर्थात्स्वप्रियस्य। वदनं चुम्बति। एवं चैतादृशसमयेऽपि भीत्यनुदयेन जुगुप्साद्यभावेन च प्रेम्णि दृढत्वमावेद्यते। अत्र प्रेतैः प्रशस्तसत्त्वेत्यादिकथनं भयानकाङ्गमपि शृङ्गारपरिपोषकत्वादथवा बाध्यत्वेनोक्तत्वाद्वा 'स्मर्यमाणो विरुद्धोऽपि' इत्युक्तदिशा 'अयं स रशनोत्कर्षी' इत्यादाविव 'संचार्यादेर्विरुद्धस्य

बाध्यस्योक्तिर्गुणावहा' इत्युक्तदिशा 'काकार्यम्' इत्यादाविव भयानकश्रृङ्गारयोरविरोधान्नासमञ्जसम् ॥

कश्चित्कंचिदुपदिशति—

पिशुनः खलु सुजनानां खलमेव पुरो विधाय जेतव्यः ।
कृत्वा ज्वरमात्मीयं जिगाय बाणं रणे विष्णुः ॥ ३९६ ॥

पिशुन इति । सुजनानां यदि पिशुनो जेतव्यः । एवं च सतां पिशुनजयेन न कापि श्लाघ्यतेति भावः । तदा निश्चयेन खलमेव पुरो विधाय । एवकारेण स्वातिरिक्तसुजनस्य निरासः । अमुमेवार्थं द्रढयितुमितिहासमाह—विष्णुः । एवं च स्वतः सामर्थ्यसत्त्वमावेद्यते । ज्वरं स्वीयत्वेन संपाद्य । एवं च दुष्टे यद्यपि स्वीयत्वसंपादनमनुचितं तथापि स्वकार्यकाल एव तत्र तद्विधेयमिति ध्वन्यते । सङ्ग्रामे बाणासुरं जितवान् । एवं च स्वस्य सामर्थ्येऽपि न दुष्टनिबर्हणं स्वयं विधेयमिति ध्वन्यते । तेन च क्लेशेऽपि दुष्टसंभाषणमनुचितमिति ॥

नायिकेयमत्यन्तमप्रगल्भेत्यतः शनैरेव किंचिदुपभोग्येति सखी नायकमन्योक्त्या वक्ति—

पिब मधुप बकुलकलिकां दूरे रसनाग्रमात्रमाधाय ।
अधरविलेपसमाप्ये मधुनि मुधा वदनमर्पयासि ॥ ३९७ ॥

पिबेति । हे मधुप । एवं च रसलम्पटत्वमावेद्यते । तेन च तूष्णीमवस्थित्यनर्हत्वम् । दूरे जिह्वाग्रमात्रं संस्थाप्य बकुलकलिकां पिब । अधरस्य विलेपेन समाप्तियोग्ये । अत्र लेपनेत्येव युक्तम् । मकरन्दे वृथा वदनमर्पयसि । एवं च बकुलकलिकाया अतिसूक्ष्मत्वात्तन्मधुनोऽतिस्वल्पतया वदनसंपर्के समाप्तिरेव भविष्यतीत्यतो रसनाग्रेणैव तद्ग्राह्यमिति भावः । एवं च नेयमत्यन्तसुरतविमर्दसहेति ध्वन्यते ॥

कश्चित्कंचिद्वक्ति—

प्रायेणैव हि मलिना मलिनानामाश्रयत्वमुपयान्ति ।
कालिन्दीपुटभेदः कालियपुटभेदनं भवति ॥ ३९८ ॥

प्रायेणेति । बाहुल्येन मलिनानामाश्रयत्वं प्राप्नुवन्ति । अर्थान्तरन्यासेनामुमेवार्थं द्रढयति—यमुनायाः पुटभेदश्चक्राणि । 'चक्राणि पुटभेदाः स्युः' इत्यमरः । कालियनामसर्पस्य पुटभेदनं पत्तनम् । 'पत्तनं पुटभेदनम्' इत्यमरः । भवति । एवं चामलिनाभिर्गङ्गादिभिर्न कालियस्याश्रयो दत्तः, किं तु कलिन्दतनययैवेति भावः । एवं च सद्भिरसतामाश्रयो न देय इति ध्वन्यते ॥

प्रियप्रीतिनिमित्तं सपत्नीसंमाननमपि विधेयमिति काचित्कांचिच्छिक्षयति—

पश्य प्रियतनुविघटनभयेन शशिमौलिदेहसंलग्ना ।
सुभगैकदैवतमुमा शिरसा भागीरथीं वहति ॥ ३९९ ॥

पश्येति । चन्द्रशेखरशरीरसंलग्ना उमा पार्वती । उमापदेन 'उमेति मात्रा तपसे निषिद्धा' इत्यादि कालिदासोक्तरीत्या प्रियप्रीतिस्तपोरूपक्लेशविशेषलभ्येति ध्वन्यते । प्रियशरीरविश्लेषभीत्या भागीरथीम् । भगीरथक्षत्रियसंबन्धोत्कीर्तनेन तीक्ष्णप्रतापतयातिदुःसहत्वं व्यज्यते । शिरसा वहति । इदं त्वं पश्य । एवं च त्वयाप्यनयैव रीत्या स्थेयमिति भावः । एवं च यत्र भगवत्या पार्वत्याप्येवंरीत्यावस्थीयते तत्र का वार्तान्यासामिति भावः ॥

काचिद्वक्ति—

पथिकवधूजनलोचननीरनदीमातृकप्रदेशेषु ।
घनमण्डलमाखण्डलधनुषा कुण्डलितमिव विधिना ॥ ४०० ॥

पथिकेति । पथिकाङ्गनानयनबाष्पैर्नदीमातृका नद्यम्बुपालिताः प्रदेशास्तेषु वेधसा कर्तृभूतेनेन्द्रधनुषा करणभूतेन मेघमण्डलं कुण्डलितमिव । पथिकाङ्गनाश्रुभिरेव सस्योत्पत्तेर्मेघमण्डलस्यानर्थक्यादिति भावः । एवं च पथिकाङ्गनानयननीराधिक्यप्रतिपादनेन तासामत्यन्तदुःखमावेद्यते ॥

काचित्कस्याश्चिद्वृत्तं वक्ति—

प्रतिवेशिमित्रबन्धुषु दूरात्कृच्छ्रागतोऽपि गेहिन्या ।
अतिकेलिलम्पटतया दिनमेकमगोपि गेहपतिः ॥ ४०१ ॥

प्रतिवेशीति । गेहिन्या । एवं च सर्वैसामर्थ्यमावेद्यते । क्लेशागतोऽपि । एवं च झटिति सर्वैराद्यदर्शनयोग्यत्वं ध्वन्यते । गेहपतिः । एवं च बहुतरदिनोत्तरागमनतया सर्वैकार्यस्य स्वमात्रकर्तृकतया सर्वैदर्शनयोग्यत्वं व्यज्यते । अत्यन्तं या क्रीडासक्तिस्तया प्रतिवेशिमित्रबन्धुषु । एवं च गोपनानर्हत्वमावेद्यते । एकं दिनमगोपि । यद्वा गेहिन्या अप्येतादृशी गतिस्तत्र का वार्तान्यस्या इति काचित् 'कथमीदृशक्रीडालम्पटा त्वम्' इति वादिनीं प्रति वक्ति ॥

नायिका नायकं प्रति वक्ति—

परपट इव रजकीभिर्मलिनो भुक्त्वापि निर्दयं ताभिः ।
अर्थग्रहणेन विना जघन्य मुक्तोऽसि कुलटाभिः ॥ ४०२ ॥

परेति । हे निन्द्य । निन्द्यकार्यकारित्वादिति भावः । रजकीभिः परपट इव ताभिः प्रसिद्धाभिः कुलटाभिः मलिनस्त्वं निर्दयं भुक्त्वा । परकीयत्वादिति भावः । द्रव्यग्रहणेन विना परित्यक्तोऽसि । एवं च कुलटात्वेन बहुनायकविषयरतिमत्तया तद्रतेराभासतया 'अर्थादौषधवत्कामः' इत्युक्तदिशा च तत्र न रस इति ध्वन्यते । अत्रान्यद्विचारजातमस्मत्कृतरसमञ्जरीटिप्पणे द्रष्टव्यम् ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता पकारत्रज्या ।

बकारव्रज्या ।

काचित्कस्याश्चिद्वृत्तं वक्ति—

बहुयोषिति लाक्षारुणशिरसि वयस्येन दयितं उपहसिते ।
तत्कालकलितलज्जा पिशुनयति सखीषु सौभाग्यम् ॥ ४०३ ॥

बह्वि॑ति । बहुतरनायिकाशालिनि लाक्षयारुणमस्तके प्रियतमे वयस्येनोपहसिते । कथं स्त्रीप्रणाममकरोदिति । तत्कालकृतलज्जा नायिका सखीषु सौभाग्यं सूचयति । बहुतराङ्गनाजातमपहाय मय्येवासक्त्या मच्चरणप्रणतिजन्यैवेयमरुणतैतच्छिरसीति द्योतनेनेति भावः । यद्वा यद्यपि नायको न तथा प्रेमादि विदधाति तथापि सख्यादिषु तु मय्येव प्रेमवानिति प्रदर्शनेन स्वगौरवं रक्षणीयमिति तत्प्रदर्शनप्रकारं काचित्कांचिदुपदिशति । बहुयोषितीत्यनेनानेकनायिकाचिन्तया किमीयश्चरणालक्तक इति संदेहयोग्यत्वं ध्वन्यते । तत्कालं वयस्योपहासैककालम् । अङ्गीकृतलज्जैव सखीषु सौभाग्यं सूचयति । एवं चैतादृशसमयेऽनया रीत्या स्वसौभाग्यप्रदर्शनं विधेयमित्यावेद्यते । तेन चैतादृशेऽपि समये न मनसि खेदो विधेयः, किं तु हर्ष एवाविष्करणीय इति ॥

कश्चिन्नायिकाकेशकलापं स्तौति—

बन्धनभाजोऽमुष्याश्चिकुरकलापस्य मुक्तमानस्य ।
सिन्दूरितसीमन्तच्छलेन हृदयं विदीर्णमिव ॥ ४०४ ॥

बन्धनेति । बन्धनवतः । गतपरिमाणस्य । अतिदीर्घस्येत्यर्थः । पक्षे गताभिमानस्य । अस्याः केशकलापस्य सिन्दूरयुक्तो यः सीमन्तस्तन्मिषेण हृदयं विदीर्णमिव । बन्धनवतो गताभिमानस्यापि विदीर्णहृदयता भवतीति लौकिकम् ॥

काचित्कंचिद्वक्ति—

बलमपि वसति मयीति श्रेष्ठिनि गुरुगर्वगद्गदं वदति ।
तज्जायया जनानां मुखमीक्षितमावृतस्मितया ॥ ४०५ ॥

बलमिति । सामर्थ्यमपि । अपिना गुणादिसमुच्चयः । मयि वसति । वसतीत्यनेन यो हि यदधिकं स्थलं जानाति तत्रैव वसतीत्यतोऽन्यनायकव्यतिरेकः स्वस्मिन्नावेद्यते । इत्यतिगर्वगद्गदं यथा स्यात्तथा वदति सति संकुचितस्मितया । एवं च किंचित्सलज्जत्वमावेद्यते । तदङ्गनया लोकानाम् । तद्वार्तादत्तावधानानामिति भावः । वदनमीक्षितम् । मत्समाधानलेशमपि कर्तुं न शक्नोति वदति त्वेतादृशमपीति विस्मयेनेति भावः । एवं च वणिजः पुंस्त्वहीनतया तदङ्गनायाश्च समृद्धमन्मथत्वेन तत्र त्वद्गमनेन तस्या आसक्तिस्त्वयि भविष्यतीति ध्वन्यते ॥

कस्याश्चिद्भुणादिकं कस्यचिद्वदनादाकर्ण्य कश्चित्तस्यामासक्त इति मधुपनलिनीवृत्तान्तव्याजेन काचिद्वक्ति—

बलवदनिलोपनीतस्फुटितनवाम्भोजसौरभो मधुपः ।
आकृष्यते नलिन्या नासानिःक्षिप्तबडिशरज्जुरिव ॥ ४०६ ॥

बलवदिति । बलवान्यो वायुस्तेन समीपानीतं विकसितनवकमलसौगन्ध्यं यस्य स मधुपो भ्रमरः कमलिन्या नासायां निःक्षिप्ता बडिशस्य मत्स्यवेधनस्य । 'बडिशं मत्स्यवेधनम्' इत्यमरः । रज्जुर्यस्यैतादृश इवाकृष्यते । क्वचिद्बडिशपदरहितः पाठः ॥

गुणमात्रग्राहकत्वं सुजनत्वम्, दोषमात्रग्राहकत्वं पिशुनत्वमिति कश्चित्कंचिद्वक्ति—

बाणं हरिरिव कुरुते सुजनो बहुदोषमप्यदोषमिव ।
यावद्दोषं जाग्रति मलिम्लुचा इव पुनः पिशुनाः ॥ १०७ ॥

बाणमिति । हरिर्विष्णुर्बाणासुरमिव सुजनो बहुदोषमपि । गुणभिन्नो दोषः । पक्षे बहुतरबाहुशालिनम् । दोषशून्यमिव । पक्षे बाहुरहितम् । कुरुते । मलिम्लुचा इव तस्करा इव पिशुनाः । पुनःशब्दोऽन्यदित्यर्थे । यावद्दोषम् । समग्रदोषमित्यर्थः । पक्षे यावद्रात्रिम् । जाग्रति । तद्विषयकगवेषणावन्तो भवन्तीत्यर्थः । पक्षे निद्राभाववन्त इत्यर्थः । परस्वापहरणार्थमिति भावः । एवं च सुजनान्न भीतिः, किं तु दुर्जनादेवेत्यतस्त्वं ततः सावधानतया तिष्ठेति ध्वन्यते ॥

नायिकादूती नायकं वक्ति—

बौद्धस्येव क्षणिको यद्यपि बहुवल्लभस्य तव भावः ।
भग्ना भग्ना भ्रूरिव न तु तस्या विघटते मैत्री ॥ १०८ ॥

बौद्धस्येति । बौद्धस्येव बह्व्यो वल्लभा नायिका यस्य । पक्षे बहूनां वल्लभस्य भक्तिविषयस्य । तव यद्यपि भावश्चित्ताभिप्रायः, प्रेम वा । पक्षे पदार्थः । क्षणिकोऽस्थिरः । बौद्धमते तु पदार्थस्य क्षणिकत्वादस्थिरत्वम् । तथापि भग्ना भग्ना भ्रूरिव तस्या मैत्री न तु विघटते । एवं च भग्नभ्रुवोर्यथा चमत्काराधायकत्वं तथा तदीयकलहस्य प्रीतिजन्यतया तत्त्वमित्यवेहीति ध्वन्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्याख्यार्थदीपनया समेता बकारव्रज्या ।

भकारव्रज्या ।

कश्चन दैन्यकारिणं महाकायमन्योक्त्या निन्दति—

भ्रमसि प्रकटयसि रदं करं प्रसारयसि तृणमपि श्रयसि ।
धिङ्मानं तव कुञ्जर जीवं न जुहोषि जठराग्नौ ॥ १०९ ॥

भ्रमसीति । हे कुञ्जर, भ्रमसि । दन्तं प्रकटयसि । रदमित्येकत्वमविवक्षितम् । करं शुण्डां हस्तं च प्रसारयसि । तृणमपि । अपिनानाश्रयणीयत्वमावेद्यते । आश्रयसि । अतस्तव मानं महापरिमाणं धिक् । उदरानले जीवं न जुहोषि । एवं चोदरपूर्त्यर्थमेतादृक्करणमत्यन्तानुचितमिति व्यज्यते । अन्योऽप्युदरपूरणार्थं नीचत्वमुपगत इतस्ततो भ्रमणादि करोतीति लौकिकम् ॥

लघोर्झटित्यपकारः कर्तुं शक्योऽनेन न गौरववत इति कश्चित्कंचिद्वक्ति—

भूतिमयं कुरुतेऽग्निस्तृणमपि संलग्नमेनमपि भजतः ।
सैव सुवर्णं दशा ते शङ्के गरिमोपरोधेन ॥ ४१० ॥

भूतीति । संलग्नमपि । एवं च न चिरकालस्तद्विनाश इति भावः । तृणमग्निर्भस्मरूपं कुरुते । विनाशयतीत्यर्थः । हे सुवर्ण, एनं भजतोऽपि चिरसंबन्धवतोऽपि ते सैव दशा गुरुत्वानुरोधेनेति तर्कयामि । एवं चायमपकारकारक एव परं तु त्वं स्वगौरवबलादेव यथावस्थितोऽवतिष्ठस्यतो नैनं सेवयेति ध्वन्यते । यद्वौद्धत्यविहीनैतत्सेवाकरणेऽत्यन्तमर्थावाप्तिरिति कश्चिदन्योक्त्या वक्ति । तृणमित्यनेन दीनमित्यावेद्यते । अत्र समित्युपसर्गो नोचितः । ऐश्वर्यप्रचुरं कुरुते । सुवर्ण, एनं भजतस्ते गुरुत्ववत्त्वात्सैव दशा । एवं च त्वयौद्धत्येन नैतस्मात्किंचिदवाप्तमित्यावेद्यते ॥

कश्चित्कांचित्प्रति संकेतं वक्ति—

भवति निदाघे दीर्घे यथेह यमुनेव यामिनी तन्वी ।
द्वीपा इव दिवसा अपि तथा क्रमेण प्रथीयांसः ॥ ४११ ॥

भवतीति । इहैतस्मिन्निदाघे महत्तरे सति । 'दीर्घा' इति पाठे पूर्वकालाभिप्रायेण यामिनीविशेषणम् । यमुनेव रात्रिः स्वल्पा भवति । तथा क्रमेण द्वीपा इव । 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्' इत्यमरः । दिवसा महत्तरा भवन्ति । यमुनायास्तन्वीत्वकथनेन चरणसंचरणयोग्यत्वं व्यज्यते । द्वीपानां प्रथीयस्त्वकथनेनानेककुञ्जवत्त्वम्, तेन च तत्र क्रीडाविशेषसंपादनयोग्यत्वं ध्वन्यते । एवं च रात्रेरतितनीयस्तया रतविशेषानर्हत्वेन, दिवसानामतिदीर्घतया दिवैव यमुनाद्वीप एव संकेतयोग्यस्तन्निश्चय एव विधेय इति द्योत्यते ॥

नायिकासखी नायकं वक्ति—

भवता महति स्नेहानलेऽर्पिता पथिक हेमगुटिकेव ।
तन्वी हस्तेनापि स्प्रष्टुमशुद्धैर्न सा शक्या ॥ ४१२ ॥

भवतेपि । भवता महति प्रीतिरूपवह्नौ । एवं च त्वत्प्रीतेर्दुःखदत्वं ध्वन्यते । पक्षे तैलसंबन्धिवह्नौ यार्पिता सुवर्णगुटिकेव । एवं च नायिकायां गौराङ्गीत्वमावेद्यते । सा तन्वी हे पथिक प्रवासशालिन् । एवं चान्यथाबुद्धियोग्यत्वं द्योत्यते । अशुद्धैर्हस्तेन स्प्रष्टुमपि । एवं च हस्ते स्थापयितुं न शक्येति किं वक्तव्यमिति भावः । न शक्या । एवं चेयं त्वदासक्त्या नान्यं कमपि चित्तपथे करोतीति ध्वन्यते । तप्ततैले प्रक्षिप्ता सुवर्णादिगुटिका सदोषैर्न स्प्रष्टुं शक्येति दिव्यादिव्यवहारः ॥

कश्चित्सखायं वक्ति—

भूमिलुलितैककुण्डलमुत्तंसितकाण्डपटमियं मुग्धा ।
पश्यन्ती निःश्वासैः क्षिपति मनोरेणुपूरमपि ॥ ४१३ ॥

भूमीति । भूमौ लुलितं संलग्नमेकं कुण्डलं यत्र । उत्तंसीकृतः काण्डपटो यत्र । पश्यन्तीयं मुग्धा निःश्वासैः । क्लेशजन्यैरिति भावः । मनोरेणुसमूहमपि क्षिपति । एवं चैतस्या एतादृशावलोकनेन मम मनोऽवतिष्ठते मयीति ध्वन्यते ॥

मूर्खाङ्गनाभिलाषिणं कंचन काचिदन्योक्त्या वदति—

भवतालिङ्गि भुजंगी जातः किल भोगिचक्रवर्ती त्वम् ।
कञ्चुक वनेचरीस्तनमभिलषतः स्फुरति लघिमा ते ॥ ४१४ ॥

भवतेति । हे कञ्चुक, येन भवता भुजंगी उरगी । पक्षे वेश्या । आलिङ्गिता, यस्त्वं निश्चयेन भोगिनामुरगाणाम् । पक्षे भोगोपचारशालिनाम् । समूहवर्ती, यद्वा तेषु राजा जातः । तस्य ते वनेचरी भिल्लकान्ता । पक्षे वनेचरीत्वेन मूर्खताशालित्वं ध्वन्यते । स्तनमित्येकत्वमविवक्षितम् । इच्छतो लाघवं स्फुरति । एवं च चतुरायाः संगतिं परित्यज्याचतुरासंगतीच्छा लाघवकारिणीति ध्वन्यते ॥

केनचित्कस्याश्चित्संकेतः कृत इति कश्चित्कंचिद्वक्ति—

भैक्षभुजा पल्लीपतिरिति स्तुतस्तद्वधूसुदृष्टेन ।
रक्षक जयसि यदेकः शून्ये सुरसदसि सुखमस्मि ॥ ४१५ ॥

भैक्षेति । तस्य पल्लीपतेर्वध्वा सुदृष्टेन । सकामदृष्ट्यावलोकितेनेत्यर्थः । भिक्षासंबन्ध्यन्नभोजनवता । एवं च न्यासशून्यत्वेन पुष्टत्वाद्यभिव्यज्यते । पल्लीपतिः । एवं च चातुर्यविशेषाशालित्वं ध्वन्यते । इति स्तुतः स्तुतिविषयीकृतः । तामेवाह—रक्षक, सर्वोत्कर्षेण तिष्ठसि । यस्मादेक इतरशून्यः शून्ये मदतिरिक्तजनरहिते देवालये सुखमस्मि । एवं च त्वद्रक्षणसामर्थ्यान्न क्वापि कस्यापि भीतिरिति भावः । एवं च देवालये मयैकाकिना स्थीयते तत्र त्वयागन्तव्यमिति ध्वन्यते ॥

वृद्धेन स्त्रीसंग्रहो वसुसंग्रहो वा न विधेय इति कश्चित्कंचिद्वक्ति—

भोगाक्षमस्य रक्षां दृष्ट्यात्रेणैव कुर्वतोऽनभिमुखस्य ।
वृद्धस्य प्रमदापि श्रीरपि भृत्यस्य भोगाय ॥ ४१६ ॥

भोगेति । भोगो रतम्, सच्चन्दनादिकं च । तत्रासमर्थस्य । दृष्टिमात्रेण रक्षणं कुर्वतः । मात्रपदेन शरीरसामर्थ्याभावो ध्वन्यते । 'वाङ्मात्रेण' इत्यपि पाठः । अनभिमुखस्य, असामर्थ्यात्तत्कटाक्षनिरीक्षणासमर्थस्य, अर्थिपराङ्मुखस्य च । वृद्धस्य प्रकृष्टमदशालिनी नायिकापि लक्ष्मीरपि सेवकस्य भोगाय । एवं चैतदुभयसंग्रहोऽनर्थक एव तस्येति द्योत्यते ॥

भवितासि रजनि यस्यामध्वश्रमशान्तये पदं दधतीम् ।
स बलाद्वलयितजङ्घाबद्धां मामुरसि पातयति ॥ ४१७ ॥

भवितेति । हे रजनि, यस्यां त्वयि श्रमापनोदाय पदं दधतीम् । वलयिता या जङ्घा

तया बद्धां मामुरसि पातयिष्यति, एतादृशी त्वं भवितासि । श्रमापनोदनाय श्रान्तस्य चरणाद्युपरि चरणदानादि विधीयत इति लौकिकम् । पथिकाङ्गनाशंसनमेतत् ॥

किमित्यस्य गौरवादि न विधीयते त्वयेति वादिनीं सखीं नायिका वक्ति—

भूषणतां भजतः सखि कषणविशुद्धस्य जातरूपस्य ।
पुरुषस्य च कनकस्य च युक्तो गरिमा सरागस्य ॥ ४१८ ॥

भूषणतामिति । हे सखि, भूषणतां सर्वोत्कृष्टतां कटकादिरूपतां च भजतः । कषणेन चिरकालीनसंगत्या निकषोपलेन च विशुद्धस्य विज्ञातसकलस्वभावस्य विज्ञातशुद्धेश्च । जातरूपस्य सुरूपस्य । यद्वा यतो रूपादिकमित्यर्थः । पक्षे सुवर्णस्य । 'चामीकरं जातरूपम्' इत्यमरः । सरागस्य प्रीतिमतः । पक्षे रागो लौहित्यम् । पुरुषस्य च, कनकस्य च, गरिमा गौरवम् । पक्षे परिमाणम् । युक्तम् । एवं चैतादृशस्यैव गौरवमुचितम्, अन्यादृशस्य नेति भावः ॥

स्वगुणैः प्रियवश्यताविधानदक्षाम् 'कार्मणेनानया पतिः स्वाधीनतामानीतः' इति सपत्नीभिः प्रोच्यमानां नायिकां काचिदन्योक्त्या वक्ति—

भस्मपरुषेऽपि गिरिशे स्नेहमयी त्वमुचितेन सुभगासि ।
मोघस्त्वयि जनवादो यदोषधिप्रस्थदुहितेति ॥ ४१९ ॥

भस्मेति । भस्ममलिनेऽपि गिरिशे । एवमपि काठिन्यमाविद्यतेऽज्ञत्वं वा । तेन दुराराध्यत्वम् । स्नेहः प्रीतिस्तत्स्वरूपा, न तु प्रीतिकर्त्री । प्रीतिप्रचुरेति कश्चित् । इत्युचितेन सुभगासि । परं तु यत्, ओषधीनां प्रस्थानि सानूनि यस्मिंस्तस्य दुहितेति । 'स्नुः प्रस्थः सानुरस्त्रियाम्' इत्यमरः । एवं चानया कार्मणबलेन पतिर्वश्यतामानीत इति जनवादः । जनपदमनिवारणीयतां ध्वनयति । मोघोऽलीकः । एवं च त्वया नायकः स्वगुणैरेव स्वाधीनतां नीतः, न तु कार्मणबलेनेति व्यज्यते । तेन च लोकस्य भ्रान्तत्वम् । तेन च तद्वचनस्याप्रामाण्यम् ॥

निकटस्थाया अपि नवोढाया उपभोगो दुःसाध्य इति कश्चिदुक्ति—

भयपिहितं बालायाः पीवरमूरुद्वयं स्मरोन्निद्रः ।
निद्रायां प्रेमार्द्रः पश्यति निःश्वस्य निःश्वस्य ॥ ४२० ॥

भयेति । बालाया भयेन । नवोढास्वभावसुलभेनेति भावः । आच्छादितं पीवरं जङ्घाद्वयं प्रेमार्द्रः । प्रेमयुक्त इति यावत् । मदनोद्रतनिद्रो नायको निद्रायाम् । नायिकाया इति भावः । निःश्वस्य निःश्वस्य । संभोगाभावादिति भावः । पश्यति । यद्वा यस्य यत्र मनस्तदेव तेन निद्रायामपि दृश्यत इति कश्चित्कंचिद्वक्ति । निद्रायां स्वस्येति भावः । एवं च जाग्रद्दशायां यादृग्दृष्टं बालाया ऊरुद्वयं तादृगेव निद्रायां पश्यतीति भावः ॥

नायिकासखी नायकं वक्ति—

भ्रमरीव कोषगर्भे गन्धहृता कुसुममनुसरन्ती त्वाम् ।
अव्यक्तं कूजन्ती संकेतं तमसि सा भ्रमति ॥ ४२१ ॥

भ्रमरीति । गन्धेन परिमलेन स्वाधीनीकृतचित्ता कुसुममनुसरन्ती कोषगर्भे भ्रमरीव त्वामनुसरन्ती । अव्यक्तम् । लोकभयादिति भावः । पक्षे कोषैराच्छादितत्वात् । कूजन्ती सा तमसि संकेतं भ्रमति । नायिकाया भ्रमरीसाम्येन नायके च कुसुमसाम्येन यथा कुसुमानुसरणं विना न गतिर्भ्रमर्यास्तथा त्वदनुसरणं विना न गतिर्नायिकाया इति द्योत्यते ॥

एतस्या मय्यनुरागश्चिरं स्थास्यति न वेति संशयानं नायकं नायिकासखी वक्ति—

भ्रामं भ्रामं स्थितया स्नेहे तव पयसि तत्र तत्रैव ।
आवर्तपतितनौकायितमनया विनयमपनीय ॥ ४२२ ॥

भ्राममिति । तत्र तत्र तद्विधानशालिनि । लोकोत्तर इति यावत् । तव स्नेहरूपे पयसि । पयःपदेन माधुर्यादयभिव्यज्यते । पक्षे स्नेहयुक्ते जले । भ्रान्त्वा भ्रान्त्वा स्थितयानया विनयं नम्रतां विशिष्टनीतिं वा । पक्षे विशिष्टनयनम् । अपनीय । आवर्तेऽम्भसां भ्रमे पतिता या नौका तद्वदाचरितमेव । एवं च नान्यथा शङ्कनीयमिति भावः । एवं च यथा जले स्थिता नौकावर्तपतिता ततोऽन्यत्र न गच्छति, तथेयं तव स्नेहे स्थिता नान्यत्र चित्तं करिष्यतीति व्यज्यते । तेन च सर्वथैवेयमनुग्राह्येति ॥

काचित्कांचिद्वक्ति—

भ्रमयसि गुणमयि कण्ठग्रहयोग्यानात्ममन्दिरोपान्ते ।
हालिकनन्दिनि तरुणान्ककुद्मिनो मेढिरज्जुरिव ॥ ४२३ ॥

भ्रमयसीति । हे हालिकनन्दिनि । हालिकपदेन जातिशून्यत्वम्, तेन च कामुकागमनसौकर्यम्, विवाहयोग्येयं जातेति ज्ञानवैधुर्येण कंचित्कालं यथेच्छपरपुरुषभोगसंपादनयोग्यत्वं ध्वन्यते । गुणाः सौन्दर्यादयः । पक्षे तन्तवः । स्वसदननिकटे कण्ठग्रहयोग्यानालिङ्गनयोग्यान् । पक्षे कण्ठबन्धनयोग्यान् । तरुणान् । मेढिरज्जुः । 'पुंसि मेढिः खले दारु न्यस्तं यत्पशुबन्धने' इत्यमरः । वृषभानिव भ्रमयसि । एवं चैते गृहमध्य एव कुतो नानीयन्ते भीतेरभावादिति भावः । 'गुणमय–' इति पाठे गुणप्रचुराश्च ते कण्ठग्रहयोग्याश्च तानित्यर्थः ॥

---

१. अस्या आर्यायाः पुस्तकान्तरे तु व्याख्याभेदो यथा—'काचिदन्योक्त्या हलिकवधूं प्रत्याह—भ्रमयसीति । सौन्दर्यशालिनि । पक्षे तन्तुप्रचुरे । कण्ठग्रहयोग्यानालिङ्गनयोग्यान् । पक्षे ताडनयोग्यान् । स्वगृहसमीपे नूतनान् । पक्षे यूनः । उच्चांसान् । पक्षे बलीवर्दान् । मेढिरज्जुरिवेतस्ततः संचारयसि । सुरतस्थलाप्रास्येति भावः । 'गुणमय–' इति पाठे गुणप्रचुराश्च ते कण्ठग्रहयोग्याश्च तानित्यर्थः ॥'

कश्चित्कंचित्प्रत्यन्योक्त्या वक्ति—

भालनयनेऽग्निरिन्दुर्मौलौ गात्रे भुजंगमणिदीपाः ।
तदपि तमोमय एव त्वमीश कः प्रकृतिमतिशेते ॥ ४२४ ॥

भालेति । हे ईश । एवं चोक्तदोषदानानर्हत्वं ध्वन्यते । यद्यपि तव ललाटनेत्रे वह्निः, मस्तके चन्द्रः, शरीरे सर्पमणिरूपा दीपास्तथापि त्वं तमोमय एव । एनमर्थमर्थान्तरोपन्यासेन द्रढयति । स्वभावं कोऽतिक्रमते । न कोऽपीत्यर्थः । प्रकाशकवस्तुबाहुल्येऽप्यन्धकारप्रचुरत्वमिति विरोधः । तदभावस्तु तमःपदस्य गुणविशेषवाचित्वात् । एवं च यद्यपि समीचीनसात्विकसंगतिस्तवास्ति, तथापि त्वदीयं स्वाभाविकं तमोगुणप्रकृतित्वं नापगच्छतीति व्यज्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता भकारव्रज्या ।

मकारव्रज्या ।

आसक्तचित्तेनाङ्गनौद्धत्यमपि न गण्यत इति काचित्कंचिद्वक्ति—

मधुमदवीतव्रीडा यथा यथा लपति संमुखं बाला ।
तन्मुखमजाततृप्तिस्तथा तथा वल्लभः पिबति ॥ ४२५ ॥

मधिति । मद्यमदा । अत एव गतलज्जेति विग्रहः । मधुमदेन वीतव्रीडेति करणे मदपदमधिकमिवाभाति । बाला । एवं च लज्जौचित्यमावेद्यते । यथा यथा संमुखम् । अर्थान्नायकस्य । वक्ति । वल्लभोऽजाततृप्तिः सन्बालामुखं तथा तथा सादरमवलोकयति । एवं च रसिकानां नायिकौद्धत्यकृतवचनरचनादिकं न दुःखदम्, अतस्त्वयैतादृशैतद्वचनादिना कोपो न विधेय इति ध्वन्यते ॥

सखी नायिकां वक्ति—

मित्रैरालोच्य समं गुरु कृत्वा कदनमपि समारब्धः ।
अर्थः सतामिव हतो मुखवैलक्ष्येण मानोऽयम् ॥ ४२६ ॥

मित्रैरिति । मित्रैः समं विचार्य, महत्तरं कलहमपि कृत्वा, सम्यक् । आटोपपुरःसरमिति भावः । प्रारब्धः । अर्थ इव सतां सभ्यानां मुखवैलक्ष्येण । असम्यगिदमिति धियेति भावः । अयं मानस्तव मुखवैलक्ष्येण । प्रसादजन्येनेति भावः । हतः । एवं च यथा मित्रैः समं विचार्य महत्तरकलहं विधायारब्धोऽर्थः सतां मुखवैलक्ष्यमात्रकरणेन विनष्टो

---

१. अत्रापि पुस्तकान्तरे व्याख्याभेदो यथा—'कश्चन भक्तः शिवं प्रति वक्ति—भालेति । एतादृशप्रकाशकसामग्रीसत्त्वेऽपि तमोरूपगुणमय एव । अमुमेवार्थं द्रढयति—कः स्वभावमतिशेते । त्यजतीत्यर्थः । एवं चाज्ञेयोऽसीति व्यज्यते । अथवा नायकीयपराङ्गनासङ्गज्ञानोत्तरं विमनस्कां नायिकां सखी दृष्टान्तद्वारा समाधत्ते—तथा च यत्रेश्वरस्याप्येतादृश्यवस्था तत्र का वार्ता वाच्या त्वदीयनायकस्येति भावः ॥'

भवति, तथा ते मानः प्रसादजन्यमुखवैलक्षण्यतया विनष्टः । एवं च प्रसादचिह्नं कंचित्कालं गोपयेति ध्वन्यते । यद्वा यथा विचार्यं कलहादिकं च विधायारब्धः समीचीनानामर्थो मुखवैलक्ष्येण । स्वतः कृत्रिमत्वेन ज्ञानादिति भावः । अत एव सतामिति पदमुपयोगि । हतो भवति । लोकैर्मुखवैलक्ष्येणान्यथानिर्णयादिति भावः । तथा ते मानः 'कथं समाधेयो दयितः' इत्यादिचिन्ताजन्यमुखमालिन्येन हत इत्यर्थः । अथवा मित्रैः समं मित्रतुल्यतया विचार्य । उपकारकत्वादिति भावः । मुखवैलक्ष्येणादैन्यादिवशादिति भावः । गुरु महत्तरं कदनं क्लेशादि कृत्वा सम्यगर्जितोऽप्यर्थो द्रव्यं सतां विवेकिनां दुःखदत्वादनादरणीयो भवति । तथा मित्रत्वेन विभाव्यैवं चास्माकमनादरकरणं न तवोचितमिति व्यज्यते । मुखवैलक्षण्येन महत्तरं कलहं कृत्वा । एवं चान्यासां दुर्वचनादिरूपः कलहः, तव तु मुखवैलक्षण्यकरणमात्ररूप इत्यन्यनायिकाव्यतिरेकः सूच्यते । कृतोऽपि तवायं मानो हतो भवति दुःखदत्वादनादरणीयो भवति । एवं चैतादृशमानविधानं तवानुचितमिति द्योत्यते ॥

कश्चिल्लज्जावशात्स्वकटाक्षविक्षेपसमयेऽन्यप्रदेशाभिमुखीं कांचिद्वक्ति—

मम रागिणो मनस्विनि करमर्पयतो ददासि पृष्ठमपि ।
यदि तदपि कमलबन्धोरिव मन्ये स्वस्य सौभाग्यम् ॥ ४२७ ॥

ममेति । हे मनस्विनि प्रशस्तान्तःकरणे । एवं च कौटिल्याभावो व्यज्यते । अनुरागवतः । पक्षे लौहित्यवतः । करं हस्तम् । पक्षे किरणम् । समर्पयतो मम पृष्ठमपि यदि ददासि । लज्जावशान्मुखपरावर्तनादिति भावः । पक्षे 'पृष्ठतः सेवयेदर्कम्' इत्युक्तत्वादिति भावः । तदपि कमलबन्धोरिव स्वस्याहं सौभाग्यं मन्ये । एवं चैतावताप्यहमात्मानं कृतार्थं मन्ये, किमु संमुखावलोकन इति भावः । एवं यथाकथंचित्कुचस्पर्शार्थं करमर्पयतो मम पृष्ठदाने कूर्पासग्रन्थिमोचनानुमितिदानेनात्यन्तानुकूल्यं विहितं त्वयेति व्यज्यते ॥

पुष्पवतीवृत्तं कश्चित्सखायं वक्ति—

मा स्पृश मामिति सकुपितमिव भणितं व्यञ्जिता न च व्रीडा ।
आलिङ्गितया सस्मितमुक्तमनाचार किं कुरुषे ॥ ४२८ ॥

मेति । मा मां स्पृशेति सकुपितमिव । न वास्तवमिति भावः । भणितम् । लज्जा न च व्यञ्जिता । पुष्पवत्त्वे ज्ञाते स्पर्शमयं न करिष्यतीति भावः । आलिङ्गितया । औत्कण्ठ्यादिति भावः । आचारहीन, किं कुरुषे इति सस्मितम् । सुखोद्रेकादिति भावः । उक्तम् । एवं च कामिनीनां सुरते सर्वदा सौख्यमिति ध्वन्यते ॥

कश्चित्कांचिदन्योक्त्या वक्ति—

मूलानि च निचुलानां हृदयानि च कूलवसतिकुलटानाम् ।
मुदिरमदिरा प्रमत्ता गोदावरि किं विदारयसि ॥ ४२९ ॥

मूलेति । हे गोदावरि, मेघरूपा या मदिरा तयोत्कृष्टमदवती । एवं च कर्तव्याकर्त-

व्यविवेकविधुरत्वं ध्वन्यते । वृक्षाणाम् । निकटस्थानामिति भावः । [illegible] सतिशालिकुलटानां हृदयानि च विदारयसि । वीचीभिः शिथिलैकाण्डेन सकेतितरूनुन्मूलनेनेति भावः । कूलवसतिपदेन कुलटानामनन्यगतिकत्वं तद्दूरवर्तिनां तदाकृत्वज्ञापनीयं च ध्वन्यते । इदं किं नूचितमिति भावः । एवं चास्थिरद्रव्यादुन्मादेव [illegible] णानां निकटवसतिमात्रशालिनामितस्ततः समानीतान्नोपजीविनां दुःखदानमनुचितं तवेति ध्वन्यते ॥

पाण्डित्यादिगुणशालित्वेऽपि जडाचाराभिरतं कञ्चिदुपदिशति—

मलयद्रुमसाराणामिव धीराणां गुणप्रकर्षोऽपि ।
जडसमयनिपतितानामनादरायैव न गुणाय ॥ ४३० ॥

मलयेति । मूर्खाचारपतितानाम् । 'समयाः शपथाचार–' इत्यमरः । पक्षे शीतकालप्राप्तानाम् । चन्दनसाराणामिव धीराणां गुणानां पाण्डित्यादीनाम् । पक्षे सौगन्ध्यादीनाम् । आधिक्यमपि । अपिरनादरानर्हत्वं गमयति । अनादरायैव न गुणाय । एवं च समीचीनस्याप्यसमीचीनाचारप्रविष्टस्य गुणाद्यपि निन्दाकरमेवेत्यतस्त्वया नैवमाचरितव्यमिति व्यज्यते ॥

कस्याश्चिन्नायिकायाः साम्यं स्वस्मिन्कुर्वाणां कांचित्काचिदन्योक्त्या वक्ति—

मधुमथनमौलिमाले सखि तुलयसि तुलसि किं मुधा राधाम् ।
यत्तव पदमदसीयं सुरभयितुं सौरभोद्भेदः ॥ ४३१ ॥

मधिवति । मधुमथनस्य श्रीकृष्णस्य मौलिसंबन्धशालिनि माले सखि । एवं च यथार्थवादार्हत्वं ध्वन्यते । राधां वृथा किमिति तुलयसि स्वसमानां मन्यसे । यद्यस्मात्तव परिमलोद्भेदोऽदसीयं पदं राधासंबन्धिचरणं सुरभीकर्तुम् । श्रीकृष्णेन सर्वदा राधाचरणप्रणामकरणादिति भावः । एवं यथा तस्यां गौरवम्, न तथा त्वयीति ध्वन्यते । सौरभोद्भेद इत्यस्य प्राक्तवेति पदमुचितम् ॥

कश्चित्सखायं वक्ति—

मयि यास्याति कृत्वावधिदिनसंख्यं चुम्बनं तथाश्लेषम् ।
प्रियया नुशोचिता सा तावत्सुरताक्षमा रजनी ॥ ४३२ ॥

मयीति । गन्तुकामे मय्यवधिदिनसमसंख्यं चुम्बनं तथालिङ्गनं कृत्वा प्रियया तावत्संख्याकसुरतसंपादनासमर्था रात्रिरनुशोचिता । एवं च स्त्रीणां रतेऽत्यन्तं प्रीतिरिति भावः ॥

कश्चिद्वेश्यां स्तौति—

मृगमदनिदानमटवी कुङ्कुममपि कृषकवाटिका वहति ।
हट्टविलासिनि भवती परमेका पौरसर्वस्वम् ॥ ४३३ ॥

मृगेति। अटवी कस्तूरिकोत्पत्तिस्थानम्। कुङ्कुममपि कृषकवाटिका वहति। एवं च मृगमदकेसरयोर्वनवासशालितया न नागरिकजनसुखदत्वमिति भावः। हे वाराङ्गने, एका भवती उत्कृष्टं पुरसंबन्धिलोकसर्वस्वम्। सुखविशेषप्रदत्वादिति भावः। यद्वा कस्तूरीकुङ्कुमयोरन्यत्रापि सत्त्वेन साधारणतया, वारविलासिन्यास्तु नगरमात्रवसतिशालितयासाधारण्येन नागरिकात्यन्तस्पृहणीयत्वमिति भावः॥

वसन्तसमयेषूद्दीपनोद्रेकात्तूष्णीमवस्थातुं न शक्यत इति काचित्कांचिद्वक्ति—

मधुदिवसेषु भ्राम्यन्यथा यथा विशति मानसं भ्रमरः।
सखि लोहकण्टकनिभस्तथा तथा मदनविशिखोऽपि॥ ४३४॥

मधुविति। हे सखि, वसन्तसमयेषु भ्राम्यन्सन्। मधुपदेन दुष्परिहरत्वं ध्वन्यते। यथा यथा चित्तं लोहकण्टकसदृशो भ्रमरो विशति तथा तथा मदनबाणोऽपि। एवं च केनचित्सह मां योजयेति ध्वन्यते। यद्वेतस्ततो मदर्थमेव परिभ्रमन्भ्रमर इव भ्रमरः। सारग्राहकत्वेनातिचतुरत्वादिति भावः। नायको यथा यथा मनसि समायाति तथा तथा लोहकण्टकसदृशः। एवं च व्यथकत्वम्। मदनबाणोऽपि हृदयं प्रविशति। एवं चैतद्दर्शनेनाहं मदनशरविद्धा तद्योगं विनावस्थातुं न शक्नोमीति तेन सह मां योजयेति ध्वन्यते॥

नायको नायिकां वक्ति—

मयि चलिते तव मुक्ता दृशः स्वभावात्प्रिये सपानीयाः।
सत्यममूल्याः सद्यः प्रयान्ति मम हृदयहारत्वम्॥ ४३५॥

मयीति। हे प्रिये, मयि प्रस्थिते मुक्ताः परित्यक्ताः। पक्षे मुक्ताफलानि। स्वभावात्स्त्रीस्वभावात्। पक्षे साहसिकतया। सपानीया अश्रुजलवत्यः। पक्षे तेजोविशेषशालिन्यः। अमूल्या उत्कृष्टाः। पक्षे बहुतरद्रव्यलभ्याः। दृष्टयो मम हृदयस्य चेतसः। पक्षे वक्षसः। हारत्वमपहारकत्वम्। पक्षे हारभावं प्रयान्ति। इदं सत्यम्। एवं चैतादृशत्वद्विलोकनेनाहं गमनपराङ्मुखः संवृत्तोऽस्मीति व्यज्यते॥

अहमत्यन्तमदनबाधाक्रान्तः संवृत्त इति कश्चित्कांचिदाह—

मुग्धे मम मनसि शराः स्मरस्य पञ्चापि संततं लग्नाः।
शङ्के स्तनगुटिकाद्वयमर्पितमेतेन तव हृदये॥ ४३६॥

मुग्ध इति। हे मुग्धे, स्मरस्य पञ्चापि बाणाः। अपिनान्यसत्त्वाभावो व्यज्यते। मम मनसि निरन्तरम्। एवं च सर्वमपि मनो विद्धमिति भावः। लग्नाः, न तु निर्गताः। अत एतेन मदनेन तव हृदये स्तनरूपगुटिकाद्वयमर्पितमित्यहं संभावयामि। शराभावादिति भावः। एवं च गुटिकावेदनायाः स्वल्पतया धैर्यम्, मयि नेति ध्वन्यते॥

कश्चित्कांचिद्वक्ति—

मधुमथनवदनविनिहितवंशीसुषिरानुसारिणो रागाः।
हन्त हरन्ति मनो मम नलिकाविशिखाः स्मरस्येव॥ ४३७॥

मधिवति । श्रीकृष्णवदनविनिहिता या वंशी तद्रन्ध्रानुसारिणः शब्दा मदनस्य नलिकाबाणा इव मम मनः । हन्त खेदे । हरन्ति । एवं च वेणुध्वनिं श्रुत्वावस्थातुं न शक्यते, अतो द्रुतं प्रयाहीति ध्वन्यते ॥

कयोश्चिन्मित्रयोरन्यतरं संगमयितुं दूती नायिकां वक्ति—

महतोः सुवृत्तयोः सखि हृदयग्रहयोग्ययोः समुच्छ्रितयोः ।
सज्जनयोः स्तनयोरिव निरन्तरं संगतं भवति ॥ ४३८ ॥

महतोरिति । श्रेष्ठयोः । एवं च परच्छिद्रप्रेक्षणानर्हत्वं ध्वन्यते । पक्षे महापरिमाणशालिनोः । समीचीनाचरणयोः । एवं च लौकिकदुष्टशङ्काशून्यत्वमावेद्यते । पक्षे समीचीनवर्तुलयोः । हे सखि, हृदयग्रहयोग्ययोः । चित्ते स्थापयितुं योग्ययोः । एवं चातिप्रियत्वमावेद्यते । यद्वालिङ्गनयोग्ययोरित्यर्थः । पक्षे वक्षःस्थितिशालिनोः । समुच्छ्रितयोः । एवं च नवीनयौवनभाग्योदयादिशालित्वं द्योत्यते । पक्षे नवीनोदयवत्त्वम् । सज्जनयोः स्तनयोरिव संगतं निरन्तरं भवति । एवं चोभयोरपि समानगुणशीलतया न्यूनाधिकभावविरहेणोभयोर्मध्ये यं प्रत्यनुरागः स एवानुगृह्यतामिति ध्वन्यते । यद्वा कयोश्चित्सहचरयोर्मध्येऽन्यतरभीत्यान्यतरावलोकनमसम्यगिति मन्वानां नायिकां दूती वक्ति—एतयोरतितरां धीमत्त्वेन परस्परानन्दसंवर्धकतया नान्यतराशङ्का त्वया विधेयेत्यावेद्यते । स्तनयोरिवेत्यनेनैतत्संगतिविघटनमसंभवीति ध्वन्यते । कथमेतयोरतितरां संगतिरिति वादिनीं कांचित्काचिद्वक्ति । समानगुणशीलत्वादिति भाव इति वा । अथवा समानगुणशीलादिशालिनोः साहजिकी संगतिरिति कांचित्काचिद्वक्ति ॥

कश्चित् 'एतादृशं नाचरणीयम्' इत्युपदेशकर्तारं सखायं वक्ति—

मम वारितस्य बहुभिर्भूयो भूयः स्वयं च भावयतः ।
जातो दिशीव तस्यां सखे न विनिवर्तते मोहः ॥ ४३९ ॥

ममेति । बहुभिः । विवेकिभिरिति भावः । सुहृद्भिरिति वा । निवारितस्य । नैवं विधेयमिति भावः । स्वयं च मुहुर्मुहुर्विचारयतो मम दिशीव तस्यां जातो मोहः प्रीतिर्भ्रमश्च हे सखे, नापगच्छति । एवं च यथा संजातदिग्भ्रमस्य न केनापि निवृत्तिः कर्तुं शक्या, तथैतस्यां ममोत्पन्नानुरागस्य । अतस्त्वदुपदेशोऽनर्थकः । अत एतत्करणाद्विरमेति ध्वन्यते ॥

पराङ्गनातिलम्पटतयापकीर्त्या स्वजनपरित्यक्तं कंचन कश्चिदन्योक्त्या वक्ति—

मग्नोऽसि नर्मदाया रसे हतो वीचिलोचनक्षेपैः ।
यद्युच्यसे तरुवर भ्रष्टो भ्रंशोऽपि ते श्लाघ्यः ॥ ४४० ॥

मग्नोऽसीति । हे तरुश्रेष्ठ । एवं च नीचस्यैतादृशाचरणे न किंचिदसम्यगिति ध्वन्यते । नर्मदाया नद्याः । नर्म ददातीति व्युत्पत्त्या कलाकलापवत्त्वमावेद्यते नायिकायाम् । तरङ्गरूपकटाक्षैः, अथ च वीचीतुल्या ये लोचनक्षेपास्तैर्हतो, रसे जले, शृङ्गारादौ

च मग्नोऽसि । एवं चानन्दनिमग्नमानसतया लोकनिन्दाज्ञानवैधुर्यमावेद्यते । भ्रष्ट इति यद्युच्यसे । लोकैरित्यर्थः । अत्र कर्त्रनुपादानेन सर्वेऽपि त्वां निन्दन्तीति व्यञ्जनेन न न्यूनपदत्वमाशङ्कनीयम् । तर्हि ते भ्रंशोऽपि श्लाघार्हः । नायिकाया लोकोत्तरसौन्दर्यादिगुणशालितयेति भावः । एवं चैतादृशं निन्द्यकर्मापि चेत्कर्तव्यं तर्ह्येतादृशनायिकया सहेति ध्वन्यते ॥

पाणिग्रहणसमयसंजातसात्त्विकभावोदयं कंचन कश्चिद्वक्ति—

मेनामुल्लासयति स्मेरयति हरिं गिरिं च विमुखयति ।
कृतकरबन्धविलम्बः परिणयने गिरिशकरकम्पः ॥ ४४१ ॥

मेनामिति । विवाहकाले संपादितपाणिग्रहणविलम्बो गिरिशस्य हस्तकम्पो मेनां पार्वतीमातरमुल्लासयति स्मेत्यर्थः । एवमुत्तरत्र । कामोद्रिक्तजामातृलाभादिति भावः । विष्णुं स्मेरयति । अत्यन्तप्रकटितवैराग्यस्याप्यस्यैतादृश्यवस्थेति कुतुकादिति भावः । हिमालयं च विमुखयति । लज्जावशादिति । एवं चैतादृश्यवस्थावश्यं महतामपि भवतीति न त्वया कापि लज्जा विधेयेति ध्वन्यते ॥

मधुगन्धि घर्मतिम्यत्तिलकं स्खलदुक्ति घूर्णदरुणाक्षम् ।
तस्याः कदाधरामृतमाननमवधूय पास्यामि ॥ ४४२ ॥

मधिति । मद्यगन्धवत्, प्रस्वेदार्द्रतिलकम्, स्खलदुक्ति । सोन्मादत्वादिति भावः । घूर्णदरुणनयनम्, तस्या बुद्धिस्थनायिकाया मुखमवधूय तिरस्कृत्य । अचुम्बयित्वेति भावः । अधरामृतम् । उत्तरोष्ठपाननिषेधादिति भावः । पास्यामि । एवं चैतादृशवदनचुम्बनादप्यधरपानमधिकमिति व्यज्यते । यद्वा मधुगन्धादिगुणयुक्तमाननमवधूय कम्पयित्वा । स्थिताया इति शेषः । तस्या अधरामृतं पास्यामीति योजना । पथिकाशंसनमेतत् ॥

काचित्कांचिद्वक्ति—

मेदिन्यां तव निपतति न पदं बहुवल्लभेति गर्वेण ।
आश्लिष्य कैर्न तरुणैस्तुरीव वसनैर्विमुक्तासि ॥ ४४३ ॥

मेदिन्यामिति । अहं बहूनां वल्लभेति गर्वेण तव पदं भूमौ न निपतति । कैस्तरुणैरालिङ्गच वस्त्रैस्तुरीव न विमुक्तासि । उपसर्गेण पुनः कदापि न संबन्ध इत्यावेद्यते । उत्तरोत्तरनायकवल्लभात्वे पूर्वपूर्वनायकवल्लभात्वाभावस्य हेतुतया तस्य च गुणशून्यत्वज्ञानाधीनतया न तवानेकवल्लभात्वेन गर्वकरणमुचितम्, अपि तु यस्यामेव कलाकलापाकृष्टो नायको निमग्नमानसस्तस्या एव गर्वकरणमुचितमिति ध्वन्यते ॥

परपुरुषेष्वभिरतिमुत्पादयितुं दूती नायिकां वक्ति—

मूले निसर्गमधुरं समर्पयन्तो रसं पुरो विरसाः ।
इक्षव इव परपुरुषा विविधेषु रसेषु विनिधेयाः ॥ ४४४ ॥

मूल इति । मूले । आनन्दनिदाने रहसीति यावत् । पक्षे यथाश्रुतम् । स्वभावमधुरम् । एवं चौपाधिकमधुररसदातारोऽन्य इति भावः । रसं रत्यादिकम् । पक्ष इक्षुविकारम् । सम्यगर्पयन्तः । एवं चान्यत्र समर्पणेऽपि न सामीचीन्यमिति भावः । एवं च परपुरुषातिरिक्तपुरुषाणां रतं न स्वतो मधुरम्, न वा ते तत्कलासु कुशला इत्यावेद्यते । पुरो जनसमक्षम् । पक्षेऽग्रभागे । विरसाः । लोकभीतेरिति भावः । एवं च लोकवञ्चनानिपुणत्वेनातिविज्ञत्वमावेद्यते । परपुरुषा इक्षव इवानेकरसेषु विविधरतादौ । पक्षेऽनेकविधमधुरप्रकारादौ । विशेषेण स्थाप्याः । एवं च परपुरुषेष्वभिरुचिरतितरामुचितेति ध्वन्यते । यद्वा काचित्परपुरुषाभिरतिं निन्दति । विविधरसेषु स्थापयितुं योग्याः परपुरुषा इक्षव इव मूले प्रथमतः स्वभावेन मधुरं रसं प्रीत्यादि समर्पयन्तोऽग्रे विरसा भवन्ति । एवं च 'प्राज्ञास्तत्कर्म कुर्वन्ति येनान्ते सुखमेधते' इत्युक्तत्वात्प्रान्ते परपुरुषसंगतेरनिवार्यदुःखदत्वेन तत्करणमनुचितमिति द्योत्यते । यद्वा प्रथमतः सरसाः पश्चान्नीरसाः परपुरुषा विविधरसेषु विनियेया इति काक्वा नेत्यर्थः ॥

काचित् 'नायकं किमर्थमवगणयसि' इति वादिनीं सखीं वक्ति—

महति स्नेहे निहितः कुसुमं बहु दत्तमर्चितो बहुशः ।
वक्रस्तदपि शनैश्चर इव सखि दुष्टग्रहो दयितः ॥ ४४५ ॥

महतीति । यद्यपि महति बहुतरे स्नेहे प्रेम्णि । पक्षे तैले । निहितः । तस्मिन्प्रेम बहुतरं संपादितमिति भावः । पक्षे लोहमयी शनैश्चरप्रतिमा बहुतरतैले स्थाप्यत इति भावः । कुसुमम् । एकत्वमविवक्षितम् । बहुवारं दत्तम् । यद्वा बहु कुसुममित्यन्वयः । बहुप्रकारं पूजितस्तदपि दुष्टो ग्रह आग्रहो यस्य । पक्षे दुष्टश्चासौ ग्रहश्चेति विग्रहः । वक्रः ऋजुर्न । पक्षे वक्रोऽन्यराशिस्थितोऽन्यराशिसंचरणवान् । शनैश्चर इव । एवं चैतादृशशनेः पूजादिनापि नानुकूल्यं यथा तथास्य नायकस्य । अतो न ममापराध इति ध्वन्यते ॥

कांचिन्नीचजनसेवितां यौवनगर्वितां काचिदन्योक्त्या वक्ति—

मा शबरतरुणि पीवरवक्षोरुहयोर्भरेण भज गर्वम् ।
निर्मोकैरपि शोभा ययोर्भुजंगीभिरुन्मुक्तैः ॥ ४४६ ॥

मा शबरेति । शबरस्य तरुणि । एवं च स्वतो गुणाभावेऽपि नायकस्यापि निर्गुणतया तत्संगतिलभ्यगुणवत्ताभावो व्यज्यते । मांसलस्तनयोर्भरेण गर्वं मा भज । भुजंगीभिरुरगीभिरथ च वेश्याभिः परित्यक्तैरपि । एवं चानादरो द्योत्यते । निर्मोकैर्ययोः शोभा । एवं च कदर्यजनसेवितत्वेन न त्वया गर्वः कार्य इति व्यज्यते ॥

'कथं त्वया मानः परित्यक्तः' इति वादिनीं सखीं नायिका वक्ति—

मम कुपितायाश्छायां भूमावालिङ्ग्य सखि मिलत्पुलकः ।
स्नेहमयत्वमनुज्झन्करोति किं नैष मामरुषम् ॥ ४४७ ॥

ममेति । हे सखि, कोपवत्या मम च्छायां भूमावालिङ्ग्य संजातरोमाञ्चः प्रीतिप्रचुरत्वमपरित्यजन्नेष मां क्रोधरहितां किं न करोति । अपि तु करोति । एवं चैतादृशैतद्वृत्तमवलोक्य मानः परित्यक्तो मयेति व्यज्यते । यद्वा शिथिलितकोपा नायिका सखीं वक्ति—कुपिताया मम च्छायां भूमावालिङ्ग्य संजातरोमाञ्चः प्रीतिप्रचुरत्वमपरित्यजन्मामपगतरोषां हे सखि, किं न करोति, किं न करिष्यतीति प्रश्नः । 'वर्तमानसामीप्ये वर्तमानवद्वा' इति भविष्यत्यपि लट् । एवं च हे सखि, त्वं तथा कुरु यथायं मम च्छायायाः प्रणिपातादिना मामनुयातीति ध्वन्यते । क्वचित् 'मापरुषम्' इति पाठः । नायिका चेयं परकीया ॥

कश्चित्सखायं वक्ति—

मुषित इव क्षणविरहे रिपुरिव कुसुमेषुकेलिसङ्गमे ।
दास इव श्रमसमये भजन्नताङ्गीं न तृप्यामि ॥ ४४८ ॥

मुषित इति । क्षणमात्रसंजातविरहे मुषित इवाविद्यमान इव । मन्मथकलायुद्धे शत्रुरिव । श्रमकाले सेवक इव नताङ्गीं भजन्न तृप्यामि । विरहासहिष्णुत्वप्रचण्डरतकलाशालित्वतदाज्ञानुवर्तित्वानि क्रमेण मुषित इवेत्यादित्रयेण व्यज्यन्ते । एवं चैतादृशी नायिका नान्येति ध्वन्यते ॥

अनुनयानेकप्रकारकरणेऽप्यधिककोपशालिनीं नायिकामवलोक्यानुनयनिर्विण्णहृदयं नायकं सखी समुपदिशति—

मुञ्चसि किं मानवतीं व्यवसायाद्विगुणमन्युवेगेति ।
स्नेहभवः पयसाग्निः सान्त्वेन च रोष उन्मिषति ॥ ४४९ ॥

मुञ्चसीति । व्यवसायात्सान्त्वनप्रकाराद्विगुणकोपवेगेति हेतोर्मानवतीं मुञ्चसि, इदं किम् । नोचितमिति भावः । अत्रोपष्टम्भकमाह—स्नेहभवः प्रीतिजन्यः । पक्षे तैलजन्यः । कोपोऽनुनयेन, अग्निर्जलेनोन्मिषति । अधिको भवतीत्यर्थः । एवं चैतस्याः कोपः प्रीतिपूर्वक एव, अतो न त्वमेतस्याः समाधानाद्विरमेति ध्वन्यते ॥

इतरसंतापात्कामसंताप एवाधिक इति कश्चित्कंचिद्वक्ति—

मलयजमपसार्य घनं वीजनविघ्नं विधाय बाहुभ्याम् ।
स्मरसंतापादगणितनिदाघमालिङ्गते मिथुनम् ॥ ४५० ॥

मलयजमिति । भुजाभ्यां चन्दनं दूरीकृत्य, घनमत्यन्तं वीजनस्य विघ्नं विधाय, मदनसंतापवशादनादृतघर्मकालीननिदाघम्, स्त्रीपुंसद्वन्द्वमालिङ्गते । 'विहाय' इति पाठे वीजनाभिघ्नं विघ्नमित्यर्थः । निदाघकालीनसंतापदुःखमगणयित्वा सद्यः प्रयाहि दयितासविधे इति द्योत्यते ॥

कश्चित्कंचिच्छरणागतस्तेन चारक्षितस्तं वक्ति—

महतोऽपि हि विश्वासान्महाशया दधति नाल्पमपि लघवः ।
संवृणुतेऽद्रीनुदधिर्निदाघनद्यो न भेकमपि ॥ ४५१ ॥

महत इति। महाशयाः श्रेष्ठाः। पक्षे गभीराः। विश्वासाद्विनिश्चितं महतोऽपि श्रेष्ठानपि। एवं चैतद्रक्षणे क्लेशवत्त्वेऽपि न तं महान्तः परिगणयन्तीति द्योत्यते। पक्षे महापरिमाणान्। एवं च गोपने क्लेशवत्ता ध्वन्यते। दधति स्थापयन्ति। लघवो नीचाः। पक्षे स्वल्पपरिमाणशालिनः। अल्पमपि। एवं च संरक्षणे सुकरत्वमावेद्यते। न दधति। अर्थान्तरन्यासेनामुमेवार्थं द्रढयति—समुद्रोऽद्रीन्गोपयति। अद्रीनित्यनेन स्वदुःखदमन्दरसजातीयतया द्वेषवत्त्वेऽपि, इन्द्ररूपशत्रुसत्त्वेन भीतिकरणौचित्येऽपि च तदगणनेन महत्तरत्वमावेद्यते। निदाघकालीननद्यो मण्डूकमपि न गोपयन्ति। भेकपदेन स्वजीवनाधीनजीवनतया तथाविधशत्रुशून्यतया च रक्षणौचित्यमावेद्यते। एवं च महान्त एव महत्तरशत्रुभवधूयापि शरणागतं पालयन्ति न क्षुद्रा इति ध्वन्यते॥

आरब्धमानां नायिकां नायको वक्ति—

मधुधारेव न मुञ्चसि मानिनि रूक्षापि माधुरीं सहजाम्।
कृतमुखभङ्गापि रसं ददासि मम सरिदिवाम्भोधेः॥ ४९२॥

मध्विति। हे मानिनि। एवं च रूक्षत्वादिकरणौचित्यमावेद्यते। माक्षिकधारेव रूक्षापि स्नेहाभाववत्यपि स्वाभाविकीं माधुरीं न त्यजसि। सहजामित्यनेन तत्परित्यागस्य कर्तुमशक्यत्वमावेद्यते। वक्रीकृतवदनापि त्वं जलधेर्नदीव मम रसं प्रीतिम्। पक्षे जलम्। प्रयच्छसि। मानश्चायं लघुः॥

वीणावादनकारिणीं नायिकां सुरतोत्कण्ठितो नायकस्तन्निरसनाय वक्ति—

मदनाकृष्टधनुर्ज्याघातैरिव गृहिणि पथिकतरुणानाम्।
वीणातन्त्रीक्वाणैः केषां न विकम्पते चेतः॥ ४९३॥

मदनेति। हे गृहिणि। एवं च दयावत्त्वौचित्यमावेद्यते। मन्मथाकृष्टचापज्याघातैरिव वीणातन्त्रीशब्दैः केषां पथिकतरुणानां चेतो न विकम्पते। अपि तु सर्वेषाम्। एवं चैतादृशत्वदीयवीणावादनश्रवणेन पथिकप्राणाः प्रयास्यन्ति, अतो विरम वीणावादनादिति द्योत्यते। 'न विकल्पते' इति पाठे जीवनं भविष्यति न वेति संदेहवद्भवतीत्यर्थः॥

नायकः सखायं वक्ति—

मम भयमस्याः कोपो निर्वेदोऽस्या ममापि मन्दाक्षम्।
जातं क्व चान्तरिक्षे स्मितसंवृतिनमितकंधरयोः॥ ४९४॥

ममेति। क्व चान्तरिक्षे क्वचिन्मार्गमध्ये स्मितगोपनार्थं नमितग्रीवयोः। राज्यनुभूतविलासस्मरणजन्यदर्शनसमसमयस्मितस्य परकीयाविषयकत्वेन गोपनमावश्यकमिति भावः। आवयोर्मध्ये मम भयम्। किमिति मया जनस्य प्रेमावेदकमिदं स्मितं कृतमिति धियेति भावः। अस्या इति परोक्षायामपि नायिकायामपरोक्षवन्निर्देशोऽत्यन्ततदेकतापन्नत्वमावेदयति। नायके कोपः। किमित्यहितं विहितं स्मितमादावनेनेति धियेति भावः। अस्या निर्वेदः स्वावमानना। किमेतादृशेऽतिस्निग्धे विदग्धे कोपमकरवमिति धियेति भावः।

अपिश्चार्थः । मम च मन्दाक्षं लज्जा । कथमविदग्धः कोपमीदृश्या अप्यकरवमिति धियेति भावः । जातमिति सर्वान्वयि । एवं चैतादृशगुणविशेषशालि पराङ्गनासंगतं भवतीति व्यज्यते ॥

नायकः 'अत्यन्तासक्तायां तस्यां न तवासक्तिः, एतस्यां सात्यन्तं किमिदम्' इति वादिनं सखायं वक्ति—

मुक्ताम्बरैव धावतु निपततु सहसा त्रिमार्गगा वास्तु ।
इयमेव नर्मदा मम वंशप्रभवानुरूपरसा ॥ ४९५ ॥

मुक्तेति । हे सखे, सा मुक्तमम्बरं वासो यया । पक्षेऽम्बरमाकाशम् । धावतु । पततु । चरण इति भावः । पक्षे भूमाविति भावः । त्रिमार्गगा वास्तु । यत्किंचित्तस्या भवत्विति भावः । पक्षे स्वर्गमृत्युपातालगा । मम समीचीनवंशजन्या चासावनुकूलरतिमती । पक्षे वंशो वेणुः । नर्मदायास्तत उत्पत्तेः । रसो जलम् । इयमेव नर्मदा सुखदात्री । पक्षे नदीनाम । एवं चेयमेव मह्यं रोचते, न सेति ध्वन्यते । यद्वा यद्यप्यासक्तिं प्रदर्शयति तथाप्यनेकमार्गगामिन्यतोऽस्तु । तिष्ठत्वित्यर्थः । सद्वंशप्रभवत्वेनेयमनेकमार्गगामित्वाभावान्मम सुखदा । एवं च तस्या अनेकगामितया प्रेमप्रदर्शनं कृत्रिममिति भावः ॥

दूती नायिकां वक्ति—

मृगमदलेपनमेनं नीलनिचोलैव निशि निषेव त्वम् ।
कालिन्द्यामिन्दीवरमिन्दिन्दिरसुन्दरीव सखि ॥ ४९६ ॥

मृगेति । हे सखि, कस्तूरीलेपवन्तमेनं नायकं नीलवस्त्रैव रात्रौ सेवय । एवं च कृष्णाभिसारिकात्वमेव तवोचितमिति भावः । कालिन्द्यां नीलकमलं भ्रमरसुन्दरीव । एवं च त्रयाणामप्येकरूपत्वान्न केनापि किमपि ज्ञातुं शक्यमिति ध्वन्यते ॥

सखी कंचन नायकं स्वनायिकाचातुरीं वक्ति—

मम सख्या नयनपथे मिलितः शक्तो न काश्चिदपि चलितुम् ।
पतितोऽसि पथिक विषमे घट्टकुटीयं कुसुमकेतोः ॥ ४९७ ॥

ममेति । हे पथिक । एवं चान्यमार्गानभिज्ञत्वेन चिरविरहशालितया च तूष्णीमत्रावस्थितिरुचितेति ध्वन्यते । मम सख्याः कटाक्षविषयीभूतः कश्चिदपि । एवं च तव का वार्तेति भावः । गन्तुं न शक्तः । एवं चैतत्सौन्दर्याद्यालोकनेन के नासक्ता जाता इति भावः । अतस्त्वं विषमे पतितोऽसि । यतः 'कस्य ब्रह्मणोऽपि दुर्गमे पथि' इति पदच्छेदेन योज्यम् । इयं विषमशरस्य मदनराजस्य घट्टकुटी । एवं च त्वयात्रावस्थेयमित्यावेद्यते ॥

सखी नायकं वक्ति—

महता प्रियेण निर्मितमप्रियमपि सुभग सह्यतां याति ।
सुतसंभवेन यौवनविनाशनं न खलु खेदाय ॥ ४९८ ॥

महतेति। अत्यन्तप्रेमवता कृतमप्रियमपि सुभग सह्यतां याति। न दुःखदमित्यर्थः। अपिना सह्यत्वमावेद्यते। अर्थान्तरन्यासमाह—पुत्रोत्पत्त्या तारुण्यनाशनं दुःखाय नेति निश्चितम्। एवं च नान्यथा शङ्कनीयमिति भावः। एवं च प्रियानिर्मितापियेण खेदकरणमनुचितमिति ध्वन्यते। यद्वा स्वापराधजन्यातिभीत्या नायिकादर्शनोदासीनं नायकं नायिकासखी वक्ति—सुभग। एवं च तवापराधेऽपि सा त्वामपेक्षते, अतस्त्वमत्यन्तं धन्योऽसीति द्योत्यते। एवं चात्यन्तप्रेमवती सा त्वयि, अतस्त्वत्कृतापराधान्न गणयति, अतस्त्वं भीतिमुत्सृज्य तस्याः सविधे प्रयाहीति ध्वन्यते॥

नायको नायिकासखीं वक्ति—

मानग्रहगुरुकोपादनु दयितात्येव रोचते मह्यम्।
काञ्चनमयी विभूषा दाहाञ्चितशुद्धभावेव॥ ४९९॥

मानेति। मानाङ्गीकारेण महान्यः क्रोधस्तदनन्तरं दयिता मह्यमत्येव रोचते। दाहेन प्रकटितशुद्धरूपा सुवर्णविकारविशिष्टभूषेव। एवं च यथा दाहादिना सुवर्णभूषणस्य नैर्मल्यं तथा मानापगमोत्तरं नायिकाया नैर्मल्यम्। अतो न त्वत्कृतमानातिशयेन मम दुःखम्। अपि तु सुखमेवेति ध्वन्यते। तेन च मानस्यास्थिरत्वम्॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता मकारत्रज्या।

यकारत्रज्या।

दूती नायके नायिकासक्त्यतिशयं वक्ति—

यूनः कण्टकविटपानिवाञ्चलग्राहिणस्त्यजन्ती सा।
वन इव पुरेऽपि विचरति पुरुषं त्वामेव जानन्ती॥ ४९०॥

यून इति। सा नायिका कण्टकवृक्षानिव चेलाञ्चलग्राहकांस्तरुणांस्त्यजन्ती त्वामेव पुरुषं जानाना वन इव नगरेऽपि विचरति। यून इत्यनेन स्पृहणीयत्वम्, कण्टकविटपानिवेत्यनेन स्वाभाविकबलात्कारित्वेऽपि तदगणनेनातिसतीत्वमावेद्यते। वन इवेत्यनेन यूनां बाहुल्यम्, सभीतिसंचरणशालित्वं च नायिकायामावेद्यते। पुर इत्यनेनावश्यसंचरणानर्हत्वं द्योत्यते। अपिनान्यसंग्रहः। पुरुषमित्यनेन मन्मथकलाकलापकुशलत्वम्, अथवान्ये स्त्रीतुल्या इत्यत्यन्तानादरोऽन्ययुवस्विति व्यज्यते। एवं च सर्वत्र सर्वेऽपि तस्यामत्यन्तासक्ताः, सा तु त्वय्येवेति ध्वन्यते॥

कश्चिद्वणी दरिद्रः कस्मिंश्चित्समुदाये गतस्तत्र वसतिमलभमानस्तान्वक्ति—

युष्मासूपगताः स्मो विबुधा वाङ्मात्रपाटवेन वयम्।
अन्तर्भवति भवत्स्वपि नाभक्तस्तन्न विज्ञातम्॥ ४९१॥

युष्मास्विति। भोः पण्डिताः, वाङ्मात्रपाटवेन पाण्डित्यमात्रबलेन वयं भवत्सविधे समागताः स्मः। 'विद्वानेव विजानाति विद्वज्जनपरिश्रमम्' इति धियेति भावः। भवन्मध्येऽभक्तोऽन्नरहितः। दरिद्र इति यावत्। नान्तर्भवतीति विज्ञातमपि न। अपिनानु-

भूतमिति किं वक्तव्यमिति व्यज्यते। अत्रोपसर्गस्य न तथा प्रयोजनम्। यद्वा यथास्थित एवापिः। एवं चान्तर्भवनयोग्यत्वमावेद्यते। एवं च न पाण्डित्यग्राहिणो भवन्तः, किं तु द्रव्यलुब्धा इति द्योत्यते। एवं च द्रव्येणैव सर्वत्र प्रतिष्ठा, न पाण्डित्यमात्रेणेति। यद्वा भक्तिरहित इत्यर्थः। एवं च यो भवदीयसेवां करोति स एव भवत्सु समावेशमाप्नोति, न तु पाण्डित्यमात्रशालीति भावः॥

नायको वक्ति—

यत्र न दूती यत्र स्निग्धा न दृशोऽपि निपुणया निहिताः।
न गिरोऽद्यापि व्यक्तीकृतः स भावोऽनुरागेण॥ ४९२॥

यत्रेति। यत्र न दूती प्रेषितेति भावः। प्रेमार्द्राः कटाक्षा अपि न कृताः। गिरोऽपि न। स भावोऽभिप्रायो निपुणया। सकलजनवञ्चकत्वादिति भावः। अनुरागेण व्यक्तीकृतः। एवं चातिनिगूढनिजकार्यसाधकतयानया सदृशी न काप्यन्येति ध्वन्यते। यत्र भावे दूती न प्रकटनसमर्थेति भावः। यत्र निहिताः प्रेरिताः प्रेमार्द्रा दृशोऽपि न। स्निग्धा वाचोऽपि न प्राकट्यसंपादिका इति भावः। स भावो रसानुकूलविकारो निपुणया। समयज्ञत्वादिति भावः। प्रीत्या प्रकटीकृतः। एवं च योऽनुभावो मत्प्रेषितदूतीप्रेषणादिव्यापारैर्न प्रकटीकृतः, स भावोऽद्य स्वयं समयविशेषमासाद्य व्यक्तीकृत इति लोकोत्तरचातुर्यशालित्वमावेद्यत इति वार्थः। 'स भावोऽनुगमनेन' इति पाठे तन्मरणोत्तरं तत्प्राणपरित्यागेनेयमस्मिन्नासक्तेति ज्ञातमित्यर्थः। क्वचित् 'स जारोऽनुमरणेन' इति पाठः॥

सपत्न्यधीनत्वादिकमसम्यगिति काचित्कांचिद्वक्ति—

या नीयते सपत्न्या प्रविश्य यावर्जिता भुजंगेन।
यमुनाया इव तस्याः सखि मलिनं जीवनं मन्ये॥ ४९३॥

या नीयत इति। सपत्न्या पतिप्रियान्तरया। पक्षे गङ्गया। नीयते। पतिसविध इति भावः। पक्षे समुद्रसविधे। भुजंगेन। पक्षे सर्पेण। प्रविश्य यावर्जिता स्वाधीनीकृता। यमुनाया इव तस्या जीवनं जीवितम्। पक्षे जलम्। सखि, मलिनं निन्द्यम्। पक्षे श्यामम्। मन्ये। एवं चैतादृशतया स्थेयं नायिकया येनोपायेन गृहे सर्वाधिकतयावस्थानं भवतीति ध्वन्यते। यमुनाजलं श्याममिति कविसंप्रदायः॥

दूती नायिकां केनचिन्नायकेन सह संगमयितुं वक्ति—

यस्मिन्नयशोऽपि यशो ह्रीर्विघ्नो मान एव दौःशील्यम्।
लघुता गुणज्ञता किं नवो युवा सखि न ते दुष्टः॥ ४९४॥

यस्मिन्निति। यस्मिन्यद्विषये तेऽकीर्तिरपि कीर्तिः। लज्जा विघ्नः। मानकरणमेव दुःशीलता। एवकारेण तत्कार्यविरुद्धवचनादेः का वार्तेति भावः। लाघवं गुणप्रवणता। एतादृशो नूतनः। एवं चावश्यकग्राह्यदर्शनयोग्यत्वं व्यज्यते। तरुणः। एवं च स्पृहणी-

यत्वमावेद्यते। हे सखि। एवं च हितकथनार्हत्वं द्योत्यते। किं न दृष्टः। त्वयेति शेषः। एवं चैतादृशो गुणरूपयौवनादिसंपन्नो नान्योऽस्ति नायकः। अत एतद्दर्शनाय त्वरस्वेति ध्वन्यते। अथवा त्वत्संबन्धी युवास्माभिः किं न दृष्टः। अपि तु दृष्टः। एवं च सम्यक्त्वया संपादितं यदेतादृश आसक्तिः संपादितेति ध्वन्यते। इति सखीवाक्यम्॥

खलानां माहात्म्यदर्शनेनापि न विश्वासो विधेय इति कश्चिद्वक्ति—

यद्वीक्ष्यते खलानां माहात्म्यं क्वापि दैवयोगेन।
काकानामिव शौक्ल्यं तदपि हि न चिरादनर्थाय॥ ४९५॥

यदिति। अदृष्टवशात्क्वचिदुष्टानां यन्महत्त्वं दृश्यते तदपि काकानां शौक्ल्यमिव न चिराच्छीघ्रमनर्थाय। एवं च दुष्टस्वभावानामदुष्टस्वभावप्रदर्शनमकार्योद्देशेनैवेति व्यज्यते॥

खला एव प्रेमविघटितार इति काचित्कांचिद्वक्ति—

यत्खलु खलमुखहुतवहविनिहितमपि शुद्धिमेव परमेति।
तदनलशौचमिवांशुकमिह लोके दुर्लभं प्रेम॥ ४९६॥

यदिति। यत्खलवदनरूपो यो वह्निस्तत्र क्षिप्तमपि शुद्धिमेव। एवकारेण विनाशव्यवच्छेदः। एति प्राप्नोति। तत्परमुत्कृष्टं प्रेम। अनले शौचं शुद्धिर्यस्यैतादृशवसनमिव खलु निश्चितमिह लोके दुर्लभम्। एवं च को वेद स्वर्गादौ भविष्यति न वेति ध्वन्यते। एवं च यथा वसनस्यानलप्रक्षेपणे विनाश एव, तथा खलविज्ञातप्रेम्णोऽवश्यं विनाश एवेति ध्वन्यते। तेन च यथा खलैर्न विज्ञेयमेतत्प्रेम तथा कुर्विति। अथवा यत्खलैरपि विघटयितुमशक्यं तदेव प्रेम सम्यगिति काचिद्वक्ति। वह्नेरनलशौचं वस्त्रद्वयमस्तीति पुराणप्रसिद्धिः। अथवा यत्खलैरपि सम्यगिदमुभयोः प्रेमेत्युच्यते तदेव निश्चयेन परमुत्कृष्टम्। अत एव दुर्लभम्। एवं च तथाविधेनैव सह प्रीतिर्विधेया या खलैरपि स्तूयते, न तु साधारणेन सहेति ध्वन्यते। इति काचित्कांचित्प्रति वक्तीत्यर्थः। अत्र खल्विति दुर्लभमित्यस्य संनिधावुचितम्। 'शुद्धमेव' इति पाठ एति निर्गच्छतीत्यर्थः॥

नायकः सखायं वक्ति—

यन्नावधिमर्थयते पाथेयार्थं ददाति सर्वस्वम्।
तेनानयातिदारुणशङ्कामारोपितं चेतः॥ ४९७॥

यदिति। येनेयमवधिं कदा समागन्तव्यमिति नार्थयते। न वदतीत्यर्थः। मार्गव्ययार्थं सर्वस्वं यच्छति। तेनानया महत्तराशङ्कां चित्तं प्रापितम्। एवं चावधेरप्रार्थनेन व्ययाय सर्वस्वदानेन चेयं मद्गमनोत्तरमवश्यं प्राणांस्त्यक्ष्यतीति भावः। एवं च न मया प्रस्थीयत इति ध्वन्यते। यद्वा कश्चित्कंचिद्वक्ति—अवधिप्रार्थनाभावेन पाथेयार्थं सर्वस्वदानेन चानया चेतो नायकस्य दारुणशङ्कामन्यथासंभावनां प्रापितमिति भावः॥

नायको नायिकां वक्ति—

यूनामीर्ष्यावैरं वितन्वता तरुणि चक्ररुचिरेण।
तव जघनेनाकुलिता निखिला पल्ली खलेनेव ॥ ४६८ ॥

यूनामिति। हे तरुणि, तरुणानामीर्ष्यावैरम्। एकामिषत्वादित्युभयत्र भावः। विस्तारयता। चक्रवत्सुन्दरेण। वर्तुलत्वादिति भावः। खलेनेव धान्यमर्दनस्थानेनेव तव जघनेन समग्रा पल्ली व्याकुलीकृता। एवं च सर्वेऽपि त्वय्यासक्ताः संजाता इति भावः। खलेनेव दुष्टेनेवेति व्याख्याकरणे चक्रं समुदायस्तेन रुचिर इत्यर्थः॥

कयोश्चिदत्यन्तमैत्रीं दृष्ट्वा कश्चिद्वक्ति—

यावज्जीवनभावी तुल्याशययोर्नितान्तनिर्भेदः।
नदयोरिवैष युवयोः सङ्गो रसमधिकमावहतु ॥ ४६९ ॥

यावदिति। यावदायुःस्थितिशाली। पक्षे यावदुदकस्थितिर्भावी। अत्यन्तनिर्गतभेदः। तुल्यान्तःकरणयोः। पक्षे समानगम्भीरताशालिनोः। तरुणयोर्नदयोरिव सङ्गः संगतिः। मैत्रीति यावत्। पक्षे संबन्धः। अधिकं रसं प्रीतिम्। पक्षे जलम्। आवहतु। एवं चैतादृश्येवेयमेतयोर्मैत्री उत्तरोत्तरवृद्धिशालिन्यस्त्विति ध्वन्यते॥

नायकः सखायं वक्ति—

यन्निहितां शेखरयसि मालां सा यातु शठ भवन्तमिति।
प्रहरन्तीं शिरसि पदा स्मरामि तां गर्वगुरुकोपाम् ॥ ४७० ॥

यदिति। यया निहितां दत्तां मालां शेखरयसि शिरोभूषणत्वेन कुरुषे सा हे शठ, भवन्तं यात्विति। उक्त्वेति शेषः। मस्तके चरणेन प्रहरन्तीम्। अभिमानबहुतरं कोपवतीम्। स्मरामि। एवं च तत्कालकृतताडनेन कोपपरिमार्जनेन सुरतानन्ददायितया न तत्तुल्यान्येति तस्यामेव ममासक्तिरिति ध्वन्यते॥

कश्चित्कंचिद्वक्ति—

यौवनगुप्तिं पत्यौ बन्धुषु मुग्धत्वमार्जवं गुरुषु।
कुर्वाणा हलिकवधूः प्रशस्यते व्याजतो युवभिः ॥ ४७१ ॥

यौवनेति। पत्यौ नायके तारुण्यगोपनं कुर्वाणा। इदमग्रेऽप्यन्वेति। रक्षणकर्तृतया यौवनज्ञानोत्तरं न बहिर्गन्तुं दास्यतीति धियेति भावः। बन्धुषु मुग्धत्वमज्ञत्वम्। मुग्धत्वज्ञानेनैतैर्यथेच्छविहारः कर्तुं देयः। अथवा पतिसविधे न प्रेषणीयेयमिति धियेति भावः। श्वश्वादिष्वार्जवमृजुत्वम्। सरलत्वे ज्ञाते नैतैः कौटिल्यं ज्ञेयमिति धियेति भावः। हलिकस्त्री। एवं चाज्ञस्त्रीत्वेन मौख्यैवस्त्वौचित्येऽपि चातुर्यशालितया स्तुतिकरणयोग्यत्वमित्यावेद्यते। तरुणीर्मिषात्। लोकगोपनार्थमिति भावः। प्रशस्यते स्तूयते॥

काचित्कांचिद्वक्ति—

यो न गुरुभिर्न मित्रैर्न विवेकेनापि नैव रिपुहसितैः।
नियमितपूर्वः सुन्दरि स विनीतत्वं त्वयाऽनीतः॥ ४७२॥

य इति। यो गुरुभिर्मित्रैर्विवेकेन शत्रुहसितैः पूर्वं न नियन्त्रितः सः हे सुन्दरि, त्वया विनीतत्वं प्रापितः। एवं च गुरुवचनस्यानुल्लङ्घनीयत्वेऽपि मित्रोपदेशस्यातिप्रियत्वेऽपि विवेकस्य दुर्व्यसनादिपरित्यागसंपादनस्वाभाव्येऽपि वैरिहसितानामतिदुःखदत्वेऽपि तदगणनेनातिदुष्टस्यातिविनीतत्वसंपादनेन गुणगणशालित्वं नायिकायामावेद्यते॥

कस्यचिदाश्रयेण संपत्तिशालिनं कश्चिदन्योक्त्या वक्ति—

यन्मूलमार्द्रमुदकैः कुसुमं प्रतिपर्व फलभरः परितः।
द्रुम तन्माद्यसि वीचीपरिचयपरिणाममविचिन्त्य॥ ४७३॥

यन्मूलमिति। यद्यस्माज्जलैर्मूलमार्द्रम्। प्रतिकाण्डं कुसुमानि। समन्तात्फलातिशयः। तत्तस्मात् हे वृक्ष, उन्मादं प्राप्नोषि। तरङ्गसंपर्कपरिपाकमविचार्य। एवं च यद्यपीदानीं संपत्तिसंभारादुन्मत्तस्त्वमसि, तथाप्यग्रे कतिपयैर्दिवसैर्निर्मूल एव भविष्यसीति द्योत्यते। यद्वा कासांचित्संगत्यावाप्तवसुतोन्मादशालिनं कश्चिद्वक्ति। एवं चैतासां संगत्या तवानिष्टमवश्यंभावीति ध्वन्यते॥

काचित्कंचित्प्रत्याह—

यस्याङ्के स्मरसंगरविश्रान्तिप्राञ्जला सखी स्वपिति।
स वहतु गुणाभिमानं मदनधनुर्वल्लिचोल इव॥ ४७४॥

यस्याङ्क इति। मदनयुद्धविरामे प्रसन्ना। पक्षे सरला। नायिका यस्य नायकस्याङ्के निद्राति स गुणानां कामकलाभिज्ञतादीनाम्। पक्षे तन्तूनाम्। अभितः परिमाणं मदनधनुर्लताच्छादनपट इवाङ्गीकरोतु। एवं च यः सुरतेनानन्दसंवर्धको नायिकायाः स एवं धन्यो गुणवान्नान्य इति ध्वन्यते। तेन चैतादृशगुणे यतस्वेति॥

कश्चित्कामकलाभिज्ञताभिमानी कांचिद्वक्ति—

यदि दानगन्धमात्राद्वसन्ति सप्तच्छदेऽपि दन्तिन्यः।
किमिति मदपङ्कमलिनां करी कपोलस्थलीं वहति॥ ४७५॥

यदीति। यदि मदोदकपरिमलसजातीयपरिमलमात्रात्। मात्रपदादितरगुणव्यवच्छेदः। सप्तच्छदेऽपि। अपिना साधारणत्वमावेद्यते। करिण्यो वसन्ति तदा गजो मदपङ्केन मलिनाम्। मालिन्यस्योपमासाधकस्य सत्त्वान्नात्र रूपकम्। कपोलस्थलीं किमिति वहति। एवं च पुरुषार्थोऽवश्यमपेक्षित इति ध्वन्यते॥

कस्याश्चिद्वृत्तं कश्चिद्वक्ति—

यदवधि विगलद्भमात्रा विकसितकुसुमोत्करा शणश्रेणी।
पीतांशुकप्रियेयं तदवधि पल्लीपतेः पुत्री॥ ४७६॥

यदवधीति । यत्प्रभृति शणपङ्क्तिर्विकसितकुसुमसमूहा संजातमात्रा तत्प्रभृति पल्लीपतेस्तनया पीतं यद्वस्त्रं तत्प्रियं यस्या एतादृशी संजाता । एवं च शणश्रेणिपीतकुसुमसमूहे पीतवसनतयान्यैरज्ञेयतया यथेच्छं विहर्तुकामेयं संवृत्तेति ध्वन्यते ॥

सखी नायिकां वक्ति—

यमुनातरङ्गतरलं न कुवलयं कुसुमलावि तव सुलभम् ।
यदि सौरभानुसारी झंकारी भ्रमति न भ्रमरः ॥ ४७७ ॥

यमुनेति । हे कुसुमावचयकारिणि, यमुनायास्तरङ्गैश्चञ्चलं कुवलयं तव न सुलभम् । यदि सौगन्ध्यानुसारी झंकारकारी भ्रमरो न भ्रमति । एवं च चपलतरत्वदीयनयनप्रतिबिम्बबाहुल्याद्विशिष्य कुवलयज्ञानाभावे न तद्ग्रहणं तव वृत्तमिति भावः । एवं च नायिकायां सौन्दर्यातिशयो द्योत्यते ॥

एषामत्यन्तलालनं स्वयं क्रियते, परं तु ये न स्वसुखदुःखज्ञातारस्तेऽत्यन्तं जडा इति कश्चित्कंचिद्वक्ति—

ये शिरसि विनिहिता अपि भवन्ति न सखे समानसुखदुःखाः ।
चिकुरा इव ते बाला एव जडाः पाण्डुभावेऽपि ॥ ४७८ ॥

ये शिरसीति । हे सखे, मस्तके निहिता अपि ये समानसुखदुःखा न भवन्ति, ते पुरुषाः केशा इव जडाः पाण्डुरभावेऽपि वार्द्धकेऽपि बालका एव । एवं च येऽत्यन्तं लालितास्ते यदि न स्वसुखदुःखाभिज्ञास्तदा तेऽत्यन्तं मूढा एव । अतो न तदसत्कर्तव्यतया दुःखं मन्तव्यमिति व्यज्यते ॥

एतत्कार्ययोग्यस्याप्यस्य प्रभुणैतत्कार्यं दत्तमिति कश्चित्कंचिद्वक्ति—

यन्नियतनिर्गुणं यन्न वंशजं यच्च नित्यनिर्वाणम् ।
किं कुर्मस्तन्निहितं धनुःपदे देवराजेन ॥ ४७९ ॥

यन्नियतेति । यन्नियतं गुणेन मौर्व्या । पक्षे चातुर्यादिना । शून्यम् । यन्न वंशजम् । वंशो वेणुः । पक्षेऽन्वयः । यच्चेत्यपरं नित्यविनाशि । पक्षे नित्यं निर्वाणं विनाशो यस्मात् । तद्देवराजेनेन्द्रेण । देवराजपदेनानिवारणीयत्वमावेद्यते । कोदण्डस्थाने स्थापितम् । तत्र वयं किं कुर्मः । एवं चैतादृशस्याधिकारदानानौचित्येऽपि प्रभुणा स्वमत्या कृतत्वान्नास्माकमपराध इति ध्वन्यते ॥

एकस्यामासक्तमन्यस्यामनासक्तं नायकं काचिद्वक्ति—

या दक्षिणा त्वमस्यामदक्षिणो दक्षिणस्त्वमितरस्याम् ।
जलधिरिव मध्यसंस्थो न वेलयोः सदृशमाचरसि ॥ ४८० ॥

या दक्षिणेति । या दक्षिणानुकूला । त्वयीति भावः । अस्यां त्वमदक्षिणोऽननुकूलः । पक्षे दक्षिणदिक्संस्थायां दक्षिणदिक्संस्थो नेत्यर्थः । तदितरस्यां दक्षिणोऽनुकूलः । पक्ष

उत्तरदिक्संस्थायामित्यर्थः । किमेतावतेत्यत आह—मध्यसंस्थः सन्नुभयत्र समानपक्षपाती । पक्षे मध्यदेशस्थः । वेलयोर्जलधिरिव सदृशं नाचरसि । डलयोरैक्याज्जडधिरिवेत्यनेन तादृशविषमाचरणमज्ञस्योचितं न तव विज्ञस्येति ध्वन्यते । 'योऽविकल्पमिदमर्थमण्डलं पश्यतीश निखिलं भवद्वपुः । आत्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम्' इत्यत्रेवात्रेदम्शब्दस्य तच्छब्दार्थकता ॥

नायं नायकस्त्वामुपभोगं विना त्यक्ष्यतीति काचित्कांचिद्वक्ति—

युगपज्जघनोरःस्तनपिधानमधुरे त्रपास्मिताद्रर्मुखि ।
लोलाक्षि नैष पवनो विरमति तव वसनपरिवर्ती ॥ ४८१ ॥

युगपदिति । एककालं जघनोरःस्तनस्य यदाच्छादनं तेन मधुरे सुन्दरे । लज्जास्मिताभ्यां स्निग्धवदने । आर्द्रपदेन स्मिते सुधारूपत्वमावेद्यते । लोलाक्षि, तव वस्त्रपरिवर्तनकारी एष पवनो न विरमति । एवं च जघनाद्याच्छादनाद्यनर्थकम् । अतस्तत्त्यक्त्वा यथेच्छमनेन सह रमस्वेति ध्वन्यते । 'विधुरे' इति पाठे रहिते इत्यर्थः । यथाश्रुतमेवेदमिति ऋजवः ॥

अपकारकाणामपि सति समये शरणमयमेवेति कश्चित्कंचिदन्योक्त्या वक्ति—

यद्यपि बद्धः शैलैर्यद्यपि गिरिमथनमुषितसर्वस्वः ।
तदपि परभीतभूधररक्षायां दीक्षितो जलधिः ॥ ४८२ ॥

यद्यपीति । यद्यपि पर्वतैर्बद्धः । यद्यपि पर्वतकरणकमन्थनेनापहृतसर्वस्वः । तथापि पर इन्द्रस्ततो भीता ये पर्वतास्तद्रक्षणे जलधिर्दीक्षितः । कृतनियम इत्यर्थः । जलधिरित्यनेन निकटवर्तिसमीचीनाभावेऽपि स्वत एवैतादृशाचरणकारितयातिमहत्तरत्वमावेद्यते । अत्रानवीकरणमनुचितमित्याभाति ॥

यत्र यादृशेन तेन त्वं दृष्टासि तत्र तादृशेनैव तेनाद्यापि स्थीयत इति दूती नायिकां वक्ति—

यस्यां दिशि यस्य तरोर्यामेत्य शिखां यथोन्नतग्रीवम् ।
दृष्टा सुधांशुलेखा निशां चकोरस्तथा नयति ॥ ४८३ ॥

यस्यामिति । यस्यां दिशि यस्य वृक्षस्य यां शिखामागत्योन्नतग्रीवं यथा चन्द्रलेखा दृष्टा तथा तेनैव प्रकारेण चकोरो निशामतिवाहयति । सुधांशुलेखेत्यनेनाह्लादकत्वमावेद्यते । चकोर इत्यनेन तदेकाधीनजीवनत्वं द्योत्यते । एवं चैतादृशस्यास्योपेक्षाकरणमनुचितं तवेति ध्वन्यते ॥

सरलतया न स्थेयमिति कश्चित्कंचिद्वक्ति—

यत्रार्जवेन लघुता गरिमाणं यत्र वक्रता तनुते ।
छन्दःशास्त्र इवास्मिल्लोके सरलः सखे किमसि ॥ ४८४ ॥

यत्रेति । यत्र यस्मिन्नार्जवेन सरलतया लघिमा लाघवं तन्यते । यत्र वक्रता गुरुत्वं तनुते । छन्दःशास्त्र इवास्मिल्लोके हे सखे, सरलः किमसि । छन्दःशास्त्रे लघुर्लेखाकारो गुरुर्वक्राकारो लिख्यत इति संप्रदायः ॥

कश्चित्कस्यचिदधिकारपदं निन्दति—

यन्नोपकारकं यन्न भूषणं यत्प्रकोपमातनुते ।
गुरुणापि तेन कार्यं पदेन किं श्लीपदेनेव ॥ ४८५ ॥

यन्नेति । यदुपकारकारकं न । यद्भूषणं न । यत्प्रकृष्टकोपं विस्तारयति । गुरुणापि पदेनाधिकारेण श्लीपदेनेव रोगविशेषवच्चरणेनेव किं कार्यम् । न किंचित्फलमिति भावः । एवं च तदेवाधिकारपदं यदुपकारादिसंपादकमिति भावः ॥

कश्चित्कंचिदन्योक्त्या वक्ति—

यूथपते तव कश्चिन्न हि मानस्यानुरूप इह विटपी ।
प्रेरय दिनं निदाघद्राघीयः क्व खलु ते छाया ॥ ४८६ ॥

यूथेति । हे यूथपते । एवं चान्येषां पालकस्त्वमसीति द्योत्यते । तव हि निश्चितं मानस्य परिमाणविशेषस्य । पक्षे प्रतिष्ठायाः । अनुरूपो योग्यः । कश्चिद्विटपी वृक्षो न । निदाघेनातिदीर्घं दिनं गमय । निश्चयेन तव च्छाया क्व । एवं च कुटुम्बपोषकस्य भवतो न क्वचिदाश्रयः । समयोऽयं कठिनतरः । सोऽयं यथातथातिवाहनीय इति द्योत्यते ॥

दैवात्संपद्विहीनोऽप्ययमन्येषामुपकारक इति कश्चित्कंचिदन्योक्त्या वक्ति—

यद्यपि चन्दनविटपी फलपुष्पविवर्जितः कृतो विधिना ।
निजवपुषैव तथापि हि स हरति संतापमपरेषाम् ॥ ४८७ ॥

यद्यपीति । यद्यपि चन्दनशाखी दैवेन ब्रह्मणा वा फलपुष्परहितः कृतस्तथापि स्वशरीरमात्रेणान्येषां संतापं दूरं करोति । एवं चैतादृशो न कश्चिदन्य इति ध्वन्यते । अत्र पूर्वत्र च यद्यपिरपीति पदातिरिक्तपददानमुचितमित्याभाति ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता यकारत्रज्या ।

रकारत्रज्या ।

नायकगुणोत्कर्षेण नायिकाया अत्यन्तमुत्कर्ष इति काचित्कांचिद्वक्ति—

राज्याभिषेकसलिलक्षालितमौलेः कथासु कृष्णस्य ।
गर्वभरमन्थराक्षी पश्यति पदपङ्कजं राधा ॥ ४८८ ॥

राज्येति । राज्याभिषेकजलक्षालितमस्तकस्य कृष्णस्य वार्तासु सकलोत्कृष्टगुणवानित्यादिकासु । सतीष्विति शेषः । गर्वाधिकतानिश्चलनेत्रा राधा चरणकमलम् । स्वीयमिति भावः । पश्यति । एतादृशोऽप्ययं सर्वदा मत्प्रणतिप्रवण एवास्त इति धियेति भावः ॥

नायिकां विनावस्थितिर्न सुखदेति कश्चिद्वक्ति—

रतिकलहकुपितकान्ताकरचिकुराकर्षमुदितगृहनाथम्।
भवति भवनं तदन्यत्प्राग्वंशः पर्णशाला वा ॥ ४८९ ॥

रतीति। रतिकलहे कुपिता कान्ता तया कराभ्यां यत्केशाकर्षणं तेन संतुष्टो गृहनाथो यत्र। यद्वा कान्ताहस्तात्केशाकर्षणं यत्र। तद्भवनादिकमपि भवनम्। तद्भिन्नम्। महत्तरप्रासादादिकमित्यर्थः। प्राग्वंशः पत्नीशाला। 'प्राग्वंशः प्राग्घविर्गेहात्' इत्यमरः। पर्णशाला वा। 'पर्णशालोटजोऽस्त्रियाम्' इत्यमरः॥

नायिका वैद्यं वक्ति—

रोगी राजायत इति जनवादं सत्यमद्य कलयामि।
आरोग्यपूर्वकं त्वयि तल्पप्रान्तागते सुभग ॥ ४९० ॥

रोगीति। हे सुभग, त्वयि शयनीयसविधागमनवति सति रोगवान्राजवदाचरतीति राजायत इति लोकप्रवादमारोग्यपूर्वकं सत्यं मिथ्यात्वशून्यमद्य कलयामि। एवं चातिमहत्तरभाग्यशालिन्यहं त्वद्दर्शनेनाद्य संवृत्तेति भावः। एवं च मन्मथदुःखरूपरोगं दूरीकृत्यानन्दविशेषभागिन्यहं त्वया विधेयेति द्योत्यते॥

नायिकां प्रति कश्चिद्वक्ति—

रुद्धस्वरसप्रसरस्यालिभिरग्रे नतं प्रियं प्रति मे।
स्रोतस इव निम्नं प्रति रागस्य द्विगुण आवेगः ॥ ४९१ ॥

रुद्धेति। सखीभिः प्रतिषिद्धः स्वरसस्य स्वाच्छन्द्यस्य प्रसरो यस्य। पक्षे रसो जलम्। मम प्रीतेः। अग्रे नतम्। प्रणिपातार्थमिति भावः। प्रियं प्रति निम्नं प्रति नीचदेशं प्रति स्रोतस इव। 'स्रोतोऽम्बुसरणं स्वतः' इत्यमरः। द्विगुण आवेग आधिक्यम्। पक्ष आ समन्ताद्वेगः। एवं च निरुद्धस्य जलस्य यथाधिकं प्रवाहः प्रचलति तथा सखीभिर्निषिद्धाया मम प्रियं प्रति प्रेमाधिक्यं जायत इति भावः। एवं च प्रियं प्रति प्रेमनिरोधो मम दुर्घट इति ध्वन्यते। तेन च सख्युपदेशोल्लङ्घने न ममापराध इति॥

काचित्कांचिद्वक्ति—

रूपमिदं कान्तिरसावयमुत्कर्षः सुवर्णरचनेयम्।
दुर्गतमिलिता ललिते भ्रमसि प्रतिमन्दिरद्वारम् ॥ ४९२ ॥

रूपमिति। हे ललिते सुन्दरि, इदं रूपम्। असौ कान्तिः। अयमुत्कर्षः। इयं सुष्ठु वर्णरचना। एवं सति दरिद्रसहचारिणी। अतः प्रतिगृहद्वारं भ्रमसि। एवं चैतादृशरूपशालित्वे दरिद्रसंगतिसंपादनमनुचितम्। उचितं भाग्यवत्संगतिसंपादनमिति ध्वन्यते। यद्वा भिक्षुहस्तगतप्रतिमोद्देशव्याजेन काचित्कांचिद्वक्ति॥

कश्चित्कंचिद्वक्ति—

रचिते निकुञ्जपत्त्रैर्भिक्षुकपात्रे ददाति सावज्ञम् ।
पर्युषितमपि सुतीक्ष्णश्वासकदुष्णं वधूरन्नम् ॥ ४९३ ॥

रचित इति । निकुञ्जसंबन्धिपत्त्रैः संपादिते भिक्षुकस्य पात्रेऽवज्ञासहितं यथा स्यात्तथा वधूः पर्युषितमप्यन्नमत्यन्ततीक्ष्णा ये श्वासास्तैरीषदुष्णं ददाति । संकेतनिकेतनिकुञ्जपत्त्रच्छेदनेन संकेतस्थानविघटकतया द्वेषवत्त्वादवज्ञा । भिक्षुकत्वादन्नदानम् । स्थानविघटनदुःखवशाच्छ्वासेषूष्णता । यद्वा संकेते मया गत्वा परावृत्तमिति ज्ञापनायानीतनिकुञ्जपत्त्रपात्रमवलोक्य दुःखवशाच्छ्वासेषूष्णता । लोकगोपनाय चावज्ञाकरणं पर्युषितान्नदानं च ।।

सखी नायिकां वक्ति—

रक्षति न खलु निजस्थितिमलघुः स्थापयति नायकः स यथा ।
तिष्ठति तथैव तद्गुणविद्धेयं हारयष्टिरिव ॥ ४९४ ॥

रक्षतीति । हे सखि, योऽलघुः श्रेष्ठः । पक्षे महान् । निजस्थितिं न रक्षति । चाञ्चल्यं न त्यजतीत्यर्थः । स नायकः कान्तः । पक्षे हारमध्यमणिः । यथा स्थापयति तथैव तस्या गुणैश्चातुर्यादिभिः । पक्षे गुणः सूत्रम् । तैर्विद्धा तत्कृतासक्तिमती । पक्षे यथाश्रुतम् । इयं त्वत्प्रतिवेशिनीहारयष्टिरिव तिष्ठति । एवं च स न स्वकीयचाञ्चल्यादिदुःशीलं परित्यजति । इयं तु तच्चातुर्यादासक्ता तन्मनस्कतयैवकालमति वाहयंतीति भावः । एवं चैतादृशावस्थितिस्तव नोचितेति नायिकां प्रत्यावेद्यते । यद्वा यथा हारमध्यमणेश्चाञ्चल्येऽपि तद्गुणविद्धेयं हारलता न चाञ्चल्यं विधत्ते तथा त्वया तद्गुणमात्रावलोकनादिना तच्चाञ्चल्यमगणयित्वा निश्चलतया स्थेयमिति व्यज्यत इत्यर्थः । यद्वा सखीं सखीं वक्ति—हे सखि, अलघुः श्रेष्ठेयं नायिका निजस्थितिं न रक्षति स्वमर्यादां न विचारयति । यथा नायकः स्थापयति तथैव तच्चातुर्यादिगुणविद्धा हारयष्टिरिव तिष्ठति । एवं च स्वोचितव्यवहारमियं परित्यज्य केवलं तदधीना जातेति भावः ॥

सखी नायिकां वक्ति—

राजसि कृशाङ्गि मङ्गलकलशी सहकारपल्लवेनेव ।
तेनैव चुम्बितमुखी प्रथमाविर्भूतरागेण ॥ ४९५ ॥

राजसीति । हे कृशाङ्गि, प्रथमं कौमारप्रभृति संजातप्रीतिमता । पक्षे रागो लौहित्यम् । तेनैव । नायकेनेति भावः । चुम्बितवदना रसालपल्लवेन मङ्गलकलशीव राजसि । एवं च नान्यत्र मनो बन्धनीयमिति ध्वन्यते । यद्वा तेनैव । निकटस्थितेनैवानेनेति भावः । राजसि राजिष्यसि । चिरकालीनैतत्संगतिर्नोचिता । किं तु नवीनानुरागवत्संगतिरत्यन्तोचितेति व्यज्यत इति वा दूती नायिकां वक्ति ॥

गुणवत्संगतिकरणमेवोचितमिति सखी नायिकां वक्ति—

रूपगुणहीनहार्या भवति लघुर्धूलिरनिलचपलेव।
प्रथयति पृथुगुणनेया तरुणी तरणिरिव गरिमाणम् ॥ ४९६ ॥

रूपेति। रूपं च गुणाश्च तैर्हीनेन हार्या तत्संगतिमती। पक्षे रूपरूपो यो गुणस्तदभाववता हर्तुं योग्या। तरुणी। वायुचञ्चला धूलिरिव लघुर्भवति। पृथवो गुणा यस्य तेन नेया। पक्षे महत्तरगुणैः। नौकेव गौरवं प्रथयति। एवं चाचेतनेऽप्येवं गतिस्तत्र का वाच्या सचेतन इति भावः॥

सखी नायकं वक्ति—

रागे नवे विजृम्भति विरहक्रममन्दमन्दमन्दाक्षे।
सस्मितसलज्जमीक्षितमिदमिष्टं सिद्धमाचष्टे ॥ ४९७ ॥

रागेति। विरहक्रमेण मन्दमन्दं मन्दाक्षं क्षीर्यत्र। एतादृशे नवे रागे। 'विजृम्भित–' इति पाठे विरहविशेषणम्। इदं स्मितहसितलज्जासहितं विलोकनमिष्टं सिद्धं कथयति। एवं चाचिरमेवानया सह सङ्गस्तव भावीति ध्वन्यते॥

कुपितनायिकां दूती वक्ति—

रोषोऽपि रसवतीनां न कर्कशो वा चिरानुबन्धी वा।
वर्षाणामुपलोऽपि हि सुस्निग्धः क्षणिककल्पश्च ॥ ४९८ ॥

रोषोऽपीति। रसः शृङ्गारादिः। पक्षे जलम्। तद्वतीनाम्। एवं चान्यासामन्यादृशी गतिरिति भावः। रोषोऽपि। अपिना कर्कशत्वाद्यौचित्यमावेद्यते। कठिनो वा न। चिरकालावस्थायी वा न। अर्थान्तरन्यासमाह—वर्षाणां पाषाणोऽपि। करकेति यावत्। अत्यन्तकोमलः स्वल्पकालावस्थायी च। एवं चैतादृशातिशयितकोपकरणे रसवत्ताहानिरेव भवित्रीति ध्वन्यते। तेन चैनं परिहृत्य प्रसन्ना भवेति॥

'येनैतादृशक्लेशादिकं भवति तदपेक्षाकरणमनुचितम्' इति वादिनीं सखीं नायिकां वक्ति—

रोदनमेतद्धन्यं सखि किं बहु मृत्युरपि ममानर्घः।
स्वप्नेनेव हि विहितो नयनमनोहारिणा तेन ॥ ४९९ ॥

रोदनमिति। हे सखि, एतद्रोदनं सम्यक्। किं बहु। वक्तव्यमित्यर्थः। मरणमपि मम समीचीनम्। नयनमनःस्वाधीनतासंपादकेन। पक्षे नयनमनोव्यापाराभावसंपादकेन। स्वप्नेनेव तेन नायकेन विहितः। लिङ्गविपरिणामेन रोदनेऽप्येतदन्वेति। रोदनादिकं स्वप्ने सम्यगिति स्वप्नविवेचकाः। स्वप्ने केवलमनोव्यापारस्य सत्त्वेऽपि नयनव्यापारविशिष्टस्य तस्याभावान्नात्र दोषः॥

नायिका सखीं वक्ति—

रोषेणैव मया सखि वक्रोऽपि ग्रन्थिलोऽपि कठिनोऽपि ।
ऋजुतामनीयतायं सद्यः स्वेदेन वंश इव ॥ ९०० ॥

रोषेणेति। हे सखि, वक्रोऽपि ग्रन्थिलोऽपि कठिनोऽप्ययं नायको मया क्रोधेनैव सद्यः ऋजुतां स्वेदेन वेणुरिव प्रापितः। स्वेदेन वेणोर्वक्रताद्यपगच्छतीति काष्ठर्जुतासंपादनविदः ॥

सखी नायिकां वक्ति—

रजनीमियमुपनेतुं पितृप्रसूः प्रथममुपतस्थे ।
रञ्जयति स्वयमिन्दुं कुनायकं दुष्टदूतीव ॥ ९०१ ॥

रजनीमिति । इयं पितृप्रसूः सायंसंध्या रात्रिमुपनेतुं चन्द्रसमीपं नेतुमादावुपतस्थे । स्वयं चन्द्रं दुष्टदूती दुष्टनायकमिव रञ्जयति । रक्तरूपवन्तम् । पक्षेऽनुरागवन्तम् । करोति। एवं च संध्यात्वेन जगद्वन्द्यत्वेऽप्येतादृशानुचितकार्यकारित्वम्, तत्र का वार्तान्यासाम् । अतः स्वयमेव नायकानुनयो विधेय इति ध्वन्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता रकाररज्या ।

लकाररज्या ।

अत्यन्तपराङ्मुखालम्पटास्थिरमतिनायकासक्तां नायिकां काचिदन्योक्त्या वक्ति—

लग्नासि कृष्णवर्त्मनि सुस्निग्धे वर्ति हन्त दग्धासि ।
अयमखिलनयनसुभगो न भुक्तमुक्तां पुनः स्पृशति ॥ ९०२ ॥

लग्नासीति । हे सुस्निग्धे । स्नेहवशादिति भाव उभयत्र । वर्ति, कृष्णवर्त्मनि वह्नौ । अथ च दुष्टमार्गशालिनि नायके लग्नासि । तत्संबन्धभागिनी संवृत्तासि । हन्त खेदे । दग्धासि । एवं च न विलम्ब इति भावः । अथ च दुःखभागिनी संवृत्तासि । यतोऽयं सकलनयनस्पृहणीयः । प्रकाशवत्त्वात् । अथ च सौन्दर्यादिगुणशालित्वात् । एवं च नायिकासौलभ्यमस्येति ध्वन्यते । भोगोत्तरपरित्यक्तां पुनर्न स्पृशति । एवं चैतत्संगतिरनुचितेति ध्वन्यते ॥

संपत्त्या गुणवत्ता दारिद्र्यात्तदभाववत्तेति कश्चिद्वक्ति—

लक्ष्मीः शिक्षयति गुणानमून्पुनर्दुर्गतिर्विधूनयति ।
पूर्णो भवति सुवृत्तस्तुषाररुचिरपचये वक्रः ॥ ९०३ ॥

लक्ष्मीरिति । श्रीर्गुणानुपदिशति । अमून्पुनर्दौर्भाग्यं दूरीकरोति । अत्रार्थीन्तरन्यासमाह—पूर्णमण्डलश्चन्द्रः सुवृत्तः समीचीनवर्तुलः । अथ च समीचीनाचरणवान् । अपचये कलाविनाशे कुटिलः । एवं च संपत्त्यर्जनमत्यन्तावश्यकम् । तदविरोधेन गुणार्जनं विधेयमिति द्योत्यते ॥

नायिका सखीं वक्ति—

लूतातन्तुनिरुद्धद्वारः शून्यालयः पतत्पतगः।
पथिके तस्मिन्नञ्चलपिहितमुखो रोदितीव सखि ॥ ९०४ ॥

लूतेति। हे सखि, ऊर्णनाभतन्तुपिहितद्वारः। पतन्तः पक्षिणो यत्र। शून्यालयः। तस्मिन्नायके पथिके देशान्तरस्थे सति वस्त्रपिहितवदनो रोदितीव। एवं चैतादृशैतद्रोदननिवारणं पुण्यजनकतयावश्यं विधेयं त्वयेति द्योत्यते। तेन च तद्गमनोत्तरकालमारभ्य न केनाप्यत्र सङ्गः संवृत्तः। अत इदानीमन्यनायकमानयेति ध्वन्यते॥

नायकः सखायं वक्ति—

लग्नं जघने तस्याः सुविशाले कलितकरिकरक्रीडे।
वप्रे सक्तं द्विपमिव शृङ्गारस्त्वां विभूषयति ॥ ९०५ ॥

लग्नमिति। समीचीनविस्तीर्णे कलिताङ्गीकृता 'तर्जन्यनामिके युक्ते मध्यमा स्याद्वहिष्कृता। करिहस्तः समुद्दिष्टः कामशास्त्रविशारदैः' इत्येतल्लक्षणलक्षितस्यं करिकरस्य केलिर्येन तस्मिन्। पक्षेऽङ्गीकृतगजशुण्डाकेलौ। तस्या जघने लग्नं त्वां शृङ्गारो वप्रे सक्तं गजमिव विशेषेण भूषयति। एवं चैतादृशमेव सर्वदा कुर्विति ध्वन्यते। 'अर्थैः पदैः पिशुन्येच्च रहस्यवस्तु' इति कामशास्त्रादत्र सुरतारम्भगोष्ठीवत्कलितकरिकरक्रीड इत्यर्थस्य यद्रीडादायित्वेनाश्लीलत्वं तन्न दूषणम्॥

यथा न कस्यापि विज्ञानं भवति तथानेनेयं भुक्तेति काचित्कांचिदन्योक्त्या वक्ति—

लिप्तं न मुखं नाङ्गं न पक्षती न चरणाः परागेण।
अस्पृशतेव नलिन्या विदग्धमधुपेन मधु पीतम् ॥ ९०६ ॥

लिप्तमिति। परागेण वदनं न लिप्तम्। इदमग्रेऽप्यन्वेति लिङ्गवचनविपरिणामेन। अङ्गं न। पक्षती न। चरणा न। स्पर्शमकुर्वतेव चतुरमधुपेन। मधुपदेनोन्मादशालित्वमावेद्यते। नलिन्या मधु पीतम्। नलिन्या इत्यनेन नायिकायां पद्मिनीत्वमावेद्यते। तेन च दुर्लभत्वम्। एवं चैतस्याः सङ्गोऽपि गुप्ततयैव लब्धुं शक्य इति व्यज्यते॥

नायको दूतीं वक्ति—

लग्नं जघने तस्याः शुष्यति नखलक्ष्म मानसं च मम।
भुक्तमविशदमवेदनमिदमधिकसरागसाबाधम् ॥ ९०७ ॥

लग्नमिति। तस्या जघने लग्नं नखचिह्नं मम मानसं च शुष्यति। मानसपदेन शुष्कीभावानर्हत्वेऽपि तद्भवनेन विरहे वडवानलतुल्यत्वमावेद्यते। तेन च दुःसहत्वम्। शुष्कीभावेषूभयोर्वैलक्षण्यमाह—भुक्तं वृद्धिशून्यम्। अविशदमप्रकटम्। यद्वा न विद्यते विशदं यस्मात्। चिरकालीनतया लौहित्यापगमेन श्वेतमित्यर्थः। अवेदनं वेदनारहितम्। इदम्। मम मानसमित्यर्थः। अधिकं वृद्धिमत्। जघनेऽत्यन्तासक्तमिति भावः। सरागं

प्रीतिमत् । साबाधं पीडासहितम् । एवं च यथा सत्वरं सङ्गो भवेत्तथा यतस्वेति ध्वन्यते ।।

बह्वङ्गनालम्पटनायिकामेवं त्वया नायको वाच्य इति सखी समुपदिशति—

लज्जयितुमखिलगोपीनिपीतमनसं मधुद्विषं राधा ।
अग्रेव पृच्छति कथां शंभोर्दयितार्धतुष्टस्य ॥ ९०८ ॥

लज्जयितुमिति । समग्रगोपीनां नितरां पीतं स्वाधीनीकृतं मनो येन तम् । नितरामित्यनेन गोपीमनसोऽन्यविषयसंबन्धाभावो व्यज्यते । मधुद्विषम् । एवं चोन्मादशून्यत्वं ध्वन्यते । लज्जयितुं लज्जां प्रापयितुम् । राधा अग्रेव दयितार्धेन तुष्टस्य शंभोः सुखजनकस्य कथां पृच्छति । एवं च सर्वदा कामबाधाशालिनः कामिनीसुखसंपादकस्य महादेवस्य नायिकार्धेन तुष्टिः, तव तु न तथेति निर्लज्जस्त्वमसीति द्योत्यते । एवं च यथा राधयान्यवार्तया श्रीकृष्णं प्रत्यनुचितं त्वया विधीयत इत्युक्तं तथा त्वया स्वनायकं प्रति वाच्यमिति ध्वन्यते । यद्वा लज्जयितुम् । अर्थाद्गोपीसमूहम् । निखिलगोपीभिर्मिलिताभिर्निपीतं स्वीकृतं मनो यस्य तं मधुद्विषं दयितार्धतुष्टस्य शंभोः कथां पृच्छति । एवं च यत्र दयितार्धमेव नायिकस्य सुखसंपादकतया तन्मनोवशीकरणसमर्थम्, तत्र किमु वाच्यं नायिकाजातमिति भावः । अथवा निपीतं मनो यासाम् । न तु ताभिरित्यर्थः । एवं च गुणविशेषशालितया हरनिरूपितप्रेमवत्तया शिवया स्वस्यार्धेनापि नायकः संतोष्य स्वाधीनतां नीतः, भवतीभिश्च सर्वाभिर्न मधुद्विट् स्वाधीनीकृत इति भवत्यो गुणविहीनतया न तत्र निरूपितप्रेमवत्य इति व्यज्यते । एवं च गोपीपदमपि चातुर्यभावप्रतिपादनेनार्थवत् ।।

सपत्नीत्वमत्यन्तासह्यमिति काचित्कांचिद्वृत्ति—

लक्ष्मीनिःश्वासानलपिण्डीकृतदुग्धजलधिसारभुजः ।
क्षीरनिधितीरसुदृशो यशांसि गायन्ति राधायाः ॥ ९०९ ॥

लक्ष्मीति । लक्ष्म्या निःश्वासानलैः । परमेश्वरस्य राधातिसक्त्येर्ष्ययोष्णैरिति भावः । गाढीकृतदुग्धजलधिसारभोजनवत्यः क्षीरनिधितीरवसतिशालिन्यो नायिका राधाया यशांसि गायन्ति । यत्प्रसादादेवमस्माभिर्भुज्यत इति धियेति भावः । एवं च यत्र लक्ष्म्या अप्येवं सपत्नीदुःखम्, तत्र किमु वाच्यमन्यासामिति व्यज्यते ।।

कश्चित्कंचिद्वृत्ति—

लीलागारस्य बहिः सखीषु चरणातिथौ मयि प्रियया ।
प्रकटीकृतः प्रसादो दत्त्वा वातायने व्यजनम् ॥ ९१० ॥

लीलेति । केलिसदनस्य बहिः सखीषु सतीषु । मयि चरणातिथौ प्रणतिकारिणि । चरणातिथावित्यनेन प्रसादपात्रत्वं ध्वन्यते । प्रियया गवाक्षे व्यजनं दत्त्वा प्रसादः प्रक-

टीकृतः । व्यजनपरित्यागेन संतापनिवृत्तिप्रदर्शनेन प्रसादः प्रकटीकृत इति भावः । यद्वा गवाक्षे व्यजनस्थापनेनान्यानवलोकनीयत्वप्रदर्शनेन यथेच्छं सुरतविघ्नाभावद्योतनात्प्रसादप्रकटनमिति भावः । यद्वा केलिसदनस्य बहिः सखीविषये प्रणतिकारिणि मयि प्रियया वातायने व्यजनं दत्त्वा प्रसादः प्रकटीकृतः । कुपितेयं कदाचिद्गवाक्षद्वारा तर्जयिष्यतीति भीतः सखीप्रसादनां विहाय यदि गतस्तदा ताभिर्मत्प्रार्थनाया अकरणे मानापरित्यागेन नायकक्लेशो भवितेति यथेष्टमयं सखीप्रसादनां करोतु, ताश्च मदीयप्रसादनामिति प्रसादाविष्करणमिति भावः । अथवा गवाक्षे व्यजनसंस्थापनेन समीरणजनकस्यापि समीरणनिवारकत्वं यथा तथा दुःखजनकस्यापि तव दुःखनिवारकत्वमिति प्रदर्शनेन प्रसादाविष्कार इति भावः । एवं चैतस्या यथा चातुर्यं न तथान्यासामिति ध्वन्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्याख्यार्थदीपनया समेता लकारव्रज्या ।

वकारव्रज्या ।

सर्वगोपनपुरःसरमनेनेयं भुक्तेति व्यङ्क्तुं काचित्कांचित्प्रकारान्तरेण वक्ति—

वर्णहृतिर्न ललाटे न लुलितमङ्गं न चाधरे दंशः ।
उत्पलमहारि वारि च न स्पृष्टमुपायचतुरेण ॥ ९११ ॥

वर्णेति । ललाटे वर्णस्य मकरिकादेर्हृतिर्न । अङ्गमपि न म्लानम् । अधरे दंशोऽपि न । अर्थान्नायिकायाः । उपायनिपुणेनोत्पलं हृतं जलं च न स्पृष्टम् । एवं च सहचरीभिरपि न ज्ञातमिति भावः । नायिकाया परकीयात्वात्संभोगचिह्नानुत्पादनपुरःसरं भुक्तियमनेनेति भावः । एवं यद्येतादृशचातुर्यं तव तर्हि परकीयाभिरतिविधेयेति ध्वन्यते ॥

दूती पान्थं प्रति वक्ति—

व्यालम्बि चूर्णकुन्तलचुम्बितनयनाञ्चले मुखे तस्याः ।
बाष्पजलबिन्दवोऽलकमुक्ता इव पान्थ निपतन्ति ॥ ९१२ ॥

व्यालम्बीति । हे पान्थ, तस्या वदने विशेषेणालम्बिनो ये चूर्णकुन्तलास्तैश्चुम्बितनयनप्रान्ते सति, अलकसंबन्धिमुक्ताफलानीव बाष्पोदकबिन्दवः । जलपदेनाधिक्यं व्यज्यते । निपतन्ति । एवं च त्वरया त्वया समागन्तव्यमिति ध्वन्यते ॥

सखी नायकं वक्ति—

विनयविनता दिनेऽसौ निशि मदनकलाविलासलसदङ्गी ।
निर्वाणज्वलितौषधिरिव निपुण प्रत्यभिज्ञेया ॥ ९१३ ॥

विनयेति । हे निपुण । एवं च यथाकथंचिद्दर्शनेन कलाविहीनत्वमेव तस्यां त्वया नाशङ्कनीयमिति व्यज्यते । असौ नायिका दिवसे विनयनम्रा, रात्रौ मदनकलाविलासैर्लसदङ्गी निर्वाणज्वलितौषधिरिव प्रत्यभिज्ञेया । एवं च यथा काचिदोषधी दिवा सौम्या रात्रौ प्रज्वलति तथेयं दिवसेऽतिसौम्या रात्रौ तु मदनकलाकुशला, अतो नैतत्कालीनैतस्याः

सौम्यत्वमाशङ्क्य विरतिर्विधेयेति ध्वन्यते। यद्वेयमत्यन्तविनयशालिनीति न परपुरुषाभिलाषिणीति मन्यमानं वयस्यो वक्ति—निपुणैः प्रत्यभिज्ञेया। एवं च मूर्खाणामियं सौम्येति ज्ञानम्, न निपुणानामिति भावः॥

सखी नायकं वक्ति—

विहितबहुमानमौना सखीप्रबोधैर्यदस्रमातनुते।
रागार्तिकांक्षयाच्चालघुरीक्षा रहसि पुनरेषा॥ ९१४॥

विहितेति। विहितं बहुमानेन मौनं यया। सखीनां प्रबोधनैर्यदस्रमश्रु आतनुते। एषा पुनरेकान्ते रागे यातिर्दीनवचनं प्रार्थना एतैर्लघुवीक्षा। एवं चाधुनेयमेतादृशमानशालिनी दृश्यते परंतु रहसि रागजनितपीडादिभिः स्वयमेव स्वहस्तगतावश्यं भविष्यतीति ध्वन्यते। 'लघुरीक्ष्या' इति पाठे रागार्त्यादिभिर्लघुरेषेक्ष्येति योजना॥

स्वनायिकायामनासक्तं काचिद्वक्ति—

विषमशरविशिखभिन्ना पल्ली शरणं यमेकमभिलषति।
तस्य तव च्छायेव स्वीया जायापि भयभूमिः॥ ९१५॥

विषमेति। मदनबाणभिन्ना पल्ली यमेकं शरणं रक्षणकर्तारं वाञ्छति तस्य तव च्छायेव स्वगतापि भयस्थानम्। विषमशरेत्यनेन दुःसहत्वं ध्वन्यते। पल्ली यमेकमित्यनेन मदनातिशयशालित्वमावेद्यते। छायेवेत्यनेन सर्वदा सेवाप्रवणत्वं नायिकायामावेद्यते। एवं चैतादृशाचरणमनुचितमिति व्यज्यते। यद्वा दूती स्वनायिकासंकोचशालिनं नायकं वक्ति—विषमेति। एवं च स्वाधीनायाः स्वनायिकायास्तव का भीतिः, अतश्चल संकेतं प्रतीति व्यज्यते॥

पराक्रमशालिनि नायके नायिकात्यन्तमासक्ता भवतीति काचित्कंचिद्वक्ति—

विविधायुधव्रणार्बुदविषमे वक्षःस्थले प्रियतमस्य।
श्रीरपि वीरवधूरपि गर्वोत्पुलका सुखं स्वपिति॥ ९१६॥

विविधेति। नानाप्रकारकायुधानां ये व्रणास्तेषामर्बुदैर्मांसकीलैः। 'अर्बुदो मांसकीले स्यात्संख्याभेदे च कीर्तितः'। कठिने नायकस्य वक्षःस्थले गर्वोत्कृष्टपुलका लक्ष्मीर्वीरस्त्री च सुखं निद्राति॥

कृतनायकान्तरोपभोगं निभृतं पृष्ठतः सुप्तं नायकं नायिका वक्ति—

वैमुख्येऽपि विमुक्ताः शरा इवान्याययोधिनो वितनोः।
भिन्दन्ति पृष्ठपतिताः प्रिय हृदयं मम तव श्वासाः॥ ९१७॥

वैमुख्येऽपीति। हे प्रिय। एवं चैतादृशकर्तव्यतयातिदुःखदत्वमित्यावेद्यते। अन्याययुद्धकारिणो मदनस्य वैमुख्येऽपि परावृत्तावपि विशेषेण मुक्ताः। उपसर्गेणातिभेदकत्वं ध्वन्यते। बाणा इव पृष्ठसंलग्नास्तव श्वासा मम हृदयं भिन्दन्ति। वितनोरित्यनेन सुरता-

तिशयेन क्षीणशक्तिकत्वं नायके ध्वन्यते । एवं कृतापराधस्य तवात्र स्वापो मम न सुखद इति ध्वन्यते । यद्वा कृतकनिद्रया नायिकां वञ्चयित्वान्यत्र गन्तुकामं नायकं नायिका वक्ति—वैमुख्येऽपि । त्वदीयदौःशील्यज्ञानादिति भावः । एवं च श्वासैर्मत्स्वापज्ञानोत्तरमियं स्वप्स्यति ततो मयान्यत्र गन्तव्यमिति किमर्थं कापट्यं रचयसि, यथेच्छं गच्छेति ध्वन्यते ॥

कश्चित्कांचिद्वक्ति—

व्यक्तमधुना समेतः खण्डो मदिराक्षि दशनवसने ते ।
यन्नवसुधैकसारं लोभिनि तत्किमपि नाद्राक्षम् ॥ ११८ ॥

व्यक्तमिति । हे मदिराक्षि । एवं च कटाक्षविक्षेपमात्रेणोन्मादजनकत्वं व्यज्यते । तव दशनवसन ओष्ठे समेतो लग्नः खण्ड इत्यधुना व्यक्तं प्रकटीभूतम् । एवं च पूर्वं किमपि नोक्तवती, अधुना तु मधुरवचनमभिधत्स इति भावः । यद्वा व्यक्तं स्वच्छम् । 'व्यक्तं स्फुटे च स्वच्छे च' । यन्मधु माक्षिकं तत्समेतः खण्डः । अस्तीत्यध्याहारः । एवं चौतिमाधुर्यमधरेऽस्तीति व्यज्यते । हे लोभिनि । एवं च सर्वसंग्रहकारित्वं ध्वन्यते । नूतनसुधैकसारं यत्तत्किमपि नाद्राक्षं न दृष्टवान् । अथ च द्राक्षाशून्यं न । एवं च केवलं मधुरं वदसि, कटाक्षयसि च, न पुनश्चुम्बनादिना मां जीवयसीति ध्वन्यते । यद्वा हे मदिराक्षि, तवाधरे समेतो लग्नः खण्ड इदमधुना व्यक्तम् । निश्चितमित्यर्थः । यद्वसुधैकसारं न । अपि तु त्रिभुवनसारमित्यर्थः । तत्किमपि लोभिनिं नापश्यम् । एवं चेदानींतनाधरचुम्बनेनाधरमाधुर्यं विज्ञातं परं तु त्रिभुवनसारभूतसुरतेन किं मां न सुखयसीति व्यज्यते । अथ च त्वत्सुधैकसारं किमपि तन्न नाद्राक्षम् । अपि तु सर्वं दृष्टवानस्मीत्यर्थः । एवं च मदिरामाक्षिकशर्करासुधाद्राक्षामधुरवस्तूनां त्वयि सत्त्वेऽपि लोभवशात्किंचिद्दासि किंचिन्न ददासीत्यनुचितमित्यावेद्यते ॥

नायकः सखायं वक्ति—

बालाविलासबन्धानप्रभवन्मनसि चिन्तयन्पूर्वम् ।
संमानवर्जितां तां गृहिणीमेवानुशोचामि ॥ ११९ ॥

बालेति । हे वयस्य, अप्रभवन्नसमर्थः । प्राथमिककान्ताधीनत्वादिति भावः । बालाया विलासबन्धान्पूर्वं चिन्तयन्स्थितः । प्राथमिककान्ताधीनेन मया कथमियं विलासविशेषशालिनी भोक्तव्येति चिन्तावान्संजात इति भावः । अधुना तु संमानरहिताम् । द्वितीयकामिन्याः प्राबल्यादिति भावः । गृहिणीमेवानुशोचामि । गृहिणीमित्यनेन मानार्हत्वेऽपि तदकरणेनानौचिती द्योत्यते । एवं च यस्या भयेन पूर्वं किमपि कर्तुमशक्तस्तस्या इदानीमेतादृशी गतिः संवृत्तेति धियेति भावः । एवं च पूर्वमिदानीमपि न मां चिन्ता परित्यजतीति ध्वन्यते । यद्वा बालाया अप्रगल्भे मनसि विलासबन्धांश्चिन्तयन्नहं पूर्वं प्रतिष्ठावर्जितां गृहिणीमेवानुशोचामि । एवं चाप्रगल्भवयस्यनयैतादृशवि-

लासैर्हृतचित्तः संवृत्तः, किं पुनरग्रेऽनया विधेयमिति भावः। पूर्वं गृहिणीमेवानुशोचामीत्यनेन बालाविलासासक्तचिन्तनया स्वात्मनः परतन्त्रतया शोच्यत्वेऽपि मदीयैतादृशावस्थामालोक्य गृहिण्याः समधिकदुःखोद्रेको भवितेति तद्विषय एवानुशोचनं मह्यमापतितमिति व्यज्यते ॥

मन्मथव्यथातोऽन्यव्यथाजातं नातिदुःखदमिति कश्चिद्वक्ति—

वीजयतोरन्योन्यं यूनोर्वियुतानि सकलगात्राणि।
सन्मैत्रीव श्रोणी परं निदाघेऽपि न विघटिता ॥ ९२० ॥

वीजयतोरिति। परस्परं वीजयतोर्यूनोः समग्रावयवा विभागवन्तः संवृत्ताः। परं केवलं श्रोणी सन्मैत्रीव निदाघकालेऽपि। अपिनावश्यविघटनार्हत्वं द्योत्यते। न वियुक्ता। निदाघदुःखागणनादिति भावः ॥

उपपतिरपसार्यतामिति दूती कांचिद्भङ्ग्यन्तरेण वक्ति—

व्यारोषं मानिन्यास्तमो दिवः कासरं कलमभूमेः।
बद्धमलिं च नलिन्याः प्रभातसंध्यापसारयति ॥ ९२१ ॥

व्यारोषमिति। मानवत्या विशिष्टकोपम्, दिवोऽन्धकारम्, कलमभूमेः कासरं महिषम्, नलिन्या निरुद्धं भ्रमरं च प्रातःकालीनसंध्यापसारयति। एवं च प्रातःकालः संवृत्तः, अतो यया रीत्यानीतोऽयं तयैव रीत्या नेय इति ध्वन्यते। संध्यापदेन यथा योगसंपादनसामर्थ्यं तथापसारणसामर्थ्यमप्युपेक्षितमिति ध्वन्यते ॥

नायिकासखी नायकं वक्ति—

वक्षसि विजृम्भमाणे स्तनभिन्नं त्रुटति कञ्चुकं तस्याः।
पूर्वदयितानुरागस्तव हृदि न मनागपि त्रुटति ॥ ९२२ ॥

वक्षसीति। वक्षसि विजृम्भमाणे स्तनौन्नत्यशालिनि स्तनभिन्नं कूर्पासकं तस्यास्त्रुटति। तव हृदि प्रथमप्रियाप्रीतिरीषदपि न त्रुटतीति। एवं चैतस्यास्तारुण्योद्रेकेऽपि तव नासक्तिः, अतस्त्वत्सदृशो न कोऽपि जड इति ध्वन्यते ॥

नायिकासखी नायकं वक्ति—

व्यक्तिमवेक्ष्य तदन्यां तस्यामेवेति विदितमधुना तु।
हर्म्यहरिमुखमिव त्वामुभयोः साधारणं वेद्मि ॥ ९२३ ॥

व्यक्तिमिति। तदन्यां नायिकाभिन्नां व्यक्तिमवेक्ष्य। तस्यामेव त्वमासक्त इति शेषः। इति ज्ञातम्। एवं च पूर्वं सापीयमपि मया दृष्टैव तदानीं तवैतस्यामनादरादिना तस्यामेव प्रीतिरभूदिति विज्ञातमिति भावः। अधुना तु गृहद्वारसंबन्धि सिंहमुखमिव त्वामुभयोः साधारणं जानामि। एवं चेदानीं त्वमुभयत्र समबुद्धिरित्यस्थिरप्रकृतिकत्वं नायके ध्वन्यते। 'अवीक्ष्य' इति पाठे तदन्यां प्रथमाभिन्नां नायिकामवीक्ष्य। तस्यामेवासक्त

इति शेषः । विदितम् । अधुना तु हर्म्यहरिमुखमिवोभयोः साधारणं वेद्मि । एवं यावत्पर्यन्तमुभयोर्न दर्शनं संवृत्तं तावदन्यादृशी बुद्धिः स्थितेति भावः ॥

नायिकासखी नायकं वक्ति—

व्यजनस्येव समीपे गतागतैस्तापहारिणो भवतः ।
अञ्चलमिव चञ्चलतां मम सख्याः प्रापितं चेतः ॥ ९२४ ॥

व्यजनस्येति । व्यजनस्येव संतापापनोदकस्य भवतः समीपे । अर्थान्नायिकायाः । गमनागमनैर्वस्त्रप्रान्तमिव मम सख्याश्चित्तं चाञ्चल्यं प्रापितम् । एवं च त्वय्येव प्रथमासक्तिमुत्पाद्येदानीमुदासीनवच्छैथिल्यं क्रियत इत्ययुक्तं तवेत्यतस्त्वरस्व तद्दर्शनायेति ध्वन्यते। यद्वा व्यजनस्येव तापहारिणः समीपे । नायिकाया इति भावः । भवतो गतागतैः । एवं च लोकभीत्या कटाक्षवीक्षणाभावो व्यज्यते । सख्याः अञ्चलमिव मम चेतश्चञ्चलतां प्रापितम् । एवं च मान्मथव्यथापनोदकभवदीयसविधगतागतसंजातानुरागजनितहेलावशात्कम्परूपसात्त्विकभावोदयवशाद्वा यथा सख्याश्चेलाञ्चले चञ्चलता तथा मन्मनसि कया रीत्या कुत्र वानयोः संगमः संपादनीय इति चाञ्चल्यमुज्जृम्भत इति भावः ॥

नायिको नायिकां वक्ति—

वितरन्ती रसमन्तर्ममार्द्रभावं तनोषि तनुगात्रि ।
अन्तःसलिला सरिदिव यन्निवससि बहिरदृश्यापि ॥ ९२५ ॥

वितरन्तीति । हे कृशाङ्गि, अन्तः रसं प्रीतिं वितरन्ती ममार्द्रभावं तनोषि । यद्यस्मादन्तर्जला नदीव बहिरदृश्यापि निवससि । मम हृदीति भावः । एवं च बहिस्त्वद्विषयकप्रेमाभावेऽप्यान्तरं प्रेम ममातितरामस्ति त्वद्विषयकमित्यावेद्यते ॥

चिरतरकृतचाटुवचनादिरचनेऽप्यवधीरणात्कृतकस्वापं नायकमनुतापवशादानेतुं प्रेषिता दूती नायिकां वक्ति—

विहितविविधानुबन्धो मानोन्नतयावधीरितो मानी ।
लभते कुतः प्रबोधं स जागरित्वैव निद्राणः ॥ ९२६ ॥

विहितेति । कृतानेकसान्त्वनोऽपि मानोद्धतया त्वयावगणितोऽभिमानशाली । एवं च प्रसादनासंपादनाविरामौचित्यमावेद्यते । जाग्रदेव निद्रावान्प्रबोधं कुतो लभते । न कुतोऽपीत्यर्थः । एवं चैतादृशनायकावधीरणकरणमनुचितमिति ध्वन्यते ॥

काचित्कांचिद्वक्ति—

व्रीडाविमुखीं वीतस्नेहामाशङ्क्य काकुवाङ्मधुरे ।
प्रेमार्द्रसापराधां दिशति दृशं वल्लभे बाला ॥ ९२७ ॥

व्रीडेति । लज्जाया परावृत्तवदनाम् । अर्थान्नायिकाम् । गतस्नेहामाशङ्क्य चाटुवचनमधुरे नायके बाला । एवं चाज्ञत्वं व्यज्यते । प्रेम्णार्द्रामपराधेन सहितां दृष्टिं करोति । एवं स्त्रीणामेतादृशी गतिरिति भावः ॥

कश्चित्कंचिद्वक्ति—

बाष्पाकुलं प्रलपतोर्गृहिणि निवर्तस्व कान्त गच्छेति ।
यातं दंपत्योर्दिनमनुगमनावधिसरस्तीरे ॥ ५२८ ॥

बाष्पेति । बाष्पव्याकुलं यथा भवति तथा 'गेहिनि, निवर्तस्व', 'कान्त, गच्छ' इति प्रकृष्टालापवतोः । यद्वा परावृत्त्याद्यकरणेनानर्थकतया वृथा वदतोरित्यर्थः । 'प्रलापोऽनर्थकं वचः' इत्यभिधानात् । दंपत्योरनुगमनस्यावधिभूतसरस्तीरे दिनं यातं व्यतीतम् । एवं च प्रेम्णि सति न किंचिदपरं स्फुरतीति ध्वन्यते ॥

प्रतिज्ञापुरःसरविपरीतरतकारिणीं नायिकां नायको वक्ति—

वक्षःप्रणयिनि सान्द्रश्वासे वाङ्मात्रसुभटि घनघर्मे ।
सुतनु ललाटनिवेशितललाटिके तिष्ठ विजितासि ॥ ५२९ ॥

वक्ष इति । वक्षसि । अर्थात्स्वस्य । प्रणयः प्रीतिर्यस्याः । स्वार्थमिति भावः । दीर्घश्वासशालिनि । श्रमवशादिति भावः । वचनमात्रशूरे । मात्रपदेन सामर्थ्याभावोऽभिव्यज्यते । बहुतरप्रस्वेदवति, शोभनगात्रि, ललाटे । अर्थान्मम । संस्थापितललाटिके, तिष्ठ तूष्णीं भव । यतो विजितासि । सर्वैः संबोधनपदैर्निःसहत्वप्रतिपादनाद्विजयस्य व्यङ्ग्यत्वेऽपि विजितासीति पदोपादानं न चमत्कारकारीत्याभाति ॥

राधा कृष्णेऽत्यन्तमासक्ता जातेति काचित्कांचिद्वक्ति—

विचरति परितः कृष्णे राधायां रागचपलनयनायाम् ।
दशदिग्वेधविशुद्धं विशिखं विदधाति विषमेषुः ॥ ५३० ॥

विचरतीति । कृष्णे समन्ताद्विचरति सति, अनुरागचञ्चलनेत्रायां राधायां दशदिक्षु यो वेधस्तत्र विशुद्धम् । दशदिक्ष्वपि लक्ष्यवेधकारिणमित्यर्थः । बाणं मदनो विदधाति । एवं च सर्वत्र राधाकटाक्षविषयः श्रीकृष्णोऽभूदिति ध्वन्यते ॥

काचित्कांचिद्वक्ति—

वीक्ष्यैव वेत्ति पथिकः पीवरबहुवायसं निजावासम् ।
सौन्दर्यैकनिधेरपि दयिताया श्चरितमविचलितम् ॥ ५३१ ॥

वीक्ष्यैवेति । पथिकः पुष्टबहुकाकम् । नायकागमनशकुनदर्शनार्थं दत्तदध्योदनादिनेति भावः । स्वसदनं दृष्ट्वैव । न वचनादिनेत्यर्थः । सौन्दर्यैकस्थानभूतायाः । एवं चावश्यचरितव्यसनयोग्यत्वमावेद्यते । प्रियाया अविचलितमाचरणं जानाति । यदीयमन्यत्रासक्ता स्यात्तदा किमिति मदर्थमेतादृशशकुनाद्यवेक्षणं कुर्यादिति भावः । यद्वानया रीत्या नायकः प्रतारयितुं शक्यः, अतो यथेच्छं परपुरुषे विचरेति दूती 'त्वद्वचनकरणे नायको मत्पातिव्रत्यभङ्गं विज्ञास्यति तेन चानुचितमिदम्' इति वादिनीं नायिकां वक्ति ॥

---

१. पवर्गीयबकारव्रज्योचितेयमार्या प्रमादेन दन्त्योष्ठ्यवकारव्रज्यायामादर्शपुस्तकेषु लिखितेति भाति.

विपन्निमग्नस्योद्धारः केनचिदेव कर्तुं शक्यो न सर्वैरिति कश्चिदन्योक्त्या कंचन वक्ति—

विमुखे चतुर्मुखेऽपि श्रितवति चानीशभावमीशेऽपि ।
मग्नमहीनिस्तारे हरिः परं स्तब्धरोमाभूत् ॥ ९३२ ॥

विमुख इति । चतुर्मुखे विधातर्यपि विमुखे उद्योगशून्ये । यद्वानङ्गीकारकारिणि । ईशेऽप्यनीशभावमसमर्थभावं श्रितवति सति । मग्नधरोद्धारे परं केवलं हरिर्विष्णुः स्तब्धरोमा वराहः । अथ च रोमाञ्चितः । धरोद्धारोत्साहवशादिति भावः । अभूत् । चतुर्मुखेशपदाभ्यामनयोः सांनिध्यात्सामर्थ्यशालित्वं ध्वन्यते । तेन च तत्करणोत्साहाभावेन धरोद्धारकरणेऽतिकाठिन्यमावेद्यते । एवं च विष्णुतुल्येनैवापदुद्धारः कर्तुं शक्यो नान्येनेति व्यज्यते ॥

कश्चित्कंचिदन्योक्त्या वक्ति—

वापीकच्छे वासः कण्टकवृतयः सजागरा भ्रमराः ।
केतकविटप किमेतैर्ननु वारय मञ्जरीगन्धम् ॥ ९३३ ॥

वापीति । हे केतकवृक्ष, वापीजलप्रायदेशे वसतिः । कण्टकावरणानि । निद्राशून्या भ्रमराः । एतैः किम् । न किंचिदित्यर्थः । ननु निश्चितं मञ्जरीगन्धं वारय । एवं चैतादृशी नायिका यावत्तव समीपेऽस्ति, तावद्यत्र यत्र येन येन प्रकारेणावतिष्ठसि तत्रावश्यमन्यनायकोपसर्गो नापगमिष्यतीत्येतत्करणमनुचितमिति द्योत्यते ॥

नायको नायिकां वक्ति—

विचलसि मुग्धे विधृता यथा तथा विशसि हृदयमद्ये मे ।
शक्तिः प्रसूनधनुषः प्रकम्पलक्ष्यं स्पृशन्तीव ॥ ९३४ ॥

विचलसीति । हे मुग्धे सुन्दरि दयाशून्ये । एवं च गमनौचित्यमावेद्यते । विधृता । अञ्चलादाविति भावः । यथा विचलसि गच्छसि तथा मे हृदयं विशसि । प्रकम्पलक्ष्यं स्पृशन्ती मदनस्य शक्तिरिव । एवं च त्वद्गमने मत्प्राणा एव गमिष्यन्तीति व्यज्यते ॥

सखी नायिकां वक्ति—

विहितासमशरसमरो जितगाङ्गेयच्छविः कृताटोपः ।
पुरुषायिते विराजति देहस्तव सखि शिखण्डीव ॥ ९३५ ॥

विहितेति । हे सखि, विहितः कृतः । विशेषेण हित इति वा । असमशरसमरो मदनयुद्धम् । सुरतमिति यावत् । येन । यस्येति वा । अत एव विपरीतरतोद्योगः । पक्षे कृतोऽनुपमबाणैः सङ्ग्रामो येन सः । जिता गाङ्गेयस्य सुवर्णस्य । पक्षे भीष्मस्य । दीप्तिर्येन सः । संपादिताडम्बरः । तव देहो विपरीतरते शिखण्डीव विराजति । एवं च त्वया बहुधा विपरीतरतमेव विधेयमिति ध्वन्यते ॥

चौर्यरतादि न सम्यगिति वादिनं कश्चिद्वक्ति—

वृतिविवरनिर्गतस्य प्रमदाबिम्बाधरस्य मधु पिबते ।
अवधीरितपीयूषः स्पृहयति देवाधिराजोऽपि ॥ ९३६ ॥

वृतीति । आवरणच्छिद्रनिर्गतस्य प्रकृष्टमदशालिन्या बिम्बतुल्याधरस्य मधु पिबते । 'क्रुधद्रुह–' इत्यादिना चतुर्थी । अवगणितामृत इन्द्रोऽपि स्पृहयति । मद्रूपतावाञ्छार्थमित्यर्थः । एवं चेन्द्रपदसुखाद्यपेक्षयापि चौर्यरतसुखमधिकमित्यावेद्यते ॥

पुरुषविशेषे समासक्तायाः संगतिमपेक्षमाणं कंचन दूती वक्ति—

वासितमधुनि वधूनामवतंसे मौलिमण्डने यूनाम् ।
विलसति सा पुरकुसुमे मधुपीव वनप्रसूनेषु ॥ ९३७ ॥

वासितेति । वासितमुत्कृष्टताशालिकृतं मधु येन । एवं चैतत्समवधाने मद्यस्य मादकत्वमित्यावेद्यते । पक्षे मधुनः सौगन्ध्यार्थं पुष्पादिकं प्रक्षिप्यत इति भावः । नायिकानामवतंसे श्रुतिभूषणरूपे । एवं च सर्वा अपि कामिन्यस्तदीयगुणश्रवणं सर्वादादरातिशयेन कुर्वन्तीति भावः । तरुणानां मस्तकभूषणरूपे । वन्दनीय इत्यर्थः । नगरस्य कुसुमे । सर्वजगत्स्पृहणीयत्वादिति भावः । नायके । विशेषणमहिम्ना विशेष्यलाभः । सा विलसति शोभते । एवं च त्वं न तस्याः शोभाधायक इति भावः । वनकुसुमे मधुपीव । एवं चैतादृशनायकविशेषे समासक्ता न कथमपि त्वयि संयोजयितुं शक्येति भावः ॥

नायिकासखी नायकं वक्ति—

व्रीडाप्रसरः प्रथमं तदनु च रसभावपुष्टचेष्टेयम् ।
जवनीविनिर्गमादनु नटीव दयिता मनो हरति ॥ ९३८ ॥

व्रीडेति । आदौ लज्जाप्रसरः । तदनन्तरं रसः शृङ्गारादिः, भावश्चित्ताभिप्रायः, आभ्यां पुष्टा चेष्टा । जवनीविनिर्गमादनु नर्तकीवेयं दयिता मनो हरति । एवं च यथा जवनिकाविनिर्गमानन्तरं नटी प्रथमतो लज्जातिशयं प्रदर्श्य ततो रसाभिनयपुष्टचेष्टां प्रदर्शयति, ततो रसाविर्भावात्सामाजिकमनांसि हरति, तथेयं दयिता यथा जवन्यपसरति तथा प्रथमं लज्जाविशेषं विधाय ततः सरसाभिप्रायविलासं प्रदर्श्य ततो निर्भररतानन्दवत्तया नायकीयमनसोऽनन्यप्रवणतामापादयतीति भावः । इयमित्यनेनान्यासां प्रथमतो निर्लज्जतया किंचिन्मनोहारकत्वेऽपि न तासु नायकीयचित्तहारकत्वमिति वस्त्वावेद्यते । तेन च व्यतिरेकालंकारः ॥

दूती नायकं वक्ति—

वाससि हरिद्रयेव त्वयि गौराङ्ग्या निवेशितो रागः ।
पिशुनेन सोऽपनीतः सहसा पतता जलेनेव ॥ ९३९ ॥

वाससीति । वस्त्रे हरिद्रयेव गौराङ्ग्या नायिकया त्वयि रागोऽनुरागः । पक्षे पीतिमा ।

संपादितः। गौराङ्गचेति हरिद्राविशेषणमपि। स रागः सहसा। अप्रतर्क्यमिति यावत्। पतता प्रविष्टेन। पक्षे संबन्धवता। जलेनेव पिशुनेन सूचकेन दूरीकृतः। एवं च न तस्या अपराध इति भावः॥

एतादृशनायिकासाहचर्ये तव सर्वत्र कामुककृतपीडा स्यादिति कश्चित्कंचिदन्योक्त्या वक्ति—

विष्वग्विकासिसौरभरागान्धव्याधबाधनीयस्य।
क्वचिदपि कुरङ्ग भवतो नाभीमादाय न स्थानम्॥ ९४० ॥

विष्वगिति। हे कुरङ्ग, सर्वतो विसारिसौगन्ध्येन योऽभिलाषस्तेनान्धा ये व्याधास्तैः पीडनीयस्य। विश्वगित्यादिना गोपनमशक्यमित्यावेद्यते। रागान्धपदेन कर्तव्याकर्तव्यविवेकवैधुर्यमावेद्यते। व्याधपदेन हिंस्रत्वं द्योत्यते। भवतो नाभीमादाय क्वापि स्थलं नास्ति। एवं चैतस्याः समस्तगुणैर्विख्यातायास्तव गोपनाशक्यतया सर्वतः पीडा स्यात्, अतं एतत्सङ्गस्त्याज्य इति ध्वन्यते॥

एकजातसजातीयगुणवत्त्वेऽपि क्वचित्कश्चिदस्ति विशेष इति कंचिदन्योक्त्या वक्ति—

वटकुटजशालशाल्मलिरसालबहुवारसिन्धुवाराणाम्।
अस्ति भिदा मलयाचलसंभवसौरभ्यसाम्येऽपि॥ ९४१ ॥

वटेति। वटादिसिन्धुवारान्तवृक्षाणां मलयाद्रिजन्यसौगन्ध्यसाजात्येऽपि भेदोऽस्ति। एवं च चतुरैरेव तद्वैजात्यं ज्ञातुं शक्यं नान्यैरिति भावः॥

सामान्यवनितां काचिदन्योक्त्या समुपहसति—

विनिहितकपर्दकोटिं चापलदोषेण शंकरं त्यक्त्वा।
वटमेकमनुसरन्ती जाह्नवि लुठसि प्रयागतटे॥ ९४२ ॥

विनिहितेति। विनिहिता समर्पिता कपर्दस्य जटाजूटस्य कोटिः प्रान्तभागो येन तम्। पक्षे कोटिसंख्याककपर्ददातारम्। शंकरं शिवम्। पक्षे सुखसंपादकम्। चाञ्चल्यदोषेण त्यक्त्वा। दोषपदमनौचितीं व्यनक्ति। हे जाह्नवि जह्नुतनये। एवं चैतादृशाचरणमनुचितं तवेति ध्वन्यते। एकं वटवृक्षम्। पक्षे वराटकम्। अपेक्षमाणा प्रयागतटे। पक्षे मध्यमपदलोपिसमासात्प्रलुप्तयागस्य पापीयसः समीप इत्यर्थः। लुठसि। एवं च चाञ्चल्यकरणमनुचितं तवेति भावः॥

'किमिति विरहदुःखं त्वया मत्सख्या दत्तम्' इति वादिनीं नायिकासखीं नायको वक्ति—

वेद चतुर्णां क्षणदा प्रहराणां संगमं वियोगं च।
चरणानामिव कूर्मी संकोचमपि प्रसारमपि॥ ९४३ ॥

वेदेति। चतुःप्रहरसंबन्धिसंयोगं चतुःप्रहरसंबन्धिवियोगं च क्षणदा। क्षणदेव क्ष-

णदा। नायिकेत्यर्थः। वेद। कर्तुमिति भावः। एवं च यदि प्रसन्ना नायिका तदा सैव प्रहरचतुष्टयसंबन्धि रतसुखं करोति, सैव चाप्रसन्ना प्रहरचतुष्टयसंबन्धि विरहदुःखं करोतीति भावः। अत एव क्षणमुत्सवं ददाति द्यति चेति व्युत्पत्तिरपि संगच्छते। अथ च प्रहरचतुष्टयसंबन्धि सङ्गसुखस्य तथाविधविरहं रात्रिरेव वेद। रात्रीयप्रहरचतुष्टयसंबन्धिविरहवेदनायाश्च कर्त्री सैवेत्यर्थः। दिवसीयविरहस्यापि रात्रावेवातिदुःखदत्वादिति भावः। चरणानां संकोचं प्रसारमपि यथा कूर्मो विजानाति, एवं च यथा चरणसंकोचप्रसरणसंपादनं कूर्म्यधीनं तथा संगमविरहसंपादनं नायिकाधीनमिति भावः। एवं च न ममापराध इति ध्वन्यते। यद्वा विरहिणी सखीं वक्ति—हे सखि, चतुर्णां प्रहराणां संगमं वियोगं च क्षणदा रात्रिर्वेद। चन्द्राद्युद्दीपनादिप्राबल्याद्युन्मादाद्यवस्थया नायकसमागमासमागमाभ्यां मत्सुखदुःखसाक्षिणी रात्रिरेवेति भावः। एवं च तादृश्यापि सख्या मत्सुखदुःखविचारणा न क्रियत इति सख्युपालम्भो व्यज्यते। अथवा चतुर्णां प्रहराणां क्षणदा। समग्रा रात्रिरिति यावत्। सुखदुःखे वेद। मदीये इति भावः। एवं च क्षणमपि न रात्रौ विश्रान्तिर्वृत्तेति भावः। यद्वा सामान्यवनितां तदीयधात्री वक्ति—कूर्मीव क्षणदा चतुर्णां प्रहराणां सङ्गं वियोगं च वेद। त्वं किमिति न वेत्सि। एवं च त्वयापि केऽप्यानेयाः केऽपि विनिःसारणीया इति भावः। अथवा सखी नायिकामुपदिशति—या द्युत्सवदा कामिनी सा स्वदर्शनादिदानेन दिवसीयप्रहरचतुष्टयविरहसंपादनेनोत्कण्ठितं नायकं विधाय रात्रौ प्रहरचतुष्टयमपि रमयतीति भावः॥

नायिकासखी नायकं वक्ति—

वृतिविवरेण विशन्ती सुभग त्वामीक्षितुं सखी दृष्टिः।
हरति युवहृदयपञ्जरमध्यस्था मन्मथेषुरिव॥ ९४४॥

वृतीति। हे सुभग। एतादृशनायिकानुरागशालित्वादिति भावः। भित्तिसुषिरेण त्वामवलोकयितुं विशन्ती यूनां हृदयरूपो यः पञ्जरो वंशकरण्डिका तन्मध्यस्था। एवं च धात्रानुपघातो ध्वन्यते। मन्मथेषुरिव सख्याः। ममेति भावः। दृष्टिर्हरति। अर्थात्त्वामेव। एवं च पूर्वं त्वद्गुणश्रवणादिना त्वय्यासक्ता, इदानींतनत्वद्विषयकविलोकनेन मन्मथवशान्न किंचिदपि मम सखी जानातीति त्वय्यत्यन्तमासक्तेयमिति ध्वन्यते। यद्वा युवहृदयपञ्जरमध्यस्थेति दृष्टिविशेषणम्। पञ्जरपदेन निःसारणानर्हत्वं ध्वन्यते। एवं च त्वामवलोकयितुं प्रवृत्ताया मत्सख्या उदासीनवस्तुतुल्यतया नयनविषयीभूता अन्ये युवानस्तस्याः कटाक्षैकतानतापन्नास्तामेव भावयन्तीति भावः। एवं च सर्वैर्युवभिर्स्पृहणीया या त्वामेव स्पृहयतीति सा त्वयावश्यमनुग्राह्येति ध्वन्यते॥

याथातथ्यज्ञानवानयमेवेति कश्चित्कंचिदन्योक्त्या वक्ति—

विपणितुलासामान्ये मा गणयैनं निरूपणे निपुण।
धर्मघटोऽसावधरीकरोति लघुमुपरि नयति गुरुम्॥ ९४५॥

विपणीति। हे निरूपणे निपुण। एवं चैतस्यान्यैः समताकरणे तवैवानुचितमिति व्यज्यते। रथ्यातुलासामान्ये एनं मा गणय। असौ धर्मघटो लघुमधरीकरोति गुरुमुपरि नयति। क्वचित् 'एनां दिव्यतुला सा' इति पाठः। तत्र नायिकापक्षे योज्यम्॥

सतां मनसः सकाशान्न किंचिन्महत्तरमिति कश्चिद्वक्ति—

वासरगम्यमनूरोरम्बरमवनी च वामनैकपदम्।
जलधिरपि पोतलङ्घ्यः सतां मनः केन तुलयामः॥ ९४६॥

वासरेति। ऊरुरहितस्य। अरुणस्येत्यर्थः। अम्बरं दिवसोल्लङ्घ्यम्। वसुधा च वामनस्यैकपदम्। एकपदेनोल्लङ्घ्येत्यर्थः। समुद्रोऽपि पोतेन लङ्घ्यः। सतां मनः केन तुलयामः। एवं च महत्तरतयाभिमतस्याकाशस्याल्पसमयेन चरणहीनोल्लङ्घनीयतया, तथा वसुधाया अपि ह्रस्वपदलङ्घनीयतया, तथा जलधेरपि पोत इव पोत इत्युपमितेन स्वल्पेनाप्युल्लङ्घनीयतया, एतत्त्रयातिरिक्तवस्तुनोऽभावात्सतां मनो निरुपममित्यर्थः॥

दूती नायिकां वक्ति—

विततततमोमषिलेखालक्ष्मोत्सङ्गस्फुटाः कुरङ्गाक्षि।
पत्राक्षरनिकरा इव तारा नभसि प्रकाशन्ते॥ ९४७॥

विततेति। हे कुरङ्गनेत्रे, विततं यत्तमस्तद्रूपा या मषी तस्या या रेखास्तद्रूपचिह्नवदुत्सङ्गो यस्य तादृशा ये ताराः पत्ररूपाक्षरसमूहा इव प्रकाशन्ते। एवं च त्वद्विरहखिन्नस्य नायकस्य त्वद्विज्ञापनापत्रमिवेदमाकाशमालोक्य त्वया तरया प्रस्थेयमिति व्यज्यते। यद्वा मदनदेवस्येदं चन्द्रमुद्रामुद्रितं शासनपत्रं यन्मानवतीनां निःशङ्कं भवद्भिर्दुःखं देयमिति शारदादिनिजजनस्येत्यवगत्य मानमपहाय नायकमनुरञ्जयेति सखीवाक्यमेतत्॥

विविधाङ्गभङ्गिषु गुरुर्नूतनशिष्यां मनोभवाचार्यः।
वेत्रलतयेव बालां तल्पे नर्तयति रतरीत्या॥ ९४८॥

विविधेति। अनेकाङ्गभङ्गिषु गुरुर्मनोभवरूपाचार्यो नवीनान्तेवासिरूपां बालां वेत्रलतयेव रतरीत्या तल्पे नर्तयति। एवं चेयमग्रेऽत्यन्तरतकलाप्रवीणा भविष्यतीति भावः॥

नायको नायिकां वक्ति—

विपरीतमपि रतं ते स्रोतो नद्या इवानुकूलमिदम्।
तटतरुमिव मम हृदयं समूलमपि वेगतो हरति॥ ९४९॥

विपरीतमिति। हे सुतनु, अनुकूलमिच्छाविषयीभूतम्। पक्षे कूलं रोधः। इदं ते विपरीतमपि रतम्। अपिना विपरीतरतेतररतसंग्रहः। यद्वापिरवधारणार्थकः। नद्या इव स्रोतो मम हृदयं तटतरुमिव वेगतः। वेगविशेषादित्यर्थः। आमूलं हरति। एवं च रतसामान्यस्याधिक्येऽपि विपरीतरतस्याधिक्यमित्यावेद्यते॥

कश्चित्कंचिद्वक्ति—

वैभवभाजां दूषणमपि भूषणपक्ष एव निःक्षिप्तम् ।
गुणमात्मनामधर्मं द्वेषं च गृणन्ति काणादाः ॥ ९९० ॥

वैभवेति । दूषणमपि । अपिना हेयत्वमावेद्यते । भाग्यशालिनाम् । पक्षे वैभवं व्यापकत्वम् । भूषणपक्ष एव । एवकारेण दूषणपक्षव्यवच्छेदः । निःक्षिप्तम् । स्थापितमित्यर्थः । उक्तमर्थमर्थान्तरन्यासेन द्रढयति—काणादा वैशेषिकशास्त्रप्रवर्तका अधर्मं द्वेषं चात्मनां गुणं गृणन्ति । चतुर्विंशतिगुणेष्वेतयोर्गणनादिति भावः । एवं चाधर्मद्वेषयोर्दूषणपक्षनिःक्षेपयोग्यत्वेऽप्यात्मनि विद्यमानतया गुणत्वं मुनिभिरभिहितं तत्र का वार्तान्येषामिति भावः । एवं च दरिद्रस्यैव दोषं दोषत्वेन गणयन्ति सर्वे इति दारिद्र्यमसम्यगिति व्यज्यते ॥

वक्राः कपटस्निग्धा मलिनाः कर्णान्तिके प्रसज्जन्तः ।
कं वञ्चयन्ति न सखे खलाश्च गणिकाकटाक्षाश्च ॥ ९९१ ॥

वक्रेति । वक्राः कुटिलाः । कापट्येन स्नेहवन्तः । मलिनाः । पापकारित्वात्साहजिकश्यामताशालित्वादित्युभयत्रेति भावः । कर्णान्तिके प्रसज्जन्तः । परापकारार्थं विशालत्वादित्युभयत्र भावः । हे सखे, खला वेश्याकटाक्षाश्च कं न वञ्चयन्ति । अपि तु सर्वमेव । एवं चोभयसंसर्गस्तव नोचित्त इति व्यज्यते ॥

पाकोद्यमशालिनीं नायिकां रतार्थी नायको वक्ति—

विद्युज्ज्वालावलयितजलधरपिठरोदराद्विनिर्यान्ति ।
विशदौदनद्युतिमुषः प्रेयसि पयसा समं करकाः ॥ ९९२ ॥

विद्युदिति । हे प्रेयसि, विद्युज्ज्वालाभिर्व्याप्तं यन्मेघरूपपात्रम्, अथ च जलाधरभूतं यत्पिठरं तन्मध्यात्स्वच्छौदनकान्तिहारकाः करकाः पयसा जलेन । पक्षे दुग्धेन । सह विनिर्यान्ति । एवं चैतादृशकाले क्षुत्क्षामस्य दुग्धौदनभोजनदानवन्मम सुरतदानं जीवननिदानमित्यवगत्येतरव्यासङ्गं परिहाय मत्सविध एहीति ध्वन्यते । यद्वा वर्षोपलसहितैतादृशवृष्टौ कथं मया संकेते समागन्तव्यमिति वादिनीं काचिद्वक्ति—विद्युदिति । एवं चैतादृशकालीनसुरतं दुग्धौदनभोजनादपि मधुरमित्यवगत्य संकेतं प्रयाहीति ध्वन्यते ॥

अत्यन्तरतोत्कण्ठाशाली नायको नायिकां वक्ति—

व्यजनादिभिरुपचारैः किं मरुपथिकस्य गृहिणि विहितैर्मे ।
तापस्त्वदूरुकदलीद्वयमध्ये शान्तिमयमेति ॥ ९९३ ॥

व्यजनेति । हे गृहिणि । एवं च सेवासंपादनौचित्यमावेद्यते । मरुपथिकस्य मे संपादितैर्व्यजनप्रभृतिभिरुपचारैः किम् । न किमपीत्यर्थः । एवं च मरुदेशादागतस्य भूयसी संतापवत्तेति भावः । किं तर्हि विधेयमित्यत आह—त्वदूरुरूपकदलीद्वयान्तरालेऽयं मदेकवेद्यस्तापः शान्तिमेति । एवं चान्यव्यासङ्गं विहाय रहसि सत्वरं प्रचलेति ध्वन्यते ॥

क्षुद्रेण यत्कर्म कर्तव्यं तद्विगुणं न विधेयमिति कश्चित्कमप्युपदिशति—

वैगुण्येऽपि हि महता विनिर्मितं भवति कर्म शोभायै ।
दुर्वहनितम्बमन्थरमपि हरति नितम्बिनीनृत्यम् ॥ ९९४ ॥

वैगुण्येऽपीति । महता श्रेष्ठेन संपादितं कर्म विगुणत्वेऽपि शोभायै भवति । अर्थान्तरन्यासमाह—दुर्वहः । महत्त्वादिति भावः । यो नितम्बस्तेन निश्चलमपि नितम्बिनीनृत्यं हरति । चित्तमिति भावः ॥

काचिदत्यन्तं सा पतिव्रतेति वादिनीं कांचिद्वक्ति—

वीक्ष्य सतीनां गणने रेखामेकां तया स्वनामाङ्काम् ।
सन्तु युवानो हसितुं स्वयमेवापारि नावरितुम् ॥ ९९५ ॥

वीक्ष्येति । साध्वीनां गणने स्वनामचिह्नरूपामेकां रेखां दृष्ट्वा युवानः । तदुपभोक्तार इति भावः । हसितुं सन्तु । स्वयमेवावरितुं निरोद्धुम् । हास्यमिति भावः । नापारि । एवं च तदीयसतीगणनारेखां दृष्ट्वा युवभिर्हसितमिति किं वक्तव्यम्, तयैव कथमयं लोको भ्रान्त इति हास्यं कृतमिति भावः । एवं चैतादृश्याः क्व सतीत्वमित्यावेद्यते ॥

इतः किमिति नापसरसीति वादिनीं कांचित्कश्चिद्वक्ति—

विन्ध्याचल इव देहस्तव विविधावर्तनर्मदनितम्बः ।
स्थगयति गतिं मुनेरपि संभावितरविरथस्तम्भः ॥ ९९६ ॥

विन्ध्येति । अत्र संबुद्धिप्रदानुपादानं लोकभीतिमावेदयति । विविधोऽनेकप्रकारक आवर्त आवर्तनं चालनविशेषो यस्य स चासौ क्रीडाप्रदो नितम्बो यस्य । पक्षे विविधा आवर्ता अम्भोभ्रमणानि यस्यां तादृशी नर्मदा नदी यस्मिंस्तादृशकटकवान् । अत एव संभावितः सूर्यरथस्य स्तम्भो येन । स्वैकदेशनितम्बेन तच्चक्रविनिर्जयादिति भावः । यद्वा संभावितो रविरथस्य लक्षणया तच्चक्रस्य स्तम्भो येन । ततोऽप्यधिकपरिमाणशालिनितम्बवत्त्वादिति भावः । पक्षे रविरथस्य स्तम्भो गतिविच्छेदः । अत्युच्चत्वादिति भावः । तव देहो विन्ध्याद्रिरिव मुनेरपि मननशीलस्यापि । पक्षेऽगस्त्यस्य । गतिं श्लथयति । एवं च मननशीलस्यापि तवैतादृशदेहमवलोक्य गतिनिरोधो जायते, किं पुनर्मादृशस्य रसलम्पटस्येति भावः । यद्वा विपरीतरतनिर्जितो नायको नायिकां वक्ति—विविधावर्तोऽनेकप्रकारकभवनम् । चलनविशेषादिति भावः । तेन क्रीडाप्रदो नितम्बो यस्य । संभावितो रविरथस्य स्तम्भः । पराभव इत्यर्थः । ततोऽप्यधिकतरगतिमन्नितम्बवत्त्वादिति भावः । पक्षे प्राग्वत् । मुनेरपि 'वानरं चपलं ध्यायेत्' इत्यादिकामतन्त्रोक्तचिन्तनवतोऽपि गतिं सामर्थ्यं स्थगयति । एवं च त्वदासक्तचित्तस्य मम पराजयस्तव सुकर इति ध्वन्यते ॥

काचित्कंचिदन्योक्त्या वक्ति—

वृतिभञ्जन गञ्जनसह निाममुद्दाम दुर्नयाराम ।
परवाटीशतलम्पट दुष्टवृष स्मरसि गेहमपि ॥ ९९७ ॥

वृतीति । आवरणभञ्जक, तिरस्कारसह, अत्यर्थं परमदुर्नयस्याराम । एवं च दुर्नयस्य त्वमेव स्थानमिति भावः । परकीयोपवनशतलम्पट, दुष्टवृष, गेहमपि स्मरसि । अपिना निजजनसंग्रहः । एवं च स्वनायिकाविस्मरणं तव नोचितमिति व्यज्यते ॥

महावंशजन्यत्वेऽप्यनेकगुणवत्त्वेऽपि खलस्य विश्वासो न विधेय इति कश्चित्कंचिद्वक्ति—

वंशावलम्बनं यद्यो विस्तारो गुणस्य यावनतिः ।
तज्जालस्य खलस्य च निजाङ्कसुप्तप्रणाशाय ॥ ९९८ ॥

वंशेति । यद्वंशस्यान्वयस्य, अथ च वेणोरवलम्बनं जन्यत्वमाश्रितत्वं च । गुणस्य पाण्डित्यशौर्यादेस्तन्तोश्च यो विस्तार आधिक्यं दैर्घ्यं च । या च नम्रता तत्खलस्य जालस्य च निजाङ्कसुप्तनाशाय । विश्वस्तनाशायेत्यर्थः ॥

वर्षासमये प्रस्थातुमुद्यतं नायकं नायिकासखी वारयति—

विन्ध्यमहीधरशिखरे मुदिरश्रेणीकृपाणमयमनिलः ।
उद्यद्विद्युज्ज्योतिः पथिकवधायैव शातयति ॥ ९९९ ॥

विन्ध्येति । विन्ध्याचलसानौ मेघपङ्क्तिरूपकरवालं स्फुरच्चपलारूपस्फुलिङ्गोद्द्योतशाली असौ समीरणः पान्थविघातायैव तीक्ष्णीकरोति । विन्ध्यमहीधरशिखर इत्यनेन स्फुटदर्शनयोग्यत्वम्, तेन च मद्वचसि न मिथ्यात्वमाशङ्क्यमिति द्योत्यते । मुदिरश्रेणीकृपाणमित्यनेनानिवारणीयत्वम्, तेन च स्वसदनावस्थानमेव शरणमित्यावेद्यते । अनिल इत्यनेन सर्वत्र संचरणयोग्यत्वम्, तेन च प्रतीकारानर्हत्वं व्यज्यते । पथिकवधायैवेत्यनेन कार्यान्तराभावः, तेन च कथंचिदपि त्वया न गन्तव्यमित्यावेद्यते ॥

कश्चित्सखायं वक्ति—

व्यालम्बमानवेणीधुतधूलि प्रथममश्रुभिर्धौतम् ।
आयातस्य पदं मम गेहिन्या तदनु सलिलेन ॥ ९९० ॥

व्यालम्बेति । विशेषेणालम्बमाना या वेणी तया दूरीकृतधूलि । आयातस्य । परदेशादिति भावः । मम पदं गेहिन्या प्रथमतोऽश्रुभिः क्षालितं पश्चाज्जलेन । एवं च चिरप्रवासकरणान्मयि कोपमियं करिष्यतीति भीतिवतोऽपि ममानया चरणप्रणामादिना साध्वसमपाकृतम् । एतादृशी सरलतरा मम प्रियतमेति ध्वन्यते ॥

विपरीतरतान्तविश्रान्तां नितान्तश्रान्तां कान्तां नायको वक्ति—

वक्षःस्थलसुप्ते मम मुखमुपधातुं न मौलिमालभसे ।
पीनोत्तुङ्गस्तनभरदूरीभूतं रतश्रान्तौ ॥ ९९१ ॥

वक्षःस्थलेति । रतिविरतौ रतिश्रमे वा वक्षःस्थलपरिचयकारिणि मम वदनमुपधातुमुपधानीकर्तुं नालभसे, न नम्रीकरोषि, न धारयसीति वा । तत्र हेतुमाह—पीनोच्चकुचभरदूरीभूतम् । एवं च त्वन्मौलौ वदनोपधानभवनाभावे न मन्मुखस्यापराधः, किं तु पीनोच्चत्वत्कुचयोरेवेति भावः । यद्वा मम मुखमुपधानीकर्तुं मस्तकम् । ममेति भावः । नालभसे न स्पृशसि । स्प्रष्टुं न शक्नोषीत्यर्थः । न प्राप्नोषीति वा । तत्र हेतुः पीनोत्तुङ्गेत्यादि । अथवा मुखं स्वस्येति भावः । स्थापयितुं मम मौलिं न स्पृशसि । किं तु स्पृशेति भावः । यतस्त्वदीयपीनोच्चकुचान्तरितम् । एवं च कराभ्यां मम मौलिमुन्नमय्य स्ववदनं स्थापयेति भावः । एवं च चुम्बनौत्कण्ठ्यं स्वस्य च पीनोच्चकुचभारतया मौलेरुन्नमनासामर्थ्यं द्योत्यते ॥

कश्चिद्दूतीं वक्ति—

वदनव्यापारान्तर्भावादनुरक्तमानयन्ती त्वम् ।
दूति सतीनाशार्थं तस्य भुजंगस्य दंष्ट्रासि ॥ ९९२ ॥

वदनेति । हे दूति, वदनव्यापारेण वचनरचनया योऽन्तर्भावः परहृदयप्रवेशस्तस्मात्, अनुरक्तमनुरागवन्तम् । पक्षे मुखसंबन्धेन यदन्तःप्रवेशनं तस्मात्, अनु पश्चाद्रक्तं रुधिरम् । सतीसमुदायमानयन्ती त्वं तस्य खिन्नस्य सर्पस्य च दंष्ट्रासि । एवं च वचनरचनया तया तथा हृदयं प्रविश्य पातिव्रत्यभङ्गं विधाय तेन खिन्नेन सह कामिनीसमूहं योजयसीति भावः । वदनव्यापारपदेन द्रव्यव्ययाद्यभावो द्योत्यते । सार्थपदेन सामर्थ्यातिशयो व्यज्यते । दंष्ट्रापदेन त्वां विना सोऽकिंचित्कर इति ध्वन्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता वकारव्रज्या ।

शकारव्रज्या ।

कस्यचिन्नायकस्येतरनायकसाधारण्यमसहमाना काचित्कांचिदन्योक्त्या वक्ति—

श्रीरपि भुजंगभोगे मोहनविज्ञेन शीलिता येन ।
सोऽपि हरिः पुरुषो यदि पुरुषा इतरेऽपि किं कुर्मः ॥ ९९३ ॥

श्रीरपीति । येन सुरतविज्ञेन श्रीरपि । अपिना यदर्थे जगदखिलं यत्नमाचरतीति ध्वन्यते । सर्पशरीरे शीलिता भुक्ता । भुजंगपदेन भयजनकत्वेऽपि तदभवनेनासक्त्यतिशयो द्योत्यते । यदि स हरिरपि पुरुषः, इतरेऽपि पुरुषास्तदा किं कुर्मः । एवं चैतादृशस्यान्यैः सामान्यैः सह साम्यकरणमनुचितमिति व्यज्यते । यद्वान्योक्त्या कश्चित्कंचन निन्दति । श्रीरपि लक्ष्मीस्वरूपापि येन खिन्नेन संभोगविषये । मोहनविज्ञेनेति विपरीतलक्षणया सुरतानभिज्ञेन शीलिता कृता । इतरेऽपि यदि पुरुषाः सोऽपि हरिरिव हरिः पशुतुल्यः पुरुषस्तदा किं कुर्मः । एवं चैतादृशस्य पुरुषेषु गणना न युक्तेति भावः ॥

मानवतीं सामान्यवनितां सखी वक्ति—

शङ्के या स्थैर्यमयी श्लथयति बाहू मनोभवस्यापि ।
दर्पशिलामिव भवतीं कतरस्तरुणो विचालयति ॥ ९६४ ॥

शङ्क इति । संबुद्धिपदानुपादानं क्रोधमावेदयति । या स्थैर्यप्रचुरा बाहू अपि । अपिना चाटुवचनादिसमुच्चयः । श्लथयति । चालयितुमशक्यत्वादिति भावः । एवं च करकर्षणादिनापि नेतश्चलतीति क्रोधातिशयवत्तां द्योतयति । मनोभवस्य दर्पशिलामिव । मनोभवपदेनाकुण्ठितत्वं ध्वन्यते । भवतीं कतरस्तरुणो विचालयति । न कोऽपीत्यर्थः । इति शङ्के । एवं चैतादृशकोपकरणे कस्त्वामनुरञ्जयिष्यतीति ध्वन्यते । यद्वा मनोभवस्येति बाहू इत्यत्रान्वेति ॥

नायिकासखी नायकमन्योक्त्या वक्ति—

शार्दूलनखरभङ्गुर कठोरतरजातरूपरचनोऽपि ।
बालानामपि बाला सा यस्यास्त्वमपि हृदि वससि ॥ ९६५ ॥

शार्दूलेति । हे व्याघ्रनखकुटिल, अथ च शार्दूलनखवत्कुटिल । तथाविधाचरणवत्त्वादिति भावः । कठिनतरजातरूपस्य सुवर्णस्य रचना यस्मिन् । अथ च जाता रूपस्य रचना यस्य । सौन्दर्यशालिन्यपि । त्वमपि । अपेरितरभूषणसमुच्चयो निन्द्यत्वं चार्थः । यस्या हृदि वससि । भूषणरूपतयेति भावः । अथ च तस्यास्त्वदासक्तत्वादिति भावः । सा बालानामपि मध्ये बाला । अतिबालिका । अत्यन्तमुग्धेति भावः । सुवर्णयुतव्याघ्रनखं बालहृदि भूषणं भवतीति भावः । एवं चैतादृशे कौटिल्यादिशालिनि सौन्दर्यवत्त्वेऽप्यासक्तिसंपादने कथमिव मौर्ख्यं न भवतीति भावः । यद्वा जाता रूपस्य रचना यस्याः । एतादृश्यपि तारुण्यशालिन्यपि सात्यन्तबालिकैवेत्यर्थः । इतरत्पूर्ववत् ॥

नायिकासखी नायकं वक्ति—

श्रुत एव श्रुतिहारिणि रागोत्कर्षेण कण्ठमधिवसति ।
गीत इव त्वयि मधुरे करोति नार्थग्रहं सुतनुः ॥ ९६६ ॥

श्रुत एवेति । श्रवणसमय एव कर्णसुखजनके । पक्षे श्रुतिभिर्मनोहारिणीति वा । प्रीत्युत्कर्षेण । पक्षे श्रीरागाद्युत्कर्षेण । कण्ठमधिवसति । त्वन्नाम्नैव सर्वत्र सख्यादिष्वपि सा व्यवहरतीति भावः । पक्षे व्यक्तीभवतीत्यर्थः । मधुरे सुन्दरे । पक्षे माधुर्यशालिनि । गीत इव । द्रव्यग्रहम् । पक्षेऽभिप्रायग्रहम् । सुतनुः । एवं च स्पृहणीयत्वमावेद्यते । न करोति । एवं च नायिका न द्रव्यादिना त्वय्यनुरक्ता, किं तु त्वदीयसौन्दर्यादिगुणोत्कर्षेणेति भावः ॥

समीचोनसमताङ्गीकारे सम्यगेव फलं भवतीति कश्चित्कंचिद्वक्ति—

श्रीः श्रीफलेन राज्यं तृणराजेनाल्पसाम्यतो लब्धम् ।
कुचयोः सम्यक्साम्याद्गतो घटश्चक्रवर्तित्वम् ॥ ९६७ ॥

श्रीरिति। कुचयोरल्पसाम्याच्छ्रीफलेन बिल्वफलेन श्रीर्लब्धा। तृणराजेन तालेन राज्यं लब्धम्। सम्यक्साम्याद्भटैश्चक्रवर्तित्वं चक्रसंबन्धित्वं सार्वभौमत्वं च गतः प्राप्तः। एवं च नीचानुकरणमनुचितमिति ध्वन्यते॥

काचित्सखीं वक्ति—

श्रोणी भूमावङ्के प्रियो भयं मनसि पतिभुजे मौलिः।
गूढश्वासो वदने सुरतमिदं चेत्तृणं त्रिदिवम्॥ ९६८॥

श्रोणीति। भूतले नितम्बः। चलनज्ञानाभावार्थमिति भावः। चित्ते भीतिः। कदाचित्पतिना ज्ञेयमिति धियेति भावः। उत्सङ्गे प्रियः। जार इत्यर्थः। पतिभुजे मौलिः। पातीति व्युत्पत्त्या रक्षणमात्रकारित्वस्वभावेनान्धकारेऽपि करादिव्यापारेण ज्ञास्यतीति धियेति भावः। मुखे गुप्तः श्वासः। पतिश्रवणभियेति भावः। इदम्। एतादृशमित्यर्थः। चेद्यदि सुरतम्। लभ्यत इति भावः। सुशब्देनान्यादृशरतेऽसमीचीनत्वमावेद्यते। तदा त्रिदिवं स्वर्गस्तृणतुल्यः। अगणनीय इत्यर्थः। एवं चैतादृशसुरतवत्यो यास्ताः पुण्यातिशयशालितया धन्याः, तदभावादहमधन्येति ध्वन्यते। तेन चैतादृशरतार्थं यतस्वेति॥

नायकः सखायं वक्ति—

श्लिष्यन्निव चुम्बन्निव पश्यन्निव चोल्लिखन्निवातृप्तः।
दधदिव हृदयस्यान्तः स्मरामि तस्या मुहुर्जघनम्॥ ९६९॥

श्लिष्यन्निति। आलिङ्गन्निवेत्यादयः स्मृतिप्रकाराः। अतृप्तत्वं स्मृतौ हेतुः॥

कुपितां नायिकां नायकसखी वक्ति—

शिरसि चरणप्रहारं प्रदाय निःसार्यतां स ते तदपि।
चक्राङ्कितो भुजंगः कालिय इव सुमुखि कालिन्द्याः॥ ९७०॥

शिरसीति। हे सुमुखि। एवं च परुषभाषित्वाभावो व्यज्यते। मस्तके पादप्रहारं दत्त्वा त्वया दूरीक्रियताम्। कालिन्द्याः कालिय इव। तथापि चक्रेण त्वच्चरणसंबन्धिनेत्यर्थः। चिह्नितः। पक्षे सुदर्शनचक्रेणाङ्कितः। यमुनातो निःसार्यं सागरावस्थितौ गरुडभयनिवारणार्थं कालियस्य चक्रचिह्नं कृतमिति पौराणिकाः। स भुजंगः खिन्नः। पक्षे सर्पः। ते। तवैवेत्यर्थः। एवं च त्वया कोपे कृतेऽपि स न कुपितो भवतीति व्यज्यते। यद्वा सखी नायिकामुपदिशति। हे सुमुखि। एवं चोपदेशार्हत्वमावेद्यते। यद्यपि चक्रेण जनसंरक्षणेन चिह्नितः। 'जनावने समूहे च दम्भे भेदरथाङ्गयोः। शस्त्रभेदे च सेनायां चक्रं चापि विहंगके' इत्यभिधानात्। खिन्नस्तथापि त्वया शिरसि पादप्रहारं दत्त्वा सते संदर्थ निःसार्यताम्। एवं च यद्यप्यनेन बहु दीयते तथाप्यपकीर्तिर्भूयसी भवतीत्यतस्त्वं सामीचीन्यार्थमेनं सनिकारं दूरीकुरुष्वेति भावः॥

नायिकासखी नायकं वक्ति—

शोच्यैव सा कृशाङ्गी भूतिमयी भवतु गुणमयी वापि।
स्नेहैकवश्य भक्ता त्यक्ता दीपेन वर्तिरिव ॥ ५७१ ॥

शोच्यैवेति। हे स्नेहेन प्रीत्या न तु गुणैर्मुख्यवश्य। एवं च बहुतरतदीयगुणेषु दृष्टिमदत्त्वा स्नेहमात्रमपेक्षस इत्यनुचितं तवेति ध्वन्यते। पक्षे तैलेन। दीपेन वर्तिरिव त्वया परित्यक्ता सा कृशाङ्गी। एवं च सौन्दर्यवत्त्वमावेद्यते। कृशाङ्गीति वर्तिविशेषणमपि। भूतिरैश्वर्यम्। पक्षे भस्म। तत्प्रचुरा। गुणाः सौन्दर्यादयः। पक्षे तन्तवः। तत्प्रचुरा वा भवतु। परं तु शोच्यैव। एवं च त्वया तस्यां परित्यक्तायामैश्वर्यं गुणादिकं च तस्याः सर्वमकिंचित्करमेवेति व्यज्यते। तेन च तदीयगुणादिमात्रमवेक्ष्य त्वया तदीयानुरञ्जनं विधेयमिति। यद्वैश्वर्यगुणाद्युत्कर्षवशान्नायकं प्रत्यप्रीतिकारिणीं नायिकामालोक्य नायकसखी नायकं वक्ति—हे स्नेहैकवश्य। एवं च तव नान्यापेक्षेति व्यज्यते। भवता परित्यक्ता सा ऐश्वर्यसौन्दर्ययुक्तापि शोच्यैव। एवं च तस्याः संपत्तिसौन्दर्यादिमत्तया मत्परित्यागेऽपि न किंचिद्दुःखं भविष्यतीति मनसि न विधेयं त्वयेति ध्वन्यते। तेन च किंचित्कालं त्वया परित्यक्ता सा स्वयमेव त्वामनुनेष्यतीति॥

कश्चित्सखायं वक्ति—

शुक इव दारुशलाकापञ्जरमनुदिवसवर्धमानो मे।
कृन्तति दयिताहृदयं शोकः स्मरविशिखतीक्ष्णमुखः ॥ ५७२ ॥

शुक इति। प्रतिदिवसं वृद्धिमान्, कंदर्पबाणैर्निशितः। दुःखद इति यावत्। मुखमारम्भो यस्य सः। पक्षे मदनविशिखीभूतकिंशुकवत्तीक्ष्णवदनः। मे शोकः प्रियतमाहृदयं काष्ठशलाकापञ्जरं शुक इव। दारुपदेन च्छेदनार्हत्वं द्योत्यते। छेदयति। एवं च न मया परदेशे स्थेयमिति ध्वन्यते॥

काचित्कांचिद्वक्ति—

श्रुत्वाकस्मिकमरणं शुकसूनोः सकलकौतुकैकनिधेः।
ज्ञातो गृहिणीविनयव्यय आगत्यैव पथिकेन ॥ ५७३ ॥

श्रुत्वेति। पथिकेन निखिलकौतुकस्थानस्य शुकरूपो यः सूनुस्तस्य। एवं चातिस्नेहपात्रत्वं द्योत्यते। तेन च मारणानर्हत्वम्। तत्त्वेऽपि तत्करणेऽत्यन्तानुचितकार्यकर्तृत्वं नायिकायामभिव्यज्यते। आकस्मिकं यन्मरणम्। एवं च रोगाद्यनुत्पत्त्यानया मारित इति ध्वन्यते। श्रुत्वा। गृहिण्याः। एवं चान्यानिवारणीयत्वारक्षणीयत्वादि व्यज्यते। विनयनाशः। अकार्यकरणमित्यर्थः। आगमनोत्तरमेव। एवकारेण दास्याद्यकथितत्वं विनयव्यये व्यज्यते। ज्ञातः। एवं च किमकार्यं प्रमदानामिति ध्वन्यते। केचित्तु शुकसूनुरित्यस्य शुकबालक इत्यर्थमाहुः॥

दूती नायिकां वक्ति—

शीलितभुजंगभोगा क्रोडेनाभ्युद्धृतापि कृष्णेन।
अचलैव कीर्त्यते भूः किमशक्यं नाम वसुमत्याः॥ ५७४॥

शीलितेति। अङ्गीकृतसर्पशरीरा। आधारतयेति भावः। अथ च कृतखिन्नसंभोगा। कृष्णेन परमेश्वरेण क्रोडेन वराहरूपेण निष्कासितापि। अथ च दुष्टेन भुजाभ्यन्तरेणालिङ्गितापि। भूः पृथ्वी। अथ च भवन्त्यपराधा बहवो यस्याः सकाशात्सा। अचलैव। अथ च चाञ्चल्याभाववत्येव। कीर्त्यते। अत्र हेतुमाह—नामेति निश्चयेन वसुमत्याः। अथ च संपत्तिशालिन्याः। किमशक्यम्। न किमपीत्यर्थः। एवं च धनवत्यास्तव न किमप्ययशः संभवीत्यतो मदुक्तनायकेन संगतिं कुरुष्वेति ध्वन्यते॥

पूर्वनायिकासखी नायकं वक्ति—

श्यामा विलोचनहरी बालेयं मनसि हन्त सज्जन्ती।
लुम्पति पूर्वकलत्रं धूमलता भित्तिचित्रमिव॥ ५७५॥

श्यामेति। श्यामा षोडशवार्षिकी। पक्षे श्यामरूपा। विलोचनहरी लोचनयोः स्वस्मिन्नासक्तिसंपादिका। तारुण्यवत्त्वादिति भावः। एवं चैतस्यास्तारुण्यवशादेव सौन्दर्यं न स्वाभाविकमिति व्यज्यते। पक्षेऽश्रुसंपादकतया नेत्रहरत्वम्। मनसि लग्ना। अत्र तवेति पदानुपादानं सखीगतदुःखोद्रेकं व्यञ्जयति। इयं बाला। धूमपरम्परा। लतापदं मालिन्यातिशयजनकतामावेदयति। भित्तिस्थचित्रमिव पूर्वकलत्रं लुम्पति। हन्तेति खेदे। एवं चैतादृशानुचितमन्यत्रेति भावः। पूर्वकलत्रस्य चित्रोपमानतया स्वाभाविकसौन्दर्यवत्त्वं बहुभाषित्वाभावश्च द्योत्यते। बालायाश्च धूमलतोपमानतया मालिन्यसंपादकताप्रदर्शनेनासतीकार्यकरणत्वमावेद्यते। आर्थिकभित्त्युपमानतया मनसिजदुःखं ध्वन्यते। तेन वास्तवसमीचीनज्ञानविधुरत्वम्। लुम्पतीत्यत्र काका सखीप्रश्न इत्यपि भाति। अथवा काका न लुम्पतीत्यर्थः। पूर्वकलत्रस्नेहस्यातिदृढत्वादिति भावः॥

प्रस्थितस्त्वं किमिति स्थितोऽसीति पृष्टः कश्चित्सखायं वक्ति—

शतशो गतिरावृत्तिः शतशः कण्ठावलम्बनं शतशः।
शतशो यामीति वचः स्मरामि तस्याः प्रवासदिने॥ ५७६॥

शतश इति। अनेकवारं गमनमनेकवारं परावृत्तिश्च। सर्वथा गमने नायिका मद्विरहदहनदग्धा सती प्राणानेव त्यक्ष्यतीति धियेति भावः। अत एव वारंवारं गाढालिङ्गनम्। अचिरेणैवागमिष्यामि दुःखं मा कुरुष्वेत्यनुनयार्थमिति भावः। तथानेकवारं गच्छामीति वचनम्। त्वदाज्ञा चेद्गच्छामि, नो चेन्न गच्छामीत्येवंविधम्। एवं च नायके नायिकाज्ञावशवर्तित्वं तेन चात्यन्तासक्तिमत्त्वं तेन च प्रणयभङ्गभीरुत्वमावेद्यते। प्रस्थानकाले इदं सर्वं तस्याः। तां प्रति स्वकृतमित्यर्थः। स्मरामि। एवं च तत्कालोनावस्थास्मरणसंजातवैकल्यविवशहृदयोऽहं गन्तुं न शक्नोमीति भावः। यद्वा प्रवासदिवसे तस्या

नायिकाया अनेकगमनादिकं स्मरामि । एवं च तदीयतत्कालीनतादृशावस्थास्मरणेन मयात्र स्थातुं शक्यमिति नायकः सखायं वक्ति ॥

नायिकायास्तावदनुनयेऽपि समधिकतरमानभवनमवलोक्याभिमानितयोदासीनं नायकमवलोक्य प्रशिथिलमानां कया रीत्यानुनेतव्योऽयमिति विचारयन्तीं नायिकां सखी वक्ति—

श्रुतपरपुष्टरवाभिः पृष्टो गोपीभिरभिमतं कृष्णः ।
शंसति वंशस्तनितैः स्तनविनिहितलोचनोऽनुमतम् ॥ ९७७ ॥

श्रुतेति । श्रुतकोकिलरुताभिर्गोपीभिरीप्सितं पृष्टः कृष्णो वंशीरवैः कुचविनिहितनयनः स्वाभिमतम् । आलिङ्गनरूपमिति भावः । कथयति । गोपीपदमङ्गत्वं ध्वनयति । कृष्णपदं कर्षति चित्तमिति व्युत्पत्त्या स्वचित्तस्य पराधीनताभावकर्तृत्वमावेदयति । एवं च चातुर्याभाववत्यो गोपाङ्गना अप्यनासक्तं परमेश्वरमेवंरीत्या स्वयमेव स्ववशतां नयन्तीति भावः । एवं चैतादृशवसन्तसमये चतुरया त्वया विषयरसलम्पटो नायकः कयाचन रीत्या कथं न स्वाधीनतां नेतुं शक्य इति व्यज्यते । कोकिलायाः प्रथमं रवश्रवणे मित्रस्य यदभीष्टं तत्पृष्ट्वा प्रदेयमेवेति लौकिकम् । यद्वा वसन्तसमये परदेशगमनमनुचितमिति कश्चित्कंचिद्वक्ति—परपुष्टा इव परपुष्टा दूतीसदृशाः कोकिला इत्यर्थः । तच्छब्दश्रवणाद्गोपीभिरविदग्धाभिरभिमतम् । स्वस्येति भावः । कृष्णः । एवं च मलिनत्वं ध्वन्यते । पृष्टः स च वंशीरवैः । एवं च गोपनमभिव्यज्यते । तेन च पुरुषे धैर्यमङ्गनास्वधैर्यमिति । कुचदत्तनेत्रोऽनुमतं पृष्टेऽर्थे संमतं वक्ति । एवं च वसन्ते मौढ्यशालिन्योऽप्यङ्गनाः प्रमत्ततया समीचीनपुरुषविवेकमपास्यान्यथाचरणप्रवणा भवन्ति, किं पुनः सकलविज्ञा इति भावः ॥

नायकप्रेमातिशयशालिन्यहमित्यभिमानशालिनीं नायिकामन्योक्त्या परनायिकासखी वक्ति—

शंकरशिरसि निवेशितपदेति मा गर्वमुद्वहेन्दुकले ।
फलमेतस्य भविष्यति तव चण्डीचरणरेणुमृजा ॥ ९७८ ॥

शंकरेति । हे इन्दुकले, शंभुशिरसि स्थापितचरणेति हेतोरभिमानं मा उद्वह । किमित्यत आह—तवैतस्य । गर्वस्येत्यर्थः । चण्डीचरणधूलिभिर्मार्जनरूपं फलं भविष्यति । एवं च चण्डीं मानवतीमालोक्य शंकरेण चरणप्रणामे क्रियमाणे चरणरेणुमार्जनं भवतीति भावः । एवं च कुपिता मत्सखी त्वां ताडयिष्यतीत्यत ईदृशगर्वं मा विधेहीति ध्वन्यते ॥

कथं मयानया सह सबाधकेऽस्मिन्नेव स्थले स्थेयमिति चिन्ताव्याकुलं नायकं तत्रैव स्थापयितुं नायिकादूती कयापि भङ्ग्या वक्ति—

शाखिशिखरे समीरणदोलायितनीडनिर्वृतं वसति ।
कर्मैककरणमगणितभयमशिथिलकेलि खगमिथुनम् ॥ ९७९ ॥

शाखीति। वृक्षशिरसि। शाखिपदं घनतरच्छायावत्त्वं ध्वनयति। तच्चानेकजनाकीर्णत्वम्। शिखरपदं पतनार्हत्वं गमयति। समीरणचलकुलायसुखितम्। समीरणपदमनिवारणीयतां द्योतयति। दोलायितपदं पतनभीतिमावेदयति। कर्मैकशरणम्। एवं च दृष्टोपायविचारविधुरत्वं ध्वन्यते। अगणितभयम्। एवं च भयवत्त्वेऽपि तदगणनेनातिसाहसवत्त्वं द्योत्यते। अशिथिलकेलि। एवं च सर्वथा चिन्ताशून्यत्वं व्यज्यते। खगमिथुनम्। खे गच्छतीति व्युत्पत्त्यान्यत्र गमनसामर्थ्येऽप्यगमनेन निजवसतावतिशयितप्रेमवत्त्वं ध्वन्यते। तेन चापरित्याज्यत्वम्। एवं चान्यत्र गन्तुं समर्थः खगोऽपि प्राक्तनकर्मभोगस्यापरिहार्यत्वमाकलय्य स्ववसतिं बाधकवत्त्वेऽप्यपरित्यजन्क्रीडापरवशतयैव कालमतिवाहयति कथं पुनर्भवान्विवेकवान्महावीरोऽत्रत्यभीत्या स्थलं परित्यक्तुं विचारयतीत्यनुचितं तवेत्यतः सुखेनानया सहात्र सुरतसुखमनुभवंस्तिष्ठेति ध्वन्यते। नायिका नायकचित्तं व्याक्षिपतीति ऋजवः॥

प्रतिबन्धवशात्संकेतानागमनेन कुपितं स्वकुटुम्बकान्तिकवर्तिनं नायकमन्योक्त्या स्वापराधक्षमापनपुरःसरं संकेतं वक्ति—

शुक सुरतसमरनारद हृदयरहस्यैकसार सर्वज्ञ।
गुरुजनसमक्षमूक प्रसीद जम्बूफलं दलय॥ ९८०॥

शुकेति। शुक। एवं च वचनरचनानिपुणत्वं ध्वन्यते। सुरतरूपसङ्ग्रामे नारद तद्बन्धक। सङ्ग्रामपदेन निर्दयत्वं द्योत्यते। एवं च कामतन्त्राभिज्ञत्वमावेद्यते। यद्वात्यन्तरताभिलाषित्वमावेद्यते। हृदये। ममेति भावः। यानि गोप्यवस्तूनि तेषु सार मुख्यभूत। एवं च त्वदेकतानतापन्नाहमिति व्यज्यते। इदं त्वयापि विज्ञायत एवेत्याह—सर्वज्ञ। एवं च मदीयप्रेमातिशयाज्ञाने सर्वज्ञत्वं व्याहन्येतेति भावः। यद्वा 'सुरतसमरनारदहृदय' इत्येकं पदम्। एवं च सर्वदा सुरतप्रकारचिन्तनकारित्वमावेद्यते। अथवा नारदपदस्य शरीरावच्छिन्नात्मनि शक्त्या कदाचिच्छरीरस्य तूष्णींभावभवनार्हतया हृदयस्य तु तदभाववत्तयातिशयितसुरतसामर्थ्यवत्त्वमावेद्यते। रहस्यरूपः सन्मुख्यसाररूप। एवं च त्वदतिरिक्तं ममान्यन्न रहस्यमिति भावः। यद्वा सर्वज्ञान्तमेकं पदम्। तथा च हृद्गतरहस्यजातप्रधानभूतस्यातिगोप्यत्वेऽपि तव तज्ज्ञानवत्त्वे संकेतस्थलं प्रति मदनागमनहेतुभूतश्वश्वादिनिर्भर्त्सननिवारणरूपस्य ज्ञानवत्त्वं सुकरमिति ध्वन्यते। गुरुजनसमक्षे मूक। एवं च सर्वदा संनिहितत्वेऽपि श्लेषकाकादिनापि श्वशुरादिसंनिधौ वार्तामकरणेन धैर्यवत्त्वमावेद्यते। यद्वा गुरुजैः। रहस्यकारणानभिज्ञ इति यावत्। यो जनः। अर्थात्स्वीयो मदीयो वा। तत्समक्षमूक। एवं च स्वीयत्वेऽपि रहस्यकथनानर्हताविचारकारितयातिशयितविवेकित्वमावेद्यते। प्रसीद। जम्बूफलं दलय। एवं च प्राक्तनमदीयसंकेतभङ्गापराधमवगण्यैदानीं जम्बूवृक्षाधस्त्वया स्थेयम्, मयाप्यागम्यत एव झटिति तत्रेति ध्वन्यते। एवं च फलमित्येकवचनं सहृदयम्। यद्वा संकेतगमनजनितविलम्बवशात्समये भक्ष्याप्राप्त्या क्षुधितं शुकमवलोक्य ममाविनयमयं गुरुजनाय निवेदयिष्यतीति

भीता नायिका तं प्रसादयितुं वक्ति—शुकेति। कीरपदं विहाय शुकपदोपादानेन व्यासात्मजशुकाभेदबोधनेन क्रोधाभावौचित्यमावेद्यते। सुरतसङ्ग्रामनारद। एवं च यथा तव सुरतसङ्ग्राम एव प्रियो न तथा भोजनमिति ज्ञानवशान्मया गतमिति भावः। एवं च त्वदीयवचनरूपोद्दीपनवशादेव मया संकेते गतम्, अतो नायं ममापराध इति व्यज्यते। यद्वा त्वदीयप्रियसंपादनाय गतायां मयि क्रोधकरणमनुचितं तवेति व्यज्यते। एवं च नारदर्ष्यभेदप्रतिपादनेनापि कोपकरणानौचित्यं ध्वन्यते। हृदयरहस्यैकसारसर्वज्ञ। एवं च मदीयमनोजपीडाज्ञानवत्त्वेऽपि तत्प्रतीकाराय गतायां मयि कोपकरणं तव कथं नामौचितीमावहतीति भावः। सर्वज्ञपदेन बुद्धाभेदप्रतिपादनेन हिंसामात्रस्याधर्मसाधनत्वसमर्थनप्रवणस्य तव कोपकरणेन मन्मरणमेव भविष्यतीत्यतस्तदकरणमेव तवोचितमित्यावेद्यते। यद्वा सर्वज्ञपदेन परमेश्वराभेदप्रतिपादनेन मम त्वदतिरिक्तं नान्यदुपास्यमस्तीति ध्वन्यते। तेन च मत्कृतापराधक्षमार्हत्वम्। यद्वान्तर्यामित्वेन मदीयमन्मथवेदना ज्ञानवत्त्वं तवेति द्योत्यते। गुरुजनसमक्षमूकेत्यनेन गुरुजनसमक्षं वचनसामान्याभाववत्तया मत्कृतापराधकथनस्यासंभाव्यतया कोपफलाकरणेन निरर्थकतत्करणमनुचितमिति ध्वन्यते। अतः प्रसीद जम्बूफलं दलय। एवं च न केवलं मया स्वार्थ एव कृतः, परं त्वदर्थोऽपि संपादित इति व्यज्यते॥

बहुतरपरिग्रहाभावेऽप्यतितृष्णाशालिनं कंचन कश्चिदन्योक्त्या वक्ति—

शिरसा वहसि कपर्दं रुद्र रुदित्वापि रजतमर्जयसि।
अस्याप्युदरस्यार्धं भजतस्तव वेत्ति कस्तत्त्वम्॥ ९८१॥

शिरसेति। हे रुद्र, शिरसा कपर्दं जटाजूटमथ च वराटिकां वहसि। रोदनं कृत्वापि रजतमर्जयसि। 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' इत्याद्यर्थवादाद्रुद्ररोदनाद्रजतोत्पत्तिरिति। यद्यपि 'अग्नौ वामं वसु च संदधत' इत्यग्निरोदनाद्रजतोत्पत्तिस्तथाप्यष्टमूर्तितयाग्निरूपो रुद्र इत्यर्थः। अस्य। एवं चापलापानर्हत्वं ध्वन्यते। उदरस्यार्धं समांशकम्। 'अर्धं समेंऽशके' इत्यमरः। एवं च विभागकाले किंचिदधिकाग्रहणेनातिकृपणत्वं ध्वन्यते। भजतोऽपि तत्त्वं को वेत्ति। न कोऽपीत्यर्थः। एवं च परिग्रहभावेऽतिदैन्यादिना द्रव्यार्जनकरणमनुचितमिति व्यज्यते॥

कश्चित्कांचित्सामान्यवनितामन्योक्त्या वक्ति—

श्रोतव्यैव सुधेव श्वेतांशुकलेव दूरदृश्यैव।
दुष्टभुजंगपरीते त्वं केतकि न खलु नः स्पृश्या॥ ९८२॥

श्रोतव्यैवेति। हे केतकि, दुष्टसर्पव्याप्ते, नोऽस्माकं त्वं निश्चयेन स्पृश्या न। किं तु सुधेव श्रोतव्यैव। न तु ग्रहीतुं शक्येत्यर्थः। तत्रापि भुजंगसंरक्षणस्य सत्त्वादिति भावः। सुधाश्वेतांशुकलयोः केतक्युपमानत्वे गौरत्वं समानो धर्मः। एवं च सर्वथा स्पृहणीयत्वेऽपि विटनैकट्येन दुर्घटा त्वत्संगतिरस्माकमिति व्यज्यते। यद्वा सुधेव श्रोतव्यैवेति

काक्रा नेत्यर्थः । किं तु दृश्यादृश्यत्वेऽपि चन्द्ररेखेव दूरदृश्यैवेति काक्रा नेत्यर्थः । किं तु निकटदृश्या । एवं चेन्न कुतः संगतिं संपादयसीत्यत्राह—दुष्टसर्पव्याप्ते केतकि, त्वं नो न स्पृश्या । एवं च जीवनदाननिदानतापापनोदनस्वरूपायास्तव नैकध्येऽपि खिन्नभिया नास्माकमागमनं भवतीति व्यज्यते ॥

नायको नायिकादूतीं वक्ति—

श्रवणोपनीतगुणया समर्पयन्त्या प्रणम्य कुसुमानि ।
मदनधनुर्लतयेव त्वया वशं दूति नीतोऽस्मि ॥ ९८३ ॥

श्रवणेति । गुणः सौन्दर्यादिः । अर्थान्नायिकायाः । ज्या च । नमस्कृत्य । नमनं प्राप्य च । पुष्पाणि । अर्थान्नायिकाप्रेषितानीति भावः । मदनबाणानां पुष्पमयत्वाच्च । समर्पयन्त्या । मदनधनुर्लतयेव हे दूति, त्वया स्वाधीनतां प्रापितोऽस्मि । एवं च मयावश्यमागम्यत एवेति व्यज्यते ॥

कश्चित्कंचिदन्योक्त्या वक्ति—

शाखोटकशाखोटजवैखानसकरटपूज्य रट सुचिरम् ।
नादरपदमिह गणकाः प्रमाणपुरुषो भवानेकः ॥ ९८४ ॥

शाखोटकेति । शाखोटकस्य वृक्षविशेषस्य शाखायामुटजं पर्णशालां तत्संबन्धिनो ये मुनयः काकास्तेषु पूज्य । काकश्रेष्ठेति यावत् । यद्वा संबुद्धित्रयम् । चिरकालं रट । यत इह दैवज्ञा आदरस्थानं न । भवानेव प्रमाणपुरुषः । शुभाशुभनिर्णयार्थमिति भावः । एवं च त्वादृशमूर्खाधिष्ठितैतादृशस्थले नास्मादृशां विदुषां वचसामवकाश इति ध्वन्यते ॥

कस्यचिद्दूती कांचिद्वक्ति—

शशिरेखोपमकान्तेस्तवान्यपाणिग्रहं प्रयातायाः ।
मदनासिपुत्रिकाया इवाङ्गशोभां कदर्थयति ॥ ९८५ ॥

शशीति । चन्द्रकलोपमेयशोभायाः । यद्वा चन्द्राङ्गश्रीसदृशशोभायाः । एवं च निष्कलङ्कतया तदुपमानत्वं युक्तमित्यावेद्यते । 'अङ्गश्रीः कथ्यते रेखा' इत्यभिधानात् । अन्यस्य पाणिग्रहं प्राप्तायास्तव मदनच्छुरिकाया इवावयवशोभां कदर्थयति कदर्थयिष्यति । अन्यो नायक इति शेषः । एवं च मदुक्तनायकस्यैव त्वया संगतिः कर्तव्या नान्यस्येति व्यज्यते । तेन च तस्मिन्सौन्दर्यातिशयः । वक्रापि च्छुरिका भवतीति चन्द्ररेखोपमानता । द्वितीयव्याख्यायां न कश्चिद्दोषः ॥

समीचीनवृत्तैरेव स्वामिकार्यार्थमाग्रहः क्रियते नान्यैरिति कश्चित्कंचिद्वक्ति—

शैथिल्येन भृता अपि भर्तुः कार्यं त्यजन्ति न सुवृत्ताः ।
बलिनाकृष्टे बाहौ वलयाः कूजन्ति धावन्ति ॥ ९८६ ॥

शैथिल्येनेति । मान्द्यव्याप्ता अपि । अथ च श्लथत्ववन्तोऽपि । समीचीनवृत्तशालिनः ।

अथ च वर्तुलाः । पोषकस्य । अथ च धारकस्य । कृत्यं न त्यजन्ति । अर्थान्तरन्यासमाह—बलवता । एवं च निवारणानर्हत्वं ध्वन्यते । हस्त आकृष्टे कङ्कणानि धावन्ति शब्दं कुर्वन्ति च । एवं च सुवृत्तत्वादचेतना वलया अप्येवमाचरन्ति तत्र का वार्ता सचेतसामिति भावः ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्याख्यार्थदीपनया समेता शकारव्रज्या ।

षकारव्रज्या ।

नायको नायिकां वक्ति—

षट्चरणकीटजुष्टं परागघुणपूर्णमायुधं त्यक्त्वा ।
त्वां मुष्टिमेयमध्यामधुना शक्तिं स्मरो वहति ॥ ९८७ ॥

षट्चरणेति । भ्रमररूपकीटसेवितम् । मदनधनुर्मौर्व्या मधुकररूपत्वादिति भावः । परागः पुष्परजस्तद्रूपकाष्ठचूर्णपूर्णम् । मदनधनुषः पुष्परूपत्वादिति भावः । आयुधम् । शरासनमित्यर्थः । त्यक्त्वा । स्मरोऽधुना मुष्टिना मेयो मध्यो यस्यास्ताम् । कृशत्वादिति भावः । त्वां शक्तिं त्वद्रूपां शक्तिं वहति । एवं च त्वामासाद्याधुना मदनवीरोऽतिप्रबलः संवृत्त इति ध्वन्यते । 'वहतु' इति पाठे जातयौवनां त्वामासाद्य कंदर्प इदानीं जगज्जयं करिष्यतीति ध्वन्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्याख्यार्थदीपनया समेता षकारव्रज्या ।

सकारव्रज्या ।

सपत्नीदुःखदुःखितां नायिकां नायकसखी वक्ति—

सा दिवसयोग्यकृत्यव्यपदेशा केवलं गृहिणी ।
द्वितिथेर्दिवसस्य परा तिथिरिव सेव्या निशि त्वमसि ॥ ९८८ ॥

सेति । सा नायिका दिनयोग्यकार्यकरणात्तस्य केवलं गृहिणी । तिथिद्वयवतो दिवसस्य संबन्धिनी द्वितीयतिथिरिव रात्रौ त्वं सेव्यासि । गृहकार्यार्थमेव केवलं सा, त्वं तु सुरतसुखार्थमिति भावः । एवं च तस्यामीर्ष्या न विधेयेति ध्वन्यते ॥

सखी नायिकां वक्ति—

स्तननूतननखलेखालम्बी तव घर्मबिन्दुसंदोहः ।
आभाति पट्टसूत्रे प्रविशन्निव मौक्तिकप्रसरः ॥ ९८९ ॥

स्तनेति । त्वदीयस्तनसंबन्धितात्कालिकनखरेखालम्बी स्वेदबिन्दुसमूहः पट्टसूत्रे प्रविशन्मौक्तिकप्रकृष्टसर इव शोभते । नूतनपदेन नखरेखायामारक्तत्वं ध्वन्यते । एवं चेदानींतनसुरतेन तवातिशयशालिशोभा संवृत्तेति ध्वन्यते । एवं चैतादृशप्रत्यक्षरतचिह्नदर्शनेऽपि न मया किंचित्कृतमिति वदसीत्यतस्त्वत्तुल्या नान्या प्रतारिकेति ध्वन्यते ॥

सखी सामान्यवनितामुपदिशति—

सौभाग्यगर्वमेका करोतु यूथस्य भूषणं करिणी।
अत्यायामवतोर्या मदान्धयोर्मध्यमधिवसति ॥ ५९० ॥

सौभाग्येति। यूथस्य करिसमूहस्य भूषणं करिणी एका सौभाग्यस्य गर्वं करोतु। अत्युच्चयोर्मदशालिनोर्या मध्यमधिवसति। एवं च सर्वनायकसमाधानं त्वया विधेयमिति ध्वन्यते ॥

पतिमवमत्य तत्सखीवचनादिकमप्युपेक्ष्य पश्चात्परितप्ता सती स्वयमेव प्रियसविधमागता सखीपरिवृतं तमालोक्य तासु स्वलघुतागोपनाय नायिका नायकं वक्ति—

स्वचरणपीडानुमितत्वन्मौलिरुजाविनीतमात्सर्या।
अपराद्धा सुभग त्वां स्वयमहमनुनेतुमायाता ॥ ५९१ ॥

स्वचरणेति। स्वचरणपीडयानुमिता या त्वन्मस्तकपीडा तया विशेषेणापहृतमात्सर्या। स्वयं कृतापराधा। पतिविहितप्रणतावपि कोपकरणादिति भावः। सुभग। विना प्रयत्नं मदागमनादिति भावः। त्वामनुनेतुमहमायाता। एवं चानेन प्रियतमेन बहुतरप्रणामादिना मदनुनयः कृतोऽस्तीति व्यज्यते। यद्वा स्वयमेवोत्कण्ठिता नायिका नायकसविध आगता, तत्र च तत्सख्यादिकमवलोक्यानाकारितागमनसंभाव्यमानलाघवपरिहाराय मृषैव वक्ति—स्वचरणेति ॥

अनुरक्तजनक्लेशकर्तुः सेनादिकं न सम्यक्, किं तु प्रबलविपक्षविद्रावकस्येति कश्चिद्वक्ति—

स्नेहमयान्पीडयतः किं चक्रेणापि तैलकारस्य।
चालयति पार्थिवानपि यः स कुलालः परं चक्री ॥ ५९२ ॥

स्नेहमयानिति। तैलप्रचुरान्। अथ च प्रीतिप्रचुरान्। पीडयतस्तैलकारस्य चक्रेणापि यन्त्रविशेषेणापि। अथ च सेनयापि। 'शस्त्रभेदे च सेनायां चक्रम्' इत्यभिधानात्। अपिना कोषादिसंग्रहः। यः पार्थिवान्पृथिवीविकारान्घटादीन्। अथ च महीपतीन्। चालयति भ्रामयति। अथ च स्वस्थानभ्रष्टान्करोति। स कुलालोऽपि। अपिना निन्द्यत्वमावेद्यते। परमुत्कृष्टं चक्रवान्यन्त्रविशेषवान्। अथ च सेनावान्। यद्वा यथास्थित एवापि। एवं च सामर्थ्यविशेषवत्त्वमावेद्यते। एवं च सेनादिसत्त्वमात्रेण न प्रतिष्ठा, किं तु स्वानुरक्तसंरक्षणपरविद्रावणरूपकार्यकारितयेति व्यज्यते ॥

सखी नायिकां वक्ति—

सरले न वेद भवती बहुभङ्गा बहुरसा बहुविवर्ता।
गतिरसतीनेत्राणां प्रेम्णां स्रोतस्वतीनां च ॥ ५९३ ॥

सरल इति। हे सरले, बहुभङ्गा भङ्गो वक्रता विच्छेदस्तरङ्गश्च। बहुरसा बहुविषय-

कप्रेमवती। यद्वा शृङ्गारादिमती। बहुहर्षवती बहुजलवती च। बहुविवर्ता बहुकापट्यवती अनेकप्रकारवती बहुजलभ्रमणवती च। असतीनयनानां प्रेम्णां नदीनां च गतिः कटाक्षादिः स्थितिर्गमनं चेति भवती न वेद। एवं च प्रेम्णि भङ्गादिकं नियतमस्तीत्यतं एतत्संरक्षणं दुष्करम्, अतोऽत्यन्ताभिमानं परित्यज्य नायकसमाधानं कुर्विति ध्वन्यते॥

नायिका सखीं वक्ति—

सखि मध्याह्नद्विगुणद्युमणिकरश्रेणिपीडिता छाया।
मज्जितुमिवालवाले परितस्तरुमूलमाश्रयति॥ ९९४॥

सखीति। हे सखि। एवं च रहस्यकथनार्हत्वं व्यज्यते। मध्याह्ने द्विगुणीभूता या सूर्यकिरणश्रेणिस्तया पीडिता छाया आलवालें मज्जितुमिव समन्ताद्वृक्षमूलमाश्रयति। एवं चैतादृशनिदाघकाले न कोऽपि स्वगेहाद्वच्छतीत्युपवने नायकं नय, अहमप्यधुना तत्रागतप्रायेति ध्वन्यते। यद्वा सखी नायिकां वक्ति। एवं च यत्र प्रखररविकरनिकरखिन्ना प्राणानपि त्यक्तुकामा जडापि च्छाया स्वाश्रयं न परित्यजति, तत्र किमु वाच्यं त्वया पतिपदारविन्दं विहाय क्षणमपि खेदवत्त्वेऽपि दूरे स्थेयमिति द्योत्यते॥

'मत्प्रियो मय्यतिशयितानुरागवान्' इति वादिनीं कांचित्काचिद्वक्ति—

सखि शृणु मम प्रियोऽयं गेहं येनैव वर्त्मनायातः।
तन्नगरग्रामनदीः पृच्छति सममागतानन्यान्॥ ९९५॥

सखीति। हे सखि, शृणु। श्रुण्वित्यनेन त्वदुक्तिरकिंचित्करेति ध्वन्यते। अयं मम प्रियः। परोक्षेऽप्यपरोक्षवन्निर्देशो नायकें निरन्तरसंगतिशालित्वमावेदयति। गृहं येनैव मार्गेणागतस्तत्संबन्धिनगरग्रामनदीः स्वसहागतानन्यान्पृच्छति। एवकारेणादृष्टमार्गीयनगरादिप्रश्नकरणमुचितमिति ध्वन्यते। एवं च मन्नायको मय्येतादृशानुरागवान्यच्चिरकालीनमार्गेणागतोऽप्यवश्यविज्ञेयपत्तनादिज्ञानाभाववानिति मन्नायकतुल्यो न त्वन्नायको न वा मत्तुल्या त्वमिति ध्वन्यते। यद्वा प्रिये मानादिकं त्वया विधेयमिति वादिनीं सखीं नायिका वक्ति—सखीति। श्रुण्वित्यस्यानुपादानेऽपि श्रवणक्रियाप्रतीतेरनुपयुक्तार्थतया श्रुण्विति पदमवधारणं लक्षयति। एवं च मदुक्तौ नाप्रामाण्यमाशङ्क्यमिति ध्वन्यते। एवं च मन्निमग्नचित्ततया प्रियतमः स्वयमुल्लङ्घितवर्त्मस्थितानेककौतुकनिधाननगरादिज्ञानाभाववान्, अत एतादृशे मानादिविधानेन दुःखजननमनुचितमिति द्योत्यते॥

वियोगिन्याः सायंतनसमयोऽत्यन्तदुःखद इति नायिका सखीं वक्ति—

सायं रविरनलमसौ मदनशरं स च वियोगिनीचेतः।
इदमपि तमःसमूहं सोऽपि नभो निर्भरं विशति॥ ९९६॥

सायमिति। अत्र सखीति पदानुपादानं तावद्वर्णोच्चारणेऽपि कालातिपातो भवतीति भाविसायंतनसमयस्यातिदुःखदत्वमित्यावेदयति। सायंतनसमये सूर्योऽनलं विशति। असावनलो मन्मथशरं विशति। स च मन्मथशरो विरहिणीचेतो विशति। इदमपि विर-

हिणीचेतोऽपि तमःसमुदायम् । तमःशब्देनाज्ञानं ध्वान्तं च । सोऽपि तमःसमूहोऽप्यतिशयेन नभो विशति । अनलेत्यादि पञ्चपदद्वितीयया कर्मत्वप्रतिपादनादीप्सततमत्वेन स्वेच्छया तत्र तत्र तस्य तस्य कृतप्रवेशस्य निवारणानर्हत्वमावेद्यते । एवं च यथा यथा रात्रिर्गमिष्यति तथा तथा मच्चेतसः शून्यरूपता भवित्रीति धरित्रीतले त्वदृते नान्यां मम प्राणप्रदां मन्य इत्यतस्त्वरस्वाधुनैव प्रियतमानयनार्थमिति ध्वन्यते ॥

काचित्कंचित्संकेतं वक्ति—

स्मरसमरसमयपूरितकम्बुनिभो द्विगुणपीनगलनालः ।
शीर्णप्रासादोपरि जिगीषुरिव कलरवः क्वणति ॥ ९९७ ॥

स्मरेति । मदनयुद्धसमये । 'मदनवीरसमर' इत्यपि पाठः । पूरितो यः शङ्खस्तत्तुल्यद्विगुणितपुष्टकण्ठनालः कपोतो जयेच्छावानिव जर्जरप्रासादोपरि कूजति । शीर्णपदेनान्यानारोहणीयत्वं ध्वन्यते । प्रासादपदेन श्रमापनोदकसमीरणवत्तया निर्भररतसंपादनयोग्यत्वं व्यज्यते । उपरिपदमन्यानवलोकनीयत्वमावेदयति । कलरवपदेनोद्दीपकत्वं द्योत्यते ॥

फूत्कृत्य रुदतीं सुदतीं सखी शिक्षयति—

स्फुरदधरमविरताश्रु ध्वनिरोधोत्कम्पकुचमिदं रुदितम् ।
जानूपनिहितहस्तन्यस्तमुखं दक्षिणप्रकृतेः ॥ ९९८ ॥

स्फुरदधरमिति । स्फुरन्नधरो यस्मिन् । निबिडबाष्पम् । ध्वनिनिरोधेनोत्कटकम्पवन्तौ कुचौ यस्मिन् । जानुस्थापित[हस्तन्यस्त]वदनम् । इदमेतादृशप्रकारशालि रुदितं सरलप्रकृतेः । एवं चैतदन्यथाचरणं तवानुचितमिति ध्वन्यते । 'स्फुरदधरश्वासम्' इत्यपि पाठः । यद्वैतादृशरोदने कस्यापि ज्ञानं न भविष्यतीति फूत्कृत्य रोदनं तवोचितमिति सखी नायिकां वक्ति ॥

काचित्सामान्यवनिता कांचित्सामान्यवनितां भङ्ग्यन्तरेण वक्ति—

स्वयमुपनीतैरशनैः पुष्णन्ती नीडनिर्वृतं दयितम् ।
सहजप्रेमरसज्ञा सुभगागर्वं बकी वहतु ॥ ९९९ ॥

स्वयमिति । स्वयमाहृतैर्भक्ष्यैः कुलायसुखितं दयितं पुष्णन्ती, अकृत्रिमप्रेमरसाभिज्ञा बलाका सौभाग्यशालिनीगर्वं वहतु । सुभगेति भिन्नं पदं वा । एवं च यया स्वद्रव्येण नायकपोषणं क्रियते सैव रसाभिज्ञा सौभाग्यवतीनां गर्वमुद्वहतु नापरस्यास्तद्वहनमुचितमिति ध्वन्यते ॥

दुष्टप्रभुणा कोषाधिकारे दत्तेऽपि प्रभुरयं मय्यतीव विश्वस्त इति धिया तत्सेवनमुचितं नेति कश्चित्कंचिद्वक्ति—

स्वरसेन बध्नतां करमादाने कण्टकोत्करैस्तुदताम् ।
पिशुनानां पनसानां कोषाभोगोऽप्यविश्वास्यः ॥ १००० ॥

स्वरसेनेति । स्वेच्छया करं दण्डं बध्नतां कुर्वताम् । आदाने अर्थात्करादाने कण्टकसमूहैस्तुदताम् । स्वरसेनेत्यनेन कियदनेन भुक्तं कियन्नेति शोधशून्यत्वमावेद्यते । कण्टकोत्करैस्तुदतामित्यनेन स्वेच्छया कृतमपि दण्डं शनैः शनैर्न गृह्णन्तीति ध्वन्यते । अथ च स्वस्य रसेन द्रवेण करं हस्तं बध्नताम् । पनसरसस्य चिक्कणत्वादिति भावः । कण्टकोत्करैस्तुदताम् । पनसस्य कण्टकबाहुल्यादिति भावः । पिशुनानां पनसानां च कोषस्य भाण्डागारस्याभोगः संपर्कः । तद्विषयकाधिकारवत्त्वादिति भावः । अथ च कोषपरिपूर्णता । सोऽपि । अपिर्विश्वासास्पदत्वमावेदयति । अथ च वृक्षसर्वदेशस्यापि कठिनत्वादिदोषसत्त्वात्समुच्चायकः । अविश्वास्यः । एवं च कोषोऽप्येभिरस्मासु विनिहित इति धिया न सुधिया पिशुनाः सेव्या इति व्यज्यते ॥

सरलतया मानाद्यविधायिनीं भामिनीं सखी समुपदिशति—

सौभाग्यं दाक्षिण्यान्नेत्युपदिष्टं हरेण तरुणीनाम् ।
वामार्धमेव देव्याः स्ववपुःशिल्पे निवेशयता ॥ ६०१ ॥

सौभाग्यमिति । स्वशरीरस्य चित्रे । शिल्प इत्यनेन कार्याक्षमेऽपि वपुषि वामार्धस्यैवादरः, तत्र का वार्ता कार्यक्षमे वपुषीति व्यज्यते । देव्या वामार्धमेव सव्यसमांशकमेव । देवीदक्षिणशरीरभागस्य शिवरूपत्वादिति भावः । अर्धमित्यनेन दक्षिणैकदेशस्याप्यनिवेशनेन तत्र न केवलमौदासीन्यम्, अपि तु द्वेषवत्तेति ध्वन्यते । स्थापयता हरेण तरुणीनां दाक्षिण्यात्सरलत्वात्सौभाग्यं नेत्युपदिष्टम् । हरपदेन हरति सर्वस्य दुःखमिति व्युत्पत्त्या करुणावतापि भगवतानङ्गीकारेण करुणारहितस्यान्यसर्वनायकस्य दाक्षिण्यं न प्रीतिविषय इति व्यज्यते । यद्वोपदेशदानार्हत्वमथवोपदेशे याथातथ्यम् । एवं च श्लिष्टाभ्यां वामदक्षिणपदाभ्यां कौटिल्यादेव तरुणीनां सौभाग्यं न सरलतयेति ध्वन्यते । तरुणीनामित्यनेनान्त्ये वयसि दाक्षिण्यमुचितमित्यावेद्यते । उपदिष्टमित्यनेनान्यथासंभावनमनुचितमिति ध्वन्यते । एवं च सरलतां विहाय मानाद्यवश्यं त्वया विधेयमिति ध्वन्यते । यद्वा कौटिल्यशालिनं नायकं नायिकासखी वक्ति—स्ववपुःशिल्पे देव्या वामार्धमेव निवेशयता हरेण दाक्षिण्यात्सौभाग्यं नेति तरुणीनामुपदिष्टम् । न तु पुंसाम् । एवं च स्त्रीणामेव वाम्यकरणमुचितम्, न तु पुंसामिति ध्वन्यते । यद्वा तरुणीनामेवेति योजना ॥

नायिकासखी नायकं वक्ति—

सुभग स्वभवनभित्तौ भवता संमर्द्य पीडिता सुतनुः ।
सा पीडयैव जीवति दधती वैद्येषु विद्वेषम् ॥ ६०२ ॥

सुभगेति । हे सुभग, स्वसदनभित्तौ सम्यङ्मर्दयित्वा पीडिता सुतनुर्वैद्येषु विशेषद्वेषं दधती सा पीडयैव जीवति । एवं च त्वत्कृतपीडा यत्र तस्या जीवननिदानं तत्र किं वाच्यं त्वत्सङ्ग इति व्यज्यते । उत्सववशात्त्वद्भवनमागतां बलादबलां त्वया दृढालिङ्गनादिना संपीड्यानुरागातिशयशालिनीं विधायेदानीमुदासीनवत्स्थीयत इत्येतदनुचिततरं त-

वेति भावः। सुभगत्वं चाकस्मिकैतादृशनायिकासंपर्कवत्त्वादिति भावः। स्वपदेन भीतिशून्यत्वं नायके, नायिकार्या सख्यादिराहित्येन सहायशून्यत्वमावेद्यते। भित्त्वेत्यनेन निर्गमाभाववत्त्वं द्योत्यते। भवतेत्यनेन बलात्कारो व्यज्यते॥

नायिकासखी नायकं वक्ति—

सा गुणमयी स्वभावस्वच्छा सुतनुः करग्रहायत्ता।
भ्रमिता बहुमन्त्रविदा भवता काश्मीरमालेव॥ ६०३॥

सेति। गुणाः सौन्दर्यादयः। पक्षे गुणः सूत्रम्। स्वभावेन सहजतया शुद्धान्तःकरणा। पक्षे स्वभावोज्ज्वला। करग्रहेण पाणिग्रहेण स्वाधीना। एवं च पातिव्रत्यमावेद्यते। पक्षे हस्तेन यदङ्गीकरणं तेनायत्ता। काश्मीरमालेव सुतनुः। एवं च स्पृहणीयत्वं द्योत्यते। बहुविचारवता। अत्यन्तकलाकुशलेनेत्यर्थः। पक्षे बहुतरागमोक्तमन्त्रज्ञेन। एवं च बहुतरजपशालित्वं द्योत्यते। भवता भ्रमिता। एवं च त्वत्संगत्या कदापि नैतस्या विश्रान्तिरिति व्यज्यते। यद्वा सामान्यवनितासखी नायकं वक्ति—करग्रहेण स्वाधीना। न तु द्रव्यादिलोभेनेति भावः। स्वभावस्वच्छेत्यनेन सरलत्वं व्यज्यते। बहुमन्त्रविदानेकप्रकारकविचारवता। एवं च कापट्यशालित्वं द्योत्यते। भ्रमं प्रापिता। एवं चेयं भ्रान्ता त्वामस्थिरप्रकृतिकं भजते, त्वं तु न किमपि वसु ददासीति व्यज्यते। अन्योऽपि मन्त्रवेत्ता कंचिज्जनं भ्रान्तं विधाय तदीयसर्वस्वापहारं करोतीति लौकिकम्॥

नायको नायिकां वक्ति—

सव्रीडस्मितसुभगे स्पृष्टास्पृष्टेव किंचिदपयान्ती।
अपससि सुन्दरि यथा यथा तथा स्पृशसि मम हृदयम्॥६०४॥

सव्रीडेति। हे व्रीडासहितस्मितसुभगे, किंचित्स्पृष्टा किंचिदस्पृष्टा। एतादृश्येव। मयेति भावः। आकस्मिकसंजातसंघट्टनेऽपि लोकभीतिवशादिति भावः। अत एव व्रीडास्मितवत्ता नायिकायाः। अपसरन्ती त्वं यथा यथा सुन्दरि, अपससि तथा मम हृदयं स्पृशसि। एवं चेदानीमहं नानुग्राह्यस्त्वया चेत्तदा न मे प्राणाः स्थास्यन्तीति व्यज्यते। यद्वा स्पृष्टाप्यस्पृष्टैवाहमित्यपसरन्ती यथा यथापससि तथा मम हृदयं स्पृशसि। एवं च नाहं त्वया स्पृष्टेति वादिन्यपससि हृदयं च स्पृशसीत्यपसरणानर्थक्यम्, अत एवालिङ्गस्व मामिति व्यज्यते। 'स्पष्टीभूत्वेव किंचिदपयान्ती' इत्यपि पाठः। 'षष्ठीं संपूज्य' इति पाठेऽपि प्रसवनिमित्तक एव व्रीडास्मिते किंचित्षष्ठीं संपूज्य। यथाकथंचित्षष्ठीं पूजयित्वेत्यर्थः। यथा यथापससि तथा सुन्दरि, मम हृदयं स्पृशसि। 'षष्ठी पूज्येव' इति पाठे पूज्या षष्ठीव त्वं यथा यथापससि तथा सुन्दरि, मम हृदयं स्पृशसि। एवं च यथा षष्ठी यं स्पृशति स न जीवति, तथा कृतषष्ठीपूजया त्वया स्पृष्टं मम हृदयं न स्थितिं प्राप्नोतीति व्यज्यते। तेन च ममालिङ्गनचुम्बनादि देहीति॥

निजदयित एव रतिर्विधेया नान्यत्रेति वादिनीं सखीं नायिका वक्ति—

सखि सुखयत्यवकाशप्राप्तः प्रेयान्यथा तथा न गृही ।
वातादवारितादपि भवति गवाक्षानिलः शीतः ॥ ६०५ ॥

सखीति । हे सखि । एवं च वास्तवाभिप्रायकथनार्हत्वमावेद्यते । अवकाशप्राप्तः । संकेतवशात्समयविशेषे समागत इत्यर्थः । प्रेयान्यथा सुखमुत्पादयति तथा निजः प्रेयान्न । अमुमेवार्थमर्थान्तरन्यासेन द्रढयति—अवारितात् । महत इति भावः । वाताद्वातायनसंबन्ध्यनिलः शीतस्तापापनोदकः । एवं चान्यनायकमवश्यमानयेति ध्वन्यते । यद्वा निजदयितानुरक्तां नायिकामन्यदयितेन संयोजयितुं दूती वक्ति—गृहीत्यनेनावारितादित्यनेन च 'अर्थादौषधवत्कामः प्रभुत्वात्केवलं श्रमः । करवत्स्वेषु दारेषु त्रयादन्यत्र मन्मथः ॥' इतिवत्तुल्यन्यायतया नायिकाया अप्यधिकानुरागशालिपरपुरुषरतौ सुखातिशय इति द्योत्यते । अथवा गृहीत्यनेन निरन्तरसदनावस्थितिशालितया स्वनायकः परपुरुषाप्राप्तिसमयेऽपि भोक्तुं शक्य इति व्यज्यते । तेन चाधुना तमहमानयामीति ॥

निरन्तरं नितान्तकुपितां नायिकां सखी वक्ति—

सततमरुणितमुखे सखि निगिरन्ती गरलमिव गिरां गुम्फम् ।
अवगणितौषधिमन्त्रा भुजंगि रक्तं विरञ्जयसि ॥ ६०६ ॥

सततमिति। भुजंगीव भुजंगी तत्संबुद्धिः । एवं च तवान्तिकागमनेऽपि भीतिरुत्पद्यत इत्यावेद्यते । निरन्तररक्तीकृतवदने । कोपवशादिति भावः । पक्षे स्वभावत एवारक्तवदनत्वम् । सखि, विषमिव वाचां गुम्फं गिरन्ती पक्षे गरलं गिरन्ती । अवगणितौषधिमन्त्रा अवगणितौषधितुल्यविचारा । एवं यथौषधिः पीडाहारकतया सुखकारिणी तथा सविचारा मदुक्तिस्ते हितकारिणी, अहो एनामपि न गणयसीत्यनुचितं तवेति ध्वन्यते । पक्षे औषधमन्त्रादेरपि न यत्र सामर्थ्यमिति भावः । रक्तं जनं विरञ्जयसि विरक्तं करोषि । पक्षे, रुधिरवन्तं रुधिररहितं करोषि । एवं चैतादृशकोपवत्तया त्वया यत्रानुरक्तोऽपि जनोऽनुरागशून्यः क्रियते तत्राननुरक्तानुरञ्जनं तव दूरापास्तमिति व्यज्यते ॥

कपटभावेनैवानयाश्वासनं क्रियते न वास्तवसात्विकतयेति कश्चित्कंचिदन्योक्त्या वक्ति—

स्थलकमलमुग्धवपुषा सातङ्काङ्कस्थितैकचरणेन ।
आश्वासयति बिसिन्याः कूले बिसकण्ठिका शफरम् ॥ ६०७ ॥

स्थलेति । कमलिन्याः समीपे बलाका सत्रासं क्रोडे स्थित एकश्चरणो यस्य तेन स्थलकमलवत्सुन्दरशरीरेण मत्स्यं विश्वासयति । एवं च मत्स्यस्य कमलभ्रमेण समीपमागमनं भविष्यति ततश्चैतद्भोजनं विधेयमिति धिया तूष्णीमवतिष्ठते इति भावः । एवं चेयं दुष्टा, अत एतद्विश्वासो न विधेय इति व्यज्यते ॥

कश्चित्कामी दुष्प्रापां नायिकामवलोक्य समीरमुद्दिश्य वक्ति—

सनखपदमधिकगौरं नाभीमूलं निरंशुकं कृत्वा ।
अनया सेवित पवन त्वं किं कृतमलयभृगुपातः ॥ ६०८ ॥

सनखेति । नखक्षतसहितमत्यन्तगौरं नाभीमूलमंशुकरहितं कृत्वानया सेवित पवन, त्वं कृतो मलयाचलकटकात्पातो येन, एतादृशः किमिति वितर्कः । एवं च यदि त्वया भृगुपातो न कृतः स्यात्तर्हि कथमनया विगलितलज्जया सेवितः स्यात्, अतस्तवैव तपस्याधिक्यमिति व्यज्यते । तेन च त्वमेव धन्य इति । यद्वैतदपेक्षया किमधिकतरफलमस्ति यल्लिप्सया मलयभृगुपातस्त्वया कृत इति प्रश्नः । एवं चैतादृशसुखादन्यन्न पुरुषार्थरूपमिति व्यज्यते । रतोत्तरमपि समधिककामाविर्भावाद्रतार्थं पुनः प्रवृत्तां कान्तामालोक्यालीं नायकं वक्तीति वा ॥

अदृष्टवता श्रीस्तावदप्रयत्नेनापि लभ्यत इति कश्चिद्वक्ति—

सर्वाङ्गमर्पयन्ती लोला सुप्तं श्रमेण शय्यायाम् ।
अलसमपि भाग्यवन्तं भजते पुरुषायितेव श्रीः ॥ ६०९ ॥

सर्वाङ्गमिति । निखिलाङ्गं समर्पयन्ती चञ्चला । अथ च लोलेति श्रीनाम । श्रीर्विपरीतरतविधायिनीव शय्यायां श्रमेण सुप्तम् । एवं च शय्यादिरचनामात्रोद्योगशालित्वं व्यज्यते । उद्योगरहितमपि । अपिः प्रागप्यन्वेति । यद्वा लोलेत्यत्रान्वेति । अदृष्टशालिनं भजते । पक्षे सुगमम् ॥

सुदिनं तदेव यत्र स्मारं स्मारं वियोगदुःखानि ।
आलिङ्गति सा गाढं पुनः पुनर्यामिनीप्रथमे ॥ ६१० ॥

सुदिनमिति । तदेव समीचीनं दिनं यस्मिन्विरहदुःखानि स्मृत्वा स्मृत्वा रात्र्याः प्रथमे । प्रहर इति भावः । वारं वारं दृढं सालिङ्गति । आलिङ्गयिष्यतीत्यर्थः । त्रियामेति विहाय यामिनीपदोपादानेन निखिलजने जागरूकेऽपि सायंतनसमय एव चालिङ्गनादिविधानेन विगलितलज्जात्वं व्यज्यते । पथिकाशंसनमेतत् ॥

काचित्कांचिद्वक्ति—

सान्तर्भयं भुजिष्या यथा यथाचरति समधिकां सेवाम् ।
साशङ्कसेर्ष्यसभया तथा तथा गेहिनी तस्य ॥ ६११ ॥

सान्तर्भयमिति । भुजिष्या दासी तस्य नायकस्यान्तर्भयसहितम् । स्वामिनी ज्ञास्यतीति धियेति भावः । यथा यथा सम्यगधिकाम् । संमतानुरागवत्त्वादिति भावः । सेवामाचरति तथा तथा गेहिनी । एवं च गृहकर्मव्यापृततयैतादृशानुचिताचरणज्ञानवैधुर्यं व्यज्यते । साशङ्कानर्थप्रतिभासहिता । किमिदानीमियं समधिकां सेवां करोतीति धियेति भावः । सेर्ष्या समत्सरा । प्रायेणेयमस्मिन्नतिमतीति धियेति भावः । सभया । लोकापवादादिति

भावः । अत एव गेहिनीति पदमर्थवत् । एवं च सर्वदा स्वामिचरणपरिचरणं स्वयमेव विधेयम्, न तु गृहव्यापारवशाद्दास्यादिनेति ध्वन्यते । 'तस्याः' इति पाठे नायिकायाः । सान्तर्भयम् । न ज्ञातव्योऽनया नायकीयमत्सङ्ग इति धियेति भावः । इतरत्सुगमम् ॥

नायको नायिकां वक्ति—

सुन्दरि दर्शयति यथा भवद्विपक्षस्य तत्सखी कान्तिम् ।
पतति तथा समदृष्टिस्त्वदेकदासस्य सासूया ॥ ६१२ ॥

सुन्दरीति । हे सुन्दरि, तस्यास्त्वत्सपत्न्याः सखी भवद्विपक्षस्य त्वत्सपत्न्याः कान्तिं यथा दर्शयति तथा त्वन्मात्रदासस्य मम । एवं च त्वदतिरिक्तायाः शोभाकथनं कथं मया सोढुं शक्यमिति व्यज्यते । सद्वेषा दृष्टिः पतति । अर्थात्त्वद्विपक्षे । एवं च न मयानुरागवशात्त्वद्विपक्षावलोकनं कृतं किं तु क्रोधवशादिति भावः ॥

सपत्नीदुःखितां कान्तां नायकसखी वक्ति—

स्वाधीनैरधरव्रणनखाङ्कपत्रावलोपदिनशयनैः ।
सुभगा सुभगेत्यनया सखि निखिला मुखरिता पल्ली ॥ ६१३ ॥

स्वाधीनैरिति । हे सखि, स्वयं कर्तुं शक्यैर्दन्तक्षतनखक्षतपत्रवल्लीप्रोच्छनदिवास्वापैः सुभगेत्यनया । त्वत्सपत्न्येत्यर्थः । समग्रापि पल्ली वाचालीकृता । पल्लीपदेन जाड्यं तेन च यथार्थज्ञानशून्यत्वं तेन चैतद्वचनमप्रमाणमिति व्यज्यते । निवारणानर्हत्वं वा । मुखरितेत्यनेन वचस्युपेक्षणीयत्वं व्यज्यते । एवं च नायको नैतस्यामनुरक्तो न वा तत्कृतानि दन्तक्षतादीनि, किं तु मिथ्यैव लोके स्वसौभाग्यप्रकटनायानया स्वयमेव संपादितानीति विज्ञाय नायके मानादिकरणमनुचितं तवेति ध्वन्यते ॥

कांचित्कांचिद्वक्ति—

सरित इव यस्य गेहे शुष्यन्ति विशालगोत्रजा नार्यः ।
क्षारास्वेव स तृप्यति जलनिधिलहरीषु जलद इव ॥ ६१४ ॥

सरित इति । यस्य सदने सरित इव श्रेष्ठान्वयजाताः । पक्षे महत्तराद्रिजन्याः । नार्यः शुष्यन्ति । दुःखोद्रेकवशादिति भावः । स क्षारास्वेव । नीरसास्वेवेत्यर्थः । समुद्रलहरीषु मेघ इव तृप्यति । एवं च यः कुलीनस्वनाम्निकासु नाभिनन्दति तस्य नीरसनायिकावासिरेव भवतीति व्यज्यते । यद्वा पराङ्गनालम्पटं नायकं नायिका वक्ति—जलनिधिपदेन नीचजन्यत्वमन्याङ्गनासु ध्वन्यते । जलदपदेन नायके मालिन्यं व्यज्यते ॥

नायकदूती नायिकां वक्ति—

सकलकटकैकमण्डनि कठिनीभूताशये शिखरदन्ति ।
गिरिभुव इव तव मन्ये मनः शिला समभवच्चण्डि ॥ ६१५ ॥

सकलेति । निखिलकटकमुख्यभूषणे । पक्षे कटकोऽद्रिनितम्बः । कठोरहृदये । पक्षे कठिनी खटिका । पद्मरागरूपरदे । पक्षे शिखरं शृङ्गम् । हे कोपने, पर्वतभूमेरिव तव

मनः पाषाणः। पक्षे मनःशिला धातुविशेषः। संजात इति तर्कयामि। एवं च भवदेकशरण उचितमात्राचरणप्रवणे निजरमणे नैवंविधं नैष्ठुर्यं तव कर्तुं समुचितमिति ध्वन्यते। तेन चावश्यं तमनुसरेति॥

सखी नायिकां वक्ति—

सखि दुरवगाहगहनो विदधानो विप्रियं प्रियजनेऽपि।
खल इव दुर्लक्ष्यस्तव विनतमुखस्योपरिस्थितः कोपः॥ ६१६॥

सखीति। हे सखि, दुरवगाहः केनाप्युपायेन निवारयितुमशक्यः स चासौ गहनः। बहुतर इत्यर्थः। पक्षे केनाप्युपायेनाकलयितुमशक्यः कुटिलाशयश्चेत्यर्थः। प्रियजनेऽपि नायकेऽपि। अपिः करणानर्हत्वमावेदयति। पक्षे स्वेप्सितजनेऽपि। एवं च किमुतान्यत्रेति भावः। विप्रियं दुःखं विदधानः। विनतं यन्मुखं तस्योपरि स्थितः। पक्षे साधोरुपरि स्थितः। साधोः क्लेशद इत्यर्थः। एवं च दुष्टस्य दुष्टाद्भीतिः साधुतो नेत्यर्थः। दुष्ट इव तव कोपो दुर्लक्ष्यो ज्ञातुमशक्यः। पक्षे द्रष्टुमशक्यः। एवं चैतादृशकोपकरणमनुचितं तवेति ध्वन्यते। 'विनयमुखोपस्थितः' इति पाठे विनयो मुखेऽग्रतो यस्यैतादृश उपस्थितः। जात इत्यर्थः। एवं चैतादृशविनयप्रदर्शनमप्यन्यादृशमेव मे भातीति व्यज्यते। पक्षे विनयो मुखे यस्य। न तु हृदय इति भावः। दुर्लक्ष्यः। विनयमुखत्वादेवेत्युभयत्र भावः। दुरवगाहेत्यादेः प्राग्वदेव। प्रियजनेऽपि विप्रियं विदधानः। प्रिये विनयप्रदर्शनस्योदासीनत्वादिति भावः। पक्षे प्राग्वत्। हे सखि, खल इव तव कोपः। एवं चैतादृशकोपकरणमनुचितं तवेति भाव इत्यर्थः॥

कथमियमुपरिविवाहोत्सवं नावलोकयतीति वादिनं विदिततद्वृत्तान्तः काश्चिद्वक्ति—

स्वेदसचेलस्नाता सप्तपदी सप्त मण्डलीर्यान्ती।
समदनदहनविकारा मनोहरा व्रीडिता नमति॥ ६१७॥

स्वेदेति। स्वेदेन। त्वद्दर्शनजेनेति भावः। सवसनस्नानशालिनी। सप्तपदसमाहाररूपा सप्त मण्डलीरतिक्रामन्ती। मदनरूपो यो दहनस्तस्य यो विकारस्तत्सहिता। चित्तहारिणी। लज्जिता नम्रीभवति। एवं चानया त्वच्चित्तमपहृतम्, अत एवाग्निदिव्ये स्वेदरूपजले सवसनाप्लुता सप्तपदीरूपसप्तमण्डलातिक्रमकारिणी मदनरूपाग्निदाहशालिनी संजाताशुद्धिमत्तया लज्जावशान्नोर्ध्वमीक्षत इति भावः। एवं च त्वद्विषयकलज्जावशादेवमुन्नीयते यदियं विहितेऽपि विवाहे न त्वां त्यक्ष्यतीति व्यज्यते। अन्योऽपि तस्करः संजातदिव्यदूषणः किमिदानीं वक्तव्यं मयेति विगलितधिषणोऽधस्तादेव विलोकयन्नास्त इति लौकिकम्। यद्वा नायको नायिकासखीं वक्ति—एवं चेयं मन्मनोरूपवस्तु हृतवती वैवाहिकच्छद्मदिव्येऽपि शुद्ध्यभाववती समपहृतवस्त्वददती मयेयं भुजपाशेन बद्ध्वा निर्दयं मर्दयित्वा मुष्ट्यभिघातैरुरसि ताडयित्वा दन्तनखक्षतैश्च क्लेशभागिनी विधेया तत्रभवत्या नैतत्यक्षरक्षणं क्षणमपि विधेयमिति व्यज्यते। तेन च कृतविवाहामप्येनां न मुञ्चामीति।

यद्वा मनोहरा सुन्दरी लज्जिता नमति । स्वेदेत्यादिविशेषणस्य सप्तपदीत्यादिविशेषणं हेतुगर्भम् । एवं च नितम्बादि प्राशस्त्यमावेद्यते । लज्जायां तु स्वेदादिना मदीयमदनविकार एभिर्ज्ञात इति धीर्हेतुः । एवं चैतादृशप्रौढापरिणय एव सम्यगिति व्यज्यत इति कश्चित्कंचिद्वक्तीत्यप्यर्थः ॥

समीचीनानामप्यसमीचीनसंसर्गादन्यथाभावो भवतीति कश्चित्कंचिद्वक्ति—

सुरसप्रवर्तमानः संघातोऽयं समानवृत्तानाम् ।
एत्यैव भिन्नवृत्तैर्भङ्गुरितः काव्यसर्ग इव ॥ ६१८ ॥

सुरसेति । समीचीनरसैः प्रकर्षेण वर्तमानः । पक्षे समीचीनरसवान् । समानाचरणवताम् । पक्षे एकजातीयच्छन्दसाम् । अयं समुदायः काव्यस्य सर्ग इवान्यादृशाचरणप्रवणैः । पक्षे विजातीयच्छन्दोभिः । एत्यैव । एवकारेण बहुकालावस्थितौ किं भविष्यतीति न विद्म इति व्यज्यते । भङ्गुरितः कुटिलीकृतः । पक्षे समापितः । एवं चासत्संगतिरनुचितेति ध्वन्यते । यद्वा सर्वेऽप्येते समीचीना मत्सहायपक्ष एव स्थिताः, परमधुनैव कैश्चिद्दुष्टैरागत्यान्यथाभावं नीता इति कश्चित्कंचिद्वक्ति ॥

कश्चित्सखायं वक्ति—

सर्वासामेव सखे पय इव सुरतं मनोहारि ।
तस्या एव पुनः पुनरावृत्तौ दुग्धमिव मधुरम् ॥ ६१९ ॥

सर्वासामिति । हे सखे, सर्वासामेव । स्त्रीत्वसाधारणधर्मवत्तयेति भावः । सुरतं पय इव दुग्धमिव समीचीनम् । आवर्तितं दुग्धमिव तस्या एव पुनः पुनरावृत्तौ सुरतं मधुरम् । एवं च सर्वकामिनीनां सुरतं समभेव परमिदमधिकं तस्या यदुत्तरोत्तरसुरते माधुर्यमिति भावः । एवं चान्यासां प्रथमत एव माधुर्यं न पुनरुत्तरोत्तरत इति व्यज्यते । तेन च तत्तुल्या नान्या नायिकेति । यद्वा सर्वासामेव पुनः पुनरावृत्तौ सुरतं जलमिव मनोहारि पुनः पुनरावृत्तौ तस्या एव सुरतं दुग्धमिव मधुरम् । एवं च यथा जलदुग्धयोर्महदन्तरं तथान्यासां तस्याश्चोत्तरोत्तरसुरत इति व्यज्यते । प्रथमव्याख्याने पयःपदस्थाने दुग्धपदं दुग्धपदस्थाने पयःपदं वेत्युभयत्रैकपददानमुचितम् ॥

कश्चित्कंचिद्वक्ति—

स्वप्नेऽपि यां न मुञ्चसि या तेऽनुग्राहिणी हृदिस्थापि ।
दुष्टां न बुद्धिमिव तां गूढव्यभिचारिणीं वेत्सि ॥ ६२० ॥

स्वप्नेऽपीति । यां स्वप्नेऽपि । अपिनेतरकालसंग्रहः । एवं चासक्त्यतिशयो द्योत्यते । पक्षे स्वप्नेऽपि बुद्धेः संत्वाद्यथाश्रुतम् । या हृदिस्थापि । तवेति भावः । तेऽनु पश्चाद्ग्राहिणी । परपुरुषमिति भावः । एवं च यां त्वं सर्वदा ध्यायसि सा त्वयि क्वचित्क्षणमपि गते परपुरुषमभिलषतीति भावः । अथवा त्वद्धृदिस्थापि परपुरुषानुग्रहवतीत्यर्थः । एवं च त्वद्धृदिस्थितिकालेऽपि परपुरुषे मनः कुरुते या सा त्वत्पश्चात्किं करिष्यतीति तन्न विद्म

इति व्यज्यते। यद्वा या तवानुग्रहकारिणीत्वेनाभिमता। एवं च वास्तवं तस्यास्त्वय्यनुग्रहो नास्तीत्यर्थः। पक्षे या ते। अविद्यमानेऽपि वस्तुनीति भावः। अनुग्राहिणी। अविद्यमानवस्तुविषयिणीत्यर्थः। अपिः पूर्वसमुच्चायकः। तां दुष्टां बुद्धिमिव गुप्तव्यभिचारकारिणीम्। पक्षे झटित्यज्ञेयभ्रमत्ववतीम्। न जानासि। एवं चैतादृशदुष्टायामासक्तिसंपादनं तवानुचितमिति व्यज्यते॥

कश्चित्कांचिद्वक्ति—

सपरावृत्ति चरन्ती वात्येव तृणं मनोऽनवद्याङ्गि।
हरसि क्षिपसि तरलयसि भ्रमयसि तोलयसि पातयसि॥ ६२१॥

सपरावृत्तीति। हे अनवद्याङ्गि। एवं च स्पृहणीयत्वमावेद्यते। परावृत्तिसहितं चलन्ती। पुनः पुनः पश्चान्निरीक्षमाणा चलन्तीत्यर्थः। त्वमित्यस्यानुपादानं लोकभीतिमावेदयति। पक्षे परिभ्रमणवती। मनः। ममेतिपदानुपादानेन यदीदं मनो मदीयं स्यात्तर्हि त्वत्कृतैतादृशैतदवस्था कथं मया द्रष्टुं शक्येति व्यज्यते। यद्वा मदीयत्वेन ज्ञाते मनसीतोऽप्यधिकतरपीडानया विधेयेति भीतिरावेद्यते। वात्या तृणमिव हरसि, अवलोकनेन स्वाधीनं करोषि। त्वय्यासक्तं भवतीति भावः। क्षिपसि। अनवलोकनेऽहमनया नानुगृहीत इति दुःखभाक्करोषीति भावः। तरलयसि। पुनरवलोकने मय्यनुग्रहवतीति धियेयं मयाञ्चले झटिति धर्तव्येति चाञ्चल्यभाक्करोषीति भावः। भ्रमयसि। पुनरनवलोकनेऽज्ञानशालिनं करोषि। सर्वथा किंकर्तव्यतामूढं संजातमिति भावः। तोलयसि। पुनरवलोकनेन किमस्मिन्किंचिद्धैर्यमस्ति न वेति ज्ञापकयथावस्थितिशालित्वाभाववत्करोषीति भावः। एवं क्षणं धैर्यशालि क्षणमधैर्यशालि संवृत्तमिति भावः। पातयसि मूर्छितं करोषि। पुनरवलोकनादिति भावः। एवं च त्वत्कटाक्षरूपसायकैरसमसायकेन भूयो भूयो जर्जरीकृतं सन्निष्प्राणमिव संजातमिति भावः। अन्योऽपि कश्चिद्वीरः पुनः पुनर्हन्यमानो मूर्छितो भवतीति लौकिकम्। एवं च निरपराधिनो ममैतादृशदुःखविधाने कथं नापराध्यति भवतीति व्यज्यते॥

नायिकासखी नायकं वक्ति—

सा बहुलक्षणभावा स्त्रीमात्रं वेति कितव तव तुल्यम्।
कोटिर्वराटिका वा द्यूतविधेः सर्व एव पणः॥ ६२२॥

सेति। हे कितव। एवं च तवैतादृशबुद्धिशालित्वमुचितमिति व्यज्यते। तव बहूनि यानि लक्षणान्यस्थूलाधरत्वादीनि तेषां भावः सत्ता यस्यां सा। यद्वा बहुला ये क्षणा उत्सवास्ते येभ्य एतादृशा भावा विलासा यस्यां सा। एवं चेतरनायिकातोऽधिकत्वमावेद्यते। पक्षे बहूनां समग्राणां लक्षाणां भाव आलोकनं चित्ताभिप्रायो वा यस्यां सा। एतादृशी सा नायिका स्त्रीमात्रं वेति तव। एवं चान्यस्य नैतादृशी मतिरिति भावः। तुल्यम्। मात्रपदेन लक्षणादिसत्त्वविरह आवेद्यते। अमुमेवार्थमर्थान्तरन्यासेन द्रढयति—द्यूतविधिसंबन्धिकोटिः कोटिसंख्याकं वस्तु कपर्दिका वा सर्व एव पणः। यद्वा

द्यूतं विधिः कर्तव्यार्थो यस्य स तस्य । विधिपदमवश्यकर्तव्यत्वमावेदयति । एवं च यथा द्यूतसक्तस्य कोटिसंख्याकं वसु समधिकं वराटिका न्यूनेति ज्ञानशून्यत्वं तथा धूर्तस्य तव विशेषज्ञानशून्यत्वमिति भावः । एवं च गुणानभिज्ञतया त्वया तां मत्सखीं विहायान्यत्रासक्तिः क्रियत इति व्यज्यते ॥

सखी नायकं वक्ति—

सा विरहदहनदूना मृत्वा मृत्वापि जीवति वराकी ।
शारीव कितव भवतानुकूलिता पातिताक्षेण ॥ ६२३ ॥

सेति । हे कितव, पातिताक्षेण कृतकटाक्षेण । पक्षेऽक्षः पाशः । भवतानुकूलिता स्वाधीनीकृता । पक्षे संचरणक्षमा कृता । विरहानलखिन्ना सा वराकी । एवं च सरलत्वमावेद्यते । चतुरङ्गगुटिकेव मृत्वा मृत्वापि जीवति । एवं च तस्यास्त्वत्कटाक्षमात्रेण जीवनम्, अन्यथा मरणमेवेति भावः । एवं च या हि स्वदर्शनादिनानोपायैः स्ववशतामानीता तस्यां पुनरीदृशौदासीन्यसंपादनं कथमनौचितीं ते नावहतीति व्यज्यते । तेन च सा त्वयानुग्राह्येति । पक्षे मरणं क्रीडाक्षमत्वम् । जीवनं तत्क्षमत्वम् ॥

नायिका सखीं वक्ति—

स्पर्शादेव स्वेदं जनयति न च मे ददाति निद्रातुम् ।
प्रिय इव जघनांशुकमपि न निदाघः क्षणमपि क्षमते ॥ ६२४ ॥

स्पर्शादिति । निदाघः प्रिय इव । एवं च निवारणानर्हत्वं ध्वन्यते । स्पर्शमात्रात् । एवं च किंचित्कालोत्तरं किमनेन विधेयमिति न विद्म इति व्यज्यते । पक्षे रतादिजन्यावस्था वक्तुं न शक्येति व्यज्यते । स्वेदं करोति । निद्रां कर्तुं च मे न ददाति । जघनसंबन्धि वसनमपि क्षणमपि न क्षमते । उभयत्र जघनवसनसत्त्वमावश्यकं तदभावे का वार्तालंकरणादीनां का च वार्ता घण्टिकादीनामिति भावः । एवं च प्रतिक्षणदृढतररतकारी मत्प्रिय इति व्यज्यते । एवं चैतादृशनिदाघकाले प्रियतममन्तरा नावस्थातुं शक्यम्, अतस्त्वरस्व तदानयनार्थमिति ध्वन्यते ॥

दूती नायकं वक्ति—

सा भवतो भावनया समयविरुद्धं मनोभवं बाला ।
नूतनलतेव सुन्दर दोहदशक्त्या फलं वहति ॥ ६२५ ॥

सेति । हे सुन्दर । एवं चासक्तियोग्यत्वं व्यज्यते । यद्वैतद्दोहदविशेषणम् । नूतनलता । नूतनपदेन चिरभाविफलयोग्यत्वं द्योत्यते । दोहदस्य शक्त्या फलमिव सा बाला भवतो निरन्तरचिन्तनेन समयविरुद्धम् । बाल्ये हि मनोभवोद्रेकवत्त्वं विरुद्धमिति भावः । फलविशेषणमप्येतत् । मन्मथं वहति । एवं च सा मदनकलाकलापानभिज्ञेति न मन्तव्यं त्वयेति व्यज्यते । तेन चाभुक्तभोगान्नाधिकं किमपि सुखम्, अतस्त्वरस्व तद्दर्शनायेति ॥

नायकं नायिकासखी वक्ति—

स्पृशति नखैर्न च विलिखति सिचयं गृह्णाति न च विमोचयति।
न च मुञ्चति न च मदयति नयति निशां सा न निद्राति ॥ ६२६ ॥

स्पृशतीति। सा नखैः स्पृशति न च विलिखति। नखाग्रस्पर्शसंपादनेन मदनवत्त्वं नखक्षताद्यकरणेन लज्जावत्त्वमावेद्यते। सिचयम्। तत्करकलितमिति भावः। गृह्णाति न च विमोचयति। गृह्णातीत्यनेन लज्जावत्त्वं न विमोचयतीत्यनेन मदनवत्त्वं ध्वन्यते। न च मुञ्चति। गन्तुं न प्रयच्छति न वा गच्छतीत्यर्थः। न च मदयति। न मदयतीत्यनेन मान्मथस्पष्टचेष्टाद्यकरणेन लज्जावत्त्वं व्यज्यते। निशामतिवाहयति न निद्राति। तूष्णीं निशातिवाहनेन लज्जावत्त्वं निद्राद्यविधानेन मन्मथवत्त्वं द्योत्यते। एवं च मध्यास्वभावादियमेतादृशी न तु कोपादिमतीत्यतो भीतिमुत्सृज्यैनां निगृह्य स्वाभिलषितं संपादयेति ध्वन्यते॥

नायकः सखायं वक्ति—

स्तनजघनद्वयमस्या लङ्घितमध्यः सखे मम कटाक्षः।
नोज्झति रोधस्त्यास्तटद्वयं तीर्थकाक इव ॥ ६२७ ॥

स्तनेति। हे सखे, तीर्थसंबन्धिकाको नद्यास्तटद्वयमिव लङ्घितो मध्यः कटिर्येन। सूक्ष्मत्वादिति भावः। पक्षे लङ्घितप्रवाहः। मम कटाक्षस्तस्या उन्नतम्। तटद्वयविशेषणमप्येतत्। स्तनजघनम्। प्राण्यङ्गत्वादेकवद्भावः। नोज्झति। तीर्थकाक इत्यनेन कटाक्षे काकोपमेयतया नायिकायां तीर्थरूपत्वप्रतिपादनेन प्राक्तनकृतसुकृतसमूहैकलभ्यत्वं नायिकायामावेद्यते। लङ्घितमध्य इत्यनेन मध्यपाते जीवनमेवासंभवीति व्यज्यते। तस्याः स्तने कदाचिज्जघने वा दृष्टिर्ममावतिष्ठते नान्यत्रेति भावः। एवं च तस्यामासक्तिस्त्वया न विधेयेति नाहमुपदेष्टव्य इति व्यज्यते॥

नायकः सखायं वक्ति—

सव्रीडस्मितमन्दश्वसितं मां मा स्पृशेति शंसन्त्या।
आकोपमेत्य वातायनं पिधाय स्थितं प्रियया ॥ ६२८ ॥

सव्रीडेति। आ ईषत्कोपमेत्य लज्जास्मितकिंचिच्छ्वसितसहितम्। सख्यादिविलोकनाल्लज्जा। कथमेयमकस्मादेव पश्यन्तीषु सखीषु तादृगाचरणप्रवृत्त इति स्मयेन स्मितम्। मन्मथाविर्भावाच्च मन्दश्वसितम्। मां मा स्पृशेति कथयन्त्या प्रियया वातायनं पिधाय स्थितम्। एवं च सख्यादिदृगविषयतासंपादनेन यथेच्छरत्यनुमतिर्दत्तेति ध्वन्यते। तेन चैतादृशी नान्या चतुरेति॥

नायकः सखायं वक्ति—

सकरग्रहं सरुदितं साक्षेपं सनखमुष्टि सजिगीषम्।
तस्याः सुरतं सुरतं प्राजापत्यक्रतुरतोऽन्यः ॥ ६२९ ॥

सकरेति। करग्रहणसहितम्। निषेधार्थमित्यर्थः। सरुदितम्। असह्यत्वज्ञापनायेति भावः। साक्षेपम्। ईदृशे कर्तव्ये कथमनीदृशं विधीयत इत्याक्षेपसहितमित्यर्थः। नखमुष्टिसहितम्। जेतुमिच्छा जिगीषा तत्सहितम्। सकरग्रहं सरुदितमित्यनेन नायककामसंदीपननिपुणत्वमथवा कोमलाङ्गीत्वम्, साक्षेपमित्यनेन कामतन्त्रनिपुणत्वम्, सनखमुष्टि सजिगीषमित्यनेन रसनिमग्नमानसत्वं नायिकायामावेद्यते। तस्याः सुरतं सुरतम्। द्वितीयं सुरतपदम् 'यस्य मित्राणि मित्राणि' इत्यादिवत्सुखातिशयजनकमित्यर्थान्तरसंक्रमितवाच्यम्। अत एव तत्सुरतादन्यः प्राजापत्यक्रतुः। क्रतुपदेन कालान्तरभावि फलत्वं व्यज्यते। तेन चैतदतिरिक्तपत्नीसुरतं पुत्रादिजननोत्तरं सुखदं न तदानीमेवेत्यनेनापीयमेव ममातिशयप्रेमवतीति॥

दुर्जननिन्दाभिया परपुरुषे मानसमकुर्वाणां नायिकां दूती वक्ति—

सखि न खलु निर्मलानां विदधत्यभिधानमपि मुखे मलिनाः।
केनाश्रावि पिकानां कुहूं विहायेतरः शब्दः॥ ६३०॥

सखीति। हे सखि। एवं च हितोपदेशकथनार्हत्वं द्योत्यते। मलिना निर्मलानामभिधानमपि। अपिना संगत्यादेर्व्युदासः। निश्चयेन मुखेन विदधति। अमुमेवार्थमर्थान्तरन्यासेन द्रढयति—पिकानां कुहूं विहायान्यः शब्दः केनाश्रावि। न केनापीत्यर्थः। एवं च मलिनोक्तदुरुक्तेः किंचिन्न मनसि दुःखं विधेयमित्यावेद्यते। तेन च दुर्जनभीतिमुत्सृज्य स्वाभिलषितं यथेच्छं साधयेति॥

क्वचिल्लघुतापि समीचीनफलदेति कश्चित्कंचिद्वक्ति—

स्वल्पा इति रामबलैर्ये न्यस्ता नाशये पयोराशेः।
ते शैलाः स्थितिमन्तो हन्त लघिम्नैव बहुमानः॥ ६३१॥

स्वल्पा इति। ये रघुपतिसैन्यैः स्वल्पा इति हेतोः समुद्रस्यान्तर्ने निःक्षिप्तास्ते शैलाः स्थितिमन्तः। भुवीति भावः। जाताः। अतो लाघवेनैव बहुमानः। महत्परिमाणस्थितिशालित्वादिति भावः॥

नायिकासखी नायकं वक्ति—

सा श्यामा तन्वङ्गी दहता शीतोपचारतीव्रेण।
विरहेण पाण्डिमानं नीता तुहिनेन दूर्वेव॥ ६३२॥

सेति। अत्र संबुद्धिपदानुपादानं नायकविषयकक्रोधवत्तामावेदयति। श्यामा षोडशवार्षिकी। पक्षे श्यामवर्णा। कृशाङ्गी। पक्षे स्थूलेतरा। सा नायिका दहता शीतोपचारेण तीव्रः। अधिक इत्यर्थः। तेन। विरहेण दूर्वा हिमेनेव पाण्डुतां नीता। एवं च त्वद्विरहखिन्ना सा त्वयानुग्राह्येति व्यज्यते॥

'सा पतिमात्रानुरागिणी कथं त्वया सह मया संगमनीया' इति वादिनीं सखीं नायको वक्ति—

सुनिरीक्षितनिश्चलकरवल्लभधाराजलोक्षिता न तथा।
सोत्कम्पेन मया सखि दृष्टा सा माद्यति स्म यथा ॥ ६३३ ॥

सुनिरीक्षितेति। हे सखि। सा उत्कृष्टकम्पसहितेन। एतस्याः पतिर्द्रक्ष्यतीति धियेति भावः। सोत्कम्पेनेत्यनेन सेके चमत्कारपूर्वकत्वाभावो व्यज्यते। मया सिक्ता। जलेनेति भावः। यादृग्घृष्यति स्म, मत्ता बभूवेति वा, तादृक्सुष्ठु समीचीनविलोकनकारी निश्चलहस्तो यः प्रियतमस्तेन धाराजलसिक्ता न माद्यति स्म। सुनिरीक्षितेत्यादिना सेके चमत्कारपूर्वकत्वमावेद्यते। एवं च सा मय्यनुरक्तेति विज्ञायते। अतः सा त्वया मया सह संगमनीयेति व्यज्यते॥

दूती नायिकां वक्ति—

सखि मोघीकृतमदने पतिव्रते कस्तवादरं कुरुते।
नाश्रौषीर्भगवानपि स कामविद्धो हरः पूज्यः ॥ ६३४ ॥

सखीति। हे सखि। एवं च हितोपदेशार्हत्वं ध्वन्यते। निष्फलीकृतमन्मथे, पतिमात्रानुरागिणि, तवादरं कः कुरुते। न कोऽपीत्यर्थः। अमुमेवार्थमर्थान्तरन्यासेन द्रढयति—भगवानपि स हरः शिवश्चतुर्दशी कामस्त्रयोदशी तद्वेधवान्पूज्यः। एवं च केवलस्य पूजानर्हत्वेऽपि तदभावेन कामविद्धतयैव पूजार्हता हरस्य तत्र का वार्तान्यस्येति भावः। एवं च यत्राचेतनरूपस्य शिवचतुर्दशीदिवसस्यापि कामाभिधानत्रयोदशीविद्धतयैव पूज्यताभिधानं धर्मशास्त्रे तत्र का वार्ता सचेतनस्य लोक इति व्यज्यते॥

नायको नायिकां वक्ति—

सा मयि न दासबुद्धिर्न रतिर्नापि त्रपा न विश्वासः।
हन्त निरीक्ष्य नवोढां मन्ये वयमप्रिया जाताः ॥ ६३५ ॥

सेति। हन्त खेदे। नवोढां दृष्ट्वा वयमप्रिया जाता इत्यहं मन्ये। यतो मयि। इदमप्रेऽप्यन्वेति। सा दासबुद्धिर्न। पूर्वं यथा मय्यनुग्रहस्तथा नाधुनेत्यर्थः। सा रतिः प्रीतिर्न। पूर्ववत्प्रीतिर्नेत्यर्थः। सा। मन्मथविकारजेति भावः। लज्जा न। पूर्वं प्रियतमोऽयमिति बुद्ध्यान्यसमक्षं लज्जां कुर्वती स्थितेदानीं तद्बुद्ध्यभावात्तदभाववती वृत्तेति भावः। क्वचित् 'नापत्रपा' इति पाठः। स विश्वासो न। यद्वा नायिका सखीं वक्ति—हे सखि, सा दासबुद्धिर्मयि न। यथा पूर्वं दासवदाज्ञां कुर्वन्स्थितस्तथा नाधुनेत्यर्थः। न प्रीतिः। नान्यतो लज्जा। पूर्वं मयि स्थितायामनेन कदाचिदस्या दुःखं भविष्यतीति धियान्यस्याः परिहासोऽपि न कृतः, इदानीं मामगणयित्वा निर्लज्जतया व्यवहरतीति भावः। न विश्वासः। किंचिद्वस्त्वाद्यपि मद्धस्ते नार्पयतीति भावः। अतो नवोढां वीक्ष्य वयमप्रिया जाता इत्यहं मन्ये। निरीक्ष्येत्यनेन संगमे किमनेन विधेयं तत्र विज्ञा-

यते मयेति ध्वन्यते। एवं च सपत्नीसत्त्वमात्रमप्येतादृशदुःखदं किं पुनस्तत्प्राधान्यमिति व्यज्यते॥

काचित्कांचिद्वक्ति—

सुचिरायाते गृहिणी निशि भुक्ता दिनमुखे विदग्धेयम्।
धवलनखाङ्कं निजवपुरकुङ्कुमार्द्रं न दर्शयति॥ ६३६॥

सुचिरेति। निशि भुक्ता चतुरेयं गृहिणी अत्यन्तचिरकालेनागते। प्रिय इति भावः। प्रातःकाले श्वेतनखचिह्नं स्वशरीरं कुङ्कुमार्द्रताभाववन्न दर्शयति। कुङ्कुमार्द्रमेव दर्शयतीत्यर्थः। सुचिरायात इत्यनेन नायिकायामन्यत्रासक्तिसंपादनयोग्यत्वं नायके च मन्मथविह्वलतया सम्यङ्निरीक्षणाभावेऽपि रतकारित्वमावेद्यते। गृहिणीत्यनेन स्वातन्त्र्यं तेन चान्यकर्तृकनिवारणानर्हत्वं व्यज्यते। निशीत्यनेन दर्शनानर्हत्वं नखक्षतेषु ध्वन्यते। दिनमुख इत्यनेन नखक्षतेषु दर्शनयोग्यत्वं द्योत्यते। विदग्धपदेन वञ्चनानिपुणत्वं व्यज्यते। धवलपदेन नखक्षतेषु प्राचीनत्वं धवलनखाङ्कमित्यनेन यथास्थितशरीरस्य दर्शनायोग्यत्वं ध्वन्यते। अकुङ्कुमार्द्रं न दर्शयतीत्यनेन प्राचीननखक्षतेष्वपि नवीनत्वभ्रमोदयेन प्राकृतानुचिताचरणगोपनमभिव्यज्यते। एवं चैवंविधचतुरयैवैतादृशाचरणं कर्तव्यं नान्ययेति ध्वन्यते। तेन च न त्वयेति। यद्वैतादृशरीत्यापि नायकः प्रतारयितुं शक्यः, अतो नखक्षतादिभीतिमुत्सृज्य मदुक्तमङ्गीकुर्विति दूती नायिकां वक्ति—

नायिका नायकं वक्ति—

स्तनजघनोरुप्रणयी गाढं लग्नो निवेशितस्नेहः।
प्रिय कालपरिणतिरियं विरज्यसे यन्नखाङ्क इव॥ ६३७॥

स्तनेति। हे प्रिय, स्तनजघनोरुप्रीतिमान्। पक्षे कामतन्त्रे एतत्स्थानेषु नखक्षतदानाद्यभिधानात्। अत्यर्थं लग्नः। हठालिङ्गनप्रवण इत्यर्थः। पक्षेऽत्यन्तं निखात इत्यर्थः। निवेशितस्नेहः कृतप्रीतिः। पक्षे दत्ततैलः। पीडोपशमार्थमिति भावः। एतादृशस्त्वं नखाङ्क इव यद्विरज्यसे विरक्तो भवसि। पक्षे रुधिरशून्यः। इयं कालपरिणतिः। एवं चेदानींतनकालस्यैवायमपराधो न तवेति भावः। नखाङ्कोऽपि बहुकालेन शुष्को भवति। यद्वा यद्विरज्यसे इयं कालपरिणतिरिति काक्वा चिरकालसंगतेरिदं फलमित्यर्थः। एवं च यथा यथा चिरकालीनसंगतिस्तथा तथा सतां प्रीत्युत्कर्षः खलानां पुनरन्यथाभाव इति भावः॥

नायिकादूती नायकं वक्ति—

सा विच्छाया निशि निशि सुतनुर्बहुतुहिनशीतले तल्पे।
ज्वलति त्वदीयविरहादौषधिरिव हिमवतः पृष्ठे॥ ६३८॥

सेति। विच्छायान्यादृशाङ्गकान्तिमती। पक्षे छायाशून्या। प्रकाशशालित्वादिति भावः। त्वद्विरहात्सा सुतनू रात्रौ रात्रौ बहुहिमतुल्यशैत्यशालिनि। पक्षे बहु तुहिनेन

शीतले । तल्पे हिमालयस्य पृष्ठे औषधिरिव ज्वलति । एवं च दिवा लोकभीत्या संगुप्ता तदीयवेदना न ज्ञायतेऽस्माभिर्यामिन्यां तु तदीयवेदना विज्ञायत इति व्यज्यते । हिमवत्पृष्ठोपमानेन तस्याः कोमलतल्पोऽपि कार्कश्यमाविष्करोतीति व्यज्यते ॥

नायिकासखी नायकं वक्ति—

सा नीरसे तव हृदि प्रविशति निर्याति न लभते स्थैर्यम् ।
सुन्दर सखी दिवसकरबिम्बे तुहिनांशरेखेव ॥ ६३९ ॥

सेति । हे सुन्दर । एवं चासक्तियोग्यत्वं ध्वन्यते । यद्वा सुन्दरसखीत्येकं पदम् । नीरसे । रसः प्रीतिः । पक्षे तेजोमयत्वान्नीरसत्वम् । तव हृदि सा सुन्दरी सूर्यबिम्बे चन्द्ररेखेव प्रविशति, निर्याति, स्थैर्यं न लभते । एवं चास्थिरप्रकृतिस्त्वमेवासीति व्यज्यते ॥

काचित्कांचिदन्योक्त्या वक्ति—

सुकुमारत्वं कान्तिर्नितान्तसरसत्वमान्तराश्च गुणाः ।
किं नाम नेन्दुलेखे शशग्रहेणैव तव कथितम् ॥ ६४० ॥

सुकुमारत्वमिति । हे चन्द्ररेखे, सौकुमार्यं शोभात्यन्तसरसत्वमाभ्यन्तराश्च गुणा इति ते शशाङ्गीकारेणैव । अथ च शशजातीयपुरुषासक्त्या नाम निश्चयेन किं न कथितम् । अपि तु सर्वं कथितमित्यर्थः । एवं च यदि त्वयि सौकुमार्यादयो गुणाः स्युस्तदा कथमीदृशे पुरुषे समासक्तिः कृता स्यात्, अतस्त्वयि गुणा न सन्तीति व्यज्यते । अथवा शशग्रहेण । एवं चैतादृशपुरुषसंबन्धात्तव सर्वे गुणादिकमनर्थकमेव संवृत्तमिति द्योत्यते । यद्वा सौकुमार्यादि गुणवत्तया पद्मिनीत्वमावेद्यते । पद्मिनीनायिकायाः शशजातीयपुरुषयोग एव समुचित इति कामशास्त्रम् ॥

इतरगुणापेक्षया सद्वृत्तमेवाधिकतरमिति कश्चित्कंचिद्व्याजान्तरेण वक्ति—

सौरभ्यमात्रमनसामास्तां मलयद्रुमस्य न विशेषः ।
धर्मार्थिनां तथापि स मृग्यः पूजार्थमश्वत्थः ॥ ६४१ ॥

सौरभ्येति । सौगन्ध्यमात्रेच्छावतां मलयाचलवृक्षेषु । एवं च सर्वत्र सौगन्ध्यसत्त्वमिति भावः । न विशेषः । स्वेप्सितसौगन्ध्यस्य सर्वत्र सत्त्वादिति भावः । धर्मेच्छावतां तथापि सौगन्ध्यरूपसाधारणधर्मवत्त्वेऽपि पूजार्थमश्वत्थो गवेष्यः । एवं च पाण्डित्यादिगुणस्य सर्वत्रैकरूपसत्त्वेऽपि सद्भिः सद्वृत्तवत एवादरः क्रियत इति व्यज्यते ॥

कश्चित्कंचिद्वक्ति—

संवाहयति शयानं यथोपवीजयति गृहपतिं गृहिणी ।
गृहवृतिविवरनिवेशितदृशस्तथाश्वासनं यूनः ॥ ६४२ ॥

संवाहयतीति । गृहिणी । एवं च स्वाधीनत्वमावेद्यते । शयानं गृहपतिम्, न तु प्रियं

यथा संवाहयति, उपवीजयति । उपसर्गेण समीरणे मन्दत्वमावेद्यते । तेन च स्वापे सत्वरभवनयोग्यत्वम् । सदनभित्तिरन्ध्रे निवेशिता दृग्येन तस्य यूनः । एवं च स्पृहणीयत्वमावेद्यते । तथाश्वासनं भवति । एवं चैतादृशोपायनिबन्धनैस्तत्स्वापसंपादनं मत्सविधागमनहेतुभूतमिति ज्ञानादिति भावः । एवं च स्त्रीणां विश्वासः केनापि न कार्य इति व्यज्यते ॥

'कथमियं ममानादरं कुरुते' इति वादिनं कंचन वारवनितासखी वक्ति—

सत्यं स्वल्पगुणेषु स्तब्धा सदृशे पुनर्भुजंगे सा ।
अर्पितकोटिः प्रणमति सुन्दर हरचापयष्टिरिव ॥ ६४३ ॥

सत्यमिति । हे सुन्दर । एवं चेतरगुणवत्ताभावो व्यज्यते । स्वल्पगुणेषु सा स्तब्धा । न नम्रेत्यर्थः । इदं सत्यम् । प्रक्षेऽल्पमौर्व्यामित्यर्थः । सदृशे तु । स्वगुणैरिति भावः । पक्षे महत्तरत्वादिति भावः । भुजंगे खिन्ने । पक्षे सर्पे । अर्पितकोटिः । दत्तकोटिसंख्याकवसुरित्यर्थः । पक्षे दत्ताग्रभागा । हरचापयष्टिरिव प्रणमति नमस्करोति । पक्षेऽत्यन्तं नम्रीभवति । एवं च सामान्यवनितात्वेन द्रव्यमात्रेच्छयेयं स्वासदृशं नायकं न भजतीति भावः । एवं च द्रव्यवत्तामात्रेण त्वया गर्वो न विधेय इति व्यज्यते ॥

नायिकासखी नायकं वक्ति—

सर्वंसहां महीमिव विधाय तां बाष्पवारिभिः पूर्णाम् ।
भवनान्तरमयमधुना संक्रान्तस्ते गुरुः प्रेमा ॥ ६४४ ॥

सर्वंसहामिति । अत्र संबुद्धिपदानुपादानं क्रोधवत्तामावेदयति । सर्वंसहाम् । त्वत्कृतसर्वापराधसहनशीलामित्यर्थः । पक्षे तदभिधानाम् । बाष्पजलपरिपूर्णाम् । पक्षे जलपूर्णाम् । महीमिव तां विधाय तेऽयं गुरुः श्रेष्ठः । पक्षे बृहस्पतिः । प्रेमाधुना भवनान्तरम् । नायिकान्तरमित्यर्थः । पक्षे राश्यन्तरमित्यर्थः । संक्रान्तः । एवं च त्वदीयसर्वापराधसहनशीलां रुदतीमेतामतिसरलां विहायान्यत्रासक्तिं करोषीति त्वादृशोऽन्यो न दुष्टतर इति व्यज्यते । तेन च त्वयेत्थं न विधेयमिति । बृहस्पतिचलने चातिवृष्टिर्भवतीति ज्योतिःशास्त्रसिद्धान्तः ॥

कश्चित्कंचिद्वक्ति—

संभवति न खलु रक्षा सरसानां प्रकृतिचपलचरितानाम् ।
अनुभवति हरशिरस्यपि भुजंगपरिशीलनं गङ्गा ॥ ६४५ ॥

संभवतीति । सरसानां शृङ्गाररसवतीनाम् । पक्षे रसो जलम् । स्वभावचञ्चलाचरणानाम् । पक्षे चरितं वर्त्म । रक्षणं न संभवति । कुत इत्यत आह—हरशिरस्यपि । किमुतान्यत्रेति भावः । गङ्गा । एवं चैतादृशाकर्तव्यता नोचितेति व्यज्यते । भुजंगपरिशीलनम् । अथ च खिन्नसंभोगम् । अनुभवति । एवं चातिरक्षणादेः सत्त्वादेतस्याः सङ्गः कथं भविष्यतीति मनसि न कापि चिन्ता त्वया विधेयेति व्यज्यते ॥

बहुनायकावल्लभं स्वयं वाञ्छन्तीं कांचित्काचिद्व्याजान्तरेण वक्ति—

सुलभेषु कमलकेसरकेतकमाकन्दकुन्दकुसुमेषु ।
वाञ्छति मनोरथान्धा मधुपी स्मरधनुषि गुणाभावम् ॥ ६४६ ॥

सुलभेष्विति । कमलप्रभृतीनि यानि कुसुमानि तेष्वनायासलभ्येषु सत्सु मनोरथेनान्धा मधुपी मदनधनुषि मौर्वी भावम् । अथ चाप्रधानभावम् । वाञ्छति । कुसुमपदेन परिमले बहुलत्वं व्यज्यते । मधुपीपदेनाज्ञत्वं द्योत्यते । मदनधनुषीत्यनेन मदनस्याप्येतत्करणक एव जगज्जय इति प्रतिपादनेन लावण्यपुरुषार्थातिशयशालित्वं नायके व्यज्यते । तेन चानेककामिनीवल्लभत्वं द्योत्यते । एवं च सुलभसमीचीनपुरुषान्विहाय तादृशपुरुषे समासक्तौ क्रियमाणायामेतस्यातिगुणवत्कामिनीनां बाहुल्यात्तन्मध्ये एतस्या अप्रधानभाव एव स्यादिति व्यज्यते ॥

काचित्कांचिद्वक्ति—

सा लज्जिता सपत्नी कुपिता भीतः प्रियः सखी सुखिता ।
बालायाः पीडायां निदामिते जागरे वैद्यैः ॥ ६४७ ॥

सेति । वैद्यैर्बालायाः पीडायां जागरे निदानिते । एतस्याः पीडायां जागरणमेव निदानमित्यगदंकारैर्निश्चित्योक्त इत्यर्थः । सा बाला लज्जिता । सुरतादिक्रीडाज्ञानादिति भावः । सपत्नी कुपिता । कथं प्रियतमोऽस्यामेतादृशासक्तिमान्संवृत्त इति धियेति भावः । प्रियो भीतः । मत्कृतापराधज्ञानं गृहिण्या जातमिति धियेति भावः । सखी । अर्थाद्बालायाः । सुखिता । स्वसखीसौभाग्यप्राकट्यादिति भावः । एवं च भर्तृसमीपगमने सम्यगेव भवतीति व्यज्यते ॥

विदेशादागते प्रेयसि मानकारिणीं नायिकां सखी समुपदिशति—

सुचिरागतस्य संवाहनच्छलेनाङ्गमङ्गमालिङ्ग्य च ।
पुष्यति च मानचर्चां गृहिणी सफलयति चोत्कलिकाम् ॥ ६४८॥

सुचिरेति । गृहिणी अत्यन्तचिरकालागतस्य । दयितस्येति भावः । संवाहनमिषेणाङ्गमङ्गमालिङ्ग्य मानम् । अवधिदिवसानागमनसंजातमिति भावः । पुष्यति च । 'मानगर्वम्' इति पाठे सर्वो द्वन्द्वो विभाषयैकवद्भवतीत्येकवद्भावः । गर्वं स्वोत्कर्षाभिमानं पुष्यति च । उत्कण्ठां च सफलयति । सुचिरागतस्येत्यनेन संवाहनौत्कण्ठ्यौचित्यमावेद्यते । गृहिणीपदेनान्यासामीदृशी रीतिरिति व्यज्यते । एवं च या गृहिणी भवति तस्यास्त्वेतादृशी रीतिरत एतादृशानाचरणे तव गृहिणीत्वमेव न स्यादतो नायकसेवापुरःसरमेव मानादिकं विधेयमिति व्यज्यते । तेन च संवाहनच्छलेन मानसंगोपनमपि कर्तुं शक्यं सरलत्वसंरक्षणं चेति ॥

नायिकादूती नायकं वक्ति—

सा सर्वथैव रक्ता रागं गुञ्जेव न तु मुखे वहति ।
वचनपटोस्तव रागः केवलमास्ये शुकस्येव ॥ ६४९ ॥

सेति । अत्र संबुद्धिपदानुपादानं दूतीगतक्रोधमावेदयति । स च नायकापराधम् । सा मत्सखी सर्वप्रकारेणैव रक्तानुरक्ता । त्वयीति भावः । एवकारेण सर्वथान्यथा नाशङ्कनीयमिति व्यज्यते । पक्षे सर्वतो रक्तरूपवती । रागं प्रीतिम् । पक्षे लौहित्यम् । गुञ्जेव मुखे न वहति । वचनकुशलस्य । एवं च परप्रतारणनिपुणत्वमावेद्यते । पक्षे शब्दोच्चारणनिपुणस्य । तव शुकस्येवास्ये केवलं रागः प्रीतिः । पक्षे लौहित्यम् । एवं च सा सर्वात्मना त्वय्यनुरागवती परंतु केवलं न मुखेनानुरागप्रकटनं करोतीति तादृशी न काचिदन्या सरला । त्वं तु केवलं मुखेनैव प्रीतिमाविष्करोषि, अतस्तु शठ इति व्यज्यते । तेन च कथं त्वद्वचनं मया विश्वसितव्यमिति ॥

काचित्कांचिच्छिक्षयति—

सायं कान्तभुजान्तरपतिता रतिनीतसकलरजनीका ।
उषसि ददती प्रदीपं सखीभिरुपहस्यते बाला ॥ ६९० ॥

सायमिति । सायं संध्यासमये कान्तस्य भुजयोर्मध्ये पतिता । मध्यपदेन निःसारणानर्हत्वं व्यज्यते । पतितेत्यनेन तस्या नापराध इति ध्वन्यते । रत्या नीता निखिला रात्रिर्यया । एवं च कान्तभुजान्तरपतने रतेर्निवारणाशक्यतया तस्या नापराध इति भावः । प्रातःप्रदीपं ददती । राज्यपगमाज्ञानादिति भावः । उपसर्गेण बहलतैलादिदानेनेदानीमेव सायंतनसमयः संवृत्त इति ज्ञानवत्त्वमावेद्यते । सा बाला सखीभिरुपहस्यते । एवं च गृहकृत्यं यामिनोप्रथमयाम एव विधाय पश्चात्कान्तसदनं प्रविशेति ध्वन्यते ॥

नायको दूतीं वक्ति—

सा तीक्ष्णमानदहना महतः स्नेहस्य दुर्लभः पाकः ।
त्वां दर्वीमिव दूति प्रयासयन्नस्मि विश्वस्तः ॥ ६९१ ॥

सेति । हे दूति, स तीक्ष्णो मानरूपो वह्निर्यस्या एतादृशी बहुलस्य स्नेहस्य प्रीतेः । अथ च तैलस्य । पाकः परिपाको दुर्लभो भवति । दर्वीमिव त्वां प्रयासयन्गमनागमनव्यापारशालिनीं कुर्वन् । पक्षे आलोडयन् । विश्वासं प्राप्तोऽस्मि । अत्यन्तमानशालिन्यास्तस्याः स्नेहावस्थितिर्दुर्लभा परंतु त्वदीयपरिश्रमेण सा भवित्रीति भावः । एवं च त्वदेकसाध्या तत्प्रीत्यवस्थितिरिति व्यज्यते । तीक्ष्णाग्नौ बहुतरस्नेहपरिपाकोऽपि दर्वीचालनं विना दुर्लभो भवति ॥

काचित्कांचिदन्योक्त्या वक्ति—

स्नेहक्षतिर्जिगीषा समरः प्राणव्ययावधिः करिणाम् ।
न वितनुते कमनर्थं दन्तिनि तव यौवनोद्भेदः ॥ ६९२ ॥

स्नेहेति । हे दन्तिनि, तव तारुण्योद्गमः प्रीतिनाशः, जेतुमिच्छा, प्राणनाशावधिः सङ्ग्रामः, इति कमनर्थं गजानां न वितनुते । अपि तु सर्वम् । एवं च त्वन्निमित्तं तरुणानां परस्परं स्नेहनाशादि भवतीति व्यज्यते । तेन च त्वमत्यन्तसुभगेति ॥

काचित्कांचिद्वक्ति—

सदनादपैति दयितो हसति सखी विशति धरणिमिव बाला।
ज्वलति सपत्नी कीरे जल्पति मुग्धे प्रसीदेति ॥ ६९३ ॥

सदनादिति। मुग्धे, प्रसीदेति शुके जल्पति सति प्रियो गृहाद्गच्छति। गृहिणीक्रोधभयादिति भावः। सखी हसति। कथमिदानीं मत्सख्यधीनतामापन्न इति धियेति भावः। तोषादिति वा भावः। बाला। एवं च लज्जायोग्यत्वं व्यज्यते। धरणिमिव विशति। लज्जावशादिति भावः। सपत्नी ज्वलति। द्वेषवशान्मानवशाद्वेति भावः। एवं चैतादृशाचरणमत्यन्तं सम्यगिति व्यज्यते॥

नायको वक्ति—

संकुचिताङ्गीं द्विगुणांशुकां मनोमात्रविस्फुरन्मदनाम्।
दयितां भजामि मुग्धामिव तुहिन तव प्रसादेन ॥ ६९४ ॥

संकुचितेति। हे हिम, तव प्रसादेन संकुचिताङ्गीं द्विगुणवस्त्रां चित्तमात्रे विस्फुरन्मदनो यस्यास्तां दयितां मुग्धामिव भजामि। एवं च यद्वशात्प्रौढापि नवोढेव भवतीति व्यज्यते। तेन च त्वत्तुल्यो नान्यः कश्चिन्मदुपकर्तेति। नवोढाप्यङ्गसंकोचादिमती भवति॥

दूती नायिकां वक्ति—

सखि लग्नैव वसन्ती सदाशये महति रसमये तस्य।
वाडवशिखेव सिन्धोर्न मनागप्यार्द्रतां भजसि ॥ ६९५ ॥

सखीति। हे सखि। एवं च हितोपदेशार्हत्वं ध्वन्यते। तस्य महति प्रशस्ते। एवं चान्यकृतापराधसंगोपनकारित्वं द्योत्यते। पक्षे गभीरे। रसमये प्रीतिप्रचुरे। पक्षे रसो जलम्। आशयेऽन्तःकरणे। पक्षेऽभ्यन्तरे। सिन्धोराशये वडवाग्निरिव निरन्तरं लग्नैव वसन्ती मनागप्यार्द्रतां स्निग्धताम्। पक्षे सजलतां न भजसि। एवं च स तु त्वय्यत्यन्तमासक्तः, त्वं तु रूक्षतामेव भजसीत्यनुचितं तवेदमिति ध्वन्यते॥

नायिका दूतीं वक्ति—

सखि मिहिरोद्गमनादिप्रमोदमपिधाय सोऽयमवसाने।
वन्ध्योऽवधिवासर इव तुषारदिवसः कदर्थयति ॥ ६९६ ॥

सखीति। हे सखि। एवं चैतादृशसंबुद्ध्या तुष्टा झटिति कार्यं करिष्यतीत्यतो दूतीपदानुपादानम्। सूर्योद्गमनप्रभृति सुखमाच्छाद्य। 'मिहिरोदयसमयप्रमोदम्' इति क्वचित्पाठः। वन्ध्यो निष्फलः। नायकागमनाभावात्। अवधिवासर इव सोऽयं हिमदिवसः समाप्तौ कदर्थयति। यथावधिदिवसे प्रातरवायास्यति दयित इत्यानन्दः सायं च प्रियतमानागमे प्रातःकालीनसुखोपमर्देनात्यन्तं दुःखं भवति तथा हिमदिवसे प्रातः सूर्यरश्मिभिः संजातं सुखं दूरीकृत्य सायंतनसमये शीतदुःखमत्यन्तं भवतीति भावः। एवं च रात्रि-

रियमत्यन्तदीर्घा नैकाकितयातिवाहयितुं शक्येत्यतः संयोजयान्यनायकेन मामिति ध्वन्यते । यद्वा तुषारदिवस इवावधिदिवसोऽवसाने कदर्थयति । एवं चैतावत्कालं मया प्राणा निरुद्ध्य स्थापिताः, इदानीं दयितानागमननिर्णये नैते मया निरोद्धुं शक्या अत एतद्रक्षणं यथा भवति तथा यतस्वेति सखीं प्रत्युक्तिः । एवं चाग्रेऽन्यादृशाचरणे नाहं भवत्या निषेधनीयेति व्यज्यते ॥

दूती नायिकां वक्ति—

सुरभवने तरुणाभ्यां परस्पराकृष्टदृष्टिहृदयाभ्याम् ।
देवार्चनार्थमुद्यतमन्योन्यस्यार्पितं कुसुमम् ॥ ६९७ ॥

सुरेति । परस्पराकृष्टदृष्टिचित्ताभ्याम् । 'चक्षूरागः प्रथमं तदनु चित्तासङ्गः' इत्युक्त्वात्प्रथमं दृष्ट्युपादानम् । तरुणाभ्यां देवालये देवपूजार्थमुद्यतं कुसुमं परस्परस्यार्पितम् । सुरभवन इत्यनेनावश्यकधर्माधर्मविवेककरणौचित्यमावेद्यते । जनसंमर्दो वा । तेन च तदगणनेन साहसातिशयः । देवार्चनार्थमुद्यतमित्यनेन मनुष्यादेर्दातुमयुक्तमित्यावेद्यते । तेन च परलोकभ्रंशभीतिशून्यत्वम् । कुसुममित्येकवचनेन बहूनां कुसुमानां सत्त्वेऽन्येनापि देवार्चनस्य संपादयितुं शक्यतया न तथा दोषः, तदभावे चैतादृशाचरणेऽत्यन्तमज्ञत्वं व्यज्यते । तेन च प्रीत्यतिशयः । एकवचनमविवक्षितमिति ऋजवः । एवं चैतादृशी रीतिः, अतस्त्वयापि भीतिमुत्सृज्य यथेष्टाचरणं विधेयमिति ध्वन्यते ॥

संजातोऽयं संकेतकाल इति काचित्कांचिद्वक्ति—

सायं कुशेशयान्तर्मधुपानां निर्यतां नादः ।
मित्रव्यसनविषण्णैः कमलैराक्रन्द इव मुक्तः ॥ ६९८ ॥

सायमिति । सायं निर्गच्छताम् । भाविकमलसंकोचभियेति भावः । मधुपानाम् । एवं चोन्मत्तत्वं ध्वन्यते । कमलान्तर्नादो मित्रस्य सूर्यस्य । विकासकत्वान्मित्रत्वम् । व्यसनमतस्तेन खिन्नैः कमलैराक्रन्द इव मुक्तः । एवं च नायकः संकेतोत्सवेन वयस्यैः सह मधु पीत्वा कामबाधाव्यसनमनुप्राप्त आस्ते, इदं तु मित्रदुःखदुःखितैस्तद्वयस्यैरेवाभिहितम्, अतस्त्वरय संकेतकाल एव झटिति तत्र गन्तुमिति व्यज्यते ॥

नायको वक्ति—

सुमहति मन्युनिमित्ते मयैव विहितेऽपि वेपमानोरुः ।
न सखीनामपि रुदती ममैव वक्षःस्थले पतिता ॥ ६९९ ॥

सुमहतीति । मयैव । एवं च नान्यस्यापराध इति व्यज्यते । अत्यन्तमहत्तरे मन्युकारणे विहितेऽपि कम्पमानोरू रुदती ममैव हृदयस्थले । स्थलपदं विशालतां गमयति । यद्वा कृत्रिममपि समाधानं न कृतं मयेति व्यज्यते । सुता । न सखीनामपि । सखीपदं वक्षःस्थलस्वापयोग्यतां गमयति । अपिस्तस्मिन्नावश्यकतामावेदयति । यद्वा न सखीनामपि । सपत्नीनामित्यर्थः । समक्षमित्यध्याहारः । मयैव मन्युनिमित्ते विहितेऽपीत्यादि

प्राग्वत् । एवं च सपत्नीसमक्षकृतापराधस्यातिदुःखदत्वमिति भावः । अथवा सखीनामपि । अपिर्नायिकां समुच्चिनोति । मन्युनिमित्ते मयैव विहिते मम वक्षःस्थल एव न पतितेति काकुः । स्थल एवेत्यनेनात्यन्तसरलत्वं व्यज्यत इत्यर्थः । एवं च मदङ्गनातुल्या नान्याङ्गनेति ध्वन्यते ॥

काचित्कंचिद्वक्ति—

सुभग व्यजनविचालनशिथिलभुजाभूदियं वयस्यापि ।
उद्वर्तनं न सख्याः समाप्यते किंचिदपगच्छ ॥ ६६० ॥

सुभगेति । हे सुभग । एतादृशाङ्गनासमासक्तिमत्त्वादिति भावः । इयं वयस्यापि । एवं च दास्यादेः का वार्तेति भावः । व्यजनस्य विशेषचालने शिथिलहस्ताभूत् । एवं च शनैर्व्यजनचालने न किमपि भवतीति भावः । सख्या उद्वर्तनं न समाप्यते । सात्त्विकभावरूपस्वेदातिशयादिति भावः । किंचिदितोऽपसर । किंचिदित्यनेन दूरगमने दुःखं सख्या भविष्यतीति ध्वन्यते । एवं चेयमत्यन्तं त्वय्यासक्तेति ॥

नायिकासखी नायकं वक्ति—

सव्रीडा नखरदनार्पणेषु कुपिता प्रगाढमचिरोढा ।
बहुयाच्याचरणग्रहसाध्या रोषेण जातेयम् ॥ ६६१ ॥

सव्रीडेति । सलज्जा प्रगाढं नखक्षतदन्तक्षतेषु । कृतेष्वित्यर्थः । कुपितेयं नवोढा । एवं च नखक्षतादिना कोपौचित्यं ध्वन्यते । रोषेण । त्वदीयेनेत्यर्थः । बहुचाटवचनप्रणिपातसमाधेया जाता । एवं च नवोढात्वेन दन्तक्षताद्यसहनेन कुपितायां नायिकायां तव क्रोधकरणमनुचितमिति भावः । एवं चेदानीं चाटुवचनादिनास्याः कोपमपनय त्वमिति व्यज्यते । तेन च तवैवायमपराध इति ॥

कश्चित्कंचिद्वक्ति—

सुगृहीतमलिनपक्षा लघवः परभेदिनः परं तीक्ष्णाः ।
पुरुषा अपि विशिखा अपि गुणच्युताः कस्य न भयाय ॥६६२॥

सुगृहीतेति । सम्यग्गृहीतो दुष्टानां पक्षोऽङ्गीकारो यैः । स्वित्यनेन त्यागानर्हत्वं व्यज्यते । तेन चोपदेशानर्हत्वम् । पक्षे झटिति निष्कासनानर्हश्यामपक्षवन्त इत्यर्थः । लघवो नीचाः । पक्षेऽल्पपरिमाणवन्त इत्यर्थः । परान्भेदयन्ति ते । अन्येषां परस्परभेदजननेन कलहप्रवर्तका इत्यर्थः । पक्षे इतरच्छेदकारकाः । तीक्ष्णाः । क्रूरकर्माण इत्यर्थः । पक्षे यथाश्रुतम् । पुरुषा अपि बाणा अपि गुणच्युताः साधुत्वादिगुणहीनाः । पक्षे गुणो ज्या । कस्य न भयाय । अपि तु सर्वस्य भयायेति भावः । एवं चैतादृशपुरुषसंगतिकरणमनुचितमिति व्यज्यते ॥

दुष्टस्य किमपि कर्म न सम्यक्फलायेति कश्चिद्वक्ति—

स्वकपोलेन प्रकटीकृतं प्रमत्तत्वकारणं किमपि ।
द्विरदस्य दुर्जनस्य च मदं चकारैव दानमपि ॥ ६६३ ॥

स्वेति । स्वस्य कपोलेन प्रकटीकृतम् । दानस्य ततोऽप्युत्पत्तेरिति भावः । अथ च स्वमुखेनाभिहितं मया दानं कृतमिति । किमप्यनिर्वचनीयं प्रकृष्टमत्तत्वकारणम् । दानमपि । अपिनान्यकर्मणः का वार्तेति भावः । गजस्य खलस्य च मदमेव चकार । एवं च खलसंगतिरनुचितेति व्यज्यते ॥

नायकस्य मौर्ख्यादियमपि मूढेवेति मन्वानमुपपतिं दूती वक्ति—

सत्यं पतिरविदग्धः सा तु स्वधियैव निधुवने निपुणा ।
मार्त्तिकमाधाय गुरुं धनुरधिगतमेकलव्येन ॥ ६६४ ॥

सत्यमिति । पतिरचतुर इदं सत्यम् । अत एव पतिपदं साभिप्रायम् । सा तु स्वबुद्ध्यैव सुरते निपुणा । एनमेवार्थमर्थान्तरन्यासेन द्रढयति—मृत्स्वरूपं गुरुं संस्थाप्यैकलव्यनाम्ना निषादेन धनुरधिगतम् । एवं च 'उपदेशक्रमो राम व्यवस्थामात्रपालनम् । ज्ञानेस्तु कारणं तात शिष्यप्रज्ञैव केवलम् ॥' इति वसिष्ठवचनात् । मार्त्तिकं द्रोणाचार्यं विधायैकलव्येन धनुर्विद्याभ्यस्तेति भारते । एवं च तस्यामचातुर्यं नाशङ्कनीयं त्वयेति ध्वन्यते ॥

नायकदूती नायिकां वक्ति—

सौभाग्यमानवान्स त्वयावधीर्यापमानमानीतः ।
स्वं विरहपाण्डिमानं भस्मस्नानोपमं तनुते ॥ ६६५ ॥

सौभाग्येति । सौभाग्याभिमानवान्स त्वयावगणय्यापमानं प्रापितः । भस्मस्नानसदृशं स्वं स्वकीयं विरहपाण्डिमानम् । क्वचित् 'तव' इति पाठः । तनुते । यथा कश्चिदभिमानी अवगणितः सर्वाङ्गे भस्म संप्लाव्य सर्वं परित्यज्य दुःखवशात्तिष्ठति तथायं त्वद्विरहरूपभस्मस्नानं करोति, अत एनं प्रसन्नीभूयाङ्गीकुर्विति व्यज्यते ॥

काचित्कांचिद्वक्ति—

सखि मम करञ्जतैलं बहुसंदशं प्रहेष्यसीत्युदिता ।
श्वशुरगृहगमनामिलितं बाष्पजलं संवृणोत्यसती ॥ ६६६ ॥

सखीति । हे सखि । एवं चोपदेशार्हत्वं व्यज्यते । बहूनां संदेशो यत्र । बहुतरैरागिप्रार्थ्यमानमित्यर्थः । एवं चावश्ययाचनीयत्वप्रेषणीयत्वे व्यज्येते । अथ च बहुतरकामुकसंकेतविषयमित्यर्थः । एवंविधं करञ्जतैलं प्रहेष्यसीत्युक्ता श्वशुरसदनगमनावसरसंजातबाष्पजलमसती संवृणोति । एवं च तत्रापि मया करञ्जवृक्षसंकेतं विधाय कामुकस्त्वदर्थं प्रेषणीय इति न कापि त्वया चिन्ता विधेयेति ध्वन्यते । एवं च गृहपदं सार्थकम् । बहूनां सम्यग्देशरूपमित्यनेन निगूढतया यथेच्छसुरतयोग्यत्वं ध्वन्यते ॥

कथं मयैतादृशसमये समागन्तुं शक्यमित्याशङ्क्य दूती नायिकां वक्ति—

संदर्शयन्तिं सुन्दरि कुलटानां तमसि विततमषिकल्पे।
मौलिमणिदीपकलिका वर्तिनिभा भोगिनोऽध्वानम् ॥ ६६७ ॥

संदर्शयन्तीति। हे सुन्दरि, विततमषीतुल्ये तमसि मस्तकमणय एव दीपकलिका येषां ते वर्तितुल्या भोगिनः सर्पाः कामुकाश्च मार्गं सम्यग्दर्शयन्ति। एवं च सर्पफणामणिसंजातप्रकाशेनैव तवाध्वज्ञानं भविष्यतीत्यतो मार्गज्ञानाभावशङ्कामपास्य कार्यं साधयेति ध्वन्यते। अथवा नायका एव मस्तकस्थमणिप्रकाशैर्मार्गमादर्शयन्तोत्यनेन नातः परं मयात्रागन्तव्यं किं तु नायक एव त्वामागत्य संकेतं प्रापयिष्यतीति ध्वन्यते॥

दुष्टस्योत्कर्षेऽन्येषां क्लेशवत्त्वेव भवतीति कश्चित्कंचिदन्योक्त्या वक्ति—

सर्वं वनं तृणाल्या पिहितं पीताः सितांशुरविताराः।
प्रध्वस्ताः पन्थानो मलिनेनोद्गम्य मेघेन ॥ ६६८ ॥

सर्वमिति। मलिनेन मेघेनोद्गम्य सर्वं वनं वनस्थलं तृणपङ्क्त्याच्छादितम्। सितांशुरविताराः पीता आच्छादिताः। मार्गाः प्रध्वस्ताः। वनमित्यनेन विश्रान्तिदातृत्वप्रतिपादनात्सितांशुरित्यनेन सौम्यत्वव्यञ्जनाद्रविरित्यनेन निखिलकर्मप्रवर्तकत्वध्वननात्तारयन्तीति व्युत्पत्त्या तारा इत्यनेन सद्बुद्धिदातृत्वद्योतनात्पन्थान इत्यनेनावश्यरक्षणीयत्वदर्शनादेतादृशपुरुषापकारकरणादसमीचीनत्वाविष्करणेन दुष्टपुरुषोदयाशंसनमप्यनुचितं किं पुनस्तत्संपादनमिति व्यज्यते॥

झटिति मन्त्रो न प्रकाश्य इति कश्चित्कंचिद्वदति—

सम्यगनिष्पन्नः सन्योऽर्थस्त्वरया स्वयं स्फुटीक्रियते।
स व्यङ्ग एव भवति प्रथमो विनतातनूज इव ॥ ६६९ ॥

सम्यगिति। सन्। समीचीनोऽपीत्यर्थः। सम्यक्संपूर्णमसंजातो योऽर्थस्त्वरया स्वयं प्रकटीक्रियते। स्वयमित्यनेनान्येन प्रकटीकरणे मिथ्यैवायं वक्ति नास्माभिरेवं विचारितमिति समाधातुं शक्यमित्याक्षिप्यते। आद्यो विनतायां गरुडजनन्यास्तनूजोऽरुणस्तद्वत्स व्यङ्ग एव। एवकारेणान्यथाबुद्धिकरणानर्हत्वं ध्वन्यते॥

कश्चित्कंचिद्वक्ति—

सज्जन एव हि विद्या शोभायै भवति दुर्जने मोघा।
न विदूरदर्शनतया कैश्चिदुपादीयते गृध्रः ॥ ६७० ॥

सज्जनेति। समीचीनजन एव विद्या शोभार्थं भवति। फलदा भवतीत्यर्थः। दुर्जने निष्फला। अमुमेवार्थमर्थान्तरन्यासेन द्रढयति—अत्यन्तदूरदर्शित्वेन गृध्रः कैश्चिन्नोपादीयते। एवं च विद्यावत्त्वेऽपि त्वया दुर्जनत्वं न विधेयमिति व्यज्यते। एवकारेणैव न दुर्जन इत्यर्थप्रतीतौ दुर्जनेत्यादि निरर्थकमिवाभाति। यद्वा शोभायैवेति योजना। विद्या

सज्जने शोभाप्रदा न धनप्रदेत्यर्थः । दुर्जने मोघा फलत्वावच्छिन्नाजनिका । शोभाप्रदापि नेत्यर्थः । अथवा सज्जने विद्यैव शोभायै फलप्रदा न त्वविद्येत्यर्थः । दुर्जने विद्यैव मोघा निष्फला न त्वविद्येत्यर्थः ॥

समीचीनस्वनायक एव रुचिरुचितेति वादिनीं कांचित्काचिद्वक्ति—

सुभगं वदति जनस्तं निजपतिरिति नैष रोचते मह्यम् ।
पीयूषेऽपि हि भेषजभावोपनते भवत्यरुचिः ॥ ६७१ ॥

सुभगमिति । जनः । एवं च सर्वैकवाक्यत्वमावेद्यते । तं सुभगं वदति । मह्यं निजपतिरिति हेतोरेष पतिर्न रोचते । अमुमेवार्थमर्थान्तरन्यासेनाह—भेषज भावापन्नेऽमृतेऽपि निश्चयेनारुचिर्भवति । एवं च निजपतित्वमेव दोष इति भावः । एवं च पतिपदमर्थवत् । अत्र न रोचते इति प्रागभिधानादग्रेऽपि रुचिर्न भवतीत्येवं युक्तमित्याभाति । अरुचिपदाद्द्वेषवत्वप्रतीतेः ॥

त्वत्कटाक्षविक्षेपाक्षिप्तः क्षणमपि न त्वां विना धृतिं लभत इति नायकदूती नायिकां वक्ति—

सौधगवाक्षगतापि हि दृष्टिस्तं स्थितिकृतप्रयत्नमपि ।
हिमगिरिशिखरस्खलिता गङ्गैवैरावतं हरति ॥ ६७२ ॥

सौधेति । सौधगवाक्षगतापि ते दृष्टिः स्थितौ । धैर्यस्येति भावः । पक्षे गतिनिवृत्तौ । कृतः प्रयत्नो येन तमपि हीति निश्चयेन हिमाचलशिखरात्स्खलिता गङ्गा ऐरावतमिव हरति । सौधस्य हिमगिरिशिखरसाम्येनात्युच्चत्वं दुष्प्राप्यत्वं च व्यज्यते । एवं च स त्वयानुग्राह्य इति ध्वन्यते ॥

गृहिणीसत्त्वान्न त्वया सह संगतिर्मम चिरस्थायिनीति वादिनीं नायिकां नायको वक्ति—

सहधर्मचारिणी मम परिच्छदः सुतनु नेह संदेहः ।
न तु सुखयति तुहिनदिनच्छत्रच्छायेव सज्जन्ती ॥ ६७३ ॥

सहेति । हे सुतनु । एवं च स्पृहणीयत्वं व्यज्यते । मम सहधर्मचारिणी परिच्छदः कुटुम्बकम् । अन्नाच्छादनादिनोपकरणीयेति भावः । इह न संदेहः । तु पुनः सज्जन्ती सेवातत्परा । पक्षे सज्जीभवन्ती । शीतदिवसीयच्छत्रच्छायेव न सुखयति । एवं च सा केवलं कुटुम्बिनीमात्रं त्वं तु रतिसुखदेत्यतस्त्वया सह मत्संगतिश्चिरमवस्थायिनीति व्यज्यते ॥

दुष्टसंपर्कात्त्वन्निकटे न केऽपि समीचीनाः समायान्तीति कश्चित्कंचिदन्योक्त्या वक्ति—

सकलगुणैकनिकेतन दानववासेन धरणिरुहराज ।
जातोऽसि भूतलें त्वं सतामनादेयफलकुसुमः ॥ ६७४ ॥

सकलेति । हे निखिलगुणैकस्थान भूरुहराज, दानववसत्या त्वं भूतले समीचीनानां न आह्याणि फलकुसुमानि यस्यैतादृशो जातोऽसि । भूतले त्वमित्यनेन नान्ये महीरुहा एतादृशाः किं तु त्वमेवेति भावः । एवं चैतादृशदुष्टसंगत्या सजातीयवृद्धमध्ये त्वया प्रतिष्ठा न विधेयेति व्यज्यते ॥

नायको नायिकां वक्ति—

सुन्दरि ताटङ्कमयं चक्रमिवोद्वहति तावके कर्णे ।
निपतति निकामतीक्ष्णः कटाक्षबाणोऽर्जुनप्रणयी ॥ ६७९ ॥

सुन्दरीति । हे सुन्दरि, त्वदीये कर्णे ताटङ्कस्वरूपं चक्रमिवोद्वहति धारयति सति । पक्षे ऊर्ध्वं करोति सति । अत्यन्ततीक्ष्णोऽर्जुनप्रणयी । कृष्ण इत्यर्थः । शुष्क इति वा । पक्षे पाण्डुसुतार्जुनप्रेरित इत्यर्थः । कटाक्षरूपो बाणः । नायकचित्तापहरणादिति भावः । पक्षे तत्तुल्यः । एवं चाकर्णान्तविशाललोचना त्वमसीत्यन्यथासिद्धकुतूहलेन मानापनोदनमभिव्यज्यते । सूर्याराधनसंजातकुन्तीतनयकर्णोऽपि यदा महीगिलितरथचक्रं निष्कासितुमुपक्रान्तवांस्तदार्जुनेन बाणेन ताडित इति पुराणम् ॥

भाग्यादिकं समीचीनमित्रस्य नास्तीति चिन्ताव्याकुलं कंचन कश्चिद्वक्ति—

स्वाधीनैव फलर्द्धिर्जनोपजीव्यत्वमुच्छ्रयच्छाया ।
सत्पुंसो मरुभूरुह इव जीवनमात्रमाशास्यम् ॥ ६७६ ॥

स्वेति । मरुभुवि रोहतीति मरुभूरुहस्तस्येव मरुदेशीयवृक्षस्येव समीचीनपुरुषस्य फलं द्रव्यादि । पक्षे यथाश्रुतम् । तस्य समृद्धिः स्वाधीनैव । इदमग्रेऽपि लिङ्गविपरिणामेनान्वेति । जनानामुपजीव्यत्वम् । अन्नादिदातृत्वात् । पक्षे फलादिप्रदानात् । अधिका छाया । इतरदुःखनिवारकत्वमित्यर्थः । पक्षे यथाश्रुतम् । जीवनमायुः । पक्षे जलम् । तदेवाशास्यम् । कर्कशदेशवसतिमानेवमर्थेन मरुभूरुह इत्यपि सत्पुंसो विशेषणम् । एवं चायुष्ये सर्वमपि भवत्येवेत्यतस्त्वया न कापि जीवतस्तस्य चिन्ता विधेयेति ध्वन्यते ॥

संपत्तिसंपन्नस्तव पतिः संवृत्त इति वादिनीं नायिका सखीं वक्ति—

संतापमोहकम्पान्संपादयितुं निहन्तुमपि जन्तून् ।
सखि दुर्जनस्य भूतिः प्रसरति दूरं ज्वरस्येव ॥ ६७७ ॥

संतापेति । हे सखि, ज्वरस्येव दुर्जनस्य भूतिरैश्वर्यम् । पक्षे भवनं भूतिः । संतापमोहकम्पान्सम्यगुत्पादयितुं जन्तूनितरां हन्तुमपि दूरं प्रसरत्यधिकतरा भवति । एवं चैतस्य संपत्तौ जातायां सपत्न्यादिसंपादनेन दुःखम्, किमस्याग्रे भविष्यतीति चिन्ताबाहुल्येन मौढ्यम्, समधिकक्रोधकरणेन कम्पम्, दण्डदानेन चास्माकं प्राणविश्लेषमेवैतदैश्वर्यं करिष्यति न परं सुखलेशमपीति व्यज्यते । ज्वरोत्पत्तावपि संतापादिकमतितरां भवतीति चायुर्वेदे ॥

विद्यैवाभ्यसनीया त्वयेदानीं न द्रव्ये मनः कर्तव्यमिति कश्चित्कंचिद्वक्ति—

सुखयतितरां न रक्षति परिचयलेशं गणाङ्गनेव श्रीः।
कुलकामिनीव नोज्झति वाग्देवी जन्मजन्मापि ॥ ६७८ ॥

सुखयतीति। श्रीर्वैश्येवातिशयेन सुखयति। परिचयलेशं न रक्षति। सरस्वती कुलकान्तेव जन्मजन्मापि न त्यजति। एवं च विद्याभ्यास आवश्यक इति भावः॥

नायिका सखीं वक्ति—

स्वसदननिकटे नलिनीमभिनवजातच्छदां निरीक्ष्यैव।
हा गृहिणीति प्रलपंश्चिरागतः सखि पतिः पतितः ॥ ६७९ ॥

स्वेति। हे सखि, स्वसदनसविधे। एवं च च्छदग्रहणयोग्यत्वं ध्वन्यते। कमलिनीं नूतनसंजातदलाम्। एवं च पूर्वपत्राभावो नायिकाविरहनिबन्धन एवेति ध्वन्यते। दृष्ट्वैव। एवं च प्रश्नाद्यकरणेनातिशयितधैर्यमावेद्यते। तत्कालमागतः। एवं च चिरप्रवासाभावेन तथाविधविरहाद्ययोग्यत्वेऽपि तदज्ञानेनात्यन्तासक्तिरावेद्यते। हा गृहिणि, इति प्रलपन्। संपूर्णवाक्यानभिधानं च दुःखोद्रेकमावेदयति। पतिः। प्राणेभ्योऽपि मयि स्नेहवानित्यर्थः। पतितः। मूर्छयेति भावः। यद्वा हे सखि, निलयनिकटे न तुं निलये। एवं चातिविरहयोग्यत्वं ध्वन्यते नायिकायाम्। यद्वा निलयनिकट इत्यनेन दर्शनयोग्यत्वं तेन चावश्योच्छेदनीयत्वमावेद्यते। अभिनवानां नूतनानाम्। अर्थात्पत्राणाम्। जातः समूहो यत्र। एतादृशानि च्छदानि। अर्थात्पुराणानि। यस्यां सा तां नलिनीं निरीक्ष्यैवाचिरागतः पतिर्हा गृहिणि, इति प्रलपन्पतितः। एवं च मत्प्रस्थितौ नियतमेषा विरहमसहमाना जीवनवती प्राचीननवीनदलसमृद्धिशालिनीं नलिनीं विहन्यादेव। न चेयं व्याहृता। तेन न जीवतीयमिति नलिनीदर्शनसमसमयमेव निश्चयेन मूर्छित इति ध्वन्यते। अचिरागत इत्यनेनैतादृशसंभावनानर्हत्वं तथापि तत्करणेनात्यन्तनायिकासक्तिमत्त्वं नायके व्यज्यत इत्यर्थः। एवं चैतादृशो नायकोऽन्यस्या नेति भावः। क्वचित् 'नलिनीदलानि मलिनानि वीक्ष्यैव' इति पाठः॥

नायकसखी नायिकां वक्ति—

सखि चतुराननभावाद्वैमुख्यं क्वापि नैव दर्शयति।
अयमेकहृदय एव द्रुहिण इव प्रियतमस्तदपि ॥ ६८० ॥

सखीति। हे सखि। एवं च सत्यवादार्हत्वं ध्वन्यते। अयम्। एवं चान्येषामन्यादृशी गतिरिति भावः। प्रियतमो विधातेव चतुराननभावात्सुमुखत्वात्। चातुर्यवत्त्वादिति यावत्। पक्षे चतुर्मुखत्वात्। क्वापि वैमुख्यम्। विरसत्वमित्यर्थः। पक्षे मुखाभाववत्त्वं नैव दर्शयति। दर्शयत्येव नेत्यपि योजना। चतुराननभावादेवेत्यन्वयः। एवं च न चेतसः सकाशादिति भावः। तदपि तथापि एकस्याम्। त्वयीति भावः। हृदयं यस्यैतादृशः। एवं चान्यासु चातुर्यवशादासक्तिं प्रदर्शयति वास्तवं तु त्वय्येवासक्तिरिति व्यज्यते।

धातुरपि चतुर्मुखत्वेऽपि हृदयस्यैकत्वात्। यद्वा त्वत्प्रियतमः सर्वसपत्नीषु समबुद्धिरिति वादिनीं सखीं नायिका वक्ति—एवं च मय्येवासक्तिस्तस्य नान्यत्रेति ध्वन्यते ॥

सुन्दरत्वादिगुणयुक्तः कथं न पराङ्गनासक्त इति तर्कयन्तीं नायिकां नायकसखी वक्ति—

सत्यं मधुरो नियतं वक्रो नूनं कलाधरो दयितः।
स तु वेद न द्वितीयामकलङ्कः प्रतिपदिन्दुरिव ॥ ६८१ ॥

सत्यमिति। सः। इदमग्रेऽप्यन्वेति। मधुरः सुन्दरो मृष्टभाषी वा। इदं सत्यम्। नात्र संदेह इति भावः। एवमग्रेऽपि। एवं च स्पृहणीयत्वमावेद्यते। वक्रो नियतं वक्रोक्तिनिपुणः कुटिलो वा। एवं च पराङ्गनारञ्जकत्वं ध्वन्यते। कलाधरः। नूनं निश्चितम्। एवं च पराङ्गनाचित्ताकर्षणनिपुणत्वं व्यज्यते। दयितः। तु पुनः। कलङ्कोऽपवादस्तच्छून्यः प्रतिपच्चन्द्र इव द्वितीयामपरां न वेद। एवं च मधुरत्वादिगुणसत्त्वेऽपि न तादृगन्यः साधुरिति व्यज्यते। प्रतिपच्चन्द्रोऽपि मधुरो वक्रः कलावानपि निष्कलङ्को द्वितीयाभिधां तिथिं न जानाति। सत्यं नियतं नूनमेभिः पदैर्मधुरात्वादौ न संदेह इति प्रतिपादनेन तद्वत्त्वेऽपि तत्कार्यीभाववत्त्वेनातिसद्वृत्तत्वं व्यज्यते। न च तस्मिन्यथाकथंचिदन्यादृगाचरणसंभावनया कोपकरणं तवोचितमिति प्रतियोगिविशेषानुपादानेन मधुरत्वादौ सर्वप्रतियोगिकत्वेन सर्वाधिक्यमावेद्यते। यद्वा सौन्दर्यादिगुणयुक्तस्त्वद्दयितः कथं नापराङ्गनालम्पट इति वादिनीं सखीं नायिका वक्ति—एवं चैतादृशनायकवत्तया स्वस्मिन्नाधिक्यमावेद्यते ॥

दुर्जनस्य स्वीयपक्षरक्षणमपीति कश्चित्कंचिद्वक्ति—

स्वस्थानादपि विचलति मज्जति जलधौ च नीचमपि भजते।
निजपक्षरक्षणमनाः सुजनो मैनाकशैल इव ॥ ६८२ ॥

स्वेति। स्वाङ्गीकृतरक्षणचित्तः सुजनो मैनाकाभिधपर्वत इव स्वस्थानादपि विचलति। अपिश्चलनानर्हत्वमावेदयति। परसदनं गच्छतीत्यर्थः। डलयोरैक्याज्जडा मूर्खा धीयन्ते यस्मिन्निति जडसमूहस्तत्रापि मज्जति। तद्रूपभाग्भवतीत्यर्थः। यद्वा समुद्रपर्यन्तमपि गच्छतीत्यर्थः। एवं च क्लेशागणनमावेद्यते। क्षुद्रमपि भजत आराधयति। एवं च सुजनो यदङ्गीकारं करोति तन्निर्वाहं स्वस्यानुचितैरपि नानाविधोपायैः करोति न दुष्टवृत्ति सुजनसंनिधिरेवोचित इति ध्वन्यते। पक्षच्छेदनप्रवृत्तेन्द्रभयान्मैनाकोऽपि पृथिवीं विहाय समुद्रे गत्वा तन्नीचदेशमप्यवलम्ब्य स्थित इति पुराणप्रसिद्धिः ॥

मानवतीं नायिकां सखी वक्ति—

संवृणु बाष्पजलं सखि दृशमुपरज्याञ्जनेन वलयैनाम्।
दयितः पश्यतु पछवपङ्कजयोर्युगपदेव रुचम् ॥ ६८३ ॥

संवृणुवीति। हे सखि। एवं च हितकथनार्हत्वं ध्वन्यते। तेन च मदुक्तं कुर्वीति।

बाष्पोदकं संवृणु । कज्जलेनोपरज्यैनां दृशं वलय । उत्तरङ्गयेत्यर्थः । दयितः । एवं चावश्यसमाधेयत्वमावेद्यते । किसलयेन्दीवरयोरेककालमेव रुचं पश्यतु । एवं च रोदनादिना रक्ततामापन्नाया दृशः कज्जलदानेन श्यामतासंपादनेन व्यधिकरणत्वेन प्रसिद्धयोरपि पल्लवेन्दीवरयोरैकाधिकरण्यसंपादनेन सर्वाद्भुतवस्तुप्रदर्शनजनितानन्ददानेन नय स्वाधीनतामिति भावः । 'दृशम्' इति स्थाने 'भृशम्', 'पल्लव—' इति स्थाने 'पल्वल—' इति पाठे भृंशमधिरज्यैनां दृशमित्यध्याहार्यं वलयेति योजना । अञ्जनदानेन पङ्कवत्तासंपादनेन पङ्कजसत्त्वयोग्यता । एवं च सरसि पङ्केरुहवत्ता प्रसिद्धा । पल्वलेऽपि तद्भवनेन चमत्कारातिशयप्रदर्शनेन नायकचित्ताकर्षकत्वं तव सुलभमिति ध्वन्यते । 'एनम्' इति पाठे नेत्रमित्यध्याहारः । नायकं वलय विलोकयेति वा योज्यम् । मानश्चायमन्यथासिद्धकुतूहलाद्यपनेयः । 'पल्वलपङ्केरुहसङ्गसकलरुचम्' इत्यपि क्वचित्पाठः ॥

अत्यन्तं सा त्वद्विरहखिन्ना त्वदधीनैवेत्यवगत्यानुग्राह्या नायिकेति तत्सखी नायकं वक्ति—

सा पाण्डुदुर्बलाङ्गी नयसि त्वं यत्र याति तत्रैव ।
कठिनीव कैतवविदो हस्तग्रहमात्रसाध्या ते ॥ ६८४ ॥

सेति । एषा पाण्डूनि दुर्बलान्यङ्गानि यस्या एतादृशी । त्वद्विरहवशादिति भावः । त्वं यत्र नयसि तत्रैव याति । यास्यतीत्यर्थः । एवं चान्यविषयकप्रेमशून्यत्वमावेद्यते । कठिनीव कैतवविदः । एवं त्वदीय एवापराधो न तस्या इति भावः । यद्वा येन व्याजेन तत्र गत्वा तत्संमानं विधेयं तत्सर्वं त्वया विज्ञायते किं मयोपदेष्टव्यमिति भावः । ते हस्तग्रहमात्रसाध्या । एवं च चाटुवचनादिकं किमपि नापेक्षितमिति भावः । खटिकापि पाण्डुरवर्णा सूक्ष्मा लेखककरग्रहाधीना यत्र यत्र नीयते तत्र तत्र गच्छति ॥

कस्यचिद्दूती कांचन वक्ति—

सखि विश्वगञ्जनीया लक्ष्मीरिव कमलमुखि कदर्यस्य ।
त्वं प्रवयसोऽस्य रक्षावीक्षणमात्रोपयोग्यासि ॥ ६८५ ॥

सखीति । हे सखि, कदर्यस्य कृपणस्य विश्वोपमर्द्या लक्ष्मीरिव । एवं च पुरुषोत्तमसंगतियोग्यत्वं व्यज्यते । कमलवदने, त्वं प्रकृष्टं वयो यस्येत्येवंविधस्यास्य रक्षणं रक्षा वीक्षणं च तन्मात्रे उपयोगो यस्याः । कृपणलक्ष्मीरपि भोगाद्यभावात्तथाविधेति भावः । एतादृश्यसि । एवं चात्यन्तसौन्दर्यशालिनी त्वमेतस्य सुरताक्षमस्य जरठस्य नोपयोगिनी, अतः पुरुषविशेषे मनः कुर्विति व्यज्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता सकारव्रज्या ।

हकारव्रज्या ।

नायकः सखायं वक्ति—

हृदयज्ञया गवाक्षे विसदृक्षं किमपि कूजितं सख्या ।
यत्कलहभिन्नतल्पा भयकपटादेति मां सुतनुः ॥ ६८६ ॥

हृदयेति। कलहभिन्नशय्या सुतनुर्भयव्याजादथा मां प्रत्येति तथा हृदयज्ञया नायिकाभिप्रायज्ञानवत्या सख्या गवाक्षे किमपि वक्तुमशक्यं विसदृशं कूजितम्। विसदृक्षमित्यनेन भययोग्यत्वम्। एवं च कलहोत्तरसंजातसंतापं नायिकाया विज्ञाय तथाविधविलक्षणकूजिते सख्या कृते भयव्याजेन मन्निकटे नायिकागतेति नायिकाकलहो नातिचिरावस्थायीति व्यज्यते॥

सखी नायिकां वक्ति—

हरति हृदयं शलाकानिहितोऽञ्जनतन्तुरेष सखि मुग्धे।
लोचनबाणमुचान्तर्भ्रूधनुषा किण इवोल्लिखितः॥ ६८७॥

हरतीति। हे सखि मुग्धे सुन्दरि, शलाकया निहित एष कज्जलतन्तुः। तन्तुपदेन रेखायां तनीयस्त्वं व्यज्यते। लोचनरूपो यः शरस्तन्मोचनकर्त्री भ्रूधनुषोल्लिखितः किण इव हृदयम्। अर्थान्नायकस्य। हरति। एवं चैतादृशत्वदीयदृगनुगृहीता निगृहीत इव संवृत्तः, अतएनमनुकम्पया द्रुतमनुगृह्णाणेति व्यज्यते। अथवा मुग्धे सुन्दरे। नायक इत्यर्थः। 'मुग्धः सुन्दरमूढयोः' इति। लोचनबाणं मुञ्चेति योजना प्राग्वत्॥

क्रोधवशादपमानितं नायकं नायिका समाधत्ते—

हससि चरणप्रहारे तल्पादपसारितो भुवि स्वपिषि।
नासदृशेऽपि कृते प्रिय मम हृदयात्त्वं विनिःसरसि॥ ६८८॥

हससीति। चरणताडने हास्यं करोषि। शयनीयादूरीकृतो भूमौ स्वापं करोषि। असदृशेऽयोग्ये कृतेऽपि हे प्रिय, मम हृदयात्त्वं न विनिःसरसि। एवं च चरणप्रहारादिरूपानुचितावमानने क्रोधात्कृतेऽपि चेतसा त्वद्विषयकानुरागभागिन्येवाहमिति चरणताडनादिजन्यमदीयापराधमनादृत्यानुग्रहं कुर्विति व्यज्यते। यद्वा सपत्नीसांनिध्यरूपानुचिते विहितेऽपि। त्वयेति भावः। मम हृदयात्त्वं नापगच्छसि। अत्र हेतुमाह—चरणप्रहारे हससीत्यादि। एवं च त्वदीयैतादृशसहनशीलस्वरूपगुणाकृष्टचित्ततया त्वदीयैतादृशानुचिताचरणजनितक्रोधेन न मय्यवस्थितिर्लभ्यत इति व्यज्यते। तेन चाहमधुना त्वयि प्रसन्नेति॥

नायके नायिकासक्तिविशेषं सखी वक्ति—

हसति सपत्नी श्वश्रूं रोदिति वदनं च पिदधते सख्यः।
स्वप्नायितेन तस्यां सुभग त्वन्नाम जल्पन्त्याम्॥ ६८९॥

हसतीति। हे सुभग, तस्यां नायिकायां स्वप्नायितेनोत्स्वापेन त्वन्नाम जल्पन्त्यां सत्यां सपत्नी हसति। एतस्या असतीत्वज्ञानोत्तरं प्रियाप्रियत्वं भविष्यतीति सुखाविर्भावादिति भावः। श्वश्रूं रोदिति। इदं चेदन्यैः श्रुतं तदानर्थ एवापद्येत। अथवेयमेतादृशी संवृत्ता, कथमतः परं पुनस्तनयविवाहसंपादनमिति दुःखोद्रेकादिति भावः। सख्यश्च वदनम्। नायिकाया इति भावः। पिदधते। एवं च कर्णानामस्फुटत्वसंपादनेन पुनर्नामग्रहेऽपि

सम्यग्ज्ञानमन्येषां मा भवत्विति धियेति भावः । एवं चैतस्यास्तत्रैतादृशी गतिरिति त्वमेवाधुना शरणमित्यवगत्यानुरक्तां तामनुगृह्णातेति व्यज्यते ॥

नायकः सखायं वक्ति—

हृदयं मम प्रतिक्षणविहितावृत्तिः सखे प्रियाशोकः ।
प्रबलो विदारयिष्यति जलकलशं नीरलेखेव ॥ ६९० ॥

हृदयमिति । हे सखे, प्रबलः प्रतिक्षणं विहितावृत्तिर्येनैतादृशः प्रियासंबन्धी शोकस्तरङ्गपङ्क्तिर्जलसंबन्धिघटमिव मम हृदयं विदारयिष्यति । एवं च मयि प्रस्थितुं कृतोद्योगे संजातप्रियादुःखं प्रबलत्वाद्वारं वारं जायमानत्वान्मम हृदयं दुःखोद्रेकवशाद्भिन्नं करिष्यतीत्यर्थः । प्रियादुःखादप्यत्यन्तं मम दुःखं भावीति भावः । यद्वा वारं वारं जायमानः प्रबलः । एवं च प्रतीकारानर्हत्वमावेद्यते प्रियायाः । एवं चावश्यभवनयोग्यत्वं शोके द्योत्यते । विरहजः शोको मम हृदयं स्फोटयिष्यति । एवं च प्रियाविरहजन्यदुःखं मया सोढुमशक्यमिति न मया प्रस्थितिर्विधेयेति व्यज्यते । यद्वाननुभूतप्रियाविरहः कश्चित्सखायं पृच्छति—प्रियासंबन्धिशोको मम हृदयं विदारयिष्यतीति । एवं च प्रियासंबन्धित्वेन शोकस्य प्रियाहृदयविदारकत्वमुचितं नान्यहृदयविदारकत्वमिति व्यज्यते । मम हृदयमित्यनेन हृदयविदारणेऽसह्यत्वं तन्निवारणोपायसंपादने चावश्यकर्तव्यत्वं ध्वन्यते । तरङ्गपङ्क्तिरपि प्रतिक्षणकृतावृत्तिः प्रबला जलार्थं प्रक्षिप्तं कलशं स्फोटयति ॥

नायिका सखीं वक्ति—

हन्त विरहः समन्ताज्ज्वलयति दुर्वारतीव्रसंवेगः ।
अरुणस्तपनशिलामिव पुनर्न मां भस्मतां नयति ॥ ६९१ ॥

हन्तेति । दुःखेन निवारयितुमशक्यस्तीव्रो दुःसहः संवेग आधिक्यं यस्य स विरहः समन्ताद् । सर्वाङ्गमित्यर्थः । सर्वत्रेति वा । क्वापि विश्रान्तिस्थानं नास्तीति भावः । मां ज्वलयति । हन्त खेदे । अरुणस्तपनशिलामिव पुनर्न भस्मतां प्रापयति । एवं विरहे सति जीवनान्मरणमेव वरमिति व्यज्यते ॥

कश्चित्कांचिदन्योक्त्या वक्ति—

हृत्वा तटिनि तरङ्गैर्भ्रामितश्चक्रेषु नाशये निहितः ।
फलदलवल्कलरहितस्त्वयान्तरिक्षे तरुस्त्यक्तः ॥ ६९२ ॥

हृत्वेति । हे तटिनि । एवं च निष्कामगमनयोग्यत्वं ध्वन्यते । तरङ्गैर्हृत्वा चक्रेष्वम्भसां भ्रमेषु भ्रमिं प्रापितः । आशये मध्ये न स्थापितः । फलदलवल्कलैर्हीनस्तरुस्त्वयान्तरिक्षे त्यक्तः । एवं च तरङ्गरूपकटाक्षैरेनं स्वाधीनीकृत्येतस्ततो भ्रामयित्वा स्वान्तःकरणेऽकृत्वा द्रव्यादिहीनत्वमासादयित्वाकस्मात्परित्यक्तोऽयं नायकः, इदमनुचितं तवेति ध्वन्यते ॥

सखी नायिकां वक्ति—

हृतकाञ्चिवल्लिबन्धोत्तरजघनादपरभोगभुक्तायाः ।
उच्छ्वसति रोमराजिः स्तनशंभोर्गरललेखेव ॥ ६९३ ॥

हृतेति । न विद्यते परो यस्मात् । अत्युत्कट इत्यर्थः । यो भोगः सुरतं तत्रोपभुक्तायास्तव हृतकाञ्चिवल्लिबन्धनोत्तर उच्छ्वनो यो जघनस्तद्धेतोः स्तनशंकरस्य विषलेखेव रोमावलिरुल्लसति । एवं च काञ्चिबन्धत्रुटनोद्भूरजघनकथनेन रतातिशयवत्त्वमावेद्यते ॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनया समेता हकारव्रज्या ।

क्षकारव्रज्या ।

कथं त्वयि प्रीतिमकुर्वाणेऽपि नायके त्वं विनीतेति वादिनीं सखीं नायिका वक्ति—

क्षीरस्य तु दयितत्वं यतोऽपि शान्तोपचारमासाद्य ।
शैलोऽङ्गान्यानमयति प्रेम्णः शेषो ज्वरस्येव ॥ ६९४ ॥

क्षीरस्येति । क्षीरस्यापि दयितत्वं प्रीतिविषयत्वं यतः । यस्मादित्यर्थः । शान्तोपचारं समाप्तोपचारम् । अरोगिणमित्यर्थः । आसाद्य । एवं च क्षीरस्य क्षीरत्वेन सर्वैस्पृहणीययोग्यत्वेऽपि रोगग्रस्तं प्रति न स्पृहणीयत्वमेवमन्याङ्गनानुरागरूपरोगग्रस्तं प्रति नाहं स्पृहणीयेत भावः । एवं च न तस्यापराधो न वा मम काचित्क्षंतिरिति व्यज्यते । तेन च कंचित्कालोत्तरमहं तत्स्पृहणीया भविष्यामीति । तु पुनः । शीलस्यायं शैलसंबन्धीत्यर्थः । पक्षे शिलानामयं शैलः । अत्यन्तगुरुतापादक इति भावः । ज्वरस्येव प्रीतेः शेषोऽङ्गानि । ममेति भावः । आनमयति । एवं च यथा पर्वततुल्यो ज्वरशेषोऽङ्गानि बलादानमयति तथा शीलसंबन्धी प्रीतेः शेषो मां विनीततां प्रापयतीति भावः । एवं च यद्यपि तथाविधप्रीतेरभावादहमविनीतता कर्तुमिच्छामि तथापि शीलप्रीतिशेषो मां बलाद्विनीततां नयतीति व्यज्यते । तेन च न ममापराध इति । यद्वा नायिकासखी नायकं वक्ति—हे शान्त । एवं चापराधजनकत्वाभावो व्यज्यते । यतः क्षीरस्याप्युपचारम् । आवर्तितत्वशर्करादिसंपर्कादिकमित्यर्थः । आसाद्य दयितत्वं प्रीतिविषयत्वं भवति । एवं च स्वतः क्षीरस्य माधुर्यवत्त्वेऽप्यावर्तनशर्करादिसंपर्कवशात्प्रीतिविषयत्वं यथा तथा परांगनालम्पटत्वादिराहित्येन त्वयि प्रीतिविषयत्वेऽपि वारंवारागमनचाटुवचनरचनादिमत्तया प्रीतिविषयत्वं भावीति व्यज्यते । एवं चाहमपराधाभाववानिति तूष्णीमेवावस्थितिरनुचिततरेति व्यज्यते । तु पुनः प्रेम्णः शैलः पर्वतो ज्वरस्य शेष इवाङ्गान्यानमयति । एवं च यथा बलाज्ज्वरशेषोऽङ्गनमनाभावमिच्छोरप्यङ्गनमनं करोत्येव तथा यदि त्वं तद्विषयकबहुतरप्रेमवानसि तर्हि तदेव त्वां बलात्प्रणामादिशालिनं करिष्यतीति भावः । एवं च नाहमपराधीति किमिति प्रणामादिकं न करिष्यामीति वक्तुं नोचितं तवेति ध्वन्यत इत्यर्थः । कुपितनायिकां समाधातुमशक्ता दूती नायकं वक्ति । योजना प्राग्वत् ।

एवं च तस्यां तीव्रः कोपो न वा शीलप्रेमशेषः। अतस्तस्यास्त्वं न दयित इति भाव इति प्रतिभाति। परं तु मानस्यासाध्यत्वप्रदर्शनेनाभासत्वमायाति॥

नायिका नायकं वक्ति—

क्षान्तमपसारितो यच्चरणावुपधाय सुप्त एवासि।
उद्घाटयसि किमूरू निःश्वासैः पुलकयन्नुष्णैः॥ ६९५॥

क्षान्तमिति। अत्र संबुद्धिपदानपानं क्रोधमावेदयति। अपसारितो दूरीकृतश्चरणावुपधानीकृत्य सुप्त एवासि तत्क्षान्तम्। उष्णैः। संतापजत्वादिति भावः। निःश्वासैः पुलकयन्नूरू किमुद्घाटयसि। इयमेव हि त्वां प्रति मदीया क्षमा यच्चरणसविधे सुप्त इतो न निराकृतोऽसि। त्वं पुनर्धृष्ट ऊरुविघटनं करोषि महत्साहसं तवेति ध्वन्यते। तेन चैतन्नं मया सोढव्यमिति। यद्वा यदपसारितश्चरणावुपधाय सुप्त एवास्यतः क्षान्तं त्वदीयानुचितमिति भावः। क्षमाफलमेवाह—उष्णैः श्वसितैः पुलकयन्नूरू किमित्युद्घाटयसि। एवं च त्वदोयसहनशीलतया मया त्वदीयापराधजदुःखं त्यक्तम्। अतो दुःखजन्योश्वासान्परित्यज्याचिरमालिङ्गनचुम्बनादि विधेहीति ध्वन्यते। एवं च पुलकयन्निति सार्थकम्॥

कश्चित्कंचिद्वक्ति—

क्षुद्रोद्भवस्य कटुतां प्रकटयतो यच्छतश्च मदमुच्चैः।
मधुनो लघुपुरुषस्य च गरिमा लघिमा च भेदाय॥ ६९६॥

क्षुद्रेति। क्षुद्रा मधुमक्षिका। अथ च क्षुद्रो नीचः। तदुत्पन्नस्य। कटुतां रूक्षताम्। अथ च कटुभाषिताम्। प्रकटयतः। उच्चैरुत्कटं मदमुन्मादम्। अथ च गर्वम्। यच्छतः कुर्वतः। मधुनो माक्षिकस्याधमपुरुषस्य च गौरवं गुरुत्वं लाघवं तुच्छत्वं च भेदाय। यद्वा मधु मद्यम्, क्षुद्रा कण्टकारिकेत्यर्थः। एवं चाधमसंगतिर्न विधेयेति॥

इत्यनन्तपण्डितकृतगोवर्धनसप्तशतीव्याख्यार्थदीपनया समेता क्षकारव्रज्या।

स्वकृतौ गुणाढ्यादिमहाकविकृतिसमतां वक्ति—

पूर्वैर्विभिन्नवृत्तां गुणाढ्यभवभूतिबाणरघुकारैः।
वाग्देवीं भजतो मम सन्तः पश्यन्तु को दोषः॥ ६९७॥

पूर्वैरिति। गुणाढ्यभवभूतिबाणकालिदासैः पूर्वैः प्राक्तनैर्विभिन्नवृत्तामपि लक्षणसरणिशालिनीं (लक्षणया स्वैरिणीं) वाग्देवीं भजतो मम को दोषः। न कोऽपीत्यर्थः। इदं सन्तः पश्यन्तु। एवं च वाग्देव्या एकत्वेऽपि वैलक्षण्येन पूर्वैः सेवितत्वान्मयापि वैलक्षण्येन सा सेवितेति न मद्दोषगणनं सतामुचितमिति भावः। सन्त इत्यनेन नासतां प्रार्थना। अथ च पूर्वैर्गुणाढ्यादिभिर्विभिन्नशीलां वाग्रूपां देवीं राज्ञीं भजतो मम को दोषः। इदं सन्तः पश्यन्तु। एवं च 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति वचना-

द्वाग्देवीभजनं न मम दोषावहमिति भावः। एवं च स्वस्मिन्वाक्पतित्वमावेद्यते। एवं च कारपदोपादानान्नाश्लीलता ॥

स्वग्रन्थस्य समीचीनत्वात्सर्वहर्षजनकत्वमिति वक्ति—

सत्पात्रोपनयोचितसत्प्रतिबिम्बाभिनववस्तु[1]।
कस्य न जनयति हर्षं सत्काव्यं मधुरवचनं च ॥ ६९८ ॥

सत्पात्रेति। नवमभिनवं वस्तु सत्काव्यं मधुरवचनं च कस्य न हर्षं जनयति। अपि तु सर्वस्येति भावः। सत्पात्रेत्यादिविशेषणत्रितयस्यार्थः क्रमेण। समीचीनं यत्पात्रं संपुटादि तत्रोपनयाय स्थापनायोचितम्। अत्यन्तसंरक्षणीयमिति धियेति भावः। एवं च बहुमूल्यत्वमावेद्यते। सन्समीचीनः। परीक्षक इत्यर्थः। तस्य प्रतिबिम्बो याथातथ्यस्वरूपपरिचयो यस्य। क्षुद्रपरीक्षकस्य तद्गुणयथार्थज्ञानं न भवतीति भावः। एतादृशमभिन्नं सर्वदैकरूपम्। एवं च बहुकालसत्त्वेऽपि दोषासंस्पर्शितया मुक्ताफलादिव्यतिरेको ध्वन्यते। तेन चावश्यस्पृहणीयत्वम्। सत्पात्रे सहृदये पुंसि य उपनयः प्रापणं तत्रोचितम्। एवं च सहृदयस्यैव सत्काव्यश्रवणेऽधिकार इति भावः। सत्पात्रेण सहृदयेन च य उपनयः पठनादिस्तत्रोचितम्। एवं च सत्काव्यपाठेऽपि सहृदयस्यैवाधिकार इति ध्वन्यते। सत्स्वनादिकाव्यवासनाव्युत्पत्तिशालिहृदयेषु प्रतिबिम्बः सम्यग्बोधो यस्य। एवं च सत्काव्यार्थबोधोऽपि सहृदयस्यैवेति भावः। अभिन्नं सर्वसहृदयान्प्रत्येकरूपम्। सत्पात्राय समीचीनायोपसंमीपे नयेन विनयेनोचितम्। 'तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥' इति स्मरणात्सत्पात्रं प्रत्येतावतोऽपि स्वधर्मसंरक्षणकारित्वादिति भावः। समीचीनः प्रतिबिम्बो यस्यैतादृशो यश्चन्द्रस्ततोऽभिन्नम्। तद्रूपमित्यर्थः। एवं च मधुरवचने सुधारूपत्वप्रतिपादनान्निखिलतापापनोदकत्वं बहुतरपुण्यकलभ्यत्वं विरलत्वं च ध्वन्यते। अथवा मधुरवचनवतो देवरूपत्वं व्यज्यते। यद्वा मधुदैत्यं रात्यङ्गीकरोति। वधबलेन मुक्तिदत्वादिति भावः। तद्विषयकं यद्वचनं तदित्यर्थः। कथंभूतम्। सत्पात्रे शमादिसंपत्तिशालिनि य उपनय उपदेशस्तत्रोचितम्। सतः सत्स्वरूपस्य ब्रह्मणः प्रतिबिम्बनं प्रतिबिम्बो विज्ञानं यस्मादेतादृशं तत्। अभिन्नमेकम्। यद्यपि भगवत्प्रतिपादका बहवो वेदान्तभागास्तथापि 'सर्वेषां वेदान्तवाक्यानां ब्रह्मणि समन्वयः' इत्युक्तत्वादेकार्थत्वादेकत्वोक्तिः। अथवा सतः समीचीनाचरणस्य

---

१. बहुषु मूलपुस्तकेष्वयं समीचीनः पाठो वर्तते. टीकानुकूलपाठस्त्वयम्—'सत्पात्रोपनयोचितं सत्प्रतिबिम्बमभिन्नं नवं वस्तु.' अस्मिन्पाठे स्फुट एव च्छन्दोभङ्गः. इमामार्यामग्रिमां च भङ्गां निपीयानन्तपण्डितो व्याख्यातवानिति भाति. एवमेव आकारत्रज्यायाम् 'आरोपिता शिलायाम्—' (८१) इत्याद्यार्या टीकानुरोधेन च्छन्दोभङ्गदूषितैव मुद्रिता. मूलपुस्तकेषु तु 'आरोपिता शिलायामश्मेव त्वं स्थिरेति मन्त्रेण' इति साधीयान्पाठो दृश्यते.

पात्रम्। गुरुरित्यर्थः। तस्य समीपे नयनं नयः प्रापणम्। स्वस्येति भावः। 'समित्पाणिराचार्य श्रोत्रियमुपगच्छेत्' इत्यनेन गुरूपसत्तेर्विहितत्वादिति भावः। तेनोचितो योग्यः। प्राप्य इत्यर्थः। सत्प्रतिबिम्बनं सत्प्रतिबिम्बः समीचीनज्ञानं यस्यैतादृशम्। अभिन्नमखण्डितम्। केनापि नावगणितमिति भावः। यद्वा मधुनामकदैत्याङ्गीकारकर्तुः परमेश्वरस्य वचनं वेदान्तभाग इति भावः। एवं च सत्काव्ये भगवद्वाक्यतुल्यताप्रतिपादनेनावश्यपरिशीलनीयत्वं ध्वन्यते। अनर्घमणितुल्यताप्रतिपादनेन चार्थप्राप्तिजनकत्वं काव्ये व्यज्यते। एवं च पुरुषार्थसाधनीभूततया काव्येऽवश्यविधेयत्वं ध्वन्यते॥

एका ध्वनिद्वितीया त्रिभुवनसारा स्फुटोक्तिचातुर्या।
पञ्चेषुषट्पदहिता भूषा श्रवणस्य सप्तशती॥ ६९९॥

एकेति। एका मुख्या। ध्वननं ध्वनिः। व्यञ्जनेति यावत्। सैव द्वितीया सहायभूता यस्याः। एवं चोत्तमकाव्यमयीत्वं सप्तशत्यां ध्वन्यते। त्रिभुवनसाररूपा। यद्वा त्रिभुवने सारं रसस्तद्वतीत्यर्थः। अथवा त्रिभुवनं सारं यया। एवं च त्रिभुवनेऽप्येतदसत्त्वे निःसारतैवासीत्, इदानीमनया सारवत्ता जातेति भावः। स्फुटमुक्तिचातुर्यं यस्याम्। यद्वा स्फुटं व्यक्तमुक्तिचातुर्यं यया। पञ्चेषुर्मदनस्तद्रूपो यः षट्पदस्तस्य हिता। स्वकर्तव्यतासहायतयेति भावः। श्रवणस्य श्रोत्रस्य। सतामिति भावः। भूषा भूषणरूपा। सप्तशती। सप्तशतीनामकोऽयं ग्रन्थ आस्ताम्। एवं च सद्भिरियं सप्तशती श्रोतव्येति प्रार्थना व्यज्यते। पञ्चेषुषट्पदहिता श्रवणस्य भूषेत्यनेन सप्तशत्यां मञ्जरीत्वं व्यज्यते। यद्वा सप्तशत्यां नायिकात्वारोपणेनावश्यस्पृहणीयत्वं व्यनक्ति। सप्तशती। सतां ह्यास्तामित्यध्याहारेण योजना। ए हर्म्योदरे। एकारस्य हर्म्योदरवाचकत्वमेकाक्षरनिघण्टेऽवसेयम्। अव्ययत्वाच्चास्य सर्वलिङ्गसर्वविभक्तितुल्यत्वम्। कस्य सुखस्याध्वनि मार्गे द्वितीया। नानया विना गृहान्तर्वर्तिसुखमार्ग इति भावः। एवं च गार्हस्थ्यसुखेच्छावतेयमवश्यं सेवनीयेति व्यज्यते। त्रिभुवने सारभूता। बहुविधव्ययायाससाध्ययागादिजन्यस्वर्गादावपि नायिकैव भोगेषु मुख्येति भावः। यद्वात्रेः सकाशाद्भवतीत्यत्रिभु चान्द्रं ज्योतिस्तस्य वनं समूहस्तस्य साररूपा। एवं चेयं चन्द्रसारैर्निर्मितेति भावः। एवं चान्योपायासाध्यतापोपशामकत्वमावेद्यते। यद्वा त्रिभुवनं सारं यया। एवं च नायिकासांनिध्ये सारासाररूपस्यापि त्रिभुवनस्य साररूपतैव भवतीति व्यज्यते। स्फुटमुक्तिचातुर्यं यस्याः। स्फुटमित्यनेन निःसंदिग्धत्वं ध्वन्यते। यद्वा स्फुटा सप्रसादोक्तिर्यस्य। प्रसन्नार्थकोक्तिशालिनि नायके चातुर्यं यस्याः। एवं चानभिज्ञनायकं प्रति यदि न कामिनी चमत्कारकारिणी तदा न काचित्क्षतिरिति भावः। यद्वास्फुटोक्तौ वक्रोक्तौ चातुर्यं यस्याः। पञ्चेषोर्मदनस्य षड्भिः संधिविग्रहयानासनद्वैधीभावाश्रयरूपोपायैः पदाय वृद्धिरूपाय हिता। कामोऽप्येनामेवासाद्य संध्याद्युपायैर्जगज्जयवत्तया वृद्धिभाग्भवतीति भावः। एवं च मदनस्य सर्वस्वभूतेयमिति व्यज्यते। पञ्चेषुपदेन स्वल्पसामग्रीवतोऽपि महत्तरकार्यनिर्वाहकतयातिमन्त्रिनिपुणत्वमावेद्यते। अथवा पञ्चेषोः षट्पदरूपा। ज्यारूपेत्यर्थः। अत एव च हिता।